चित्त सारथी को जब यह परिज्ञात हुआ कि केशी कुमारश्रमण पधारे हैं तो वह दर्शन और प्रवचन-श्रवण करने के लिए पहुँचा। प्रवचन को श्रवण कर वह इतना भावविभोर हो गया कि उसने श्रमणोपासक के द्वादश व्रत ग्रहण कर अपनी अनन्त श्रद्धा उनके चरणों में समर्पित की। जब चित्त सारथी श्वेताम्बिका लौटने लगा तो उसने केशी कुमारश्रमण से अभ्यर्थना की - आप श्वेताम्बिका अवश्य पधारें। पुनः-पुनः निवेदन करने पर केशीश्रमण ने कहा कि वहाँ का राजा प्रदेशी अधार्मिक है, इसलिए मैं वहाँ कैसे आ सकता हूँ ?

चित्त ने निवेदन किया - भगवन्! प्रदेशी के अतिरिक्त वहाँ पर अनेक भावुक, आत्माएँ रहती हैं, जो अपने बीच आपको पाकर धन्यता अनुभव करेंगी। सम्भव है, आपके पावन प्रवचनों से प्रदेशी के जीवन का भी काया-कल्प हो जाये। केशी कुमारश्रमण को लगा कि चित्त सारथी के तर्क में वजन है। वहाँ जाने से धर्म की प्रभावना हो सकती है। चित्त सारथी ने केशीकुमार की मुद्रा से समझ लिया कि मेरी प्रार्थना अवश्य ही मूर्त्त रूप लेगी। उसने श्वेताम्बिका पहुँच कर सर्वप्रथम उद्यानपाल को सूचित किया कि केशीश्रमण अपने ५०० शिष्यों के साथ यहाँ पर पधारेंगे, अतः उनके ठहरने के लिए योग्य व्यवस्था का ध्यान रखना।

कुछ दिनों के पश्चात् केशीश्रमण श्वेताम्बिका नगरी में पधारे। उद्यानपालक ने उनके ठहरने की समुचित व्यवस्था की और चित्त सारथी को उनके आगमन की सूचना दी। चित्त सारथी समाचार पाकर प्रसन्नता से झूम उठा। वह दर्शन के लिए पहुँचा। उसने निवेदन किया-मैं किसी बहाने से राजा प्रदेशी को यहाँ लाऊँगा। आप डटकर उसका पथ-प्रदर्शन करना।

दूसरे दिन चित्त सारथी अभिनव शिक्षित घोडों की परीक्षा के बहाने राजा प्रदेशी को उद्यान में ले गया, जहाँ केशी कुमारश्रमण विराज रहे थे। चित्त सारथी ने राजा को बताया - ये चार ज्ञान के धारक कुमारश्रमण केशी हैं। हम यह पूर्व में ही बता चुके हैं कि राजा प्रदेशी अक्रियावादी था। उसे आत्मा के स्वतंत्र अस्तित्व पर विश्वास नहीं था। वह आत्मा और शरीर को एक ही मानता था।

भारतीय दर्शन का विकास और विस्तार आत्मतत्त्व को केन्द्र मानकर ही हुआ है । आत्मवादी दर्शन हो या अनात्मवादी, सभी ने आत्मा के विषय में चिन्तन किया है । किन्तु उस चिन्तन में एकरूपता नहीं है । आत्मा विश्व के समस्त पदार्थों से विलक्षण है । प्रत्येक व्यक्ति आत्मा का अनुभव तो करता है, किन्तु उसे अभिव्यक्त नहीं कर पाता । यही कारण है कि किसी ने आत्मा को शरीर माना, किसी ने बुद्धि कहा, किसी ने इन्द्रिय और मन को ही आत्मा समझा तो कितनों ने इन सबसे पृथक् आत्मा के स्वतंत्र अस्तित्व को स्वीकार किया । आत्मा के अस्तित्व की संसिद्धि स्वसंवेदन से होती है । इस संसार में जितने भी प्राणी हैं, वे अपने आपको सुखी-दुःखी, धनवान्-निर्धन अनुभव करते हैं । यह अनुभूति चेतन आत्मा को ही होती है, जड को नहीं । आत्मा अमूर्त है । किन्तु अनात्मवादियों की धारणा है कि घट-पट आदि पदार्थ जैसे प्रत्यक्ष दिखाई देते हैं, उसी तरह आत्मा प्रत्यक्ष दिखाई नहीं देता और जो प्रत्यक्ष से सिद्ध नहीं हैं, उसकी सिद्धि अनुमान प्रमाण से भी नहीं हो सकती, क्योंकि अनुमान का हेतु प्रत्यक्षगम्य होना चाहिए, जैसे अग्नि का अविनाभावी हेतु धूम प्रत्यक्षगम्य है । हम भोजनशाला में उसे प्रत्यक्ष देखते हैं, इसलिए दूसरे स्थान पर भी धुएँ को देखकर स्मरण के बल पर परोक्ष अग्नि को अनुमान से जान लेते है । किन्तु आत्मा का इस प्रकार का कोई अविनाभावी पदार्थ पहले नहीं देखा । इसीलिए आत्मा का अस्तित्व प्रत्यक्ष और अनुमान से सिद्ध नहीं है । प्रत्यक्ष से सिद्ध न होने के कारण चार्वाक दर्शन ने आत्मा को स्वतंत्र द्रव्य नहीं माना । भूतसमुदाय से विज्ञानघन उत्पन्न होता है और भूतों के नष्ट होने पर वह भी नष्ट हो जाता है । परलोक या पुनर्जन्म नहीं है ।

किसी-किसी का यह मन्तव्य था कि शरीर ही आत्मा है । शरीर से भिन्न कोई आत्मा नामक तत्त्व नहीं है । यदि शरीर से भिन्न आत्मा हो तो मृत्यु के पश्चात् स्वजन और परिजनों के स्नेह से पुनः लौटकर क्यों नहीं आता ? इसलिए इन्द्रियातीत कोई आत्मा नहीं है, शरीर ही आत्मा है ।

इसके उत्तर में आत्मवादियों का कथन है कि आत्मा है या नहीं, यह संशय जड को नहीं होता । यह चेतन तत्त्व को ही हो सकता है । यह मेरा शरीर हैं, इसमें जो 'मेरा' शब्द है वह सिद्ध करता है कि 'मैं' शरीर से पृथक् है । जो शरीर से पृथक् है, वह आत्मा है ।

जड पदार्थ में किसी का विधान या निषेध करने का सामर्थ्य नहीं होता । यदि जड शरीर से भिन्न चैतन्यमय आत्मा का अस्तित्व न हो तो आत्मा का निषेध कौन करता है ? स्पष्ट है कि आत्मा का निषेध करनेवाला स्वयं आत्मा ही है ।

आचार्य देवसेन ने आत्मा के ज्ञान, दर्शन, सुख, वीर्य, चेतनत्व, अमूर्त्तत्व ये छह गुण बताये हैं[१३०] । आचार्य नेमिचन्द्र ने जीव को उपयोगमय, अमूर्त्तिक, कर्त्ता, स्वदेहपरिमाण, भोक्ता,

१३०. आलापपद्धति, प्रथम गुच्छक, पृष्ठ-१६५-६६

ऊर्ध्वगमनशील कहा है[१३१] । जहाँ पर उपयोग है, वहाँ पर जीवत्व है । उपयोग के अभाव में जीवत्व रह नहीं सकता । उपयोग या ज्ञान जीव का ऐसा लक्षण है जो सांसारिक और मुक्त सभी में पाया जाता है ।

छान्दोग्योपनिषद् में एक सुन्दर प्रसंग है[१३२] - असुरों में से 'विरोचन' और देवों में से 'इन्द्र' ये दोनों आत्म-स्वरूप को जानने के लिए प्रजापति के पास पहुँचे । प्रजापति ने एक शान्त सरोवर में उन्हें देखने को कहा और पूछा - क्या देख रहे हो ? विरोचन और इन्द्र ने कहा - हम अपना प्रतिबिम्ब देख रहे हैं । प्रजापति ने बताया - बस वही आत्मा है । विरोचन को समाधान हो गया और वह चल दिया । पर इन्द्र चिन्तन के महासागर में गहराई से डुबकी लगाने लगे । इन्द्रिय और शरीर का संचालक मन है, अतः उन्होंने पहले मन को आत्मा माना, उसके बाद सोचा - मन भी जब तक प्राण हैं तभी तक कहता है । प्राण पंखेरू उडने पर मन का चिन्तन शब्द हो जाता है, अतः मन नहीं, प्राण आत्मा है । चिन्तन आगे बढा और उन्हें यह भी मालूम हुआ कि प्राण नाशवान् है, परन्तु आत्मा तो शाश्वत है । शरीर इन्द्रिय, मन और प्राण ये भौतिक हैं, किन्तु आत्मा अभौतिक है ।

चार्वाकदर्शन को छोडकर भारत के सभी दर्शन आत्मा के अस्तित्व में विश्वास करते हैं । न्याय और वैशेषिक दर्शन का मन्तव्य है - आत्मा अविनश्वर और नित्य है । इच्छा, द्वेष, प्रयत्न, सुख, दुःख और ज्ञान उसके विशेष गुण है । आत्मा ज्ञाता, कर्त्ता और भोक्ता है । ज्ञान, अनुभूति और संकल्प आत्मा के धर्म है । चैतन्य आत्मा का स्वरूप है । मीमांसा दर्शन का भी यही अभिमत है । वह आत्मा को नित्य और विभु मानता है । चैतन्य को आत्मा का निजगुण नहीं किन्तु आगन्तुक गुण मानता है । स्वप्नरहित गाढ निद्रा में तथा मोक्ष की अवस्था में आत्मा चैतन्य गुणों से रहित होता है । सांख्य दर्शन ने पुरुष को नित्य, विभु तथा चैतन्य स्वरूप माना है । सांख्य दृष्टि से चैतन्य आत्मा का आगन्तुक गुण नहीं है, वह निजगुण है । पुरुष अकर्ता है । वह स्वयं सुख-दुःख की अनुभूतियों से रहित है । बुद्धि कर्ता है और वही सुख-दुःख का अनुभव करती है । बुद्धि का उपादान कारण प्रकृति है । प्रकृति प्रतिपल-प्रतिक्षण क्रियाशील है । इसके विपरीत पुरुष विशुद्ध चैतन्य स्वरूप है । अद्वैत वेदान्त आत्मा को विशुद्ध सत्, चित् और आनन्द स्वरूप मानता है । सांख्य दर्शन ने अनेक पुरुषों (आत्माओं)को माना है,पर ईश्वर को नहीं माना । जबकि वेदान्त दर्शन केवल एक ही आत्मा को सत्य मानता है । बौद्ध दर्शन की दृष्टि से आत्मा ज्ञान, अनुभूति और संकल्पों की प्रतिक्षण परिवर्तन होनेवाली सन्तति है । इसके विपरीत जैन दर्शन का वज्र आघोष है - आत्मा नित्य, अजर और अमर है । ज्ञान आत्मा का मुख्य गुण है । आत्मा स्वभाव से अनन्त ज्ञान, अनन्त दर्शन, अनन्त सुख और अनन्त शक्ति से सम्पन्न है ।

---

१३१. द्रव्यसंग्रह-१।२

१३२. छान्दोग्योपनिषद-८-८

राजा प्रदेशी जीव और शरीर को एक मानता था । उसकी मान्यता के पीछे अपना अनुभव था । उसने अनेकों बार परीक्षण कर देखा - तस्करों और अपराधियों को सन्दूक में बन्द कर या उनके शरीर के टुकडे-टुकडे कर जीव को देखने का प्रयत्न किया कि कहीं आत्मा का दर्शन हो, पर आत्मा अरूपी होने के कारण उसे दिखाई कैसे दे सकता था ? जब आत्मा दिखाई नहीं दिया तो उसे अपना मत सही ज्ञात हुआ कि जीव और शरीर अभिन्न हैं । किन्तु उसके सभी तर्कों का केशी कुमारश्रमण ने इस प्रकार रूपको के माध्यम से निरसन किया कि राजा प्रदेशी को आत्मा और शरीर पृथक्-पृथक् स्वीकार करने पडे ।

स्वर्ग और नरक से जीव क्यों नहीं आकर कहते हैं कि हमने प्रबल पुण्य की आराधना की जिसके फलस्वरूप मैं देव बना हूँ, मैंने पापकृत्य किया जिसके कारण मैं नरक के दारुण वेदनाओं को भोग रहा हूँ, इसलिए मैं तुम्हें कहता हूँ कि तुम पाप से बचो और पुण्य उपार्जन की ओर लगो । यदि स्वर्ग और नरक होता तो मेरे पिता, प्रपितामह वहाँ गये होंगे, वे अवश्य ही आकर मुझे चेतावनी देते । प्रत्युत्तर में केशी श्रमण ने कहा - एक कामुक व्यक्ति हो, जिसने तुम्हारी पत्नी के साथ दुराचार किया हो, और तुमने उसे प्राणदण्ड की सजा दी हो, वह अपने पारिवारिक जनों को सूचना देने के लिए जाना चाहे तो क्या तुम उसे मुक्त करोगे ? नहीं, वैसे ही नरक से जीव मुक्त नहीं हो पाते, जो आकर तुम्हें सूचना दें और स्वर्ग के जीव इसलिए नहीं आते कि यहाँ पर गन्दगी है । कल्पना करो अपने शरीर को स्वच्छ बनाकर और सुगन्धित द्रव्यों को लेकर तुम देवालय की और जा रहे हो, उस समय शौचालय में बैठा हुआ कोई व्यक्ति तुम्हें वहाँ बुलाए तो क्या तुम उस गन्दे स्थान में जाना पसन्द करोगे ? नहीं । वैसे ही देव भी यहाँ आना पसन्द नहीं करते हैं ।

राजा प्रदेशी और केशी का यह संवाद अत्यन्त महत्त्वपूर्ण है । केशी श्रमण की युक्तियाँ इतनी गजब की हैं कि आज भी पाठकों के लिए प्रेरणादायी ही नहीं अपितु आत्म-स्वरूप को समझने के लिए सर्चलाइट की तरह उपयोगी है । वास्तविक रूप से देखा जाय तो यही संवाद राजप्रश्नीय की आत्मा है । जिस तरह से राजप्रश्नीय में प्रश्नोत्तर है, उसी तरह दीघ-निकाय के 'पायासिसुत्त' में राजा 'पायासि' के प्रश्नोत्तर हैं । जो इन प्रश्नों से मिलते-जुलते है । यह भी सम्भव है कि जनमानस में आत्मा और शरीर की अभिन्नता को लेकर जो चिन्तन चल रहा था, उसका प्रतिनिधित्व राजा प्रदेशी ने किया हो और जैन दृष्टि से उसका समाधान केशी श्रमण ने किया हो ।

राजा प्रदेशी का जीवन अत्यन्त उग्र रहा है । उसके हाथ रक्त से सने हुए रहते थे पर केशी श्रमण के सान्निध्य ने उसके जीवन में आमूल-चूल परिवर्तन कर दिया । महारानी के द्वारा जहर देने पर भी उसके मन में किंचित् मात्र भी रोष पैदा नहीं हुआ । जिस जीवन में पहले क्रोध की ज्वाला धधक रही थी, वही जीवन क्षमा-सागर के रूप में परिवर्तित हो गया । इसलिए सत्संग की महिमा और गरिमा का यत्र-तत्र उल्लेख हुआ है ।

व्याख्या-साहित्य

राजप्रश्नीय कथाप्रधान आगम होने से इस पर न निर्युक्ति लिखी गई, न भाष्य की रचना हुई और न चूर्णि का निर्माण ही हुआ । इस पर सर्वप्रथम आचार्य मलयगिरि ने संस्कृत भाषा में टीकानिर्माण किया । संस्कृत टीकाकारो में आचार्य मलयगिरि का स्थान विशिष्ट है । जिस प्रकार वैदिक परम्परा में वाचस्पति मिश्र ने षट्दर्शनों पर महत्त्वपूर्ण टीकाएँ लिखकर एक भव्य आदर्श उपस्थित किया, वैसे ही जैन साहित्य पर आचार्य मलयगिरि ने प्रांजल भाषा और प्रवाहपूर्ण शैली में भावपूर्ण टीकाएँ लिखकर एक आदर्श उपस्थित किया । वे दर्शनशास्त्र के प्रकाण्ड पण्डित थे । उनमें आगमों के गम्भीर रहस्यों को तर्कपूर्ण शैली से व्यक्त करने की अद्‌भुत कला और क्षमता थी । आगमप्रभावक मुनि पुण्यविजयजी महाराज के शब्दों में कहा जाय तो 'व्याख्याकारों में उनका स्थान सर्वोत्कृष्ट है ।'

मलयगिरि अपनी वृत्तियों में सर्वप्रथम मूलसूत्र, गाथा या श्लोक के शब्दार्थ की व्याख्या कर उसके अर्थ का स्पष्ट निर्देश करते है और उसकी विस्तृत विवेचना करते हैं, जिससे उसका अभीष्टार्थ पूर्णरूप से स्पष्ट हो जाता है । विषय से सम्बन्धित अन्य प्रासंगिक विषयों पर विचार करना तथा प्राचीन ग्रन्थों के प्रमाण प्रस्तुत करना आचार्यश्री की अपनी विशेषता है ।

टीकाकार ने सर्वप्रथम श्रमण भगवान् महावीर को नमस्कार किया है । उसके पश्चात् राजप्रश्नीय पर विवरण लिखने की प्रतिज्ञा की ।[१३३] साथ ही इस बात पर भी प्रकाश डाला है कि प्रस्तुत आगम का नाम राजप्रश्नीय क्यों रखा गया है । इस सम्बन्ध में लिखा है - यह आगम राजा के प्रश्नों से सम्बन्धित है, इसीलिए इसका नाम 'राजप्रश्नीय' है । टीकाकार ने यह भी बताया है कि यह आगम सूत्रकृतांग का उपांग है । टीका में, आगम में आये हुए विशिष्ट शब्दों की मीमांसा भी की है । मीमांसा में टीकाकार का गम्भीर पाण्डित्य उजागर हुआ है । टीका का ग्रन्थ-प्रमाण तीन हजार सात सौ श्लोक प्रमाण है । टीका में अनेक स्थलों पर जीवाजीवाभिगम के उद्धरण दिये है । कहीं-कहीं पर पाठभेद का भी निर्देश किया है । देशीनाममाला के उद्धरण भी दिये गये हैं ।[१३४]

प्रस्तुत आगम और उसकी टीका में जडवाद और आत्मवाद का सुन्दर विश्लेषण हुआ है । स्थापत्य, संगीत और नाट्यकला के अनेक तथ्यों का इसमें समावेश है । लेखन सम्बन्धी सामग्री का भी इसमें निर्देश है । साम, दाम, दण्ड, नीति के अनेक सिद्धान्त इसमें समाविष्ट हैं । बहत्तर कलायें, चार परिषद्, कलाचार्य, शिल्पाचार्य का भी इसमें निरूपण हुआ है । भगवान् पार्श्वनाथ की परम्परा से

---

१३३. प्रणमत वीरजिनेश्वरचरणयुगं परमपाटलच्छायम् ।
अधरीकृतनतवासवमुकुटस्थितरत्नरुचिचक्रम् ॥१॥
राजप्रश्नीयमहं विवृणोमि यथाऽऽगमं गुरुनियोगात् ।
तत्र च शक्तिमशक्तिं गुरवो जानन्ति का चिन्ता ॥२॥

१३४. पहकराः संघाताः-पहकर-ओरोह-संघाया इति देशीनाममालावचनात् । राजप्रश्नीयवृत्ति, पृष्ठ ३

सम्बन्धित अनेक तथ्य इसमे आये हैं । राजा प्रदेशी और केशी श्रमण का जो संवाद है, साहित्यिक दृष्टि से भी अत्यन्त महत्त्वपूर्ण है । यह संवाद कथा के विकास के लिए एक आदर्श लिए हुए है । इस संवाद में जो रूपक दिये गये है, वे आत्मा के अस्तित्व को सिद्ध करने के लिए परम उपयोगी हैं । इनका उपयोग बाद में अन्य साहित्यकारों ने भी किया है । जैसे - आचार्य हरिभद्र ने समराइच्चकहा में 'पिंगल' और 'विजयसिंह' के संवाद में बन्द कमरे में से भी स्वरलहरियाँ बाहर आती हैं, इस रूपक को प्रस्तुत किया है ।

राजप्रश्नीय सूत्र का सर्वप्रथम सन् १८८० में बाबू धनपतसिंहजी ने मलयगिरि वृत्ति के साथ प्रकाशन किया । उसके बाद सन् १९२५ में आगमोदय समिति बम्बई और वि. सं. १९९४ में गुर्जर ग्रन्थरत्न कार्यालय - अहमदाबाद से सटीक प्रकाशित हुआ । वी.सं. २४४५ में पूज्य अमोलकऋषिजी म. के द्वारा हिन्दी अनुवाद सहित संस्करण निकला । सन् १९६५ में पूज्य श्री घासीलालजी म. ने स्वनिर्मित संस्कृत व्याख्या व हिन्दी-गुजराती अनुवाद के साथ जैन शास्त्रोद्धार समिति - राजकोट से प्रकाशित किया । सन् १९३५ में पं. बेचरदास जीवराज दोशी ने इसका गुजराती अनुवाद लाघाजी स्वामी पुस्तकालय - लीमडी से और वि.सं. १९९४ में गुर्जर ग्रन्थरत्न कार्यालय - अहमदाबाद से प्रकाशित करवाया । इस प्रकार आज दिन तक राजप्रश्नीय के विविध संस्करण अनेक स्थलों से प्रकाशित हुए हैं ।

• • •

પ્રસન્નતાનો પારાવાર

પૂજ્યપાદ ગુરુભગવંત શ્રીમદ્ વિજય અરવિન્દ સૂરીશ્વરજી મહારાજાના સાન્નિધ્યમાં બેઠા હોઈએ ત્યારે લાગે કે એક અન્તઃસ્થ મહાપુરુષની શીળી છાયાને માણી રહ્યા છીએ.

તેઓશ્રીજીની આ અન્તઃસ્થતા, તેમનું આ ભીતર ડૂબવાપણું તેઓશ્રીના ચહેરા પર પ્રસન્નતાના સ્વરૂપે દેખાયા કરે.

સદા પ્રસન્ન એ મહાપુરુષ.

બિલકુલ નિર્ભાર.

જ્યારે બધું જ પ્રભુને સોંપાઈ ગયું હોય; ભાર શાનો ?

પૂજ્યપાદશ્રીજીની આ નિર્ભાર દશાને જોતાં મને એક ઘટના યાદ આવે છે.

એક ગામને પાદરેથી એક આચાર્ય ભગવંતની વિહારયાત્રા ચાલી રહી હતી. ડોળીમાં બિરાજમાન હતા આચાર્ય ભગવંતશ્રી. ગામને પાદરે રમતાં બે બાળકોએ ગુરુદેવને જોયાં. તેઓ દોડતાં આવ્યાં. તેમણે ચરણસ્પર્શ કર્યો. ડોળી આગળ ચાલી.

બે બાળકોમાંનાં છ વર્ષના નાના ભાઈએ પોતાના મોટાભાઈને પૂછ્યું : ભાઈ, આ બેઉ ડોળીવાળા ભાઈઓ મહારાજ સાહેબને ઊંચકીને સડસડાટ દોડતા હતા, તો તેમને ભાર નહિ લાગતો હોય ?

આઠ વર્ષની વયના દીકરાએ તે વખતે જે જવાબ આપ્યો તે અદ્‌ભુત હતો. એણે કહ્યું : ડોળીમાં મહારાજ સાહેબ બેઠેલ હતા. મહારાજ સાહેબના હૃદયમાં ભગવાન હોય. અને ભગવાન જેના હૃદયમાં હોય તેનો ભાર શી રીતે હોય ?

કેટલી સરસ વાત !

પૂજ્યપાદશ્રીજીની નિર્ભારતાની પાછળ પણ મને આ જ કારણ લાગ્યા કર્યું છે.

• • •

તેઓશ્રીની નિર્ભાર દશાના ઘણા પ્રસંગો યાદ આવે. બે-ત્રણ શિષ્યો જોડે હોય ત્યારે, એ લોકો બહાર ગયા હોય અને પૂજ્યશ્રીજી પાત્રાનું પ્રતિલેખન કરી લે.

બહારથી શિષ્ય આવે. એને ખ્યાલ આવે. એ ભક્તિથી કહે : ગુરુદેવ ! આપે કેમ પાત્રાનું પ્રતિલેખન કર્યું ? ત્યારે પૂજ્યશ્રીજી સ્મિત સાથે કહેતા : તમે લોકો કેટલો બધો સ્વાધ્યાય અને વેયાવચ્ચ કરો છો. હું તો બેઠો બેઠો તમારી સેવા સ્વીકારું છું. અને આ કામમાં પણ શું કર્યું છે ?

શિષ્યોની આંખો સદ્‌ગુરુ પ્રત્યેની ભક્તિથી ભરાઈ આવે.

• • •

પૂજ્યપાદ પ્રદાદા ગુરુદેવ શ્રીમદ્ વિજય ભદ્રસૂરિ દાદાની સેવા વર્ષો સુધી કરેલી. આ સેવાએ તેમના હૃદયમાં શિષ્યત્વના ભાવની ગરિમા એવી તો મંડિત કરેલી કે હું ઘણા બધા શિષ્યોનો ગુરુ છું આ ભાવ તેમને ક્યારેય સ્પર્શ્યો નથી.

પ્રદાદા ગુરુદેવશ્રી આપણા યુગના અજોડ ભક્તિયોગાચાર્ય હતા. પ્રભુ-પરાયણતાને કારણે વિકસેલી તેઓશ્રીની નિર્ભાર દશાનો વારસો પૂજ્યશ્રીજી પામ્યા છે.

દાદા ગુરુદેવશ્રીના જીવનની એક ઘટના યાદ આવે છે; જે તેઓશ્રીના ભક્તહૃદયની આપણા હૃદયમાં અમીટ છાપ છોડી જાય તેવી છે.

એકવાર પૂજ્યપાદ દાદા ગુરુદેવશ્રીની આંખે મીઠો ઝામર ઊતરી ગયો. તે સમયે ખ્યાલ ન આવ્યો. પાછળથી એક આંખ બંધ કરીને જોતાં ખ્યાલ આવ્યો કે તે આંખની રોશની ચુકાઈ ગઈ છે. બીજી આંખે મોતિયો આવતો હતો. કુશળ ડૉક્ટરે ઑપરેશન કર્યું. પરંતુ નિષ્ફળ ગયું. બીજી આંખની રોશની પણ ગઈ.

ભક્તો સ્તબ્ધ આ ઘટનાથી.

શિષ્યવૃન્દ હતપ્રભ.

સ્વસ્થ હતા દાદા ગુરુદેવશ્રી. એમણે કહ્યું : આ ઘટનામાં હું પ્રભુનો સંકેત જોઈ રહ્યો છું. અત્યાર સુધી આંખ દ્વારા સ્વાધ્યાયાદિ હું કરતો'તો. હવે પ્રભુ એમ કહી રહ્યા છે કે તારે જાપ અને ધ્યાનની સૂક્ષ્મ દુનિયામાં જવાનું છે.

કેવી આ ઘટના-અપ્રભાવિતતા !

• • •

પૂજ્યશ્રીજીના ગુરુદેવ હ્રીંકારવિજય મહારાજ સંસારી સંબંધે તેઓશ્રીના કાકા થતા. પ્રગુરુદેવશ્રી જનકવિજયજી મહારાજ જોડે પણ એ જ સંસારી સંબંધ હતો.

પૂજ્યપાદ જનકવિજયજી મહારાજ સાહેબ બહુ જ મોટા વિદ્વાન અને વિરાગી સાધક પુરુષ હતા.

તેઓશ્રીજીના એ ગુણો પૂજ્યશ્રીને મળ્યા. તીવ્ર અનાસક્તિ, સાહિત્યમાં રુચિ.

મહાત્મા બુદ્ધ એક વાત કહેતા કે નદીનું પાણી સતત વહ્યા કરતું હોય ત્યાં તો સ્વચ્છતા જ રહેવાની. હા, ક્યાંક ખૂણો પડતો હોય અને પાણી ત્યાં સ્થિર થઈ જાય તો લીલ-ફૂલ બાઝી જાય. સાધકે ક્યાંય ખૂણો બનાવવાનો નથી; પરિણામે એની ચેતના નિર્મળ રહે.

પૂજ્યશ્રીજીની ચિત્તવૃત્તિ સતત વહ્યા કરે છે સ્વાધ્યાયમાં, ભક્તિમાં, અનુષ્ઠાનોમાં. ઠહેરાવ જ નથી, તો આસક્તિ ક્યાં ? કોઈ પણ પદાર્થો કે વ્યક્તિઓ પર ચેતના સ્થિર થાય તો રાગ-દ્વેષને અવકાશ મળે ને ?

• • •

પૂજ્યપાદ જનકવિજયજી મહારાજ સાહેબના વૈરાગ્યપ્રેમનાં મૂળિયાં એમની સદ્‌ગુરુપ્રીતિમાં દેખાતાં.

સંસારીપણામાં તેઓ પાલીતાણામાં ભણતા હતા. વિ.સં. ૧૯૮૭માં પૂજ્યપાદ ભદ્રસૂરિ દાદાનું ચાતુર્માસ પાલીતાણામાં. કો'કના કહેવાથી મૂળજીભાઈ (પૂ. જનક વિ.મ.નું સંસારીપણાનું નામ) દાદા પાસે આવ્યા.

દાદાની નિઃસ્પૃહતા, તેઓશ્રીનો પરમ વૈરાગ્ય... પ્રથમ દર્શને જ મૂળજીભાઈ અભિભૂત થયા.

દાદાનાં ચરણોમાં જીવન સમર્પિત કરવાની ઇચ્છા અભિવ્યક્ત કરી. દાદાએ કહ્યું : પાલીતાણામાં ઘણા બધા સંતો છે. તમે બધાનો પરિચય કરો !

સદ્‌ગુરુની આજ્ઞા. મૂળજીભાઈએ તેમ કર્યું. પરંતુ ઋણાનુબંધ દાદા જોડે. આવ્યા ફરી દાદા પાસે. 'આપ જ મને દીક્ષિત કરો !'

સદ્‌ગુરુપ્રીતિનાં આ મૂળિયાં જન્માન્તરીય પણ હોઈ શકે. તીવ્ર વૈરાગ્યની જન્માન્તરીય ધારાને કારણે પણ આ સદ્‌ગુરુપ્રીતિ થયેલી હોઈ શકે.

દાદાની શિષ્યો માટેની નિઃસ્પૃહતા પૂજ્યશ્રીજીના જીવનમાં સ્પષ્ટતયા અંકિત થયેલી જોવા મળે... ધર્મચર્યા દ્વારા અનેકોને ધર્મ પમાડનાર પૂજ્યશ્રીજીએ એ પૈકીના કોઈને શિષ્ય બનાવવાનો વિચાર સુદ્ધાં નહિ કરેલ.

• • •

આપણા યુગના સંઘસ્થવિર પૂજ્યપાદ પ્રદાદા ગુરુદેવ શ્રીમદ્‌ વિજય સિદ્ધિસૂરીશ્વરજી મહારાજા (પૂ. બાપજી મહારાજ સાહેબ)ના ચાર વર્ષ સુધીના સળંગ ઉપનિષદનો લાભ પૂજ્યશ્રીજીને મળેલો.

તે સમયે તેઓશ્રી બાળમુનિ શ્રી અરવિન્દ વિજયજી મહારાજરૂપે. દેખીતી રીતે, બધા મુનિવરો પ્યારથી 'નાના મહારાજ' કહીને તેમને સંબોધે. પરંતુ પૂજ્યપાદ બાપજી મહારાજ સાહેબ તેમને 'મોટા

મહારાજ' તરીકે સંબોધતા. ખૂબ જ લાડભર્યા સ્વરે તેઓ પોકારતા : મોટા મહારાજ, ચાલો ! ભણવાનું છે ને ?

પૂજ્યપાદ બાપજી મહારાજ સાહેબ વચનસિદ્ધ મહાપુરુષ હતા. તેઓશ્રીએ સંબોધેલ 'મોટા મહારાજ' સંબોધન આજે કેવું સાર્થક થયું કે પૂજ્યશ્રીજી પૂજ્યપાદ બાપજી મહારાજ સાહેબના સમુદાયના સહુથી વરિષ્ઠ, શ્રદ્ધેય આચાર્ય ભગવંત બન્યા.

• • •

પૂજ્યશ્રીજીનો સ્વાધ્યાયપ્રેમ અજોડ છે. આજે પંચ્યાસી વર્ષની વયે પણ તેઓશ્રીજી કલાકો સુધી સ્વાધ્યાય કરે છે.

સ્વાધ્યાયની આ અપ્રમત્તતા આપણા જેવા પ્રમાદીઓના ચિત્તને ઝકઝોરી નાખે તેવી હોય છે.

મને એક પ્રસંગ યાદ આવે. પૂજ્યપાદ વર્ધમાન તપોનિધિ આચાર્ય ભગવંત શ્રીમદ્ વિજય ભદ્રંકર સૂરીશ્વરજી મહારાજાને વન્દના કરવા અમદાવાદ ગયેલો હું. પૂજ્યપાદશ્રીજી તે સમયે પંકજ સોસાયટીના પૂ. આ. શ્રી ભુવનભાનુસૂરિ સ્મૃતિમન્દિરમાં બિરાજમાન. હોલમાં જ પૂજ્યશ્રીજીની પાટ. થોડે દૂર હું.

બપોરે વાપરીને હું મારા આસન પર આવ્યો. વામકુક્ષિની કુટેવ. પરંતુ આજે જ્યાં સુવાનો, આડે પડખે થવાનો વિચાર કરું, ત્યાં જ મારી નજર પૂજ્યપાદશ્રીજી પર પડી. તે વખતની તેઓશ્રીની સત્તાણું વર્ષની વય. પૂજ્યશ્રીજી હાથમાં પુસ્તક લઈ સ્વાધ્યાય કરી રહ્યા હતા. હું શરમાઈ ગયો. તે દિવસે હું સૂઈ ન શક્યો.

પૂજ્યપાદશ્રીજીની સ્વાધ્યાય-પ્રીતિ પણ આપણા પ્રમાદને ખંખેરી નાખે.

• • •

સ્વાધ્યાય-પ્રીતિ પૂજ્યશ્રીજીની. આ સ્વાધ્યાય-પ્રીતિ પૂજ્યશ્રીજીને પોતાની અંદરના આનંદના સામ્રાજ્યમાં લઈ ગઈ છે.

તેઓશ્રીજીની સ્વાધ્યાયપ્રીતિ જ્ઞાનદશાને શિખરે એ રીતે પહોંચેલી છે કે તે જોતાં જ્ઞાનસાર યાદ આવે : विकल्पविषयोत्तीर्णः, स्वभावालम्बनः सदा । ज्ञानस्य परिपाको यः, सः शमः परिकीर्तितः ॥ વિકલ્પોના વિસ્તારને પેલે પાર અને સ્વભાવની અનુભૂતિ વડે ઓતપ્રોત જ્ઞાનની પરિપક્વ દશા તે સમભાવ. પૂજ્યશ્રીજીની જ્ઞાનદશા સમભાવમાં કેટલી તો સરસ રીતે નીખરી રહે છે !

સદા સમભાવ.

સદા પ્રસન્નતા...

• • •

આ પ્રસન્નતાને તેઓશ્રીએ એવી રીતે સિદ્ધ કરી છે કે તેઓશ્રી તેનો વિનિયોગ કરતા રહે છે.

તેઓશ્રીના સાન્નિધ્યમાં બેસીને, તેઓશ્રીનાં આન્દોલનોને સ્વીકારતાં જ આપણે પ્રસન્ન બની જઈએ છીએ.

તેઓશ્રીજી પોતાના અન્તઃસ્થ વૈભવનું આપણને દાન, સતત, કરી રહ્યા છે.

• • •

પૂજ્ય સાહેબજીનું સાન્નિધ્ય તો આપણા મનને બિલકુલ બદલી આપે તેવું છે : વિષાદયોગમાંથી પ્રસાદયોગ ભણી લઈ જતું; પૂજ્યશ્રીજીની જન્મભૂમિ મનફરા (કચ્છ) પણ તેવું જ છે : મનને બદલી નાખે તેવું.

પૂજ્યપાદશ્રીજીનો જન્મ જ્યાં થયેલ તે મનફરા ભૂકંપમાં ધ્વસ્ત થયા પછી, ત્યાંના જૈનબન્ધુઓએ સ્વપુરુષાર્થથી જે નવું મનફરા (શાન્તિનિકેતનના નામે) વસાવ્યું છે; તે રમણીય તીર્થભૂમિ સમું બન્યું છે.

ભવ્ય દેરાસર, ઉપાશ્રયો, સ્થાનકો, ધર્મશાળા, ભોજનશાળા આદિથી યુક્ત આ મનફરામાં મનને ખૂબ શાન્તિ મળે છે, ત્યાંના મઝાના પ્રાકૃતિક પરિવેશને કારણે. આનો અનુભવ અમે લોકોએ પૂજ્યપાદશ્રીજીના વિ. સં. ૨૦૬૪ના ત્યાંના ચાતુર્માસમાં કર્યો.

પૂજ્યપાદશ્રીજીની નિશ્રામાં વિશાળ મુનિવૃન્દ અને સાધ્વીવૃન્દના આ ચાતુર્માસમાં ત્યાંના શ્રી સંઘે જે ભક્તિ કરી છે; અવિસ્મરણીય છે એ.

સેંકડો વૃક્ષોથી ઘેરાયેલું, વ્યવસ્થિતરૂપે વિકસેલું આ શાન્તિનિકેતન ખરેખર શાન્તિને અર્પનારું મઝાનું કેન્દ્ર છે.

એ ચાતુર્માસ પ્રવેશના પ્રસંગે મેં કહેલું કે પૂજ્ય દાદા જિતવિજયજી મહારાજા, પૂજ્ય દાદા કનકસૂરિ મહારાજ અને પૂજ્ય દાદા અધ્યાત્મયોગી, શ્રદ્ધેય આચાર્ય ભગવંત કલાપૂર્ણસૂરિ મહારાજાનાં ચરણોથી પાવન બનેલ આ ભૂમિ અમારા માટે તો તીર્થભૂમિ છે; કારણ કે અમારા પૂજ્યપાદ ગુરુભગવન્તશ્રીની આ જન્મભૂમિ છે.

• • •

પૂજ્યપાદશ્રીજીના સાન્નિધ્યમાં એમજ બેસવાનું મન ઘણીવાર થાય. તેમની પ્રશાન્ત મુદ્રાને નિહાળ્યા કરીએ. અને આંખો બંધ કરીને તેઓશ્રીનાં પાવન આન્દોલનોને માણ્યા કરીએ ત્યારે અનાયાસ ભીતર ઊતર્યા કરાય...

અન્તઃસ્થ મહાપુરુષનો આ વિશિષ્ટ પ્રભાવ... બહિઃસ્થ ચેતનાઓને પણ તે અન્તઃસ્થ, કમ સે કમ, અન્તર્મુખ તો બનાવી જ દે.

અન્તઃસ્થ એ મહાપુરુષનાં ચરણોમાં વન્દના.

• • •

પૂજ્યપાદ, પ્રશમમૂર્તિ આચાર્ય ભગવન્ત
શ્રીમદ્‌વિજય અરવિન્દસૂરીશ્વરજી મહારાજા

સંક્ષિપ્ત જીવનયાત્રા

જન્મ	:	વિ. સં. ૧૯૮૫ જેઠ સુદ ૧૨
જન્મભૂમિ	:	મનફરા (કચ્છ)
માતા	:	વાલીબેન
પિતા	:	પેથાભાઈ
દીક્ષા	:	૧૯૯૬ મહા સુદ ૧૦ (મનફરા)
વડી દીક્ષા	:	૧૯૯૬ વૈશાખ સુદ ૩ (પલાસવા)
દીક્ષાભૂમિ	:	મનફરા
પ્રદાદા ગુરુદેવ	:	પૂજ્યપાદ, સંઘસ્થવિર આ.ભ. શ્રીમદ્‌વિજય ભદ્રસૂરીશ્વરજી મહારાજા
પ્રગુરુદેવ	:	પૂજ્યપાદ, વિદ્વદ્વર્ય મુનિરાજશ્રી જનકવિજયજી મહારાજ સાહેબ (સંસારી પક્ષે કાકા)
ગુરુદેવ	:	પૂજ્યપાદ, વિદ્વદ્વર્ય મુનિરાજશ્રી હ્રીંકારવિજય મહારાજ સાહેબ (સંસારી પક્ષે કાકા)
ગણિપદ	:	વિ. સં. ૨૦૪૨ માગસર સુદ ૫ ચવાવ (બી.કે.)
પંન્યાસ પદ	:	વિ. સં. ૨૦૪૨ વૈશાખ સુદ ૫ (જૂના ડીસા)
આચાર્ય પદ	:	વિ. સં. ૨૦૪૫ મહા સુદ ૫ (વાવ)
ગણિ-પંન્યાસ પદ પ્રદાતા	:	આચાર્ય ૐકારસૂરીશ્વરજી મહારાજા
આચાર્ય પદ પ્રદાતા	:	આચાર્ય ભદ્રંકરસૂરીશ્વરજી મહારાજાની આજ્ઞાથી તપસ્વીસમ્રાટ આચાર્ય હિમાંશુસૂરીશ્વરજી મહારાજા.

• • •

॥ अर्हम् ॥

आचार्यप्रवरश्रीमलयगिरिसूरिविहितवृत्तियुतं

रायपसेणियसुत्तं ॥

॥ ॐ जिनाय नमः ॥

प्रणमत[१] वीरजिनेश्वरचरणयुगं परमपाटलच्छायम् ।
अधरीकृतनतवासवमुकुटस्थितरत्नरुचिचक्रम् ॥१॥
राजप्रश्नीयमहं विवृणोमि यथाऽऽगमं गुरुनियोगात् ।
तत्र च शक्तिमशक्तिं गुरवो जानन्ति का चिन्ता ? ॥२॥

अथ कस्मादिदमुपाङ्गं **राजप्रश्नीया**भिधानमिति ?, उच्यते, इह **प्रदेशिनामा** राजा भगवतः **केशिकुमारश्रमणस्य** समीपे यान् जीवविषयान् प्रश्नानकार्षीत्, यानि च तस्मै

१. इदमत्र ध्येयं- सम्पादनकार्ये अस्माभिः उपयुक्तप्रतिनां संकेतविवरणम्. **L** = लिंबडीस्थ आ.क.पेढी सत्कं (मूलमात्रम्) ॥ **J** = जेसलमेरीय, **B** = भांडारकर इंस्टी. पुना, **K** अथवा **खं** = शांतिनाथतालपत्र भंडार-खंभात (सर्वे तालपत्रीयाः) **मु.** = आगमोद्धारकश्री सागरजी संपादित संस्करण । **G** = गूर्जरग्रंथ प्रकाशित पं बेचरदास संपादित संस्करणम्, **V** = विश्वभारती-लाडनू प्रकाशित (मूलसूत्रं केवलम्) आ. महाप्रज्ञसंपादितसंस्करणं, बाबु = धनपतसिंहबाबुप्रकाशितसंस्करणम् इत्यादयः उपयुक्ताः सन्ति ॥

केशिकुमारश्रमणो गणभृद् व्याकरणानि व्याकृतवान्, यच्च व्याकरणसम्यक्परिणतिभावतो बोधिमासाद्य मरणान्ते शुभानुशययोगतः प्रथमे सौधर्मनाम्नि नाकलोके विमानमाधिपत्येनाध्यतिष्ठत्, यथा च विमानाधिपत्यप्राप्त्यनन्तरं सम्यगवधिज्ञानाऽऽभोगतः **श्रीमद्वर्धमानस्वामिनं** भगवन्तमालोक्य भक्त्यतिशयपरीतचेताः सर्वस्वसामग्रीसमेत इहावतीर्य भगवतः पुरतो द्वात्रिंशद्विधिनाट्यमनरीनृत्यत्, नर्त्तित्वा च यथाऽऽयुष्कं दिवि सुखमनुभूय ततश्च्युत्वा यत्र समागत्य यथा मुक्तिपदमवाप्स्यति, तदेतत्सर्वमस्मिन् उपाङ्गेऽभिधेयं, परं सकलवक्तव्यतामूलं 'राजप्रश्नीय'[१] इति-राजप्रश्नेषु भवं राजप्रश्नीयम् ।

अथ कस्याङ्गस्येदमुपाङ्गम्?, उच्यते, **सूत्रकृताङ्गस्य**, कथं तदुपाङ्गतेति चेत्, उच्यते, सूत्रकृते ह्यङ्गे अशीत्यधिकं शतं क्रियावादिनां, चतुरशीतिरक्रियावादिनां, सप्तषष्टिरज्ञानिकानां, द्वात्रिंशद्वैनयिकानां, सर्वसङ्ख्यया त्रीणि त्रिषष्ट्यधिकानि पाखण्डिकशतानि प्रतिक्षिप्य स्वसमयः स्थाप्यते, उक्तं च **नन्द्यध्ययने**-

"**सुयगडे णं असीयसयं किरिआवाईणं चतुरासीई अकिरियावाईणं सत्तट्ठी अण्णाणियवाईणं बत्तीसा वेणइयवाईणं तिण्हं तेवट्ठाणं पासंडियसयाणं वूहं किच्चा ससमए ठाविज्जई**"[२]त्ति, [नन्दीसूत्रे अङ्गप्रविष्टाधिकारः पृ. २१२] **प्रदेशी** च राजा पूर्वम्-अक्रियावादिमतभावितमना आसीत्, अक्रियावादिमतमेव चाऽवलम्ब्य जीवविषयान् प्रश्नानकरोत्, **के**शिकुमारश्रमणश्च गणधारी **सू**त्रकृताङ्गसूचितमक्रियावादिमतप्रतिक्षेपमुपजीव्य व्याकरणानि व्याकार्षीत्, ततो यान्येव सूत्रकृताङ्गसूचितानि केशिकुमारश्रमणेन व्याकरणानि व्याकृतानि तान्येवात्र सविस्तरमुक्तानीति **सू**त्रकृताङ्गगतविशेषप्रकटनादिदमुपाङ्गं **सू**त्रकृताङ्गस्येति ।

एतद्वक्तव्यता च भगवता **व**र्द्धमानस्वामिना **गौ**तमाय साक्षादभिहिता । तत्र यस्यां नगर्यां येन प्रक्रमेणाभ्यधीयत, तदेतत्सर्वमभिधित्सुरिदमाह—

---

१. राजप्रश्ना इति-BJ ॥ २. "**सूत्रकृते** अशीतं शतं क्रियावादिनां चतुरशीतिमक्रियावादिनां सप्तषष्टिमज्ञानिकानां द्वात्रिंशतं वैनयिकवादिनां त्रयाणां त्रिषष्ट्यधिकानां पाखण्डिकशतानां व्यूहं-प्रतिक्षेपं कृत्वा स्वसमयः स्थाप्यते ।" इति मु. टि. ॥

ॐ नमो वितरागाय नमः ॥

नमो अरिहंताणं । नमो सिद्धाणं । नमो आयरियाणं । नमो उवज्झायाणं । नमो लोए सव्वसाहूणं

सूत्र-१ : [1]ते णं काले णं ते णं समए णं [2]आमलकप्पा नामं नयरी होत्था, रिद्धत्थिमियसमिद्धा जाव पासादीया दरिसणिज्जा अभिरूवा पडिरूवा ॥ १ ॥

[१] **'ते णं काले णं ते णमित्यादि'** । **'ते'** इति प्राकृतशैलीवशात् तस्मिन्निति द्रष्टव्यम्, अस्यायमर्थो-यस्मिन्काले भगवान् वर्द्धमानस्वामी स्वयं विहरति स्म तस्मिन्निति। **'ण'**मिति वाक्यालङ्कारे, दृष्टश्चान्यत्रापि णंशब्दो वाक्यालङ्कारार्थो यथा-**"इमा णं पुढवी"** [ ] इत्यादाविति । **'काले'** अधिकृतावसर्प्पिणीचतुर्थविभागरूपे, अत्रापि **णं**शब्दो वाक्यालङ्कृतौ, **'ते णं समए णं'**ति समयोऽवसरवाची, तथा लोके वक्तारो-'नाद्याप्येतस्य वक्तव्यस्य समयो वर्तते', किमुक्तं भवति ?-नाद्याप्येतस्य वक्तव्यस्यावसरो वर्तते इति । तस्मिन्निति यस्मिन् समये भगवान् **सूर्याभदेव**वक्तव्यतामचकथत्, तस्मिन् समये **आमलकल्पा नाम नगरी अभवद्**, [3]ननु इदानीमपि सा नगरी वर्त्तते ततः कथमुक्तम् 'अभवदिति ?', उच्यते, वक्ष्यमाणवर्ण्णकग्रन्थोक्तविभूतिसमन्विता तदैवाभवत्, न तु विवक्षितोपाङ्गविधानकाले, तदपि कथमवसेयम् ? इति चेत्, उच्यते, अयं कालः अवसर्प्पिणी, अवसर्प्पिण्यां च प्रतिक्षणं च शुभा भावा हानिमुपगच्छन्ति, एतच्च सुप्रतीतं जिनप्रवचनवेदिनामतः 'अभवद्' इत्युच्यमानं न विरोधभाक् ।

सम्प्रत्यस्या नगर्या वर्णकमाह--**'रिद्ध-त्थिमिय-समिद्धा जाव पासादीया दरिसणिज्जा अभिरूवा पडिरूवा'** इति ऋद्धा-भवनैः पौरजनैश्चातीव वृद्धिमुपागता, **"[4]ऋधि वृद्धौ"**[दिवादि-४३ धातुपारायणे] इति वचनात्, स्तिमिता-स्वचक्र-परचक्र-तस्कर-

---

१. द्र. औपपातिक सू. १ ॥ २. "बौद्ध साहित्यमें 'अल्लकप्पा' नाम आता है । यह स्थान शाहाबाद जिले में मसार और वैशाली के बीच में अवस्थित था ।" जैन आगम साहित्य मनन और मीमांसा पृ. २०६ ले. देवेन्द्रमुनि शास्त्री । दृष्टव्यः बी.सी. लाहा, ज्योग्राफी आफ अर्ली बुद्धिज्झम पृ. २४ आदि । ३. तुला-औपपातिकसूत्रवृत्तिः सू.१ ॥ ४. ऋद्ध-BJ खं.बाबु. । ऋद्धि वृ० मु. । 'ऋधः ईर्त' (आ. ३/५५) इति मलयगिरिशब्दानुशासने ।

डमरादिसमुत्थभयकल्लोलमालाविवर्जिता, समृद्धा-धन-धान्यादिविभूतियुक्ता, ततः पदत्रयस्य विशेषणसमासः, यावच्छब्देन 'पमुइयजण-जाणवया' प्रमुदिताः-प्रमोदवन्तः प्रमोदहेतुवस्तूनां तत्र सद्भावात्, जना-नगरीवास्तव्यलोकाः जानपदाः-जनपदभवास्तत्र प्रयोजनवशादायाताः सन्तो यत्र सा प्रमुदितजन-जानपदा । 'आइण्णजणमणूसा' मनुष्यजनैराकीर्ण्णा, प्राकृतत्वात्पदव्यत्ययः । ''हलसयसहस्ससंकट्ठ-विगट्ठलट्ठ-पण्णत्तसेउसीमा' हलानां शतैः सहस्रैश्च सङ्कृष्टा-विलिखिता विकृष्टा-नगर्या दूरवर्त्तिनी बहिर्वर्तिनीति भावः, लष्टा-मनोज्ञा प्राज्ञैः-छेकैराप्ता प्राज्ञाप्ता, छेकपुरुषपरिकर्मितेति भावः, सेतुसीमा कुल्याजलसेक्यक्षेत्रसीमा यस्याः सा हलशतसहस्रसङ्कृष्टविकृष्टलष्टप्राज्ञाप्तसेतुसीमा, 'कुक्कुड-संडेय-गाम-पउरा' कुक्कुडसम्पात्या ग्रामाः सर्वासु दिक्षु विदिक्षु च प्रचुरा यस्याः सा कुक्कुडसण्डेयग्रामप्रचुरा, 'गो-महिस-गवेलगप्पभूया'गावो-बलीवर्दा महिषाः-प्रतीता गावः-स्त्रीगव्य एडकाः-उरभ्रास्ते प्रभूता यस्यां सा तथा । 'आयारइन्त-चेइय-जुवइ-विसिट्ठसन्निविट्ठबहुला' आकारवन्ति-सुन्दराकाराणि चैत्यानि, युवतीनां च-पण्यतरुणीनामिति भावः, विशिष्टानि सन्निविष्टानि, सन्निवेशपाटका इति भावः, बहुलानि-बहूनि यस्यां सा तथा, 'उक्कोडिय-गाय-गंठिभेद-तक्कर-खंडरक्खरहिया' उत्कोटा-लञ्चा तया चरन्ति औत्कोटिकास्तैः गात्रभेदैः-शरीरविनाशकारिभिः ग्रन्थिभेदैः-ग्रन्थिच्छेदैः तस्करैः खण्डरक्षैः-दण्डपाशिकै रहिता, अनेन तत्रोपद्रवकारिणामभावमाह । 'क्षेमा' अशिवाभावात्, 'निरुवद्दवा' राजादिकृतोपद्रवाऽभावात्, 'सुभिक्षा' भिक्षाकाणां भिक्षायाः सुलभत्वात्, 'विसत्थसुहावासा' विश्वस्तो-निर्भयः सुखमावासो लोकानां यस्यां सा तथा, 'अणेगकोडिकोडुंबियाइण्णणेव्वुत्तसुहा' अनेककोटीभिः-अनेककोटिसङ्ख्याकैः कौटुम्बिकैराकीर्ण्णा निर्वृत्ता सन्तुष्टजनयोगात् शुभाशुभवस्तूपेतत्वात्, ततः पदत्रयस्य कर्मधारयः, 'नड-नट्ट-जल्ल-मल्ल-मुट्ठिय-वेलंबग-कहग-पवक-लासक-आइक्खय-लंख-मंख-तूणइल्ल-तुंबवीणिय-अणेगतालाचराणुचरिया' नटाः-नाटकानां-नाटयितारः, नर्त्तका-ये नृत्यन्ति, जल्लाः-राज्ञः स्तोत्रपाठकाः, मल्लाः प्रतीताः, मौष्टिकाः-मल्लाः एव ये मुष्टिभिः प्रहरन्ति, विडम्बकाः-विदूषकाः, कथकाः-प्रतीताः, प्लवकाः-ये उत्प्लवन्ते नद्यादिकं वा तरन्ति, लासकाः-ये रासकान् गायन्ति जयशब्दप्रयोक्तारो वा भाण्डा इत्यर्थः, आख्यायिकाः-ये शुभाशुभमाख्यान्ति, लङ्घाः-महावंशाग्रखेलकाः, मङ्खाः-चित्रफलकहस्ता

१. इतेऽग्रे-G मध्ये 'इक्षु-यव-शालिकलिता' इत्यधिकम् । २. BJ खं.बाबु । आयारवन्त० मु. ॥ ३. BJ खं. । भिक्षु० मु. एवमग्रेऽपि ॥ ४. नाटकानां - मु. नास्ति, BJ खं.बाबु अस्ति ॥

भिक्षाकाः, 'तूणइल्लाः' तूणाभिधानवाद्यविशेषवन्तः, तुम्बवीणिकाः-तुम्बवीणावादका, अनेके च ये तालाचराः-तालादानेन प्रेक्षाकारिणः, एतैः सर्वैरनुचरिता-आसेविता या सा तथा, 'आरामुज्जाण-अगड-तलाग-दीहिय-वप्पिण-गुणोववेया' आरामाः यत्र माधवीलतागृहादिषु दम्पत्यादीन्यागत्य रमन्ते, उद्यानानि-पुष्पादिमद्वृक्षसङ्कुलान्युत्सवादौ बहुजनभोग्यानि, अगड त्ति-अवटाः-कूपाः, तडाकानि-प्रतीतानि, दीर्घिकाः-सारिण्यः, वप्पिणत्ति केदाराः, एते गुणोपपेता-रम्यतादिगुणोपपेता यस्यां सा तथा । 'उव्विद्ध-विउल-गंभीर-खातफलिहा' उव्विद्धम्-उण्डं विउलं-विस्तीर्णं गम्भीरम्-अलब्धमध्यं खातम्-उपरिविस्तीर्णमधः सङ्कुचितं, परिखा च- अध उपरि च समखातरूपा यस्यां सा तथा, 'चक्क-गय-मुसंढि-ओरोह-सयग्घि-जमलकवाडघणदुप्पवेसा' चक्राणि-प्रहरणविशेषरूपाणि, गदाः-प्रहरणविशेषाः, मुषण्ढयोऽप्येवंरूपा, अवरोधः-प्रतोलीद्वारेष्वन्तःप्राकारः सम्भाव्यते, शतघ्न्यो-महायष्टयो महाशिला वा याः पातिताः शतानि पुरुषाणां घ्नन्ति, यमलानि-समस्थितद्रव्यरूपाणि[1] यानि कपाटानि घनानि च-निश्छिद्राणि तैर्दुष्प्रवेशा या सा तथा । 'धणुकुडिलवंकपागार-परिक्खित्ता' 'धणुकुडिलं'-कुटिलं धनुस्ततोऽपि वक्रेण प्राकारेण परिक्षिप्ता या सा तथा । 'कविसीसय-वट्टरइय-संठियविरायमाणा' कपिशीर्षकैर्वृत्तरचित-संस्थितैः-वर्तुलकृतसंस्थानै-र्विराजमाना-शोभमाना या सा तथा, 'अट्टालय-चरिय-दार-गोपुर-तोरण-उन्नय-सुविभत्त-रायमग्गा' अट्टालकाः-प्राकारोपरि[2] भृत्याश्रयविशेषाः, चरिका-अष्टहस्त-प्रमाणो मार्गः द्वाराणि-भवन-देवकुलादीनां गोपुराणि-प्राकारद्वाराणि तोरणानि च उन्नतानि-उच्चानि यस्यां सा तथा, सुविभक्ता-विविक्ता राजमार्गा यस्यां सा तथा, ततः पदद्वयस्य कर्म्मधारयः । 'छेयायरिय-रइयदढफलिह-इंदकीला' छेकेन-निपुणेन आचार्येण-शिल्पोपाध्यायेन रचितो दृढः-बलवान् परिघः-अर्गला इन्द्रकीलश्च-सम्पाटितकपाटद्वयाधारभूतः प्रवेश-मध्यभागो यस्यां सा तथा, 'विवणि-वणिच्छित्त-सिप्पिआइन्ननिव्वुयसुहा' विपणीनां-वणिक्पथानां हट्टमार्गाणां वणिजां च क्षेत्रं-स्थानं सा[3](तद्) विपणिवणिक्क्षेत्रं तथा शिल्पिभिः- कुम्भकारादिभिर्निर्वृतैः-सुखिभिः शुभैः-स्वस्वकर्मकुशलैराकीर्ण्णा, प्राकृतत्वाच्च सूत्रेऽन्यथा पदोपन्यासः, ततः पूर्वपदेन कर्मधारयः । 'सिंघाडग-तिय-चउक्क-चच्चर-पणियापण-विविहवसुपरिमंडिया' शृङ्गाटक-त्रिक-चतुष्क-चत्वरैः पणितानि-क्रेयाणि[4] तत्प्रधानेषु आपणेषु यानि विविधानि वसूनि-द्रव्याणि तैश्च

१. °द्वय° इति औपपातिकवृत्तिः सू. १ ॥ २. °परिवर्त्या° इति औप.वृ.सू. १ ॥ ३. स-BJ बाबु ॥ ४. J खं. बाबु । क्रयाणकानि मु. B ॥

परिमण्डिता । शृङ्गाटकं-त्रिकोणं स्थानं, त्रिकं-यत्र रथ्यात्रयं मिलति, चतुष्कं-रथ्याचतुष्कमीलनात्मकं, चत्वरं-बहुरथ्यापातस्थानम्, 'सुरम्मा' सुरम्या-अतिरम्या 'नरवइ-पविइन्नमहिवइपहा' नरपतिना-राज्ञा प्रविकीर्ण्णो-गमनागमनाभ्यां व्याप्तो महीपतिपथो-राजमार्गो यस्यां सा तथा । 'अणेगवरतुरग-मत्तकुंजररहपहकर[१]-सीय-संदमाणीआइण्णजाण-जुग्गा' अनेकैर्वरतुरगाणां मत्तकुञ्जराणां रथानां च पहकरैः-सङ्घातैः तथा शिबिकाभिः स्यन्दमानीभिर्यानैर्युग्यैश्चाकीर्ण्णा[२]-व्याप्ता या सा तथा, आकीर्ण्णशब्दस्य मध्यनिपातः प्राकृतत्वात् । तत्र शिबिकाः-कूटाकारेणाच्छादिता[३] जम्पानविशेषाः, स्यन्दमानिकाः-पुरुष-प्रमाणा जम्पानविशेषाः, यानानि-शकटादीनि, युग्यानि-**गोल्ल**विषयप्रसिद्धानि, द्विहस्त-प्रमाणानि वेदिकोपशोभितानि जम्पानान्येव । 'विमउलनवनलिणसोभियजला' विमुकुलैः-विकसितैर्नवैर्नलिनैः-कमलैः शोभितानि जलानि यस्यां सा तथा । 'पंडुर-वरभवणपंति[४]-महिया उत्ताणयनयणपिच्छणिज्जा' इति सुगमं, 'पासाईया' इत्यादि, प्रासादेषु भवा प्रासादीया, प्रासादबहुला इत्यर्थः, अत एव दर्शनीया द्रष्टुं योग्या, प्रासादानामति-रमणीयत्वात्, तथा अभि-द्रष्टॄन् प्रति प्रत्येकमभिमुखमतीव चेतोहारित्वात् रूपम्-आकारो यस्याः सा अभिरूपा, एतदेव व्याचष्टे-प्रतिरूपा, प्रतिविशिष्टम्-असाधारणम् रूपम्-आकारो यस्याः सा प्रतिरूपा ॥१॥

सूत्र-२ तीसे णं आमलकप्पाए नयरीए बहिया उत्तरपुरत्थिमे दिसीभाए अंबसालवणे नामं चेइए होत्था, पोराणे[५] जाव[६] पडिरूवे ॥ २ ॥

[२] **तीसे णमि**त्यादि, तस्यां णमिति पूर्ववत् । **आमलकल्पाया नगर्या बहिः 'उत्तरपौरस्त्ये'**-उत्तरपूर्वारूपे ईशानकोणे इत्यर्थः, **'दिग्भागे' 'अम्बसालवणे'** इति आम्रैः शालैश्चातिप्रचुरतयोपलक्षितं यद्वनं तदाम्रशालवनं तद्योगाच्चैत्यमपि आम्रशालवनं, चितेः-लेप्यादिचयनस्य भावः कर्म्म वा चैत्यं, तच्च इह[७] संज्ञाशब्दत्वात् देवताप्रतिबिम्बे प्रसिद्धं, ततस्तदाश्रयभूतं यद्देवताया गृहं तदप्युपचारात् **चैत्यं**, तच्चेह व्यन्तरायतनं द्रष्टव्यं[८], न तु भगवतामर्हतामायतनम्, **'होत्था'** त्ति अभवत् । तच्च किंविशिष्टमित्याह-'चिरातीते **पुराणे' यावच्छब्द**करणात् 'सद्दिए कित्तिए नाए सच्छत्ते सज्झए' इत्याद्यौपपातिकग्रन्थप्रसिद्ध-

१. °रह° JB खं बाबुमध्ये नास्ति ॥ २. स्प° G । एवमग्रेऽपि ॥ ३. °तानि शकटानि J खं. ॥ ४. °वरभवणसण्णिमहिया-इति औप. सू. १ ॥ ५. JKL कखगघचछ । चिराईए जाव-V ॥ ६. द्रष्टव्यम् औपपातिकसूत्रे २-७ ॥ ७. इह JB खं बाबु-नास्ति ॥ ८. द्रष्टव्यम् औप. सू. २ ॥

वर्ण्णकपरिग्रहः । एवंरूपं च चैत्यवर्ण्णकमुक्त्वा वनखण्डवक्तव्यता वक्तव्या । सा चैवं–'से णं अंबसालवणे चेइए एगेणं महया वणसंडेणं सव्वओ समंता संपरिक्खित्ते । से णं वणसंडे किण्हे किण्होभासे' इत्यादि यावत् पासाइए दरिसणिज्जे अभिरूवे पडिरूवे' तत्र प्रासादीयं-कृष्णावभासत्वादिना गुणेन मनःप्रसादहेतुत्वाद्दर्शनीयं चक्षुरानन्दहेतुत्वात्, अभिरूपप्रतिरूप-शब्दार्थः प्राग्वत्, तत उक्तं-'**जाव पडिरूवे**' ॥२॥

सूत्र-३-४ असोगवरपायव-पुढविसिलावट्टयवत्तव्वया उववातियगमेणं नेया ॥ ३-४ ॥

[३-४] **असोगे**त्यादि, **अशोकवरपादपस्य पृथिवीशिलापट्टकस्य च वक्तव्यता औपपातिक[१]ग्रन्थानुसारेण ज्ञेया,** सा चैवं-"तस्स णं वणसंडस्स बहुमज्झदेसभागे इत्थ णं महं एगे असोगवरपायवे पन्नत्ते जाव पडिरूवे । से णं असोगवरपायवे अन्नेहि य बहूहिं तिलएहिं जाव नंदिरुक्खेहिं सव्वतो समंता संपरिक्खित्ते । ते णं तिलगा जाव नंदीरुक्खा कुसविकुसविसुद्धरुक्खमूला मूलमंतो कंदमंतो जाव पडिरूवा । ते णं तिलगा जाव नंदिरुक्खा अन्नाहिं बहूहिं पउमलयाहिं नागलयाहिं असोगलयाहिं चंपगलयाहिं चूयलयाहिं वणलयाहिं वासंतियलयाहिं अइमुत्तयलयाहिं कुंदलयाहिं सामलयाहिं सव्वतो समंता संपरिक्खित्ता । ताओ णं पउमलयाओ जाव सामलयाओ निच्चं कुसुमियाओ जाव पड़िरूवाओ ।

तस्स णं असोगवरपायवस्स उवरिं बहवे अट्ठट्ठमंगलगा पन्नत्ता, तंजहा-सोत्थिय-सिरिवच्छ-नंदियावत्त-वद्धमाणग-भद्दासण-कलस-मच्छ-दप्पणा सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा णीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा समिरीया सउज्जोया पासादीया दरिसणिज्जा अभिरूवा पडिरूवा । तस्स णं असोगवरपायवस्स उवरिं बहवे किण्हचामरज्झया नीलचामरज्झया लोहितचामरज्झया हालिद्दचामरज्झया सुक्किल्लचामरज्झया अच्छा सण्हा लण्हा रूप्पपट्टा वइरामयदंडा जलयामलगंधिया सुरम्मा पासाईया दरिसणिज्जा अभिरूवा पडिरूवा । तस्स णं असोगवरपायवस्स उवरिं बहवे छत्ताइछत्ता पडागाइपडागा घंटाजुयला चामरजुयला उप्पलहत्थगा पउमहत्थगा कुमुयहत्थगा णलिणहत्थगा सुभगहत्थगा [२]सोगंधियहत्थगा पोंडरियहत्थगा महापोंडरियहत्थगा सयपत्तहत्थगा सहस्सपत्तहत्थगा

१. द्रष्टव्यम् औप. सू. ८-१३ ॥ २. सोगंधह० BJ खं. ॥

सव्वरयणामया अच्छा जाव पडिरूवा । तस्स णं असोगवरपायवस्स हेट्ठा एत्थ णं महं एगे पुढविसिलापट्टए पन्नत्ते इसिं खंधसमल्लीणे विक्खंभायामसुप्पमाणे किण्हे अंजणगघण-कुवलय-हलधरकोसेज्जसरिसे आगासकेसकज्जलकक्केयण-इंदनीलअयसिकुसुमप्पगासे, भिंगं-जणभंगभेयरिट्ठगगुलियगवलाइरेगे भमरनिकुरुंबभूते, जंबूफल-असण-कुसुम-सणबंधण-नीलुप्पल-पत्तणिगर-मरगयासासग-णयणकीयासिवन्ननिद्धे घणे अज्झुसिरे रूवगपडिरूवग-दरिसणिज्जे, आयंसगतलोवमे सुरम्मे, सीहासणसंठिते सुरूवे, मुत्ताजालखइयंतकम्मे आइणग-रूय-बूर-नवणीय-तूलफासे सव्वरयणामए अच्छे जाव पडिरूवे" [औप. सू. ८-१३] इति ।

अस्य व्याख्या-'तस्स णमिति' पूर्ववत् वनखण्डस्य बहुमध्यदेशभागे 'अत्र' एतस्मिन् प्रदेशे महान् एकोऽशोकवरपादपः प्रज्ञप्तस्तीर्थकरगणधरैः, स च किम्भूत इत्याह-'जाव पडिरूवे' अत्र यावच्छब्देन ग्रन्थान्तरप्रसिद्धं विशेषणजातं सूचितं, तच्चेदं-'दुरुग्गयकन्दमूल-वट्ट-लट्ठसंधि-असिलिट्ठे घण-मसिण-सिणिद्ध-अणुपुव्विसुजायणिरुवहतोव्विद्धपवरखंधी अणे-गणरपवरभुयअगेज्झे कुसुमभरसमोणमंतपत्तलविसालसाले महुकरि-भमरगणगुमुगुमाइय-णिलिंतउड्डेंतसस्सिरीए णाणासउणगणमिहुणसुमहुरकण्णसुहपलत्तसद्दमहुरे कुस-विकुसविसुद्ध-रुक्खमूले पासाईए दरिसणिज्जे अभिरूवे पडिरूवे' तत्र दूरमुत्-प्राबल्येन गतं कन्दस्याधस्तात् मूलं यस्य स दूरोद्गतकन्दमूलस्तथा वृत्तो-वृत्तभावेन परिणतः, एवं नाम सर्वासु दिक्षु विदिक्षु च शाखाभिः प्रशाखाभिश्च प्रसृतो यथा वर्तुलः प्रतिभासते इति, तथा लष्टाः-मनोज्ञाः सन्धयः-शाखागता यस्य स लष्टसन्धिस्तथा अश्लिष्टः-अन्यैः पादपैः सहाऽसम्पृक्तो विविक्त इत्यर्थः, ततो विशेषणसमासः, स च पदद्वयपदद्वयमीलनेनावसेयो, बहूनां पदानां विशेषणसमासानभ्युपगमात्, तथा घनो-निबिडो मसृणः-कोमलत्वक् न कर्कशस्पर्शः, स्निग्धः-शुभकान्तिः, आनुपूर्व्या-मूलादिपरिपाट्या सुष्ठु जन्मदोषरहितं यथा भवति एवं जात आनुपूर्वीसुजातः, तथा निरुपहतः-उपदेहिकाद्युपद्रवरहित उद्विद्धः-उच्चः प्रवरः-प्रधानः स्कन्धो यस्य स घनमसृणस्निग्धानुपूर्वीसुजातनिरुपहतोद्विद्धप्रवरस्कन्धः, तथा अनेकस्य नरस्य-मनुष्यस्य ये प्रवराः-प्रलम्बा भुजाः-बाहवस्तैरग्राह्यः-अपरिमेयो-ऽनेकनरप्रवरभुजाऽग्राह्यः, अनेकपुरुषव्यामैरप्यप्रतिमेयस्थौल्य इत्यर्थः, तथा कुसुमभरेण-पुष्पसम्भारेण सम्-ईषदवनमन्त्यः पत्रसमृद्धाः "पत्तसमिद्धं तिक्खं च पत्तलं" [ ] इति वचनाद्

१. °सिंग° बाबु औप. सूत्रे । 'शृङ्गभेदः महिषादिविषाणच्छेद' इति औप. सू. १३ वृत्तौ ॥ २. पत्तसमिद्धंति खंधपत्तलमिति -मु. । "पत्तसमिद्धं पत्तलं" **पाइअलच्छीनाममाला** अङ्क ३४८ । पत्तल-पडुवइया पत्तिसमिद्धं चेव तिक्खम्मि **देशीनाममाला** वर्ग ६ गा. १४ । इति G पृ. ११ टिप्पणे । तुला- चन्द्रप्र. टीका पृ. २ ।

विशाला-विस्तीर्णाः शालाः-शाखा यस्य स कुसुमभरसमवनमत्पत्रलविशालशालः, तथा मधुकरीणां भ्रमराणां च ये गुणा[१] 'गुमगुमायिता' गुमगुमायन्ति स्म, कर्म्मकर्तृत्वात्कर्त्तरि क्तप्रत्ययः, गुमगुमेति शब्दं कृतवन्तः सन्त इत्यर्थः, निलीयमानाः-आश्रयन्त उड्डीयमानाः-तत्प्रत्यासन्नमाकाशे परिभ्रमन्तस्तैः सश्रीको मधुकरीभ्रमरगणगुमगुमायितनिलीयमानोड्डीयमानसश्रीकः, तथा नानाजातीयानां शकुनगणानां यानि मिथुनानि-स्त्रीपुंसयुग्मानि तेषां प्रमोदवशतो यानि परस्परसुमधुराण्यत एव कर्ण्णसुखानि-कर्णसुखदायकानि प्रलप्तानि-भाषणानि, शकुनगणानां हि स्वेच्छया क्रीडतां प्रमोदभरवशतो यानि भाषणानि तानि प्रलप्तानीति प्रसिद्धानि ततः 'पलत्ते'त्युक्तं, तेषां यः शब्दो-ध्वनिस्तेन मधुरो नानाशकुनगणमिथुनसुमधुरकर्णसुखप्रलप्तशब्दमधुरः, तथा कुशा-दर्भादयो विकुशा-बल्वजादयः[२] तैर्विशुद्धं-रहितं वृक्षस्य-सकलस्याशोकपादपस्य, इह मूलं शाखादीनामपि आदिमो भागो लक्षणया प्रोच्यते, यथा शाखामूलमिदं प्रशाखामूलमिदमित्यादि, ततः सकलाशोकपादपसत्कमूलप्रतिपत्तये वृक्षग्रहणं, मूलं यस्य स कुश-विकुशविशुद्धवृक्षमूलः, यश्चैवंविधः स द्रष्टृणां चित्तसन्तोषाय भवति, तत आह-प्रासादीयः-प्रसादाय-चित्तसन्तोषाय हितस्तदुत्पादकत्वात् प्रासादीय अत एव दर्शनीयो-द्रष्टुं योग्यः, कस्मादित्याह-'अभिरूपो' द्रष्टारं द्रष्टारं प्रत्यभिमुखं न कस्यचिद्विरागहेतू रूपम्-आकारो यस्यासावभिरूपः, एवंरूपोऽपि कुतः ? इत्याह-प्रतिरूपः-प्रतिविशिष्टं सकलजगदसाधारणं रूपं यस्य स प्रतिरूपः ।

'से णं असोगवरपायवे' इत्यादि 'जाव नंदिरुक्खेहिं' इत्यत्र यावच्छब्दकरणात्, 'लउएहिं छत्तोवगेहिं सिरीसेहिं सत्तवण्णेहिं लोद्धेहिं दधिवन्नेहिं चंदणेहिं अज्जुणेहिं नीवेहिं[३] कयंबेहिं फणसेहिं दालिमेहिं सालेहिं तालेहिं तमालेहिं पियालेहिं पियंगुहिं रायरुक्खेहिं नंदिरुक्खेहिं' इति परिग्रहः, एते च[४] लवक-च्छत्रोपग-शिरीष-सप्तपर्ण-दधिपर्ण-लुब्धक-धव-चन्दना-ऽर्जुन-नीप-कदम्ब-फनस-दाडिम-[साल]ताल-तमाल-प्रियाल-प्रियङ्गु-राजवृक्ष-नन्दिवृक्षाः प्रायः सुप्रसिद्धाः । 'ते णं तिलगा जाव नंदिरुक्खा कुस-विकुसे'त्यादि ते तिलका यावन्नन्दिवृक्षाः कुश-विकुशविशुद्धवृक्षमूलाः, अत्र व्याख्या पूर्ववत् । 'मूलवन्तः' मूलानि प्रभूतानि दूरावगाढानि [च] सन्त्येषामिति मूलवन्तः, कन्द एषामस्तीति कन्दवन्तः, यावच्छब्दकरणात् खंन्धिमन्तो[५] तयामन्तो सालमन्तो पवालमन्तो पत्तमंतो पुप्फमंतो फलमंतो बीयमंतो अणुपुव्विंसुजायरुइलवट्टभावपरिणया[६] एगखंधा अणेगसाहप्पसाहविडिमा अणेगनर-

१. गुणा-B खं. ॥ २. वल्वजादयाः-मु. । वच्चकादयाः-BJ खं. ॥ ३. नीमेहि-BJ ॥ ४. च तिलक-लवक० G॥ ५. BJ खं G । सन्धि० मु. ॥ ६. ०व्व० इति औप. ॥

वामसुप्पसारियअगिज्झघणविपुलवट्टखंधा[१] अच्छिद्दपत्ता अविरलपत्ता अवाईणपत्ता अणईइपत्ता णिद्धूयजरढपंडुपत्ता नवहरियभिसंतपत्तभारंधयारगंभीरदरिसणिज्जा उवनिग्गयनवतरुणपत्त-पल्लवकोमलउज्जलचलंतकिसलयसुकुमालपवालसोभियवरंकुरग्गसिहरा निच्चं कुसुमिया निच्चं मउलिया निच्चं लवइया निच्चं थवइया निच्चं गुलइया निच्चं गोच्छिया निच्चं जमलिया निच्चं जुयलिया णिच्चं [वि]णमिया निच्चं पणमिया [निच्चं सुविभत्त पडिमंजरि-वडिंसयधरा] निच्चं कुसुमिय-मउलिय-लवइय-थवइय-गुलइय-गुच्छिय-जमलिय-जुयलिय-विणमिय-पणमिय-सुविभत्तपडिमंजरिवडिंसयधरा सुक-बरहिण-मयणसलागा-कोइल-कोरुंगक[२]-भिंगारक-कोंडलक-जीवंजीवक-नंदीमुख-कविल-पिंगलक्खग-कारंडव-चक्कवाक-कलहंस-सारस,अणेगसउणगणमिहुणविअरियसद्दोन्नइयमहुरसरणाइया[३] सुरम्मा सुपिंडियदरियभमर-महु-यरिपहकरपरिल्लेंतमत्तछप्पयकुसुमासवलोलमहुरगुमगुमंतगुंजंतदेसभागा[४] अब्भिंतरपुप्फफला बाहिरपत्तोच्छण्णा पत्तेहि य पुप्फेहि य उच्छन्नपलिच्छिन्ना निरोगका साउफला अकंटका णाणाविहगुच्छगुम्ममंडवगसोहिया विचित्तसुहकेउपभूया (बहुला) वाविपुक्खरिणिदीहियासु य सुनिवेसियरम्मजालघरगा पिंडिमनीहारिमसुगंधिसुहसुरभिमणहरं च महया गंधद्धणिं मुंचंता सुहसेउ-केतुबहुला अणेग[रह]सगड-जाण-जुग्ग-गिल्लि-थिल्लि-सीय-संदमाणि-पडिमोयगा पासा-इया दरिसणिज्जा अभिरूपा पडिरूवा' [औपपातिक सू. ५-७] इति परिग्रहः ।

अस्य व्याख्या-इह मूलानि सुप्रतीतानि यानि कन्दस्याधः प्रसरन्ति, कन्दास्तेषां मूलानामुपरिवर्तिनस्ते अपि प्रतीताः, खन्धः-थुडं, त्वक्-छल्ली, शालाः-शाखाः, प्रवालः-पल्लवाङ्कुरः, पत्र-पुष्प-फल-बीजानि सुप्रसिद्धानि, सर्वत्राऽतिशयेन क्वचिद् भूम्नि वा मतुप्प्रत्ययः, 'अणुपुव्वसुजायरुचिलवट्टभावपरिणया' इति आनुपूर्व्या-मूलादिपरिपाट्या सुष्ठु जाता आनुपूर्वीसुजाता रुचिराः-स्निग्धतया देदीप्यमानच्छविमन्तः, तथा वृत्तभावेन परिणता वृत्तभावपरिणताः । किमुक्तं भवति ?-एवं नाम सर्वासु दिक्षु विदिक्षु च शाखाभिः प्रशाखाभिश्च प्रसृता यथा वर्त्तुलाः संजाता इति, आनुपूर्वीसुजाताश्च ते रुचिराश्च आनुपूर्वी-सुजातरुचिरास्ते च ते वृत्तभावपरिणताश्च आनुपूर्वीसुजातरुचिरवृत्तभावपरिणताः ते तथा, तिलकादयः पादपाः प्रत्येकमेकस्कन्धाः, प्राकृते चास्य स्त्रीत्वमिति 'एगखंधी'[५] इति सूत्रपाठः, तथा अनेकाभिः शाखाभिः प्रशाखाभिश्च मध्यभागे विटपो-विस्तारो यैषां ते तथा, तिर्यग् बाहुद्वयं प्रसारणप्रमाणो व्यामः, व्यामीयन्ते-परिच्छिद्यन्ते रज्ज्वाद्यनेनेति व्यामः, बहुलवचनात्

---

१. ०धी-B खं. ॥ २.कोहंगक-इति औपपातिके । केरककोभरकभिंगार-J ॥ ३. JBG । विरइय-मु. । ४. JB । ०लिंत० औप. । ०ल्लव० मु. ॥ ५. JBG ०धा -मु. ॥

"**करणे क्वचिद्**" इति [मलय.आ. १०/४५] 'ड'प्रत्ययः, अनेकैर्नरव्यामैः-पुरुषव्यामैः सुप्रसारितैरग्राह्यः अप्रमेयो घनो-निबिडो विपुलो-विस्तीर्णो वृत्तः[१] स्कन्धो येषां ते अनेकनरव्यामसुप्रसारिताऽग्राह्यघनविपुलवृत्तस्कन्धाः, तथा अच्छिद्राणि पत्राणि येषां ते अच्छिद्रपत्राः, किमुक्तं भवति ?- न तेषां पत्रेषु वातदोषतः कालदोषतो वा गडुरिकादिः ईतिः[२] उपजातो येन तेषु पत्रेषु छिद्राण्यभविष्यन्नित्यच्छिद्रपत्राः, अथवा एवं नामान्योऽन्यं शाखाप्रशाखानुप्रवेशात्पत्राणि पत्राणामुपरि जातानि, येन मनागप्यपान्तरालरूपं छिद्रं नोपलक्ष्यते इति, तथा चाह-'अविरलपत्ता' इति, अत्र हेतौ प्रथमा, ततोऽयमर्थः-यतः अविरलपत्रा अतोऽच्छिद्रपत्राः, अविरलपत्रा इत्यपि कुत इत्याह-अवातीनपत्रा वातीनानि-वातोपहतानि, वातेन पातितानीत्यर्थः, न वातीनानि अवातीनानि पत्राणि येषां ते तथा, किमुक्तं भवति ?- न प्रबलेन खरपरुषेण वातेन तेषां पत्राणि भूमौ निपात्यन्ते, ततोऽवातीनपत्रत्वादविरलपत्रा इति अच्छिद्रपत्रा इति, अच्छिद्रपत्रा इत्यत्र प्रथमव्याख्यानपक्षमधिकृत्य हेतुमाह-'अणईइपत्ता' न विद्यते ईतिः-गडुरिकादिरूपा येषां तान्यनीतिनि, अनीतीनि पत्राणि येषां ते अनीतिपत्राः, अनीतिपत्रत्वाच्चाच्छिद्रपत्राः, 'निद्धूयजरढपंडुपत्ता' इति निर्द्धूतानि-अपनीतानि जरठानि पाण्डुपत्राणि येभ्यस्ते निर्द्धूतजरठपाण्डुपत्राः, किमुक्तं भवति ?-यानि वृक्षस्थानि जरठानि पाण्डुपत्राणि वातेन निर्द्धूय निर्द्धूय भूमौ पातितानि, भूमेरपि च प्रायो निर्द्धूय निर्द्धूयान्यत्रापसारितानीति, 'नवहरियभिसंतपत्तभारंधयारगंभीरदरिसणिज्जा' इति नवेन-प्रत्यग्रेण हरितेन-नीलेन भासमानेन स्निग्धत्वेन वा दीप्यमानेन पत्रभारेण-दलसञ्चयेन यो जातोऽन्धकारस्तेन गम्भीरा-अलब्धमध्यभागाः सन्तो दर्शनीया नवहरितभासमानपत्र-भारान्धकारगम्भीरदर्शनीयाः, तथा उपनिर्गतैः, निरन्तरविनिर्गतैरिति भावः, नवतरुणपत्र-पल्लवैस्तथा कोमलैः-मनोज्ञैरुज्ज्वलैः-शुद्धैश्चलद्भिः-ईषत्कम्पमानैः किशलयैः-अवस्थाविशेषो-पेतैः पल्लवविशेषैस्तथा सुकुमारैः प्रवालैः-पल्लवाङ्कुरैः शोभितानि वराङ्कुराणि-वराङ्कुरोपेतानि अग्रशिखराणि येषां ते उपविनिर्गतनवतरुणपत्रपल्लवकोमलोज्ज्वलचलत्किशलयसुकुमाल-प्रवालशोभितवराङ्कुराग्रशिखराः, इहाऽङ्कुर-प्रवालयोः कालकृताऽवस्थाविशेषाद्विशेषो भाव-नीयः, तथा नित्यं-सर्वकालं, षट्स्वपि ऋतुषु इत्यर्थः, 'कुसुमिताः' कुसुमानि-पुष्पाणि सञ्जातान्येषामिति कुसुमिताः, तारकादिदर्शनादितप्रत्ययः, 'निच्चं मालइया' (मउलिया) इति नित्यं-सर्वकालं मुकुलितानि, मुकुलानि नाम कुड्मलानि कलिका इत्यर्थः, 'निच्चं लवइया'

---

१. JBK । वृक्षः स्क०-मु. ॥ २. "अतिवृष्टि-अनावृष्टिप्रमुखोपद्रवविशेषः ईतिः" इति G पृ. १३ टिप्पणे ॥

इति पल्लविताः, नित्यं 'थवइया' इति स्तबकिताः स्तबकभारवन्त इत्यर्थः, नित्यं 'गुलइया' इति गुल्मिताः, स्तबक-गुल्मौ गुच्छविशेषौ, नित्यं 'गोच्छिता' गोच्छवन्तः, नित्यं 'जमलिता' यमलं नाम समानजातीययोर्युग्मं तत् संज्ञातमेषामिति यमलिताः, नित्यं युगलिता युगलं-सजातीय-विजातीययोर्द्वन्द्वं तदेषां सञ्जातमिति युगलिताः, तथा नित्यं-सर्वकालं फलभरेण विनताः-ईषन्नताः, तथा नित्यं महता फलभरेण प्रकर्षेणातिदूरं नताः प्रणताः, तथा नित्यं-सर्वकालं सुविभक्तः-सुविच्छित्तिकः प्रतिविशिष्टो मञ्जरीरूपो योऽवतंसकस्तद्धरास्तद्धारिणः, एवं सर्वोऽपि कुसुमितत्वादिको धर्म्म एकैकस्य वृक्षस्योक्तः । साम्प्रतं केषाञ्चिद्वृक्षाणां सकलकुसुमितत्वादिधर्मप्रतिपादनार्थमाह-'निच्चं कुसुमिय-मउलियेत्यादि', किमुक्तं भवति ? केचित्कुसुमिताद्यैकैकगुणयुक्ताः केचित्समस्तकुसुमितादिगुणयुक्ता इति अत एव कुसुमिय-मालइय-मउलियेत्यादिपदेषु कर्मधारयः, तथा शुक-बर्हिण-मदनशालिका-कोकिला-कोरक-[१]कोभव-भिङ्गारक-कोण्डलक-जीवंजीवक-नन्दीमुख-कपिल-पिङ्गलाक्ष-कारण्डव-चक्रवाक-कलहंस-सारसाख्यानामनेकेषां शकुनगणानां मिथुनैः-स्त्रीपुंसयुग्मैर्यद्विचरितम्-इतस्ततो गमनं यच्च शब्दोन्नतिकम्-उन्नतशब्दकं मधुरस्वरं च नादितं-लपितं येषु ते तथा, अत एव सुरम्याः-सुष्ठु रमणीयाः, अत्र शुकाः-कीराः, बर्हिणो-मयूराः, मदनशालिकाः-शारिकाः, कोकिलाः-पिकाः, चक्रवाक-कलहंस-सारसाः प्रतीताः, शेषास्तु जीवविशेषा लोकतो वेदितव्याः, तथा सम्पिण्डिताः-एकत्र पिण्डीभूताः दृप्ताः-मदोन्मत्ततया दर्पाध्माता भ्रमर-मधुकरीणां पहकराः-सङ्घाताः "[२]**पहकर ओरोह संघाया**" इति **देशीनाममाला**वचनाद् यत्र ते सम्पिण्डितदृप्तभ्रमर-मधुकरीपहकराः, तथा परिलीयमानाः अन्यत आगत्याश्रयन्तो मत्ताः षट्पदाः कुसुमासवलोलाः-किञ्चल्कपानलम्पटा मधुरं गुमगुमायमाना गुञ्जन्तश्च-शब्दविशेषं च विदधाना देशभागेषु येषां ते परिलीयमानमत्तषट्पदकुसुमासवलोलमधुरगुमगुमायमान-गुञ्जद्देशभागाः, गमकत्वादेवमपि समासः, ततो भूयः पूर्वपदेन सह विशेषणसमासः, तथा अभ्यन्तराणि-अभ्यन्तरभागवर्तीनि पुष्पाणि च फलानि च पुष्प-फलानि येषां ते तथा, 'बाहिर[३]पत्तच्छन्ना' इति बहिस्तः पत्रैश्छन्ना-व्याप्ता बहिःपत्रच्छन्नाः, तथा पत्रैश्च पुष्पैश्च

---

१. °कोभकभि° JB ॥ २. "आचार्यहेमचन्द्रविरचितायां देशीनाममालायां नैतद् वचनं दृश्यते । अत एतद् वचनं संभवेत् ततोऽपि प्राचीनतरायां कस्यांचिद् देशीनाममालायाम् । धनपाल-हेमचन्द्रनिर्मितयोः पाइअलच्छी-देशीनाममालयोः 'ओरोह' शब्दो न दृश्यते समूहवाची अतः अस्मिन् वचने 'पहकर-पयर-ओह-'संघाया' इति पाठः साधुतरः स्यात् । "पहयरो गणो पयरो । ओहो निवहो संघाओ" - पाइअल० अं० १८ । "पग्गेज्ज-पहयराणियरे"-दे० ना० वर्ग ६ गा० १५ ।" इति G पृ. १६ टिप्पणे ॥ ३. JBK । °पत्तो° -मु. G ॥

अवच्छन्न-परिच्छन्नाः-अत्यन्तमाच्छादिताः, तथा नीरोगकाः-रोगवर्ज्जिता अकण्टकाः-कण्टकरहिताः, न तेषां प्रत्यासन्ना बब्बूलादिवृक्षाः सन्तीति भावः, तथा स्वादूनि फलानि येषां ते स्वादुफलाः, तथा स्निग्धानि फलानि येषां ते स्निग्धफलाः, तथा प्रत्यासन्नैर्नानाविधैः-नानाप्रकारैर्गुच्छैः-वृन्ताकीप्रभृतिभिर्गुल्मैः-नवमालिकादिभिर्मण्डपकैः शोभिता नानाविधगुच्छ-गुल्ममण्डपकशोभिताः, तथा विचित्रैः-नानाप्रकारैः शुभैः-मण्डनभूतैः केतुभिः-ध्वजैर्बहुला- 5
व्याप्ता विचित्र-शुभकेतुबहुलाः, तथा 'वावि-पुक्खरिणी-दीहियासु य सुनिवेसियरम्मजाल-घरगा' वाप्यश्चतुरस्राकारास्ता एव वृत्ताः पुष्करिण्यः, यदि वा पुष्कराणि वर्त्तन्ते यासु ताः पुष्करिण्यः, दीर्घिका-ऋजुसारिण्यः, वापीषु पुष्करिणीषु दीर्घिकासु च सुष्ठु निवेशितानि रम्याणि जालगृहकाणि येषु ते वापी-पुष्करिणी-दीर्घिकासु सुनिवेशितरम्य-जालगृहकाः, तथा पिण्डिमा-पिण्डिता सती निर्हारिमा-दूरं विनिर्गच्छन्ती पिण्डिमनिर्हारिमा तां सुगन्धि- 10
सुगन्धिकां शुभसुरभिभ्यो गन्धान्तरेभ्यः सकाशात् मनोहरा शुभसुरभिमनोहरा तां च, 'महया' इति प्राकृतत्वात् द्वितीयार्थे तृतीया, महतीमित्यर्थः, गन्धघ्राणिं यावद्भिर्गन्धपुद्गलैर्गन्धविषये गन्धघ्राणिरुपजायते तावती गन्धपुद्गलसंहतिरुपचारात् गन्धघ्राणिरित्युच्यते, तां निरन्तरं मुञ्चन्तः, तथा 'सुहसेउकेउबहुला' इति शुभाः-प्रधाना इति सेतवो-मार्गा आलवालपाल्यो वा केतवो-ध्वजा बहुला-बहवो येषां ते तथा, 'अणेगरह-सगड-जाण-जुग्ग-गिल्लि[1]-थिल्लि-सिविय- 15
संदमाणियपडिमोयणा' इति, रथा द्विविधाः-क्रीडारथाः सङ्ग्रामरथाश्च, शकटानि प्रतीतानि, यानानि-सामान्यतः शेषाणि वाहनानि युग्यानि-गोल्लविषयप्रसिद्धानि द्विहस्तप्रमाणानि वेदिकोप-शोभितानि जम्पानानि शिबिकाः-कूटाकारेणाच्छादिता जम्पानविशेषाः स्यन्दमानिकाः[2]-पुरुषप्रमाणजम्पानविशेषाः, अनेकेषां रथशकटादीनां मध्येऽ[3]तिविस्तीर्णत्वात् प्रतिमोचनं येषु ते तथा, 'पासादीया' इत्यादिपदचतुष्टयं प्राग्वत् । 20

'ते णं तिलगा' इत्यादि पाठसिद्धं, नवरं 'नागलयाहिं' ति नागाः-द्रुमविशेषाः 'वणलयाहिं' ति वना अपि द्रुमविशेषाः, द्रुमाणां च लतात्वमेकशाखाकानां द्रष्टव्यं, ये हि द्रुमा ऊर्ध्वगतैकशाखा न तु दिग्विदिक्प्रसृतबहुशाखास्ते लता इति प्रसिद्धाः, 'निच्चं कुसुमियाओ जाव पडिरूवाओ' इत्यत्र यावच्छब्दकरणात् 'निच्चं कुसुमियाओ निच्चं मालइयाओ निच्चं लवइयाओ निच्चं थवइयाओ निच्चं गुच्छियाओ निच्चं गुम्मियाओ निच्चं 25

---

१. "गिल्लि=अंबाडी, थिल्लि=बे घोडानी बगी ? थिल्लि=ठेला गाडी ?" इति G पृ. १७-१८ टिप्पणे ॥
२. स्पन्द° G ॥ ३. अधोऽति° G । °मधेवि° K ॥

जमलियाओ निच्चं जुयलियाओ निच्चं विणमियाओ निच्चं पणमियाओ निच्चं सुविभत्त-पडिमंजरिवडिंसगधरीओ निच्चं कुसुमियमालइयथवइयलवइयगुम्मियजमलियजुयलिय-गुच्छियविणमियपणमियसुविभत्तपडिमंजरिवडिंसगधरीओ संपिंडियदरियभमर-महुयरिपह-करपरिल्लेंतमत्तछप्पयकुसुमासवलोलमहुरगुमगुमेंतगुंजंतदेसभागाओ पासाइयाओ दरिसणि-ज्जाओ अभिरूवाओ पडिरूवाओ इति' एतच्च समस्तं प्राग्वद् व्याख्येयम् ।

तस्य 'ण'मिति प्राग्वत्, अशोकवरपादपस्य उपरि बहूनि अष्टावष्टौ[१] मङ्गलकानि प्रज्ञप्तानि, तद्यथा-स्वस्तिकः, श्रीवृक्षो[२](वत्सो), 'नंदियावत्ते' इति नन्द्यावर्त्तः[३], क्वचिद् नन्दावत्त इति पाठः, तत्र नन्दावर्त्त इति शब्दसंस्कारः, वर्द्धमानकं[४]-शरावसम्पुटं, भद्रासनं, कलशो, मत्स्ययुग्मं, दर्पणः, एतानि चाष्टावपि मङ्गलकानि सर्वरत्नमयानि अच्छानि-आकाशस्फटिकवदतीव स्वच्छानि श्लक्ष्णानि-श्लक्ष्णपुद्गलस्कन्धनिष्पन्नानि श्लक्ष्णतन्तु निष्पन्नपटवद् लण्हानि-मसृणानि घुण्टितपटवद् 'घट्ठाइं'ति घृष्टानीव घृष्टानि खरशाणया पाषाणप्रतिमावद् 'मट्ठाइं'ति मृष्टानीव मृष्टानि, सुकुमारशाणया पाषाणप्रतिमेव, अत एव नीरजांसि-स्वाभाविकरजोरहितत्वाद्, निर्मलानि-आगन्तुकमलाभावात्, निष्पङ्कानि-कलङ्क-विकलानि कर्दमरहितानि वा, निष्कंकटच्छाय इति निष्कङ्कटा-निष्कवचा निरावरणा निरुपघातेति भावार्थः, छाया-दीप्तिर्येषां तानि निष्कङ्कटच्छायानि 'सप्रभाणि' स्वरूपतः प्रभावन्ति, 'समरीचीनि' बहिर्विनिर्गतकिरणजालानि, अत एव सोद्योतानि-बहिर्व्यवस्थित-वस्तुस्तोमप्रकाशकराणि, 'पासाईया' इत्यादिपदचतुष्टयव्याख्या पूर्ववत् ।

'तस्स णमि'त्यादि, तस्य 'ण'मिति प्राग्वद्, अशोकवरपादपस्योपरि बहवः कृष्ण-चामरध्वजाः, चामराणि च ध्वजाश्च चामरध्वजाः, कृष्णाश्च ते चामरध्वजाश्च कृष्णचामर-ध्वजाः, एवं नीलचामरध्वजाः, लोहितचामरध्वजाः, हारिद्रचामरध्वजाः, शुक्लचामरध्वजाः, एते च कथंभूताः इत्याह-अच्छाः-स्फटिकवदतिनिर्मलाः, श्लक्ष्णाः-श्लक्ष्णपुद्गलस्कन्ध-निष्पन्नाः, 'रूप्पपट्टा' इति रूप्यो-रूप्यमयो वज्रमयस्य दण्डस्योपरि पट्टो येषां ते रूप्यपट्टाः 'वइरदण्डा'[५] इति वज्रो-वज्ररत्नमयो दण्डो रूप्यपट्टमध्यवर्ती येषां ते वज्रदण्डाः, तथा जलजानामिव-जलजकुसुमानां पद्मादीनामिवाऽमलो गन्धो येषां ते जलजाऽमलगन्धकाः,

१. "अष्टौ. अष्टौ" इति वीप्साकरणात् प्रत्येकं ते अष्टौ इति वृद्धाः । अन्ये तु अष्टौ इति संख्या, अष्टमङ्गलकानि इति च संज्ञा "इति॰ औप॰ वृ. पृ. १७ ॥ २. "श्रिया युक्तो वत्सो वक्षः अनेन श्रीवत्सः रोमावर्तविशेषः" इति अभिधानचिं० २/१३६ ॥ ३. "नन्द्यावर्तः प्रतिदिग्नवकोणः स्वस्तिकविशेषः रूढिगम्यः" इति औप. वृत्तिः पृ. १७ ॥ ४. "वर्धमानकम् शरावं, पुरुषारूढः पुरुषः इत्यन्ये" इति औप. वृ. पृ. १७ ॥ ५. वइरामयदण्डा-इति औप. ॥

अत एव सुरम्याः-अतिशयेन रमणीयाः 'पासाईया' इत्यादि पूर्ववत्, तस्स णमिति प्राग्वत्, अशोकवरपादपस्योपरि बहूनि छत्रातिच्छत्राणि-छत्रात्-लोकप्रसिद्धादेकसङ्ख्याकादतिशायीनि-छत्राणि उपर्यधोभागेन द्विसङ्ख्यानि त्रिसङ्ख्यानि वा छत्राणि छत्रातिच्छत्राणि, तथा बह्व्यः 'पडागाइपडागा' इति पताकाभ्यो लोकप्रसिद्धाभ्योऽतिशायिन्यः पताकाः पताकाऽतिपताकाः, बहूनि तेष्वेव छत्रातिच्छत्रादिषु घण्टायुगलानि, चामरयुगलानि, तथा तत्र तत्र प्रदेशे उत्पलहस्तकाः-उत्पलाख्या जलजकुसुमसङ्घातविशेषाः, एवं पद्महस्तकाः, कुमुदहस्तकाः, नलिनहस्तकाः, सुभगहस्तका, सौगन्धिकहस्तकाः, पुण्डरीकहस्तका, महापुण्डरीकहस्तकाः, शतपत्रहस्तकाः, सहस्रपत्रहस्तकाः ।

उत्पलं-गर्दभकं, पद्मं-सूर्यविकाशि पङ्कजं, कुमुदं-कैरवं, नलिनम्-ईषद्रक्तं पद्मं, सुभगं-पद्मविशेषः, सौगन्धिकं-कल्हारं, पुण्डरीकं-श्वेताम्बुजं, तदेवातिविशालं महापुण्डरीकं, शतपत्र-सहस्रपत्रे पत्रसङ्ख्याविशेषावच्छिन्नौ पद्मविशेषौ, एते च छत्रातिच्छत्रादयः सर्वेऽपि सर्वरत्नमयाः-सर्वात्मना रत्नमयाः, 'अच्छा सण्हा' इत्यादि विशेषणजातं पूर्ववत् ।

'तस्स ण'मित्यादि, तस्य 'ण'मिति प्राग्वत्, अशोकवरपादपस्याधस्तात्, 'एत्थ ण'मिति अशोकवरपादपस्य यदधो अत्र 'ण'मिति पूर्ववद् एको महान् पृथ्वीशिलापट्टकः प्रज्ञप्तः, कथम्भूत इत्याह-'इसिं खंधा समल्लीणे' इत्यादि, इह स्कन्धः स्थुडमित्युच्यते, तस्याऽशोकवरपादपस्य[1] यत् स्थुडं तद्[2] ईषद्-मनाक् सम्यग् लीनस्तदासन्न इत्यर्थः, 'विक्खम्भा-ऽऽयामसुप्पमाणे' इति, विष्कम्भेनाऽऽयामेन च शोभनम्-औचित्यानतिवर्ति प्रमाणं यस्य स विष्कम्भाऽऽयामसुप्रमाणः, कृष्णः, कृष्णत्वमेव निरूपयति-'अंजणग-घण-कुवलय-हलधरकोसेज्जसरिसे' अञ्जनको-वनस्पतिविशेषः, घनो-मेघः, कुवलयं-नीलोत्पलं हलधरकौशेयं-बलदेववस्त्रं, तैः सदृशः-समानवर्णः, 'आगास-केस-कज्जल-कक्केयण-इंदनील-अयसिकुसुमप्पगासे' आकाशं धूलीमेघादिविरहितं, केशाः-शिरसिजाः, कज्जलं-प्रतीतं, कर्केतनेन्द्रनीलौ-मणिविशेषौ, अतसीकुसुमं प्रसिद्धम्, एतेषामिव प्रकाशो-दीप्तिर्यस्य स तथा, 'भिंगंजणभंगभेय[3]-रिट्ठग-नीलगुलिय-गवलाइरेगे' इति भृङ्गः-चतुरिन्द्रियः पक्षिविशेषः, अञ्जनं-सौवीराञ्जनं तस्य भङ्गेन-विच्छित्त्या भेदः-छेदोऽञ्जनभङ्गभेदः, रिष्टको-रत्नविशेषः, नीलगुटिकाः-प्रतीताः, गवलं-माहिषं शृङ्गं, तेभ्योऽपि कृष्णत्वेनातिरेको यस्य स तथा, 'भमरनिकुरम्बभूए' इति अत्र भूतशब्द औपम्यवाची, यथाऽयं लाटदेशः सुरलोकभूतः-

१. यस्याऽशोकवरपादयस्य यत् ईषद् - JBK ॥ २. तद् - JB नास्ति ॥ ३. सिंगभेद-इति औप. सूत्रे ।

सुरलोकोपम इत्यर्थः, ततोऽयमर्थः-भ्रमरनिकुरम्बोपमः, 'जंबूफल-असणकुसुमबंधण-नीलुप्पलपत्तनिकर-मरगय-आसासग-नयणकीयासिवन्ने' जम्बूफलानि प्रतीतानि, असनकुसुम-बन्धनम्-असनपुष्पवृन्तं, नीलोत्पलपत्रनिकरो मरकतमणिः प्रतीतः, आसासकः-बीयकाभिधानो वृक्षः, नयनकीकः-नेत्रमध्यतारा, असि-खड्गं तेषामिव वर्णो यस्य स तथा, स्निग्धो न तु रूक्षः घनो-निबिडो न तु कोष्ठक इव मध्यशुषिरः, 'अज्झुसिरे' इति श्लक्ष्णशुषिररहितः, 'रूवगपडिरूवगदरिसणिज्जे' इति रूपकाणां यानि तत्र सङ्क्रान्तानि प्रतिरूपकाणि प्रतिबिम्बानि तैः दर्शनीयो रूपकप्रतिरूपकदर्शनीयः, 'आदर्शतलोपमः' आदर्शो-दर्प्पण-स्तस्य तलं तेन समतयोपमा यस्य स आदर्शतलोपमः, सुष्ठु मनांसि रमयतीति सुरम्यः "कृद्बहुलम्" [मलय. कृ. १/१२] इति वचनात् कर्त्तरि यप्रत्ययः, 'सिंहासणसंठिए' इति सिंहासनस्येव संस्थितं-संस्थानं यस्य स सिंहासनसंस्थितः, अत एव सुरूपः-शोभनं रूपम्-आकारो यस्य स सुरूपः, इतश्च सुरूपो यत आह-'मुत्ताजालखइयंतकम्मे' मुक्ताजालानि-मुक्ताफलसमूहाः खचितानि अन्तकर्मसु-प्रान्तप्रदेशेषु यस्य स मुक्ताजाल-खचितान्तकर्मा, 'आइणग-रूय-बूर-नवनीय-तूलफासे' आजिनकं-चर्म्ममयं वस्त्रं, रूतं-प्रतीतं, बूरो-वनस्पति-विशेषः, नवनीतं-म्रक्षणं, तूलम्-अर्कतूलं, तेषामिव कोमलतया स्पर्शो यस्य स आजिनक-रूत-बूर-नवनीत-तूलस्पर्शः, 'सव्वरयणामए' इत्यादिविशेषणकदम्बकं प्राग्वत् ॥ ३-४ ॥

सूत्र ५-६ [१]सेओ राया । धारिणी देवी । सामी समोसढे । परिसा निग्गया, [२]जाव [३]राया पज्जुवासइ ॥ ५-६ ॥

[५-६] **'सेओ राया धारिणी देवी जाव समोसरणं समत्त'**मिति तस्यां आमलकल्पायां नगर्यां **श्वेतो** नामा **राजा,** तस्य समस्तान्तःपुरप्रधाना भार्या सकलगुण-[४]धारणाद् **धारिणीनामदेवी,** 'जाव समोसरणं समत्त'मिति, यावच्छब्दकरणाद्राजवर्ण्णकः, देवीवर्ण्णकः, समवसरणं चौप[५]पातिकगमानुसारेण तावद्वक्तव्यं यावत्समवसरणं समाप्तं, तच्चैवं-'तत्थ णं आमलकप्पाए नयरीए सेओ नाम राजा होत्था, महयाहिमवंत-महंतमलय-मंदर-महिंदसारे अच्चंतविसु[६]द्धरायकुलवंसप्पसूए निरंतरं रायलक्खणविराइयंगमंगे बहुजण-बहुमाणपूइए सव्वगुणसमिद्धे खत्तिए मुइए मुद्धाभिसित्ते माउपिउसुजाए दयपत्ते सीमंकरे

---

१. सेणिए -भा. । सेणिओ-पा. १-३ । स्थानाङ्गे (८-६२१) प्रभुवीरहस्तदीक्षितनृपाष्टकमध्ये सेयस्याऽपि नाम वर्तते । स च आमलकप्पास्वामि इति तत्रैव वृत्तौ ॥ २. °या राया जाव प° LJBK ॥ ३. द्रष्टव्यं औपपातिकसूत्रे १४-७० ॥ ४. JB । धारिणी धा° मु. G ॥ ५. द्रष्टव्या औप. वृत्तिः पत्र २१ तः १३६ ॥ ६. °सुद्धदीहराय° औप. सू. १४ ॥

सीमंधरे खेमंकरे खेमंधरे मणुस्सिंदे जणवयपिया जणवयपाले जणवयपुरोहिए सेउकरे केउकरे नरपवरे पुरिसवरे पुरिससीहे पुरिसवग्घे पुरिसआसीविसे पुरिसवरपोंडरीए पुरिसवरगंधहत्थी अड्ढे दित्ते वित्ते वित्थिन्नविपुलभवण-सयणाऽऽसण-जाण-वाहणाइन्ने बहुधण-बहुजायरूव-रजए आओग-पओगसंपउत्ते विच्छड्डियपउरभत्तपाणे बहुदासी-दास-गो-महिस-गवेलप्पभुए पडिपुन्नजंत-कोस-कोट्ठागारा-ऽऽउहधरे [1]बलवं दुब्बलपच्चामित्ते ओहय- 5
कंटयं मलियकंटयं उद्धियकंटयं अप्पडिकंटयं ओहयसत्तुं निहयसत्तुं मलियसत्तुं उद्धियसत्तुं निज्जियसत्तुं पराइयसत्तुं ववगयदुब्भिक्खदोसमारि भयविप्पमुक्कं खेमं सिवं सुभिक्खं पसंतडिंबडमरं रज्जं पसासेमाणे विहरइ ।

तस्स णं सेयस्स रण्णो धारिणी नामं देवी होत्था सुकुमाल-पाणिपाया अहीण-पडि-पुण्णपंचिंदियसरीरा लक्खण-वंजण-गुणोववेया माणुम्माण-पमाण-पडिपुण्णसुजायसव्वंगसुंदरंगी 10
ससिसोमागार-कंत-पिय-दंसणा सुरूवा करयल-परिमिय-पसत्थ-तिवलिबलियमज्झा कुंडलुल्लिहिय-पीणगंडलेहा कोमुइय-रयणियर-विमल-पडिपुण्ण-सोमवयणा सिंगारागार-चारुवेसा संगय-गय-हसिय-भणिय-चिट्ठिय-विलास-ललिय-संलावनिउणजुत्तोवयारकुसला सुंदर-थण-जघण-वयण-कर-चरण-नयण-लायण्णविलासकलिया सेएण रण्णा सद्धिं अणुरत्ता अविरत्ता इट्ठे सद्द-फरिस-रस-रूव-गंधे पंचविहे माणुस्सए कामभोगे पच्चणुभवमाणा विहरइ' एष राजदेवीवर्ण्णकः । 15

अस्य व्याख्या-'महयाहिमवंतेति' महाहिमवान् हैमवतस्य क्षेत्रस्योत्तरतः सीमाकारी वर्षधरपर्वतः, मलयः-पर्वतविशेषः सुप्रतीतः, मन्दरो-मेरुः महेन्द्रः-शक्रादिको देवराजस्तद्वत् सारः-प्रधानो महाहिमवद्-महामलय-मन्दर-महेन्द्रसारः, तथा अत्यन्तविशुद्धे राजकुलवंशे प्रसूतोऽत्यन्तविशुद्धराजकुलवंशप्रसूतः, तथा 'निरन्तरं रायलक्खणविराइयंगमंगे' इति निरन्तरम्-अपलक्षणव्यवधानाभावेन राजलक्षणैः-राज्यसूचकैर्लक्षणैर्विराजितानि अङ्गमङ्गानि- 20
अङ्गप्रत्यङ्गानि यस्य स निरन्तरराजलक्षणविराजिताङ्गमङ्गः, तथा बहुभिर्जनैः बहुमानेन-अन्तरङ्गप्रीत्या पूजितो [2]बहुजनबहुमानपूजितः, कस्मादित्याह-'सव्वगुणसमिद्धे' सर्वैः शौर्योपशमादिभिर्गुणैः समृद्धः-स्फीतः सर्वगुणसमृद्धः, ततो बहुजनबहुमानपूजितः, गुणवत्सु प्रायः सर्वेषामपि बहुमानसम्भवात्, तथा 'खत्तिये' इति [3]क्षेत्रस्यापत्यं क्षत्रियः **'क्षत्राद्रिय'** : [सि.हे. ६-१-९३] इति 'इय'प्रत्ययः, अनेन नवमाष्टमादिनन्दवत् राजकुलवंशप्रसूतोऽपि न 25
हीनजातीयः, किन्तु उत्तमजातीयः इत्यावेदितम्, तथा '[4]मुदितः' सर्वकालं हर्षवान्,

१. JKG औप. । बहुतु० मु. ॥ २. बहुजन० JK नास्ति ॥ ३. क्षेत्रस्यापत्यं क्षित्रियः - JK ॥ ४. 'मुइए' त्ति निर्दोषमातृकः, यदाह- ''मुइओ जो होइ जोणिसुद्धो'' इति औपपातिकवृत्तिः सू. १४ ॥

प्रत्यनीकोपद्रवासम्भवात्, तदसम्भवश्च प्रत्यनीकानामेवाभावात्, तथा चाह-'मुद्धाभिसित्ते' प्रायः सर्वैरपि प्रत्यन्तराजैः प्रतापमसहमानैः 'नान्यथाऽस्माकं गतिः' इति परिभाव्य मूर्द्धभिः-मस्तकैरभिषिक्तः-पूजितो मूर्धाभिषिक्तः, तथा मातृपितृभ्यां सुजातो मातृपितृसुजातः, अनेन समस्तगर्भाधानप्रभृतिसम्भविदोषविकल इत्यावेदितः, तथा दयाप्राप्तः स्वभावतः शुद्धजीवद्रव्यत्वात्, तथा सेवागतानामपूर्वापूर्व्वनृपाणां सीमां-मर्यादां करोति यथा 'एवं वर्त्तितव्यमेवं न' इति सीमङ्करः, तथा पूर्वपुरुषपरम्परायातां स्वदेशप्रवर्त्तमानां सीमां-मर्यादां धारयति-पालयति न तु विलुम्पतीति सीमन्धरः, तथा क्षेमं-वशवर्त्तिनाम् उपद्रवाभावं करोति क्षेमङ्करः चौरादिसंहारात्, तथा तद् धारयति आरक्षकनियोजनात् क्षेमन्धरः, अत एव मनुष्येन्द्रः, तथा जनपदस्य पितेव जनपदपिता, कथं पितेव इत्यत आह-'जनपदपालः' जनपदं पालयतीति जनपदपालः, ततो भवति जनपदस्य पितेव, तथा जनपदस्य शान्तिकारितया पुरोहित इव जनपदपुरोहितः, तथा सेतुः-मार्गस्तं करोतीति सेतुकरः, मार्गदेशक इति भावः, केतुः-चिह्नं, तत्करोतीति केतुकरः, अद्भुतसंविधानकारीति भावः, तथा नरेषु-मनुष्येषु मध्ये प्रवरो-नरप्रवरः, स च सामान्यमनुष्यापेक्षयापि स्यादत आह-'पुरिसवरे' पुरुषेषु-पुरुषाभिमानेषु मध्ये वरः-प्रधान उत्तमपौरुषोपेतत्वादिति पुरुषवरः, यतः पुरुषः सिंह इवाऽप्रतिमल्लतया पुरुषसिंहः, तथा पुरुषो व्याघ्र इव शूरतया पुरुषव्याघ्रः, पुरुष आशीविष इव दोषविनाशनशीलतया पुरुषाशीविषः, पुरुषः वरपुण्डरीकमिवोत्तमतया भुवनसरोवरभूषकत्वात् पुरुषवरपुण्डरीकः, पुरुषः वरगन्धहस्तीव परानसहमानान् प्रतीति पुरुषवरगन्धहस्ती, ततो भवति पुरुषवरः, तथा आढ्यः-समृद्धः, दीप्तः शरीरत्वचा देदीप्यमानत्वाद् दृप्तो वा दृप्तारिमानमर्दनशीलत्वात्, अत एव वित्तो-जगत्प्रतीतः, यदुक्तम् आढ्यः इति तदेव सविस्तरमुपदर्शयति-'वित्थिण्णे'त्यादि, विस्तीर्णानि-विस्तारवन्ति विपुलानि-प्रभूतानि भवनानि-गृहाणि शयनानि आसनानि च प्रतीतानि यानानि-रथादीनि वाहनानि-अश्वादीनि एतैराकीर्णो-व्याप्तो युक्तो विस्तीर्णविपुलभवन-शयना-ऽऽसन-यान-वाहनाकीर्णः, तथा बहु धनं बहु जातरूपं-सुवर्णं रजतं च-रूप्यं यस्य स बहुधन-बहुजातरूप-रजतः, तथा आयोग-प्रयोगसम्प्रयुक्तः-आवाहन-विसर्जनकुशलः, तथा विच्छर्दितं-तथाविधविशिष्टोपकाराकारितया विसृष्टम् उकुरुटकादिषु प्रचुरं भक्तपानं यस्मिन् राज्यमनुशासति स विच्छर्दितप्रचुरभक्तपानः, अनेन पुण्याधिकतया न तस्मिन् राज्यमनुशासति दुर्भिक्षमभूदिति कथितम् । तथा बहूनां दासीनां दासानां गवां-

---

१. दया (द्रव्य) प्राप्तः-मु. । 'दयपत्ते'त्ति प्राप्तकरुणागुणः-इति औप. वृत्तिः पृ. २१ ॥ २. तथाविधतथाविधविशिष्टोपकारका॰ JBK ॥ ३. "भाषायाम् 'ऊकरडो' इति प्रसिद्धं" इति G पृ. २७ टि. ॥

बलीवर्द्दानां महिषाणां गवां-स्त्रीगवानाम् एडकानां च प्रभुः बहुदासी-दास-गो-महिष-गवेलकप्रभुः, ततः स्वार्थिक'क'प्रत्ययविधानात् प्रभुकः, तथा प्रतिपूर्णानि-भृतानि यन्त्र-कोश-कोष्ठागाराणि यन्त्रगृहाणि कोशगृहाणि-भाण्डागाराणि कोष्ठगृहाणि-धान्यानां कोष्ठा-गाराणि गृहाणि इति भावः, आयुधगृहाणि च यस्य स प्रतिपूर्णयन्त्र-कोश-कोष्ठागारा-ऽऽयुधगृहः, तथा बलं शारीरिकं मानसिकं च यस्यास्ति स बलवान्, दुर्बलप्रत्ययमित्रो, दुर्बलानामकारणवत्सल इति भावः, एवंभूतः सन् राज्यं प्रशासत् विहरति-अवतिष्ठते इति योगः, कथम्भूतं राज्यमित्याह-अपहतकण्टकम्-इह देशोपद्रवकारिणश्चरटाः कण्टकाः ते अपहता अवकाशाऽनासादनेन स्थगिता यस्मिन् तद् अपहतकण्टकं, तथा मलिताः-उपद्रवं कुर्वाणा मानम्लानिमापादिताः कण्टका यत्र तन्मलितकण्टकं, तथा उद्धृताः स्वदेशत्याजनेन जीवितत्याजनेन वा कण्टका यत्र तद् उद्धृतकण्टकं, तथा न विद्यते प्रतिमल्लः कण्टको यत्र तदप्रतिकण्टकं[१], तथा 'ओहयसत्तुं' इति प्रत्यनीकाः राजानः शत्रवस्ते अपहताः स्वावकाशमलभमानीकृता यत्र तद् अपहतशत्रु, तथा निहताः-रणाङ्गणे पातिताः शत्रवो यत्र तन्निहतशत्रु, तथा मलिताः-तद्बलसैन्यत्रासापादनतो मानम्लानिमापादिताः शत्रवो यत्र तद् मलितशत्रु, तथा स्वातन्त्र्यच्यावनेन स्वदेशच्यावनेन जीवितच्यावनेन वा उद्धृताः शत्रवो यत्र तद् उद्धृतशत्रु, एतदेव विशेषणद्वयेन व्याचष्टे-निर्जितशत्रु, पराजितशत्रु, तथा व्यपगतं दुर्भिक्षं दोषो मारिश्च यत्र तद् व्यपगतदुर्भिक्षदोषमारि, तथा भयेन स्वदेशोत्थेन परचक्रकृतेन वा विप्रमुक्तम्, अत एव क्षेमं-निरुपद्रवं, शिवं-शान्तं, सुभिक्षं शोभना-शुभा भिक्षा दर्शनिनां दीनानाथादीनां च यत्र तत् सुभिक्षं, तथा प्रशान्तानि डिम्बानि-विघ्ना डमराणि-राजकुमारादिकृतविड्वरा यत्र तत्प्रशान्तडिम्बडमरम् ।

देवीवर्णके-'सुकुमालपाणिपाया' इति सुकुमारौ पाणी पादौ च यस्याः सा सुकुमारपाणिपादा, तथा अहीनानि-अन्यूनानि स्वरूपतः प्रतिपूर्णानि लक्षणतः पञ्चापीन्द्रियाणि यस्मिन् तथाविधं शरीरं यस्याः सा अहीनप्रतिपूर्णपञ्चेन्द्रियशरीरा, तथा लक्षणानि-स्वस्तिक-चक्रादीनि, व्यञ्जनानि-मषी-तिलकादीनि, गुणाः-सौभाग्यादयस्तैरुपपेता लक्षण-व्यञ्जन-गुणोपपेता, 'उप अप इत' इति शब्दत्रयस्थाने "**पृषोदरादय**" [सि.हे. ३-२-१५५] इति अपाऽकारस्य लोपे उपपेता इति द्रष्टव्यम् । 'माणुम्माणपमाणपडिपुण्णसुजात-सव्वंगसुंदरंगी' इति तत्र मानं-जलद्रोणप्रमाणता, कथमिति चेत् ? उच्यते, जलस्यातिभृते

---

१. JKB बाबु । प्रतिमल्लकण्टकं-मु. ॥

कुण्डे पुरुषे स्त्रियां वा निवेशितायां यज्जलं निस्सरति तद्यदि द्रोणप्रमाणं भवति तदा स पुरुषः स्त्री वा मानप्राप्ता उच्यते, तथा उन्मानम्-अर्द्धभारप्रमाणता, सा चैवं-तुलायामारोपितः पुरुषः स्त्री वा यद्यर्द्धभारं तुलति तदा स उन्मानप्राप्तोऽभिधीयते, प्रमाणं-स्वाङ्गुलेनाऽष्टोत्तरशतोच्छ्रितता[1], ततो मानोन्मानप्रमाणैः प्रतिपूर्णानि-अन्यूनानि सुजातानि-जन्मदोषरहितानि सर्वाणि अङ्गानि-शिरःप्रभृतीनि यानि तैः सुन्दराङ्गी मानोन्मानप्रमाण-प्रतिपूर्णसुजातसर्वाङ्गसुन्दराङ्गी, तथा शशिवत्सोमाकारम्-अरौद्राकारं कान्तं-कमनीयं प्रियं-द्रष्टृणामानन्दोत्पादकं दर्शनं-रूपं यस्याः सा शशिसोमाकारकान्तप्रियदर्शना, अत एव सुरूपा, तथा करतलपरिमितो-मुष्टिग्राह्यः प्रशस्तलक्षणोपेतः त्रिवलीको-वलित्रयोपेतो रेखात्रयोपेतो बलिको-बलवान् मध्यो-मध्यभागो यस्याः सा करतलपरिमितप्रशस्त-त्रिवलीकबलिकमध्या, तथा कुण्डलाभ्याम् उल्लिखिता-घृष्टा गण्डलेखा-कपोलविरचित-मृगमदादिरेखा यस्याः सा कुण्डलोल्लिखितगण्डलेखा, 'कोमुईयरयणियरविमलपडि-पुण्णसोमवयणा' कौमुदी-कार्तिकी पौर्णमासी, तस्यां रजनिकरः-चन्द्रमास्तद्वद्विमलं-निर्मलं प्रतिपूर्णम्-अन्यूनातिरिक्तमानं सौम्यम्-अरौद्राकारं वदनं यस्याः सा तथा, शृङ्गारस्य-रसविशेषस्याऽगारमिवागारम्, अथवा शृङ्गारो-मण्डनभूषणाटोपस्तत्प्रधान आकारः-आकृतिर्यस्याः सा तथा, चारुः वेषो-नेपथ्यं यस्याः सा तथा, ततः कर्मधारयः, शृङ्गारागारचारुवेषा, तथा सङ्गता ये गत-हसित-भणित-चेष्टितविलासाः यश्च निपुणो युक्तश्च स्वजन-परिजनान् प्रति उपचारः तेषु कुशला संगत-गत-हसित-भणित-चेष्टित-विलास-ललित-संलापनिपुणयुक्तोपचारकुशला, तत्र सङ्गतं नासङ्गतं गतं यद् गुप्ततया तद्गृहस्यैवान्तर्गमनं न तु बहिः स्वेच्छाचारितया, सङ्गतं हसितं-यत्कपोलविकाशमात्रसूचितं न त्वट्टट्टहासादि । "**हसियं कपोलकहुकहियं**" [ ] इति वचनात्, सङ्गतं भणितं यत्समागते प्रयोजने नर्मभणितिपरिहारेण विवक्षितार्थमात्रप्रतिपादनं, सङ्गतं चेष्टितं यत्कुच-जघनाद्य-वयवाच्छादनपरतयोपवेशन-शयनोत्थानादि, सङ्गतो विलासः-स्वकुलौचित्येन शृङ्गारादिकरणं, तथा सुन्दरै स्तन-जघन-वदन-कर-चरण-नयनलावण्यविलासैः कलिता, अत्र विलासः-स्थाना-ऽऽसन-गमनादिरूपश्चेष्टाविशेषः । उक्तं च-

"**स्थानासनगमनानां, हस्तभ्रूनेत्रकर्मणां चैव ।**
उत्पद्यते विशेषो यः श्लिष्टोऽसौ विलासः स्यात् ॥ १ ॥" [ ]

---

१. G । शतोच्छ्रयिता-मु. K बाबु ।

अन्ये त्वाहुः-"विलासो नेत्रजो विकारः", तथा चोक्तं-

"हावो मुखविकारः स्यात्, भावश्चित्तसमुद्भवः ।
विलासो नेत्रजो ज्ञेयो, विभ्रमो भ्रूसमुद्भवः ॥१॥" [ ]

"ते णं कालेणं ते णं समएणं समणे भगवं महावीरे जाव चउत्तीसबुद्धवयणाइसेससंपत्ते पणतीससच्चवयणातिसेससंपत्ते आगासगएणं चक्केणं आगासगतेणं छत्तेणं आगासगयाहिं सेयवरचामराहिं आगासफालिहमएणं सपायपीढेण सीहासणेण पुरतो धम्मज्झएणं पगढिज्जमाणेणं चउद्दसहिं समणसाहस्सीहिं छत्तीसाए अज्जियासाहस्सीहिं सद्धिं सम्परिवुडे पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे सुहंसुहेणं विहरमाणे जेणेव आमलकप्पा नयरी जेणेव वणसंडे जेणेव असोगवरपायवे जेणेव पुढविसिलापट्टे तेणेव उवागच्छइ, उवागच्छित्ता अहापडिरूवं उग्गहं उग्गिण्हइ, उग्गिण्हित्ता असोगवरपायवस्स अहे पुढविसिलापट्टगंसि पुरत्थाभिमुहे संपलिअंकनिसन्ने संजमेणं तवसा अप्पाणं भावेमाणे विहरति" । इदं सुगमं, नवरं 'जाव चोत्तीसाए' इत्यत्र यावच्छब्दकरणात् 'आइकरे तित्थगरे' इत्यादिकः समस्तोऽपि औपपातिकग्रन्थप्रसिद्धो भगवद्वर्णको वाच्यः[1], स चातिगरीयानिति न लिख्यते, केवलमौपपातिकग्रन्थादवसेयः । 'चोत्तीसाए बुद्धवयणातिसेससंपत्ते' चतुस्त्रिंशद् बुद्धानां-भगवतामर्हतां वचनप्रमुखाः "**सर्वस्वभाषानुगतं वचनं धर्मावबोधकरम्**" [ ] इत्यादिना उक्तस्वरूपा ये अतिशेषाः-अतिशयास्तान् प्राप्तः-चतुस्त्रिंशद्बुद्धवचनातिशेषसम्प्राप्तः, इह वचनातिशेषस्योपादानमत्यन्तोपकारितया प्राधान्यख्यापनार्थम्, अन्यथा देहवैमल्यादयस्ते पठ्यन्ते, तथा च-

"देहं[2] विमलसुगन्धं आमयपस्सेयवज्जियं अरयं ।
रुहिरं गोक्खीराभं निव्विस्सं पंडुरं मंसं ॥१॥

इत्यादि, 'पणतीसाए सच्चवयणातिसेससंपत्ते' पञ्चत्रिंशत् ये सत्यवचनस्य[3]अतिशेषा-अतिशयास्तान् सम्प्राप्तः पञ्चत्रिंशद्वचनातिशेषसम्प्राप्तः, ते चामी सत्यवचनातिशेषाः-संस्कारवत्त्वम् १, उदात्तत्वम् २, उपचारोपेतत्वं ३, गम्भीरशब्दत्वम् ४, अनुनादित्वं ५, दक्षिणत्वम् ६, उपनीतरागत्वम् ७, महार्थत्वम् ८, अव्याहतपौर्वापर्यत्वं ९, शिष्टत्वम् १०, असन्दिग्धत्वम् ११, अपहतान्योत्तरत्वं १२, हृदयग्राहित्वं १३, देशकालाव्यतीतत्वं १४, तत्त्वानुरूपत्वम् १५, अप्रकीर्णप्रसृतत्वम् १६, अन्योऽन्यप्रगृहीतत्वम् १७, अभिजातत्वम् १८,

१. द्र. औप. सू. १९ ॥ २. देहो विमल सुगन्धः आमयप्रस्वेदवर्जितः अरजाः । रुधिरं गोक्षीराभं निर्विस्रं पाण्डुरं मांसम् ॥ ३. "सत्यवचनातिशया आगमे न दृष्टाः । एते तु ग्रन्थान्तरदृष्टाः सम्भाविताः समवायाङ्गटीकायाम् अभयदेवसूरयः पृ. ६३" - इति G पृ. १९ टिप्पणम् ॥

अतिस्निग्धमधुरत्वम् १९, अपरमर्मवेधित्वम् २०, अर्थधर्माभ्यासानपेतत्वम् २१, उदारत्वं २२, परनिन्दात्मोत्कर्षविप्रमुक्तत्वम् २३, उपगतश्लाघत्वम् २४, अपनीतत्वम्[1] २५, उत्पादिताविच्छिन्नकौतूहलत्वम् २६, अद्भुतत्वम्[2] २७, अनतिविलम्बित्वं २८, विभ्रमविक्षेपकिलिकिञ्चितादिवियुक्तत्वम् २९, अनेकजातिसंश्रयाद्विचित्रत्वम् ३०, आहितविशेषत्वं ३१, साकारत्वं ३२, सत्त्वपरिगृहीतत्वम् ३३, अपरिखेदितत्वम् ३४, अव्युच्छेदित्वं ३५ चेति ।

तत्र संस्कारवत्त्वं-संस्कृतादिलक्षणयुक्तत्वम् १, उदात्तत्वम्-उच्चैर्वृत्तिता २, उपचारोपेतत्वम्-अग्राम्यता ३, गम्भीरशब्दत्वं मेघस्येव ४, अनुनादिता-प्रतिरवोपेतत्वं ५, दक्षिणत्वं -सरलता ६, उपनीतरागत्वम्-उत्पादिता श्रोतृजने स्वविषयबहुमानता ७, एते सप्त शब्दापेक्षा अतिशयाः. अत ऊर्ध्वं त्वर्थाश्रयाः, तत्र महार्थत्वं-परिपुष्टार्थाभिधायिता ८, अव्याहतपौर्वापर्यत्वं-पूर्वापरवाक्याविरोधः ९, शिष्टत्वं वक्तुः शिष्टत्वसूचनात् १०, असन्दिग्धत्वं परिस्फुटार्थप्रतिपादनात् ११, अपहतान्योत्तरत्वं-परदूषणाविषयता १२, हृदयग्राहित्वं-दुर्गमस्याप्यर्थस्य परहृदये प्रवेशकरणं १३, देशकालाव्यतीतत्वं-प्रस्तावोचितता १४, तत्त्वानुरूपत्वं-विवक्षितवस्तुस्वरूपानुसारिता १५, अप्रकीर्णप्रसृतत्वं-सम्बन्धाधिकारपरिमितता १६, अन्योऽन्यप्रगृहीतत्वं-पदानां वाक्यानां वा परस्परसापेक्षता १७, अभिजातत्वं-यथाविवक्षितार्थाभिधानशीलता १८, अतिस्निग्धमधुरत्वं-बुभुक्षितस्य घृतगुडादिवत्परमसुखकारिता १९, अपरमर्मवेधित्वं-परमर्मानुद्घट्टनशीलता २०, अर्थधर्माभ्यासानपेतत्वम्-अर्थधर्म्मप्रतिबद्धता २१, उदारत्वम्-अतिविशिष्टगुम्फगुणयुक्ता अतुच्छार्थप्रतिपादकता वा २२, परनिन्दात्मोत्कर्षविप्रमुक्तत्वं प्रतीतम् २३, उपगतश्लाघत्वम्-उक्तगुणयोगतः प्राप्तश्लाघता २४, अपनीतत्वं[3]-कारक-काल-वचन-लिङ्गादिव्यत्ययरूपवचनदोषापेतत्व २५, उत्पादिताविच्छिन्नकु(कौ)तूहलत्वं-श्रोतृणां स्वविषये उत्पादितं-जनितमविच्छिन्नं कौतूहलं-कौतुकं येन तत्तथा तद्भावस्तत्त्वं, श्रोतृषु स्वविषयाद्भुतविस्मयकारितेति भावः २६, अद्भुतत्वमनतिविलम्बित्वं च प्रतीतं २७-२८, विभ्रमविक्षेपकिलिकिञ्चितादिवियुक्तत्वमिति-विभ्रमो-वक्तुर्भ्रान्तमनस्कता, विक्षेपो-वक्तुरेवाभिधेयार्थं प्रत्यनासक्तता, किलिकिञ्चितं-[4]रोषभयाभिलाषादिभावानां युगपदसकृत्करणम्, आदिशब्दान्मनोदोषान्तरपरिग्रहः, तैर्वियुक्तं यत्तत्तथा तद्भावस्तत्त्वम् २९, अनेकजातिसंश्रयाद्विचित्रत्वं-सर्वभाषानुयायितया चित्ररूपता ३०, आहितविशेषत्वं-शेषपुरुषवचनापेक्षया शिष्येषूत्पादितमतिविशेषता ३१, साकारत्वं-विच्छिन्न-

---

१. अपनी° G । २. अद्भुतत्वम् - मु. ॥ ३. KJB । अनुप° -मु. । अप° G ॥ ४. JBK औप. वृत्तिः । रोषभयलोभादि° मु. ॥

पदवाक्यता ३२, सत्त्वपरिगृहीतत्वम्-ओजस्विता ३३, अपरिखेदित्वम्-अनायास-सम्भविता ३४, अव्युच्छेदित्वं-विवक्षितार्थसम्यक्सिद्धि यावदविच्छिन्नवचनप्रमेयतेति ३५ ।

'आगासफालियामएणं'ति आकाशस्फटिकं-यदाकाशवत् अतिस्वच्छं स्फटिकं तन्मयेन, 'धम्मज्झएणं'ति धर्मचक्रवर्तित्वसूचकेन केतुना महेन्द्रध्वजेनेत्यर्थः, तथा 'पुव्वाणुपुव्विं चरमाणे' इति पूर्वानुपूर्व्या क्रमेणेत्यर्थः चरन्-सञ्चरन्, एतदेवाह-'गामाणुगामं दूइज्जमाणे' इति ग्रामश्चानुग्रामश्च-विवक्षितग्रामादनन्तरं ग्रामो ग्रामानुग्रामः, तम्, द्रवन्-गच्छन्, एकस्मादनन्तरं ग्राममनुल्लङ्घयन् इत्यर्थः, अनेनाप्रतिबद्धविहारिता ख्यापिता, तत्राऽप्यौत्सुक्याभावमाह-'सुहंसुहेणं विहरमाणे' सुखंसुखेन-शरीरखेदाभावेन संयमबाधाविरहेण[1] च ग्रामादिषु विहरन्-अवतिष्ठमानो 'जेणेवे'ति प्राकृतत्वात्सप्तम्यर्थे तृतीया[2] यस्मिन्नेव देशे आमलकल्पा नगरी, यस्मिन्नेव च प्रदेशे वनखण्डः, यस्मिन्नेव देशे सोऽनन्तरोक्तस्वरूपः शिलापट्टकः । 'तेणामेवे'ति तस्मिन्नेव देशे उपागच्छति, उपागत्य च यथाप्रतिरूपं यथोचितं मुनिजनस्यावग्रहमावासम् अनुज्ञापनापूर्वकमवगृह्णाति, अवगृह्य चाशोकपादपस्याधः पृथिवीशिलापट्टके पूर्वाभिमुखः, 'तीर्थकृतो हि भगवन्तः सदा समवसरणे पृथिवीशिलापट्टके वा देशनायै पूर्वाभिमुखा अवतिष्ठन्ते' संपर्यङ्कनिषण्णः, संयमेन तपसा चात्मानं भावयन् विहरन्[3] आस्ते ॥

ततः पर्षन्निर्गमो वाच्यः, स चैवं-'तए[4] णं आमलकप्पानयरीए सिंघाडग-तिय-चउक्क-चच्चर-चउम्मुह-महापहेसु बहुजणो अन्नमन्नस्स एवमाइक्खइ एवं भासेइ एवं पण्णवेइ एवं परूवेइ-एवं खलु देवाणुप्पिया ! समणे भगवं महावीरे जाव आगासगएणं छत्तेणं जाव[5] संजमेणं तवसा अप्पाणं भावेमाणे विहरति । तं महाफलं खलु देवाणुप्पियाणं तहारूवाणं अरहंताणं नाम-गोयस्स वि सवणयाए किमंग पुण अभिगमण-वंदण-नमंसण-पडिपुच्छण-पज्जुवासणयाए ?, तं सेयं खलु एगस्स वि आयरियस्स धम्मियस्स सुवयणस्स सवणयाए, किमंग पुण विउलस्स अट्ठस्स गहणयाए ?, तं गच्छामो णं देवाणुप्पिया ! समणं भगवं महावीरं वंदामो णमंसामो सक्कारेमो सम्माणेमो कल्लाणं मंगलं देवयं चेइयं पज्जुवासेमो । एयं

---

१. संयमाबाध्यविहारेण-G । संयमः अबाध्यः यस्मिन् विहारे - विचरेण तेन इति G पृ. ३७ टिप्पणे । संयमाबाध्य विहरेण - पा.४ । संयमबाधाविरहेण - भा. २ । संयमबाधाविहरेण - K ॥ २. ''यथा वा संस्कृतभाषायां 'पूर्वेण' इति 'एन' प्रत्ययान्तं सविभक्तिप्रतिरूपकमव्ययं 'पूर्वस्मिन्' अर्थे प्रयुज्यते तथा 'येन-जेण' इति अव्ययं 'यस्मिन्' अर्थे प्राकृते व्यवह्रियमाणं बोध्यम् । तथैव 'तेण' इत्यस्यापि निष्पत्तिर्ज्ञेया'' इति G पृ. ३७ टिप्पणे ॥ ३. ०रति-JBK ॥ ४. द्र. औप. सूत्रे ५२ ॥ ५. द्र. औप. सू. १९ ॥

तं इहभवे परभवे य हियाए सुहाए [खमाए निस्सेयसाए] आणुगामियत्ताए भविस्सइ । तए णं आमलकप्पाए नयरीए बहवे उग्गा भोगा' इत्याद्यौपपातिकग्रन्थोक्तं[1] सर्वमवसातव्यं यावत् समग्राऽपि राजप्रभृतिका परिषत्पर्युपासीना अवतिष्ठते ॥ ६ ॥

सूत्र-७ : ते णं काले णं ते णं समए णं सूरियाभे [णामं]देवे सोहम्मे कप्पे सूरियाभे विमाणे सभाए सुहम्माए सूरियाभंसि सिंहासणंसि चउहिं सामाणियसाहस्सीहिं, चउहिं अग्गमहिसीहिं सपरिवाराहिं, तिहिं परिसाहिं, सत्तहिं अणिएहिं, सत्तहिं अणियाहिवईहिं, सोलसहिं आयरक्खदेव-साहस्सीहिं, अन्नेहिं य बहूहिं सूरियाभविमाणवासीहिं वेमाणिएहिं देवेहिं देवीहि य सद्धिं संपरिवुडे महयाऽहयनट्ट-गीय-वाइय-तंती-तल-ताल-तुडिय-घण-मुइंग-पडुप्पवादियरवेणं दिव्वाइं भोगभोगाइं भुंजमाणे विहरति, इमं च णं केवलकप्पं जंबुद्दीवं दीवं विउलेणं ओहिणा आभोएमाणे आभोएमाणे पासति ॥ ७ ॥

[७] '**ते णं काले ण**'मित्यादि, ते इति प्राकृतशैलीवशात्तस्मिन्निति द्रष्टव्यं, यस्मिन्काले भगवान् वर्द्धमानस्वामी साक्षाद्विहरति तस्मिन्काले '**ते णं समए णं**'ति तस्मिन् समये यस्मिन्नवसरे भगवान् आम्रशालवने चैत्ये देशनां कृत्वोपरतस्तस्मिन्नवसरे इति भावः, **सूर्याभो** नाम्ना **देवः** नामशब्दो ह्यव्ययरूपोऽप्यस्ति, ततो विभक्तिलोपः, ततः **सौधर्मे** सौधर्म्माख्ये **कल्पे** यत्**सूर्याभं** सूर्याभनामकं **विमानं** तस्मिन् या **सभा सुधर्म्मा**भिधा तत्र यत्**सूर्याभा**भिधानं **सिंहासनं** तत्रोपविष्टः सन्निति गम्यते । '**चउहिं सामाणियसाहस्सीहिं**' इति समाने द्युतिविभवादौ भवाः सामानिकाः, अध्यात्मादित्वाद्[2] 'इकण्', विमानाधिपति-सूर्याभदेवसदृशद्युतिविभवादिका देवा इत्यर्थः, ते च मातृ-पितृ-गुरूपाध्याय-महत्तर-वत्सूर्याभदेवस्य पूजनीयाः, केवलं विमानाधिपतित्वहीना इति सूर्याभं देवं स्वामिनं प्रतिपन्नाः, तेषां सहस्राणि सामानिकसहस्राणि तैश्चतुर्भिः, प्राकृतत्वाच्च सूत्रे सकारस्य दीर्घत्वं स्त्रीत्वं च, '**चतसृभिरग्रमहिषीभिः**' इह कृताभिषेका देवी महिषीत्युच्यते, सा च स्वपरिवारभूतानां सर्वासामपि देवीनामग्रे इत्यग्राः, अग्राश्च ता महिष्यश्च अग्रमहिष्यस्ताभिश्चतसृभिः, कथम्भूताभिः इत्याह-'**सपरिवाराभिः**' परिवारः सह यासां ताः सपरिवारास्ताभिः, परिवारश्चैकैकस्या देव्याः सहस्रं सहस्रं देवीनां, तथा **तिसृभिः पर्षद्भिः**, तिस्रो हि

१. द्र. औप. सू. ५२ ॥ २. 'अध्यात्मादिभ्य इकण्' सि. हे. ६-३-७८ ॥

विमानाधिपतेः सर्वस्यापि पर्षदः, तद्यथा-अभ्यन्तरा मध्या बाह्या च, तत्र या वयस्यमण्डलीस्थानीया परममित्रसंहतिसदृशी सा अभ्यन्तरपर्षत्, तया सहाऽपर्यालोचितं स्वल्पमपि प्रयोजनं न विदधाति, अभ्यन्तरपर्षदा सह पर्यालोचितं यस्यै निवेद्यते यथा-'इदमस्माकं पर्यालोचितं सम्मतमागतं युष्माकमपीदं सम्मतं किं वा न'?- इति सा मध्यमा, यस्याः पुनरभ्यन्तरपर्षदा सह पर्यालोचितं मध्यमया च सह दृढीकृतं यस्यै करणायैव निरूप्यते यथा-'इदं क्रियताम्' इति सा बाह्या तथा '**सत्तहिं अणिएहिं**' इति अनीकानि-सैन्यानि, तानि च सप्त, तद्यथा-हयानीकं गजानीकं रथानीकं पदात्यनीकं वृषभानीकं गन्धर्वानीकं नाट्यानीकं, तत्राद्यानि पञ्चानीकानि सङ्ग्रामाय कल्पन्ते, गन्धर्व-नाट्यानीके पुनरुपभोगाय, तैः सप्तभिरनीकैः, अनीकानि स्वस्वाधिपतिव्यतिरेकेण न सम्यक् प्रयोजने समापतिते सत्युपकल्पन्ते ततः सप्तानीकाधिपतयोऽपि तस्य वेदितव्याः, तथा चाह-'**सत्तहिं अणियाहिवईहिं,**' तथा '**षोडशभिरात्मरक्षदेवसहस्रैः**' इति विमानाधिपतेः सूर्याभस्य देवस्यात्मानं रक्षयन्तीत्यात्मरक्षाः, "**कर्मणोऽण्**" [मलय. कृ. २/१५] इति 'अण्' प्रत्ययः, ते च शिरस्त्राणकल्पाः, यथा हि शिरस्त्राणं शिरस्याविद्धं प्राणरक्षकं भवति तथा तेऽप्यात्मरक्षका गृहीतधनुर्दण्डादिप्रहरणाः समन्ततः पृष्ठतः पार्श्वतोऽग्रतश्चावस्थायिनो विमानाधिपतेः सूर्याभस्य देवस्य प्राणरक्षकाः । देवानामपायाभावात् तेषां तथाग्रहण-पुरस्सरमवस्थानं निरर्थकमिति चेत् ? न, तत् स्थितिमात्रपरिपालनहेतुत्वात् प्रीतिप्रकर्ष-हेतुत्वाच्च, तथाहि-ते समन्ततः सर्वासु दिक्षु गृहीतप्रहरणा ऊर्ध्वस्थिता अवतिष्ठमानाः स्वनायकशरीररक्षणपरायणाः स्वनायकैकनिषण्णदृष्टयः परेषामसहमानानां क्षोभमापादयन्तो जनयन्ति स्वनायकस्य परां प्रीतिमिति । एते च नियतसङ्ख्याकाः सूर्याभस्य देवस्य परिवारभूता देवा उक्ताः, ये तु तस्मिन् सूर्याभे विमाने पौरजनपदस्थानीया;, ये तु आभियोग्याः-दासकल्पास्तेऽतिभूयांसः, आस्थानमण्डल्यामपि चानियतसङ्ख्याका इति तेषां सामान्यत उपादानमाह-'**अन्नेहिं य बहूहिं सूरियाभविमाणवासीहिं देवेहिं देवीहि य सद्धिं संपरिवुडे**' एतैः सामानिकप्रभृतिभिः सार्द्धं संपरिवृतः-सम्यग्नायकैकचित्ताराधनपरतया परिवृतः, '**महयाऽहये**'त्यादि, महता रवेणेति योगः 'अहय' इति "आख्यानक-प्रतिबद्धानीति" वृद्धाः, अथवा अहतानि-अव्याहतानि, अक्षतानीति भावः, **नाट्य-गीत-वादितानि** च **तन्त्री**-वीणा, **तलाः**-हस्तताला:, **तालाः**-कंसिकाः, **तुटितानि**[1]-शेषतूर्याणि,

१. "संस्कृत- तूर्य, प्राकृत- तुरिय-तुडिय-तुटिय-तुटित-इति शब्दपरिवर्तनम्" इति G पृ. ४६ टिप्पणे ।

तथा **घनः**-घनसदृशो ध्वनिसाधर्म्याद् यो **मृदङ्गो**-मर्दलः **पटुना**-दक्षपुरुषेण **प्रवादितः**, तत एतेषां पदानां द्वन्द्वः, तेषां यो रवस्तेन, **दिव्यान्**-दिवि भवान् अतिप्रधानानित्यर्थः, '**भोगभोगाइं**' इति भोगार्हा ये भोगाः-शब्दादयस्तान्, सूत्रे नपुंसकता प्राकृतत्वात्, प्राकृते हि लिङ्गव्यभिचारः, यदाह **पाणिनिः स्वप्राकृतलक्षणे**-"**लिङ्गं व्यभिचार्यपि**" इति, **भुञ्जानो** '**विहरति**' आस्ते, न केवलमास्ते किन्तु **इमं**-प्रत्यक्षतया उपलभ्यमानं '**केवलकल्पम्**' ईषदपरिसमाप्तं केवलं-केवलज्ञानं केवलकल्पं, परिपूर्णतया केवलसदृशमिति भावः, जम्ब्वा रत्नमय्या उत्तरकुरुवासिन्या उपलक्षितो द्वीपो **जम्बूद्वीपस्तं** जम्बूद्वीपं जम्बूद्वीपाभिधानं **द्वीपं** '**विपुलेन**' विस्तीर्णेन **अवधिना**, तस्य हि सूर्याभस्य देवस्यावधिः-अधः प्रथमां पृथिवीं यावत्तिर्यग् असङ्ख्येयान्[१] द्वीपसमुद्रानिति भवति विस्तीर्णस्तेन **आभोगयन्**-परिभावयन् **पश्यति**, अनेन सत्यप्यवधौ यदि तं ज्ञेयविषयमाभोगं न करोति तदा न किञ्चिदपि तेन जानाति पश्यति चेत्यावेदितम् ॥७॥

सूत्र-८ तत्थ समणं भगवं महावीरं जंबुद्दीवे दीवे भारहे वासे आमलकप्पाए नयरीए बहिया अंबसालवणे चेइए अहापडिरूवं ओग्गहं ओग्गिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणं पासति, पासित्ता हट्ठतुट्ठचित्तमाणंदिए पीइमणे परमसोमणस्सिए हरिसवसविसप्पमाणहियए विकसियवरकमलणयणे पयलिय-वरकडग-तुडिय-केऊर-मउड-कुंडल-हार-विरायंतरइयवच्छे पालंब-पलंबमाण-घोलंतभूसणधरे ससंभमं तुरियं चवलं सुरवरे सीहासणाओ अब्भुट्ठेइ, अब्भुट्ठित्ता पायपीढाओ पच्चोरुहति, पच्चोरुहित्ता एगसाडियं उत्तरासंगं करेति, करेत्ता सत्तट्ठपयाइं तित्थयराभिमुहे अणुगच्छति, अणुगच्छित्ता वामं जाणुं अंचेति, अंचेत्ता दाहिणं जाणुं धरणितलंसि णिहट्टु तिक्खुत्तो मुद्धाणं धरणितलंसि निवेसेइ[२], निवेसित्ता ईसिं पच्चुन्नमइ, ईसिं पच्चुन्नमित्ता करतलपरिग्गहियं सिरसावत्तं दसणहं मत्थए अंजलिं कट्टु एवं वयासी-

---

१. मु. । सङ्ख्ये॰ JBKG ॥ सौधर्म-एशानयोर्देवा अवधिविषयेण अधो रत्नप्रभां पश्यन्ति, तिर्यग् असंख्येयानि योजनसहस्राणि, ऊर्ध्वम् आस्वभवनात्" इति तत्त्वार्थभाष्ये अ. ४-२१ ॥ २. णामेइ-K णिमेइ णिमेत्ता - LB "निम्नयति - नीचैः करोति" इति G टिप्पणे पत्र ४९ ॥

णमोऽत्थु णं अरिहंताणं भगवंताणं आदिगराणं तित्थगराणं सयंसंबुद्धाणं →पुरिसुत्तमाणं[1] पुरिससीहाणं पुरिसवरपुंडरीयाणं← पुरिसवरगंधहत्थीणं लोगुत्तमाणं लोगनाहाणं लोगहिआणं लोगपईवाणं लोगपज्जोयगराणं अभयदयाणं चक्खुदयाणं मग्गदयाणं जीवदयाणं सरणदयाणं बोहिदयाणं धम्मदयाणं धम्मदेसयाणं धम्मनायगाणं धम्मसारहीणं धम्मवरचाउरंतचक्कवट्टीणं अप्पडिहयवरनाणदंसणधराणं वियट्टछउमाणं जिणाणं जावयाणं तिण्णाणं तारयाणं बुद्धाणं बोहयाणं मुत्ताणं मोयगाणं सव्वन्नूणं सव्वदरिसीणं सिवमयलमरुयमणंतमक्खय-मव्वाबाहमपुणरावत्तयं सिद्धिगइनामधेयं ठाणं संपत्ताणं, नमोऽत्थु णं समणस्स भगवओ महावीरस्स आदिगरस्स[2] तित्थयरस्स जाव संपाविउकामस्स । वंदामि णं भगवन्तं तत्थगयं इहगते पासइ मे भगवं तत्थगते इहगतं तिकट्टु वंदति णमंसति, वंदित्ता णमंसित्ता → सीहासण[3]-वरगए पुव्वाभिमुहं सण्णिसण्णे ← ॥ ८ ॥

[८] **'तत्थ समणं'** इत्यादि, **'तत्र'** तस्मिन्विपुलेनावधिना जम्बूद्वीपविषये दर्शने प्रवर्तमाने सति **'श्रमणं'** श्राम्यति-तपस्यति नानाविधमिति श्रमणः, भगः- समग्रैश्वर्यादि-लक्षणः, उक्तं च-

"ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रियः ।
धर्मस्याथ प्रयत्नस्य, षण्णां भग इतीङ्गना ॥१॥"

भगोऽस्यास्तीति भगवान् तं **भगवन्तं** **"शूर वीर विक्रान्तौ"** [**पा.धा.पा.३७०-१**] वीरयति-कषायान् प्रति विक्रामति स्मेति वीरः महांश्चासौ वीरश्च **महावीरस्तं**, **जम्बूद्वीपे भारते वर्षे आमलकल्पाया नगर्या बहिराम्रशालवने चैत्ये** अशोकवरपादपस्याधः पृथिवीशिलापट्टके सम्पर्यङ्कनिषण्णं श्रमणगणसमृद्धिसंपरिवृतं **यथाप्रतिरूपमवग्रहं गृहीत्वा संयमेन तपसा आत्मानं भावयन्तं पश्यति, दृष्ट्वा** च- **'हट्ठतुट्ठचित्तमाणंदिए'** इति, हृष्टतुष्टो-

---

१. →← चिह्नद्वयमध्यवर्तिपाठः LJBK कखगघ नास्ति ॥ २. °स्स मोक्खं संपा° JB ॥
३. →← चिह्नद्वयमध्यवर्तिपाठः-JBK कखगघचछ नास्ति । मुद्रिते प्रायः वृत्त्याधारेण स्वीकृतोऽस्ति ॥

ऽतीवतुष्टहृदयः इति भावः, अथवा हृष्टो नाम विस्मयमापन्नः, यथा-'अहो भगवानास्ते' इति, तुष्टः-तोषं कृतवान्, यथा-भव्यमभूद् यन्मया भगवानवलोकितः, तोषवशादेव चित्तमानन्दितं-स्फीतीभूतं "टु नदु समृद्धौ" [ ] इति वचनात्, यस्य स चित्तानन्दितः, सुखादिदर्शनात्पाक्षिको[१] निष्ठान्तस्य परनिपातः, मकारः प्राकृतत्वादलाक्षणिकस्ततः पदत्रयस्य पदद्वयमीलनेन कर्मधारयः, **'पीतिमणे** इति' प्रीतिर्मनसि यस्यासौ प्रीतिमनाः, भगवति बहुमानपरायण इति भावः, ततः क्रमेण बहुमानोत्कर्षवशात् **'परमसोमणस्सिए'** इति शोभनं मनो यस्य स सुमनास्तस्य भावः सौमनस्यं परमं च तत् सौमनस्यं च परमसौमनस्यं तत्सञ्जातमस्येति परमसौमनस्यितः, एतदेव व्यक्तीकुर्वन्नाह-**'हरिसवसविसप्पमाणहियए'** हर्षवशेन विसर्प्पद्-विस्तारयायि हृदयं यस्य स हर्षवशविसर्प्पद्धृदयः, हर्षवशादेव **'वियसियवरकमलनयणे'** विकसिते वरकमलवत् नयने यस्य स तथा, हर्षवशादेव शरीरोद्धर्षेण **'पयलिय-वरकडग-तुडिय-केऊर-मउड-कुंडले'**ति प्रचलितानि वराणि कटकानि-कलाचिकाभरणानि, त्रुटितानि[२]-बाहुरक्षकाः, केयूराणि-बाह्वाभरणविशेषरूपाणि, मुकुटो-मौलिभूषणं, कुण्डले-कर्णाभरणे यस्य स प्रचलितवरकटक-त्रुटित-केयूरमुकुट-कुण्डलः, तथा हारेण विराजमानेन रचितं-शोभितं वक्षो यस्य स **हारविराजमानरचितवक्षाः**, ततः पूर्वपदेन कर्मधारयसमासः, तथा प्रलम्बते इति प्रलम्बः[३]-पदकस्तं[४] प्रलम्बमानं-आभरणविशेषं घोलन्ति[५] च भूषणानि धरन्तीति **प्रलम्बप्रलम्बमानघोलद्भूषणधरः**, सूत्रे च प्रलम्बमानपदस्य विशेष्यात्परतो निपातः प्राकृतत्वाद्, हर्षवशादेव **'ससंभमं'** संभ्रम इह विवक्षितक्रियाया बहुमानपूर्विका प्रवृत्तिः, सह सम्भ्रमो यस्य वन्दनस्य नमनस्य[६] वा तत्ससम्भ्रमं, क्रियाविशेषणमेतत्, **त्वरितं**-शीघ्रं **चपलं**-सम्भ्रमवशादेव व्याकुलं यथा भवत्येवं सुरवरो-देववरो यावत्करणात् **'सीहासणाओ[७] अब्भुट्ठेइ अब्भुट्ठित्ता पायपीढाओ पच्चोरुहति पच्चोरुहित्ता** पाउयाओ ओमुयइ ओमुयइत्ता **तित्थयराभिमुहे सत्तट्ठपयाइं अणुगच्छइ, अणुगच्छित्ता वामं जाणुं अंचेइ** उत्पाटयति **दाहिणं जाणुं**

---

१. "जाति-काल-सुखादिभ्यः परवचनम्" इति काशिकावृत्तौ २-२-३६ इति G पृ. ४८ टिप्पणे ॥ २. तुटिकाश्च बाहुरक्षकाः - इति औप. वृत्तिः ॥ ३. "प्रलम्बः झुम्बनकम्" इति "औप. वृत्तिः" । 'झुमणुं' इति भाषा - इति G पृ. ४८ टि. ॥ ४. प्रलम्बः-पदकणुं-G ॥ ५. 'घोलत् शब्दस्य द्वितीयाबहुवचनम् । घोलन्ति-चलानि-चञ्चलानि इति भावः' इति G पृ. ४९ टिप्पणे ॥ ६. गम० G । ७. वृत्तिकारसम्भुखं एतत्पाठः सूत्रप्रतिषु न अभविष्यत् । अधुना सर्वासु सूत्रप्रतिषु दृश्यतेऽयं पाठः ॥

धरणितलंसि निहट्टु तिक्खुत्तो मुद्धाणं धरणितलंसि [१]निवेसेइ, निवेसित्ता ईसिं पच्चुन्नमइ, पच्चुन्नमित्ता कडयतुडियथंभियभुयाओ साहरइ, साहरित्ता करयलपरिग्गहियं दसणहं सिरसावत्तं मत्थए अंजलिं कट्टु एवं वयासी-नमोऽत्थु णं अरिहंताणं भगवंताणं जाव ठाणं संपत्ताणं, नमोऽत्थु णं समणस्स भगवओ महावीरस्स आदिगरस्स तित्थयरस्स जाव संपाविउकामस्स । वंदामि णं भगवंतं तत्थगयं इह गए' इति परिग्रहः, पश्यति मां स भगवान् तत्र गत इहगतमिति कृत्वा वन्दते-स्तौति नमस्यति-कायेन मनसा च वन्दित्वा नमस्यित्वा च भूयः सिंहासनवरगतो गत्वा च पूर्वाभिमुखं सन्निषण्णः ॥ ८ ॥

सूत्र-९ : → [२]तए णं तस्स सूरियाभस्स ← इमे एयारूवे अज्झत्थिए चिंतिए पत्थिए मणोगए संकप्पे समुपज्जित्था ।

[३]एवं खलु समणे भगवं महावीरे जंबूद्दीवे दीवे भारहे वासे आमलकप्पाणयरीए बहिया अंबसालवणे चेइए अहापडिरूवं ओग्गहं ओग्गिणिहत्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरति । तं महाफलं खलु तहारूवाणं अरहंताणं भगवंताणं णामगोयस्स वि सवणयाए किमंग पुण अभिगमण-वंदण-णमंसण-पडिपुच्छणपज्जुवासणयाए ?, एगस्स वि आयरियस्स धम्मियस्स सुवयणस्स सवणयाए, किमंग पुण विउलस्स अट्ठस्स गहणयाए ?, तं गच्छामि णं समणं भगवं महावीरं [४]वंदामि णमंसामि सक्कारेमि सम्माणेमि कल्लाणं मंगलं चेतियं देवयं [५]पज्जुवासामि, एयं मे पेच्चा हियाए सुहाए खमाए णिस्सेयसाए आणुगामियत्ताए भविस्सति त्तिकट्टु एवं संपेहेइ, एवं संपेहित्ता आभिओगे देवे सद्दावेइ, सद्दावित्ता एवं वयासी-

---

१. J संशो. । निमेइ निमित्ता - J मूल मु. ॥ २. →← चिह्नद्वयमध्यवर्तिपाठः JK कखगघचछ नास्ति । अत्र सूत्रे भूयान् क्रमभेदः दृश्यते ॥ ३. एवं (सेयं) (मे) खलु-मु. ॥ ४. वंदिउं नमंसिउं सक्कारेउं सम्माणेउं (वृत्तिः) मु. ॥ ५. पज्जुवासिउं (वृत्तिः)

"एवं खलु देवाणुप्पिया ! समणे भगवं महावीरे जंबूद्दीवे दीवे भारहे वासे आमलकप्पाए नयरीए बहिया अंबसालवणे चेइए अहापडिरूवं ओग्गहं ओगिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरइ ।"

तं गच्छह णं तुमे देवाणुप्पिया ! जंबूद्दीवं दीवं भारहं वासं आमलकप्पं णयरिं अंबसालवणं चेइयं समणं भगवं महावीरं तिक्खुत्तो आयाहिण-पयाहिणं करेह, करेत्ता वंदह, णमंसह, वंदित्ता णमंसित्ता साइं साइं नाम-गोयाइं साहेह, साहित्ता समणस्स भगवओ महावीरस्स सव्वओ समंता जोयणपरिमंडलं जं किंचि तणं वा पत्तं वा कट्ठं वा सक्करं वा असुइं अचोक्खं पूइअं दुब्भिगंधं तं सव्वं आहुणिय आहुणिय एगंते एडेह, एडेत्ता णच्चोदगं णाइमट्टियं पविरलपप्फुसियं रयरेणुविणासणं दिव्वं सुरभि-गंधोदयवासं वासह, वासित्ता णिहयरयं णट्ठरयं भट्ठरयं उवसंतरयं पसंतरयं करेह, करित्ता जलय-थलयभासुरप्पभूयस्स बिंटट्ठाइस्स दसद्धवण्णस्स कुसुमस्स जाण्णुस्सेहपमाणमेत्तिं ओहिं वासं वासह, वासित्ता कालागुरु-पवरकुंदुरुक्क-तुरुक्क-धूव-मघमघेंतगंधुद्धुयाभिरामं सुगंधवरगंधगंधियं गंधवट्टि-भूतं दिव्वं सुरवराभिगमणजोग्गं करेह य कारवेह य, करित्ता य कारवेत्ता य खिप्पामेव [मम] एयमाणत्तियं पच्चप्पिण्णह ॥ ९ ॥

[९] **'तए णं तस्से'**त्यादि, **'ततो'** निषदनानन्तरं **'तस्य' सूर्याभदेवस्य अयमेतद्रूपः सङ्कल्पः समुदपद्यत,** कथम्भूतः ? इत्याह-**'मनोगतः'** मनसि गतो-व्यवस्थितो नाद्यापि वचसा प्रकाशितस्वरूप इति भावः, पुनः कथम्भूतः ? इत्याह-**आध्यात्मिकः** आत्मनि अधि अध्यात्मं तत्र भव आध्यात्मिकः, आत्मविषय इति भावः । सङ्कल्पश्च द्विधा भवति-कश्चिद् ध्यानात्मकः अपरश्चिन्तात्मकः, तत्रायं चिन्तात्मक इति प्रतिपादनार्थमाह-**चिन्तितः** चिन्ता सञ्जाताऽस्येति चिन्तितः, चिन्तात्मक इति भावः, सोऽपि कश्चिदभिलाषात्मको भवति कश्चिदन्यथा, तत्रायमभिलाषात्मकः, तथा चाह-**प्रार्थितः** प्रार्थनं प्रार्थो णिजन्तत्वात् अल्प्रत्ययः, प्रार्थः सञ्जातोऽस्येति प्रार्थितः, अभिलाषात्मक इति भावः, किंस्वरूप ? इत्याह-

'**सेयं**[१] **खलु**' इत्यादि, श्रेयः '**खलु**' निश्चितं '**मे**' मम '**श्रमणं भगवन्तं महावीरं वन्दितुं**' कायेन मनसा च प्रणन्तुं, '**सत्कारयितुं**' कुसुमाञ्जलिमोचनेन पूजयितुं '**सन्मानयितुम्**'-उचितप्रतिपत्तिभिराराधयितुं '**कल्याणं**' कल्याणकारित्वाद् '**मङ्गलं**' दुरितोपशमकारित्वाद् **दैवतं**-देवं त्रैलोक्याधिपतित्वात् '**चैत्यं**' सुप्रशस्तमनोहेतुत्वात् '**पर्युपासितुं**'-सेवितुम् '**इतिकृत्वा**' इतिहेतोः '**एवं**' यथा वक्ष्यमाणं तथा '**सम्प्रेक्षते**' बुद्ध्या परिभावयति, **संप्रेक्ष्य** च **आभियोगिकान्**-आभिमुख्येन योजनं अभियोगः[२]-प्रेष्यकर्मसु व्यापार्यमाणत्वम् अभियोगेन जीवन्तीत्याभियोगिकाः "**वेतनादेर्जीवति**" [मलय. त. ९-२१]इति 'इकण्'प्रत्ययः, आभियोगिकाः-कर्मकरास्तान् **शब्दापयति**-आकारयति **शब्दापयित्वा** च तेषां सम्मुख**मेवमवादीत्-एवं खलु देवानां प्रियाः** इत्यादि सुगमं, नवरं **देवानां प्रियाः**- ऋजवः प्राज्ञाः ।

'**तं गच्छह णमि**'त्यादि, यस्मादेवं भगवान् विहरन् वर्त्तते, **तत्**-तस्मा**द्देवानां प्रियाः ! यूयं गच्छत जम्बूद्वीपं द्वीपं,** तत्रापि **भारतं वर्षं,** तत्रापि **आमलकल्पां नगरीं,** तत्रापि **आम्रशालवनं चैत्यं, श्रमणं भगवन्तं महावीरं त्रिकृत्वः**-त्रीन् वारान् **आदक्षिण-प्रदक्षिणं कुरुत,** आदक्षिणाद्-दक्षिणहस्तादारभ्य प्रदक्षिणः-परितो भ्राम्यतो दक्षिण एव आदक्षिणप्रदक्षिणस्तं कुरुत, **कृत्वा** च **वन्दध्वं नमस्यत, वन्दित्वा नमस्यित्वा** च '**साइं साइं**'ति स्वानि स्वानि आत्मीयानि आत्मीयानि **नाम-गोत्राणि,** → [३]गोत्रम्-अन्वर्थस्तेन युक्तानि नामानि नामगोत्राणि ← [४]राजदन्तादिदर्शनात् 'नाम'शब्दस्य पूर्वनिपातः, **साधयत**-कथयत, **कथयित्वा** च **श्रमणस्य भगवतो महावीरस्य सर्व्वतः** सर्व्वासु दिक्षु **समन्ततः**-सर्वासु विदिक्षु **योजनपरिमण्डलं**-परिमाण्डल्येन योजनप्रमाणं **यत्** क्षेत्रं तत्र यत् '**तृणं**' किलिञ्जादि **काष्ठं** वा काष्ठशकलं वा **पत्रं वा** निम्बा-ऽश्वत्थादिपत्रजातं कचवरं वा-श्लक्ष्णतृणधूल्यादिपुञ्जरूपं, कथम्भूतम् इत्याह-'**अशुचि**' अशुचिसमन्वितम् **अचोक्षम्**-अपवित्रं, **पूयितं**-कुथितमत एव **दुरभिगन्धं** तत्संवर्त्तकवातविकुर्वणेन **आहत्य आहत्य एकान्ते**-योजनपरिमण्डलात्क्षेत्राद्दवीयसि देशे '**एडयत**' अपनयत **एडयित्वा च नात्युदकं नाप्यतिमृत्तिकं** यथा भवति एवं **सुरभिगन्धोदकवर्षं वर्षत**, कथम्भूतमित्याह-**दिव्यं**-

---

१. वृत्तिकारसम्मुखं-'सेयं खलु मे समणं भगवं महावीरं वंदित्तए नमंसित्तए सक्कारित्तए सम्माणित्तए कल्लाणं मंगलं चेइयं पज्जुवासित्तए' इति पाठः सम्भाव्यते ज्ञाताधर्मकथा (सूत्र १४८) मध्ये एतत्संवादीपाठो दृश्यते ॥ २. आभि° JBK ॥ ३. →← चिह्नद्वयमध्यवर्तिपाठः JBK नास्ति ॥ ४. 'राजदन्तादिषु'-सि. हे. ३-१-१४९ ॥

प्रधानं सुरभिगन्धोपेतत्वात्, पुनः कथम्भूतम् इत्याह-'**पविरलपप्फुसिय**'मिति प्रकर्षेण यावद्रेणवः स्थगिता भवन्ति तावन्मात्रेणोत्कर्षेणेति भावः, स्पर्शनानि प्रस्पृष्टानि प्रविरलानि घनभावे कर्दमसम्भवात् प्रस्पृष्टानि-प्रकर्षवन्ति स्पर्शनानि मन्दस्पर्शनसम्भवे रेणुस्थगनासम्भवाद् यस्मिन्वर्षे तत्प्रविरलप्रस्पृष्टम्, अत एव '**रयरेणुविणासणं**' श्लक्ष्णतरा रेणुपुद्गला-रजः त एव स्थूला रेणवः, रजांसि च रेणवश्च रजोरेणवस्तेषां विनाशनं रजोरेणुविनाशनम्, एवम्भूतं च **सुरभिगन्धोदकं वर्षं वर्षित्वा** तद् योजनपरिमण्डलं क्षेत्रं **निहतरजः** कुरुतेति योगः, निहतं रजो भूय उत्थानासम्भवाद् यत्र तन्निहतरजः, तत्र निहतत्वं रजसः क्षणमात्रमुत्थानाभावेनापि सम्भवति, तत आह-**नष्टरजः**-नष्टं सर्वथाऽदृश्यीभूतं रजो यत्र तन्नष्टरजः, तथा भ्रष्टं-वातोद्धूततया योजनमात्रात् क्षेत्राद् दूरतः पलायितं रजो यस्मात्तद् **भ्रष्टरजः**, एतदेव एकार्थिकद्वयेन प्रकटयति-**उपशान्तरजः प्रशान्तरजः कुरुत, कृत्वा** च **कुसुमस्य** जातावेकवचनं कुसुमजातस्य **जानूत्सेधप्रमाणमात्रम् ओघेन**-सामान्येन सर्वत्र योजनपरिमण्डले क्षेत्रे **वर्षं वर्षत,** किंविशिष्टस्य कुसुमस्य इत्याह-'**जलज-थलज-भासुरप्पभूयस्स**' जलजं च स्थलजं च जलज-स्थलजं, जलजं पद्मादि, स्थलजं विचकिलादि, भास्वरं-दीप्यमानं, प्रभूतम्-अतिप्रचुरं, ततः कर्म्मधारयः, भास्वरं च तत्प्रभूतं च भास्वरप्रभूतं जलजस्थलजं च तद् भास्वरप्रभूतं च जलजस्थलजभास्वरप्रभूतं, तस्य, पुनः कथम्भूतस्य इत्याह-'**बिंटट्ठाइस्स**' वृन्तेन-अधोवर्त्तिना तिष्ठतीत्येवंशीलं वृन्तस्थायि तस्य वृन्तस्थायिनः, वृन्तमधोभागे उपरि पत्राणीत्येवंस्थानशीलस्येत्यर्थः, '**दसद्धवन्नस्स**' दशानामर्द्धं पञ्च दशार्द्धं वर्णा यस्य तद् दशार्द्धवर्णं तस्य पञ्चवर्णस्येति भावः, इत्थम्भूतस्य च कुसुमजातस्य वर्षं **वर्षित्वा** ततः योजनपरिमण्डलं क्षेत्रं **दिव्यं**-प्रधानं **सुरवराभिगमनयोग्यं** → **कुरुत**[१], कथम्भूतं सत् कृत्वा सुरवराभिगमनयोग्यं ← कुरुतेत्यत आह-'**कालागरुपवरकुंदुरुक्कतुरुक्कधूवमघमघेंतगंधुद्धुयाभिरामं**'[२] कालागुरुः प्रसिद्धः प्रवरः-प्रधानः कुन्दुरुक्कः-चीडा तुरुक्कं-सिल्हकं कालागुरुश्च प्रवरकुन्दुरुक्क-तुरुक्कौ च कालागुरुप्रवरकुन्दुरुक्कतुरुक्काः, तेषां धूपस्य यो मघमघायमानो गन्धः उद्धूतः-इतस्ततो विप्रसृतस्तेनाभिरामं-रमणीयं कालागुरुप्रवरकुन्दुरुक्कतुरुक्कधूपमघमघायमानगन्धोद्धूताभिरामं, तथा शोभनो गन्धो येषां ते सुगन्धास्ते च ते वरगन्धाश्च-वासाः सुगन्धवरगन्धास्तेषां गन्धः सोऽस्यास्तीति **सुगन्धवरगन्धगन्धिकं** "**अतोऽनेकस्वरात्**" [मलय. ७-१४] इति

---

१. →← चिह्नद्वयमध्यवर्तिपाठः JBK नास्ति ॥ २. °मघमघमघेंत° JBK ॥

'इक'प्रत्ययः, अत एव **गन्धवर्त्तिभूतं**, सौरभ्यातिशयाद् गन्धद्रव्यगुटिकाकल्पमिति[1] भावः, न केवलं स्वयं **कुरुत किन्त्वन्यैरपि कारयत, कृत्वा च कारयित्वा च एतां ममाज्ञप्तिकां क्षिप्रमेव**-शीघ्रमेव **प्रत्यर्पयत**, यथोक्तकार्यसम्पादनेन सफलां कृत्वा निवेदयत ॥ ९ ॥

सूत्र-१० : तए णं ते आभियोगिया देवा सूरियाभेणं देवेणं एवं वुत्ता समाणा हट्ठतुट्ठ जाव[2] हियया करयलपरिग्गहियं [दसनहं] सिरसावत्तं मत्थए अंजलिं कट्टु 'एवं देवो ! तहत्ति आणाए' विणएणं वयणं पडिसुणंति, पडिसुणित्ता उत्तरपुरत्थिमं दिसिभागं अवक्कमंति, अवक्कमित्ता वेउव्वियसमुग्घाएणं समोहण्णंति, समोहणित्ता संखेज्जाइं जोयणाइं दंडं निस्सिरन्ति, तंजहा-रयणाणं वयराणं वेरुलियाणं लोहियक्खाणं मसारगल्लाणं हंसगब्भाणं पुलगाणं सोगंधियाणं जोईरसाणं अंजणाणं अंजणपुलगाणं रययाणं जायरूवाणं अंकाणं फलिहाणं रिट्ठाणं अहाबायरे पोग्गले परिसाडेंति, परिसाडेत्ता अहासुहुमे पोग्गले परियायंति, परियाइत्ता दोच्चं पि वेउव्वियसमुग्घाएणं समोहण्णंति, समोहणित्ता उत्तरवेउव्वियाइं रूवाइं विउव्वंति, विउव्वित्ता ताए उक्किट्ठाए [पसत्थाए] तुरियाए चंडाए चवलाए जवणाए सिग्घाए उद्धूयाए दिव्वाए देवगईए तिरियमसंखेज्जाणं दीवसमुद्दाणं मज्झंमज्झेणं वीईवयमाणा वीईवयमाणा जेणेव जंबुद्दीवे दीवे जेणेव भारहे वासे जेणेव आमलकप्पा णयरी जेणेव अंबसालवणे चेतिए जेणेव समणे भगवं महावीरे तेणेव उवागच्छंति, उवागच्छित्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेंति, करेत्ता वंदंति नमंसंति, वंदित्ता नमंसित्ता एवं वदासि-'अम्हे णं भंते ! सूरियाभस्स देवस्स आभियोग्गा देवा देवाणुप्पियं वंदामो नमंसामो सक्कारेमो सम्माणेमो कल्लाणं मंगलं देवयं चेइयं पज्जुवासामो ॥१०॥

१. JBKG । गन्धगुटिकाकारमिति-मु. ॥ २. द्रष्टव्यं सू. ५ ॥

[१०] '**तए णमि**'त्यादि, ततो णमिति पूर्ववत्, **ते आभियोगिका देवाः सूर्याभेण देवेन एवमुक्ताः सन्तो 'हट्ठतुट्ठ जाव हियया'** इति, अत्र यावच्छब्दकरणात् 'हट्ठतुट्ठचित्तमाणंदिया पीइमणा परमसोमणस्सिया हरिसवसविसप्पमाणहियया' इति द्रष्टव्यम्, '**करयलपरिग्गहिय**'मित्यादि, द्वयोर्हस्तयोरन्योऽन्यान्तरिताङ्गुलिकयोः →[१]सम्पुटरूपतया यदेकत्र मीलनं सा **अञ्जलिस्तां** करतलाभ्यां परिगृहीता-निष्पादिता करतलपरिगृहीता तां, दश नखा यस्यां एकैकस्मिन् हस्ते नखपञ्चकसम्भवात् **दशनखा** तां, तथा आवर्त्तनमावर्त्तः शिरस्यावर्त्तो यस्याः सा **शिरस्यावर्त्ता** 'कण्ठेकालः' 'उरसिलोमा' इत्यादिवत् अलुक् समासः, ताम्, अत एवाह-**मस्तके कृत्वा विनयेन वचनं** सूर्याभस्य देवस्य **प्रतिशृण्वन्ति**-अभ्युपगच्छन्ति, कथम्भूतेन← विनयेन इत्याह-'**एवं देवो तहत्ति आणाए**' इति 'हे देव ! एवं यथैव यूयमादिशत तथैवाज्ञया-भवदादेशेन कुर्म्मः' इत्येवंरूपेण, 'देवो' इत्यत्र ओकार-आमन्त्रणे प्राकृतलक्षणवशाद्, यथा 'अज्जो!' इत्यत्र, प्रतिश्रुत्य वचनम् '**उत्तरपुरत्थिमं**' उत्तरपूर्वदिग्भागम्, ईशानकोणमित्यर्थः, तस्यात्यन्तप्रशस्तत्वात्, **अपक्रामन्ति**-गच्छन्ति, **अपक्रम्य च वैक्रियसमुद्घातेन**-वैक्रियकरणाय प्रयत्नविशेषेण **समोहनन्ति**-समवहन्यन्ते समवहता भवन्तीत्यर्थः, समवहतांश्चात्मप्रदेशान् दूरतो विक्षिपन्ति, तथा चाह-'**संखेज्जाणि जोयणाणि दंडं निस्सिरन्ति**' दण्ड इव दण्डः-ऊर्ध्वाध आयतः शरीरबाहल्यो जीवप्रदेशसमूहस्तं शरीराद्बहिः सङ्ख्येयानि योजनानि यावन्निसृजन्ति-निष्काशयन्ति, निसृज्य तथाविधान् पुद्गलानाददते, एतदेव दर्शयति, **तद्यथा-रत्नानां** कर्केतनादीनां **१ वज्राणां २ वैडूर्याणां ३ लोहितालक्षाणां ४ मसारगल्लाणां ५ हंसगर्भाणां ६ पुलकानां ७ सौगन्धिकानां ८ ज्योतीरसानाम्[२] ९ अञ्जनानाम् १० अञ्जनपुलकानां ११ रजतानां १२ जातरूपाणाम् १३ अङ्कानां १४ स्फटिकानां १५ रिष्टानां १६** योग्यान् **यथाबादरान्**-असारान् **पुद्गलान् परिशातयन्ति यथासूक्ष्मान्**-सारान् **पुद्गलान् पर्याददते पर्यादाय** च चिकीर्षितरूपनिर्माणार्थं **द्वितीयमपि वारं वैक्रियसमुद्घातेन समवहन्यन्ते, समवहत्य** च यथोक्तानां रत्नादीनामयोग्यान् यथाबादरान् पुद्गलान् परिशातयन्ति यथासूक्ष्मानाददते, आदाय च ईप्सितानि **उत्तरवैक्रियाणि विकुर्वन्ति ।**

ननु रत्नादीनां प्रायोग्याः पुद्गला औदारिकाः, उत्तरवैक्रियरूपयोग्याश्च पुद्गला ग्राह्या वैक्रियास्ततः कथमेवम् युक्तमिति ?, उच्यते, इह रत्नादिग्रहणं सारतामात्रप्रतिपादनार्थं, न तु

१. →← चिह्नद्वयमध्यवर्तिपाठः JBK नास्ति ॥ २. मु. G । °रत्नानाम्-JBK पा० ५-४ भा. १ ॥

'रत्नादीनामेव' परिग्रहार्थं ततो रत्नादीनामिवेति द्रष्टव्यमिति न कश्चिद्दोषः । अथवा औदारिका अपि ते[१] गृहीताः सन्तो वैक्रियतया परिणमन्ते, पुद्गलानां तत्तत्सामग्रीवशात् तथातथापरिणमनस्वभावत्वादतोऽपि न कश्चिद्दोषः, तत एवमुत्तरवैक्रियाणि रूपाणि कृत्वा तया देवजनप्रसिद्धया **उत्कृष्टया** प्रशस्तविहायोगतिनामोदयात् **'प्रशस्तया'** शीघ्रसञ्चरणात् **'त्वरितया'** त्वरा सञ्जाता अस्या इति त्वरिता तया, प्रदेशान्तरक्रमणवती **चपला** तया, क्रोधाविष्टस्येव श्रमासंवेदनात् चण्डेव **चण्डा** तया, निरन्तरं शीघ्रत्वगुणयोगात् शीघ्रा तया **शीघ्रया,** परमोत्कृष्टवेगपरिणामोपेता **जवना** तया, वातोद्धूतस्य दिगन्तव्यापिनो रजस इव या गतिः सा **उद्धूता** तया, **दिव्यया**-दिवि देवलोके भवा दिव्या तया, **देवगत्या तिर्यगसङ्ख्येयानां द्वीपसमुद्राणां मध्यंमध्येन,** मध्येनेत्यर्थः, 'गृहंगृहेण' 'मध्यंमध्येन' 'पदंपदेन' 'सुखंसुखेने'त्यादयः शब्दाश्चिरन्तनव्याकरणेषु साधवः प्रतिपादिता इति नायमपप्रयोगः, अवपतन्तोऽवपतन्तः, समागच्छन्त इति भावः, पूर्वान् द्वीपसमुद्रान् **व्यतिक्रामन्तो व्यतिक्रामन्तः,** उल्लङ्घयन्त इत्यर्थः, शेषं सुगमं यावत् ॥१०॥

सूत्र-११ : [२]देवाइ ! समणे भगवं महावीरे देवा एवं वदासी- पोराणमेयं देवा ! जीयमेयं देवा ! किच्चमेयं देवा ! करणिज्जमेयं देवा ! आचिन्नमेयं देवा ! अब्भणुण्णायमेयं देवा ! जण्णं भवणवइवाणमंतर-जोइसियवेमाणिया देवा अरहंते भगवंते वंदंति नमंसंति, वंदित्ता नमंसित्ता तओ साइं साइं नामगोयाइं [३]साहिंति, तं पोराणमेयं देवा ! जाव अब्भणुण्णायमेयं देवा ! ॥ ११ ॥

[११] **'[४]देवाइ समणे'**त्यादि, देवादियोगाद् **देवादि श्रमणो भगवान् महावीरस्तान् देवानेवमवादीत्**-पुराणेषु भवं **पौराणमेतत्** कर्म भो **देवाः** !, चिरन्तनैरपि देवैः कृतमिदं

---

१. K । तैः-मु. ॥ २. देवा-B कखगघच ॥ ३. सावेंति-K । सार्विति-पा. १-२ ॥ ४. "मदभिप्रायेण तु 'देवा इ' इति पदद्वयम् । तस्यार्थस्तु 'देवा'-'हे देवाः' 'इ'-'इति' संबोध्य भगवान् तान् देवान् एवमुवाच । 'इ' शब्दः 'इति-इइ-इअ-इ' एतत्क्रमेण 'इति' शब्दस्य रूपान्तरम् । एवंप्रकारा वाक्यरचना अन्यत्रापि समायाता । यथा "गोयमा इ समणे भगवं महावीरे भगवं गोयमं एवं वयासी" [व्याख्याप्रज्ञप्ति द्वि.श.उ. १ स्कन्दक] अर्थात् "'गोयमा'-'गौतम !' 'इ' - 'इति संबोध्य' श्रमणो भगवान् महावीरः भगवन्तं गौतमम् एवम् अवादीत्" । व्याख्याप्रज्ञप्तिटीकाकृता श्रीमता अभयदेवसूरिणाऽपि मदभिप्राय एव समर्थितः । तथाहि- "'गोयमा इ' त्ति गौतम ! इति एवम्, आमन्त्र्य इति शेषः" । अतः 'देवा इ' इति पदद्वयमेव सुसंगतम् ।" इति G पृ. ५९ [पं. बेचरदासस्याभिप्रायः] ॥

चिरन्तनान् तीर्थङ्करान् प्रतीति तात्पर्यार्थः, [१]**देयमेतद्**-वन्दनादिकं तीर्थकृद्भ्यो भो **देवा** !, [२]**यतोऽभ्यनुज्ञातमेतत्** सर्वैरपि तीर्थकृद्भिर्भो **देवाः**! ततः **कर्त्तव्यमेतद्** युष्मादृशां भो **देवाः**!, एतदेव व्याचष्टे-**करणीयमेतद् भो देवाः** !, **आचीर्ण्णमेतत्**-[३]कल्पभूतमेतद् भो **देवाः**!, किं तदित्याह-'**जन्न**'मित्यादि, यत् '**णमि**'ति पूर्ववद्, **भवनपति-व्यन्तर-ज्योतिष्क-वैमानिका देवा अर्हतो भगवतो वन्दन्ते नमस्यन्ति, वन्दित्वा नमस्यित्वा च पश्चात्स्वानि स्वानि**-आत्मीयानि आत्मीयानि **नामगोत्राणि कथयन्ति**, ततो युष्माकमपि **भो देवाः ! पौराणमेतत् यावदा**चीर्णमेतदिति ॥११॥

सूत्र-१२ : तए णं ते आभिओगिया देवा समणेणं भगवया महावीरेणं एवं वुत्ता समाणा हट्ठ [४]जाव हियया समणं भगवं महावीरं वंदंति णमंसंति, वंदित्ता णमंसित्ता उत्तरपुरत्थिमं दिसीभागं अवक्कमंति, अवक्कमित्ता वेउव्वियसमुग्घाएणं समोहण्णंति, समोहणित्ता संखेज्जाइं जोयणाइं दंडं निसिरंति, तंजहा-रयणाणं [५]जाव रिट्ठाणं अहाबायरे पोग्गले परिसाडेंति परिसाडेत्ता[६] दोच्चं पि वेउव्वियसमुग्घाएणं समोहण्णंति, समोहणित्ता [७]संवट्टयवाए विउव्वंति । से जहानामए भ[८]इयदारए सिया तरुणे जुगवं बलवं [जुवाणे] अप्पायंके[९] थिरसंघयणे थिरग्गहत्थे [१०][दढं]पडिपुण्णपाणिपायपिट्ठंतरोरुपरिणए घननिचियवट्टवलियखंधे चम्मेट्ठगदुघणमुट्ठियसमाहयनिचयगत्ते उरस्सबलसमन्नागए तलजमलजुयल [११]फलिह-निभबाहू लंघण[१२]पवणजइणपमद्दणसमत्थे छेदे दक्खे पट्ठे कुसले

---

१. JKG । जीतमे॰ मु. । "मूलपाठे पोरणमेयं देवा इति पाठानन्तरम् 'जीयमेयं देवा !' इति पाठः सर्वासु मूलप्रतिपुस्तकेषु लभ्यते परंतु टीकाप्रतिपुस्तकेषु क्वापि तत्पाठविवरणं न लब्धम् । टीकाप्रतिपुस्तकेषु सर्वेष्वपि 'पोराण' इत्यादिपाठविवरणानन्तरम् 'देयमेतद् वन्दनादिकम्' इत्येव पाठो लब्धः इति ।" इति G पृ. ५९ टिप्पणे ॥ २. 'किच्चमेयं' इति पाठो न व्याख्यातः ॥ ३. कल्पभूतमेतद्-JK पा० ५-४ आ० १ नास्ति ॥ ४. द्र. सू. ८ ॥ ५. द्र. सू. १० ॥ ६. ०त्ता अहासुहुमे पोग्गले परियायंति, परियाइत्ता दोच्चं-V ॥ ७. संवट्टवाए मु. । संवट्टावाए-K । एवमग्रेऽपि ॥ ८. कम्मादारए-LB कखगघच । कंमदारए-K। भइयदारए कम्मादारए-छ ॥ ९. के थिरसंघयणे - KB कखगघचछ बाबु ॥ १०. "पडिपुन्नपाणिपाए पिट्ठंतरोरु(संघाय-LJB बाबु) परिणए-LJB मु. कखगघचछ ॥ दढपाणिपायपास पिट्ठंतरोरुपरिणते (अणु. ४१६, जी. ३।११८)" इति V पृ. ८५ टि. ११ सूत्रादर्शेषु भूयान् क्रम भेदः इतोऽग्रे दृश्यते ॥ ११. फलिहनिभ-J कखगघच अस्ति । VG नास्ति ॥ १२. ०णवग्गण० JBK ॥

मेधावी णिउणसिप्पोवगए एगं महं दंडसंपुच्छणिं वा सलागाहत्थगं वा वेणुसलाइयं वा गहाय रायंगणं वा रायंतेपुरं वा देवकुलं वा सभं वा पवं वा आरामं वा उज्जाणं वा अतुरियमचवलमसंभंतं निरंतरं सुनिपुणं सव्वतो समंता संपमज्जेज्जा, एवामेव तेऽवि सूरियाभस्स देवस्स आभिओगिया देवा संवट्टयवाए विउव्वंति, विउव्वित्ता समणस्स भगवओ महावीरस्स सव्वतो समंता जोयणपरिमण्डलं जं किंचि तणं वा पत्तं वा तहेव सव्वं आहुणिय आहुणिय एगंते एडेंति, एडेत्ता खिप्पामेव उवसमंति, उवसमित्ता दोच्चं पि वेउव्वियसमुग्घाएणं समोहणंणंति, समोहणित्ता अब्भवद्दलए विउव्वंति, विउव्वित्ता से जहाणामए भइगदारए सिया तरुणे जाव निउ[1]णसिप्पोवगए एगं महं दगवारगं वा दगथालगं वा दगकलसगं वा दगकुंभगं वा गहाय आरामं वा जाव पवं वा अतुरिय जाव सव्वतो समंता आवरिसेज्जा, एवामेव तेऽवि सूरियाभस्स देवस्स आभियोगिया देवा अब्भवद्दलए विउव्वंति, विउव्वित्ता खिप्पामेव पतणतणायन्ति, पतणतणाइत्ता खिप्पामेव [प]विज्जुयायंति [प]विज्जुयाइत्ता समणस्स भगवओ महावीरस्स सव्वओ समंता जोयणपरिमंडलं णच्चोदगं णातिमट्टियं तं पविरलप्फुसियं रयरेणुविणासणं दिव्वं सुरभिगंधोदगं वासं वासंति, वासेत्ता णिहयरयं णट्ठरयं भट्ठरयं उवसंतरयं पसंतरयं करेंति, करेत्ता खिप्पामेव उवसामंति, उवसामित्ता -

तच्चं पि वेउव्वियसमुग्घाएणं समोहणंणंति, समोहणित्ता पुप्फवद्दलए विउव्वंति, से जहाणामए मालागारदारए सिया तरुणे जाव निउण-सिप्पोवगए एगं महं पुप्फपडलगं वा पुप्फचंगेरियं वा पु[2]प्फछज्जियं वा गहाय रायंगणं वा जाव सव्वतो समंता कयग्गहगहियकरयलपब्भट्ठविप्पमुक्केणं दसद्धवन्नेणं कुसुमेणं मुक्कपुप्फपुंजोवयारकलितं करेज्जा, एवामेव ते सूरियाभस्स देवस्स आभिओगिया देवा पुप्फवद्दलए विउव्वंति, विउव्वित्ता खिप्पामेव पयणतणायन्ति, पतणतणायित्ता जाव जोयण-

१. निउण० K नास्ति । एवमग्रेऽपि ॥ २. "पुप्फछज्जियं पुप्फपत्थियं-K पा.२ । पुप्फपत्थियं-पुष्पप्रस्थिकाम् पुष्पपात्रिकाम् इत्यर्थः संभाव्यते-" इति G पृ. ६६ टिप्पणे ॥

परिमण्डलं जलथलयभासुरप्पभूयस्स बिंटट्ठाइस्स दसद्धवन्नकुसुमस्स जाणुस्सेहपमाणमेत्तिं ओहिं वासं वासंति, वासित्ता कालागुरुपवरकुंदुरुक्क-तुरुक्क-धूव-मघमघेंत-गंधुद्धुयाभिरामं सुगंधवरगंधगंधियं गंधवट्टिभूतं दिव्वं सुरवराभिगमणजोग्गं करेंति य कारवेंति य करेत्ता य कारवेत्ता य खिप्पामेव उवसामंति, उवसामित्ता जेणेव समणे भगवं महावीरे तेणेव उवागच्छंति, उवागच्छित्ता समणं भगवं महावीरं तिक्खुत्तो जाव वंदित्ता नमंसित्ता समणस्स भगवओ महावीरस्स अंतियातो अंबसालवणातो चेइयाओ पडिनिक्खमंति, पडिनिक्खमित्ता ताए उक्किट्ठाए जाव वीईवयमाणा वीईवयमाणा जेणेव सोहम्मे कप्पे जेणेव सूरियाभे विमाणे जेणेव सभा सुहम्मा जेणेव सुरियाभे देवे तेणेव उवागच्छंति, उवागच्छित्ता सूरियाभं देवं करयलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति, वद्धावेत्ता तमाणत्तियं पच्चप्पिणंति ॥ १२ ॥

[१२] **'तए णमित्यादि'** सुगमं, यावत् **'से जहानामए भइयदारए सिया'** इत्यादि, स वक्ष्यमाणगुणो यथानामकोऽनिर्दिष्टनामकः कश्चिद्भृतिकदारकः-भृतिं करोति भृतिकः-कर्म्मकरः तस्य दारको भृतिकदारकः स्यात्, किंविशिष्ट इत्याह-**तरुणः**-प्रवर्द्धमानवयाः[१], ननु[२] दारकः वर्धमानवया एव भवति ततः किमनेन विशेषणेन ?, न, आसन्नमृत्योः प्रवर्द्धमानवयस्त्वाभावाद्, न ह्यासन्नमृत्युः[३] प्रवर्धमानवया भवति, न च तस्य विशिष्ट-सामर्थ्यसम्भवः, आसन्नमृत्युत्वादेव, विशिष्टसामर्थ्यप्रतिपादनार्थश्चैष आरम्भस्ततो-ऽर्थवद्विशेषणम्, अन्ये तु व्याचक्षते-"इह यद् द्रव्यं विशिष्टवर्णादिगुणोपेतमभिनवं च तत्तरुणमिति लोके प्रसिद्धं, यथा 'तरुणमिदमश्वत्थपत्र'मिति, ततः स भृतिकदारकस्तरुण इति, किमुक्तं भवति ?-अभिनवो विशिष्टवर्ण्णादिगुणोपेतश्च"इति, बलं-सामर्थ्यं तद् यस्यास्तीति **बलवान्,** तथा युगं-सुषमदुष्षमादिकालः, स स्वेन रूपेण यस्यास्ति न दोषदुष्टः स **युगवान्,** किमुक्तं भवति ?-कालोपद्रवोऽपि सामर्थ्यविघ्नहेतुः, स चास्य नास्तीति प्रतिपत्त्यर्थमेतद्विशेषणं, **युवा**-यौवनस्थः, युवावस्थायां हि बलातिशय इत्येतदुपादानम्, **'अप्पायंके'** इति अल्पशब्दोऽभाववाची, अल्पः-सर्वथा अविद्यमान

१. °तया-भा. १ ॥ २. ननु दारकः वर्धमानवया-JK पा.४ पा.२ बाबु नास्ति ॥ ३. °त्युः नहि (स-हि K) आसन्नमृत्युः प्रवर्ध० JK बाबु. ॥

आतङ्को-ज्वरादिर्यस्य सोऽल्पातङ्कः स्थिरोऽग्रहस्तो यस्य स **स्थिराग्रहस्तः**, '**दढपाणि-पायपिट्ठंतरोरुपरिणए**' इति दृढानि-अतिनिबिड[१]चयापन्नानि पाणि-पाद-पृष्ठान्तरोरूणि परिणतानि यस्य स दृढपाणि-पाद-पृष्ठान्तरोरुपरिणतः, सुखादिदर्शनात् पाक्षिकः क्तान्तस्य परनिपातः । तथा घनम्-अतिशयेन निचितौ-निबिडतरचयमापन्नौ वलितावि‌व वलितौ वृत्तौ स्कन्धौ यस्य स **घननिचितवलितवृत्तस्कन्धः**, '**चम्मेट्ठगदुघणमुट्ठियसमाहय[२][निचिय]-गायगत्ते**' इति चर्मेष्टकेन द्रुघणेन मुष्टिकया च-मुष्ट्या समाहत्य समाहत्य ये निचितीकृतगात्रास्ते चर्मेष्टक-द्रुघण-मुष्टिकसमाहतनिचितगात्रास्तेषामिव गात्रं यस्य स चर्मेष्टकद्रुघणमुष्टिकसमाहतनिचि[३]तगात्रगात्रः, '**उरस्सबलसमण्णागए**' इति उरसि भवम् उरस्यं तच्च तद्बलं च उरस्यबलं तत्समन्वागतः-समनुप्राप्तः उरस्यबलसमन्वागतः आन्तरोत्साहवीर्ययुक्त इति भावः, '**तलजमलजुयलबाहू**' तलौ-तालवृक्षौ तयोर्यमलयुगलं-समश्रेणीकं युगलं तलयमलयुगलं तद्वदतिसरलौ पीवरौ च बाहू यस्य स तलयमलयुगलबाहुः, '**लंघणपवणजइणपमद्दणसमत्थे**' इति लङ्घने-अतिक्रमणे, प्लवने-मनाक् पृथुतरविक्रमवति गमने, जवने-अतिशीघ्रगतौ, प्रमर्दने-कठिनस्यापि वस्तुनश्चूर्णन-करणे समर्थः लङ्घन-प्लवन-जवन-प्रमर्द्दनसमर्थः, क्वचित् '**लंघणपवणजइणवायामण-समत्थे**' इति पाठः, तत्र व्यायामने-व्यायामकरणे इति व्याख्येयं, **छेको**-द्वासप्तति-कलापण्डितः, **दक्षः**-कार्याणामविलम्बितकारी, **प्रष्ठो**-वाग्मी, **कुशलः**-सम्यक्क्रिया-परिज्ञानवान्, **मेधावी**-परस्पराव्याहतपूर्वापरानुसन्धानदक्षः, अत एव '**निपुणसिप्पोवगए**' इति निपुणं यथा भवति एवं शिल्पं-क्रियासु कौशलम् उपगतः-प्राप्तो निपुणशिल्पोपगतः । **एकं महान्तं शलाकाहस्तकं**-स[४]रित्पर्णादिशलाकासमुदायं स[५]रित्पर्णादिशलाकामयीं सम्मार्जनीमित्यर्थः, वाशब्दो विकल्पार्थः, '**दंडसंपुच्छणिं वा**' इति दण्डयुक्ता स[६]म्पुंसनी-सम्मार्जनी दण्डसम्पुंसनी तां वा । '**वेणुसिलागिगं वा**' इति वेणुः-वंशस्तस्य शलाका वेणुशलाकास्ताभिर्निर्वृत्ता वे[७]णुशलाकिकी-वेणुशलाकामयी सम्मार्जनी तां वा **गृहीत्वा राजाङ्गणं वा राजान्तःपुरं वा देवकुलं वा सभां वा** सन्तो भान्त्यस्यामिति सभा-ग्रामप्रधानानां नगरप्रधानानां यथासुखमवस्थानहेतुर्मण्डपिका तां वा '**प्रपां वा**' पानीयशालां

१. डतया॰ JK बाबु. ॥ २. ॰हयगायगत्ते JK हयगत्ते मु. ॰गायगते-बाबु. ॥ ३. JK बाबु. । तगात्राः मु ॥ ४. "अत्र 'सरित्पर्ण' शब्दः कमर्थं गमयति इति नावगम्यते । 'सरित्पर्ण' स्थाने श्रीपर्णी संभवेत् ?" इति G टिप्पणे पृ. ६३ । 'सरित्' दुर्गादेव्या नाम, तस्यै प्रियाणि पर्णानि यत्र वृक्षे वर्तन्ते तत्सम्भाव्यते इति आ.भ.श्री कुलचन्द्रसूरीणामभिप्रायः । सूरित्पर्णादि भा.२ । परित्पर्णादि-पा.५ बाबु. ॥ ५. "शरित्पर्णादि-पा.५" ॥ ६. JKG बाबु. । सम्पुच्छनी-सन्मार्जनी दण्डसम्पुच्छनी-मु. ॥ ७. वेणुशिला॰ JK बाबु. ॥

वा '**आरामं वे**ति' आगत्यागत्य भोगपुरुषा वरतरुणीभिः सह यत्र रमन्ते-क्रीडन्ति स आरामो नगरान्नातिदूरवर्त्ती क्रीडाश्रयः तरुखण्डः तम् '**उज्जाणं वे**ति' ऊर्ध्वं विलम्बितानि प्रयोजनाभावाद् यानानि यत्र तदुद्यानं-नगरात्प्रत्यासन्नवर्त्ती यान-वाहन-क्रीडागृहाद्याश्रयस्तरुखण्डः, तद् वा, तथा **अत्वरितमचपलमसम्भ्रान्तं,** त्वरायां चापल्ये सम्भ्रमे वा सम्यक्कचवराद्यपगमासम्भवाद्, **निरन्तरं** न त्वपान्तरालमोचनेन, **सुनिपुणं** श्लक्ष्णस्याप्यचोक्षस्यापसारणेन, **सर्वतः**-सर्वासु दिक्षु[1] **समन्ततः**-सामस्त्येन **सम्प्रमार्जयेत्** '**एवमेवे**'त्यादि, सुगमं यावत् '**खिप्पामेव पच्चुवसमंति**'इत्यादि, एकान्ते तृणकाष्ठाद्यपनीय क्षिप्रमेव-शीघ्रमेव प्रत्युपशाम्यन्ति प्रत्येकं ते आभियोगिका देवाः उपशाम्यन्ति संवर्त्तकवायुविकुर्वणान्निवर्त्तन्ते, संवर्त्तकवातमुपसंहरन्ती[2]ति भावः । ततो '**दोच्चं पि वेउव्विय-समुग्घाएणं समोहण्णंति**' इति, संवर्त्तकवातविकुर्वणार्थं हि यद्वेलाद्वयमपि वैक्रिय-समुद्घातेन समवहननं तत्किलैकम् इदं तु अब्भ्रवार्दलकविकुर्वणार्थं द्वितीयमत उक्तं-द्वितीयमपि वारं वैक्रियसमुद्घातेन समवहन्यन्ते (घ्नन्ति), **समवहत्य च अब्भ्रवार्दलकानि विकुर्वन्ति,** वाः-पानीयं तस्य दलानि वार्दलान्येव[3] वार्दलकानि मेघा इत्यर्थः,[4] अप्पो बिभ्रतीति अब्भ्राणि-मेघाः, अब्भ्राणि सन्त्यस्मिन्निति अब्भ्रम्, "**अभ्रादिभ्यः**" [सि.हे. ७-२-४६] इति मत्वर्थीयः 'अ'प्रत्ययः, आकाशमित्यर्थः, अब्भ्रे वार्दलकानि अब्भ्रवार्दलकानि तानि विकुर्वन्ति-आकाशे मेघान् विकुर्वन्तीत्यर्थः । '**से जहानामए भइगदारगे सिया**' इत्यादि पूर्ववद् यावद् '**निउणसिप्पोवगए एगं महं**' इत्यादि, स यथानामको भृतिकदारक **एकं महान्तं दकवारकं वा** मृत्तिकामयभाजनविशेषं '**दगकुंभगं वा**' ति दकघटं, **दकस्थालकं वा**-कंसादिमयमुदकभृतं भाजनं **दककलसं वा**-उदकभृतं भृङ्गारम् '**आवरिसिज्जा**' इति आवर्षेत् आ-समन्तात् सिञ्चेत्, '**खिप्पामेव पतणतणायंति**' अनुकरणवचनमेतत् प्रकर्षेण स्तनितं कुर्वन्तीत्यर्थः, '**पविज्जुयाइंति**'त्ति प्रकर्षेण विद्युतं विदधति । '**पुप्फवद्दलए विउव्वंति**' पुष्पवृष्टियोग्यानि वार्दलकानि पुष्पवार्दलकानि-पुष्पवर्षुकान् मेघान् विकुर्वन्तीति भावः । '**एगं महं पुप्फछज्जियं वा**' एकां महतीं छाद्यते-उपरि स्थग्यते इति छाद्या, छाद्यैव छाद्यिका पुष्पैर्भृता छाद्यिका पुष्पछाद्यिका तां वा । **पटलकानि**-प्रतीतानि, '**कयग्गहगहियकरयलपब्भट्ठविप्पमुक्केणं**' ति इह मैथुनसंरम्भे यद् युवतेः केशेषु ग्रहणं स कचग्रहस्तेन गृहीतं कचग्रहगृहीतं तथा करतलाद्विप्रमुक्तं सत्प्रभ्रष्टं

---

१. JKG बाबु. । दिक्षु विदिक्षु-मु. ॥ २. JK बाबु. । वातविकुर्वण मु० मु. ॥ २. JKG । ०तविकुर्वणमुप० मु. ३. JKG बाबु. । वार्दलानि तान्येव-मु. ॥ ४. आपो-JK बाबु. ॥

करतलप्रभ्रष्टविप्रमुक्तम्, प्राकृतत्वात्पदव्यत्ययस्ततो विशेषणसमासः, तेन, शेषं सुगमं यावद् **'जएणं विजएणं वद्धावेंति'** जयेन विजयेन वर्द्धापयन्ति, जयतु त्वं देव ! विजयस्व त्वं देव ! इत्येवं वर्द्धापयन्तीत्यर्थः, तत्र जयः- परैरनभिभूयमानता प्रतापवृद्धिश्च विजयस्तु- परेषामसहमानानामभिभवोत्पादः, **वर्द्धापयित्वा च तां** पूर्वोक्ता**माज्ञप्तिकां प्रत्यर्प्पयन्ति,** आदिष्टकार्यसम्पादनेन निवेदयन्तीत्यर्थः ॥१२॥

सूत्र-१३ : तए णं से सूरियाभे देवे तेसिं आभियोगियाणं देवाणं अंतिए एयमट्ठं सोच्चा निसम्म हट्ठतुट्ठ जाव हियए पायत्ताणियाहिवइं देवं सद्दावेति, सद्दावेत्ता एवं वदासी-"खिप्पामेव भो देवाणुप्पिया ! सूरियाभे विमाणे सभाए सुहम्माए मेघोघरसियगंभीरमहुरसद्दं जोयणपरिमंडलं सूसरं घंटं तिक्खुत्तो उल्लालेमाणे उल्लालेमाणे महया महया सद्देणं उग्घोसेमाणे उग्घोसेमाणे एवं [1]वयाहि-आणवेति णं भो ! सूरियाभे देवे गच्छति णं भो ! सूरियाभे देवे जंबूद्दीवे दीवे भारहे वासे आमलकप्पाए नयरीए अंबसालवणे चेतिते समणं भगवं महावीरं अभिवंदए, तुब्भेऽवि णं भो ! देवाणुप्पिया! सव्विड्ढीए जाव [2]नातियरवेणं नियगपरिवालसद्धिं संपरिवुडा सातिं सातिं जाणविमाणाइं दुरूढा समाणा अकालपरिहीणं[3] चेव सूरियाभस्स देवस्स अंतियं पाउब्भवह ॥ १३ ॥

[१३] **'तए णमि'**त्यादि, ततो 'णमिति' पूर्ववत् स **सूर्याभो देवस्तेषाम् 'आभियोग्गाणं'** ति आ-समन्तादाभिमुख्येन युज्यन्ते-प्रेष्यकर्मसु व्यापार्यन्ते इत्याभियोग्या आभियोगिका इत्यर्थः, तेषामाभियोग्यानां **देवानामन्तिके**-समीपे **एनम्**-अनन्तरोक्त**मर्थं 'श्रुत्वा'** श्रवणविषयं कृत्वा श्रवणानन्तरं च **निशम्य**-परिभाव्य **'हट्ठतुट्ठ जाव हियए'** इति

---

१. भा.१ V । वदाहि- बाबु. । वयासी आणवेसि B कखगघचछ । "अयं पाठः भा. १ प्रतावेव लभ्यते तथापि अनेनैव च अर्थसंगतिः । मुद्रितः 'वयासी' इति पाठस्तु भूतकालसूचकः, स चात्र न संगतिं गच्छति । अत्र तु आज्ञार्थसूचकस्यैव पाठस्योचितत्वम्" G पृ. ६८ टिप्पणे ॥ २. "विवरणकारेण सव्विड्ढीए पदं व्याख्याय सर्वद्युत्या... नादितरवेण' एतान्यपि पदानि कानिचित् सप्रतीकं व्याख्यातानि अतो ज्ञायते यत् विवरणकारप्राप्तमूलपाठे एतानि सर्वाण्यपि पदानि मूले एव अभूवन्" इति G पृ.६९ टिप्पणे ॥ ३. ण्णा- LBK खगघच बाबु. ॥

यावच्छब्दकरणाद् 'हट्ठतुट्ठचित्तमाणंदिए पीइमणे परमसोमणस्सिए हरिसवसविसप्पमाणहियए' इति द्रष्टव्यं, **पदात्यनीकाधिपतिं देवं शब्दयति, शब्दयित्वा एवमवादीत्-क्षिप्रमेव भो देवानां प्रिय ! सभायां सुधर्मायां**-सुधर्माभिधानायां '**मेघोघरसियगंभीर-महुरसद्द**'मिति मेघानामोघः-सङ्घातो मेघौघस्तस्य रसितं-गर्जितं तद्वद्गम्भीरो मधुरश्च शब्दो यस्याः सा मेघौघरसितगम्भीरमधुरशब्दा तां, '**जोयणपरिमंडलं**' ति योजनं-योजनप्रमाणं परिमण्डलं-गुणप्रधानोऽयं निर्देशः पारिमण्डल्यं यस्याः सा योजनपरिमण्डला तां **सुस्वरां**-सुस्वराभिधानां **घण्टामुल्लालयन् उल्लालयन्** ताडयन् ताडयन्नित्यर्थः, **महता महता शब्देन उद्घोषयन्**-उद्घोषणां कुर्व्वन् **एवं वंद[१]-आज्ञापयति भोः ! सूर्याभो देवो यथा गच्छति भोः ! सूर्याभो देवो जम्बूद्वीपं भारतं वर्षम् आमलकल्पां नगरीमाम्रशालवनं चैत्यं** [तत्र] **श्रमणं भगवन्तं महावीरं वन्दितुं**, तत्-तस्मात्, '**तुब्भेऽवि णमि**'ति यूयमपि 'णमि'ति पूर्ववद्, **देवानां प्रियाः!** पूर्ववद् **सर्वद्धया**-परिवारादिकया, सर्वद्युत्या-यथाशक्तिविस्फारितेन समस्तेन शरीरतेजसा, सर्वबलेन-समस्तेन हस्त्यादिसैन्येन, सर्वसमुदायेन-स्वस्वाभियोग्यादिसमस्तपरिवारेण, सर्वादरेण-समस्तयावच्छक्ति[२]मूलेन, सर्वविभूत्या-[३]समस्तस्वाभ्यन्तरवैक्रियकरणादिबाह्यरत्नादिसम्पदा, सर्वविभूषया-यावच्छक्तिस्फारोदारशृङ्गारकरणेन, 'सव्वसंभमेणं'ति सर्वोत्कृष्टेन संभ्रमेण, सर्वोत्कृष्टसम्भ्रमो नामेह स्वनायकविषयबहुमानख्यापनपरा स्वनायकोपदिष्टकार्यसम्पादनाय यावच्छक्तित्वरितत्वरिता प्रवृत्तिः, 'सव्वपुप्फवत्थगंधमल्लालंकारेणं' अत्र गन्धा-वासाः, माल्यानि-पुष्पदामानि, अलङ्काराः-आभरणविशेषाः, ततः समाहारो द्वन्द्वस्ततः सर्वशब्देन सह विशेषणसमासः, 'सव्वदिव्वतुडियसद्दसंनिनाएणं'इति सर्वाणि च तानि दिव्यतुडितानि च दिव्यतूर्याणि सर्वदिव्यतुडितानि, तेषां शब्दाः सर्वदिव्यतुडितशब्दाः, तेषामेकत्र मीलनेन यः सङ्गतेन नितरां नादो-महान् घोषः सर्वतुडितदिव्यशब्दसन्निनादस्तेन । इह अल्पेष्वपि सर्वशब्दो दृष्टो यथा 'अनेन सर्वं पीतं घृतम्' इति, तत आह-'महताए इड्ढीए' इत्यादि महत्या यावच्छक्तितुलितया ऋद्ध्या-परिवारादिकया, एवं 'महताए जुईए' इत्याद्यपि भावनीयं, तथा महता-स्फूर्त्तिमता वराणां-प्रधानानां तुडितानाम्-आतोद्यानां यमकसमकम्-एककालं पटुभिः पुरुषैः प्रवादितानां यो रवस्तेन, एतदेव विशेषेणाचष्टे-'संख-पणव-पडह-भेरि-झल्लरि-खरमुहि-हुडुक्क-मुरय-मुइंग-दुंदुभि-निग्घोसनाइतरवेण' शङ्ख-प्रतीतः, पणवो भाण्डानां, पडहः प्रतीतः, भेरी-ढक्का,

---

१. JKG बाबु. । वदति - मु. ॥ २. ० JKG बाबु. । °क्तितुलनेन-मु. भा.२ ॥ ३. JKG बाबु. । सर्वया अभ्य° मु. ॥

झल्लरी-चर्मावनद्धा विस्तीर्णा वलयाकारा, खरमुही-काहला, हुडुक्का-प्रतीता, महाप्रमाणो मर्दलो मुरजः, स एव लघुर्मृदङ्गः, दुन्दुभिः-भेर्याकारा सङ्कटमुखी, एतेषां द्वन्द्वस्तासां निर्घोषो-महान् ध्वानो **नादितं** च-घण्टायामिव वादनोत्तरकालभावी सततध्वनिः तल्लक्षणो यो **रव**स्तेन, **'नियगपरिवारसद्धिं संपरिवुडा'** इति निजकः-आत्मीयः आत्मीयो यः परिवारस्तेन सार्द्धं, तत्र सहभावः परिवाररीतिमन्तरेणापि सम्भवति तत आह-**'संपरिवुडा'** सम्यक्-परिवाररीत्या परिवृताः सम्परिवृताः, **'अकालपरिहीणं चेवे'**ति परिहानिः-परिहीनं, कालस्य परिहीनं कालपरिहीनं कालविलम्ब इति भावः न विद्यते कालपरिहीनं यत्र प्रादुर्भवने तदकालपरिहीनं, क्रियाविशेषणमेतत्, **'अंतिए पाउब्भवह'** अन्तिके-समीपे प्रादुर्भवत, समागच्छतेति भावः ॥१३॥

सूत्र-१४ : तए णं से पायत्ताणियाहिवती देवे सूरियाभेणं देवेणं एवं वुत्ते समाणे हट्ठतुट्ठ जाव[3] हियए एवं देवो[1] ! तहत्ति आणाए विणएणं वयणं पडिसुणेति, पडिसुणित्ता जेणेव सूरियाभे विमाणे जेणेव सभा सुहम्मा जेणेव मेघोघरसियगंभीरमहुरसद्दा जोयणपरिमंडला सुस्सरा घंटा तेणेव उवागच्छति, उवागच्छित्ता तं मेघोघरसितगंभीरमहुरसद्दं जोयणपरिमंडलं सुसरं घंटं तिक्खुत्तो उल्लालेति । तए णं तीसे[2] मेघोघरसितगंभीरमहुरसद्दाते जोयणपरिमंडलाते सुसराते घंटाए तिक्खुत्तो उल्लालियाए समाणीए से सूरियाभे विमाणे पासायविमाणणिक्खुडावडियसद्दघंटापडिसुयासय-सहस्ससंकुले जाए याऽवि होत्था ॥ १४ ॥

[१४] **'तए णं से'** इत्यादि **'जाव[3] पडिसुणित्ता'** इति, अत्र यावच्छब्दकरणात् 'करयलपरिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु **एवं देवो ! तहत्ति आणाए विणएणं वयणं पडिसुणेइ**'त्ति द्रष्टव्यं, **'तिक्खुत्तो उल्लालेइ**'त्ति, त्रिकृत्वः-त्रीन् वारान् उल्लालयति-ताडयति, ततो **'णं'** इति वाक्यालङ्कारे, **तस्यां मेघौघरसितगम्भीरमधुर-शब्दायां योजनपरिमण्डलायां सुस्वराभिधानायां घण्टायां त्रिकृत्वस्ताडितायां सत्यां यत् सूर्याभं विमानं [तत्र] तत्प्रासादनिष्कुटेषु च ये आपतिताः शब्दाः**-शब्दवर्गणा-

१. GKBL बाबु. कचछ । देवा-मु. खग ॥ २. तीए - LBK खगघचछ ॥ ३. सूत्रादर्शे जाव हियए-इति पाठः दृश्यते । वृत्तिकारपार्श्वे जावपडिसुणित्ता इति पाठः आसीत् ॥

पुद्गलास्तेभ्यः समुच्छलितानि यानि **घण्टाप्रतिश्रुताशतसहस्राणि**-घण्टाप्रतिशब्दलक्षाणि तैः **सङ्कुल**मपि **जातमभूत्**, किमुक्तं भवति ?-घण्टायां महता प्रयत्नेन ताडितायां ये विनिर्गताः शब्दपुद्गलास्तत्प्रतिघातवशतः सर्वासु दिक्षु विदिक्षु च दिव्यानुभावतः समुच्छलितैः प्रतिशब्दैः सकलमपि विमानमेकयोजनलक्षमानमपि बधिरितमुपजायत इति । एतेन 'द्वादशभ्यो योजनेभ्यः समागतः शब्दः श्रोत्रग्राह्यो भवति, न परतः, ततः कथमेकत्र ताडितायां घण्टायां सर्वत्र तच्छब्दश्रुतिरुपजायते ?' इति यच्चोद्यते तदपाकृतमवसेयं, सर्वत्र दिव्यानुभावतः तथारूपप्रतिरूपप्रतिशब्दोच्छलने[१] यथोक्तदोषासम्भवात् ॥ १४ ॥

सूत्र-१५ : तए णं तेसिं सूरियाभविमाणवासिणं बहूणं वेमाणियाणं देवाण य देवीण य एगंतरइपसत्त-निच्चप्पमत्त-विसयसुहमुच्छियाणं सुसरघंटारवविउलबोलतुरियचवलपडिबोहणे[२] कए समाणे घोसणकोउहल-दिन्नकन्नएगग्गचित्तउवउत्तमाणसाणं से पायत्ताणीयाहिवई देवे तंसि[३] घंटार-वंसि णिसंतपसंतंसि महया महया सद्देणं उग्घोसेमाणे उग्घोसेमाणे एवं वदासी-हंद[४] सुणंतु भवंतो सूरियाभविमाणवासिणो बहवे वेमाणिया देवा य देवीओ य सूरियाभविमाणवइणो वयणं हियसुहत्थं, आणवेइ णं भो ! सूरियाभे देवे, गच्छइ णं भो ! सूरियाभे देवे जंबूद्दीवं दीवं भारहं वासं आमलकप्पं नयरीं अंबसालवणं चेइयं समणं भगवं महावीरं अभिवंदए, तं तुब्भेऽवि णं देवाणुप्पिया ! सव्विड्ढीए जाव अकालपरिहीणा[५] चेव सूरिया-भस्स देवस्स अंतियं पाउब्भवह ॥ १५ ॥

[१५] '**तए णं**' इत्यादि, ततो 'णमि'ति पूर्ववत्, **तेषां सूर्याभदेवविमानवासिनां बहूनां वैमानिकदेवानां देवीनां च** एकान्तेन-सर्वात्मना रतौ-रमणे प्रसक्ता **एकान्तरतिप्रसक्ता**, अत एव नित्यं-सर्वकालं प्रमत्ता **नित्यप्रमत्ताः**, कस्मादिति चेद् ? अत आह-'**विसयसुहमुच्छियत्ति**' विषयसुखेषु मूर्च्छिता-अध्युपपन्ना विषयसुखमूर्च्छिताः ततो नित्यप्रमत्ताः, ततः पदत्रयस्य पदद्वयमीलनेन विशेषणसमासः, तेषां, '**सुसरघंटारव-विउलबोलतुरियचवलपडिबोहणे**' इति सुस्वराभिधानाया घण्टाया रवस्य यः सर्वासु

१. KG बाबु. । °प्रतिशब्दो° मु. ॥ २. VG । तुरियचवल - LB ख ग घ च बाबु. नास्ति । मुद्रिते ( ) कोष्ठके वर्तते ॥ ३. तस्सिं - VK ॥ ४. GB । हंत-KV मु. ॥ ५. °णं-V ॥

दिक्षु विदिक्षु च प्रतिशब्दोच्छलनेन विपुलः-सकलविमानव्यापितया विस्तीर्णो बोलः-कोलाहलस्तेन त्वरितं-शीघ्रं चपलम्-आकुलं प्रतिबोधने **कृते सति 'घोसणकोउहल-दिन्नकन्नएगग्गदित्तउवउत्तमाणसाणमिति'** कीदृग् नाम घोषणं भविष्यतीत्येवं घोषणे कुतूहलेन दत्तौ कर्णौ यैस्ते घोषणकुतूहलदत्तकर्णाः, तथा एकाग्रं-घोषणाश्रवणैकविषयं चित्तं येषां ते [1]एकाग्रचित्ताः, एकाग्रचित्तत्वेऽपि कदाचिदनुपयोगः स्यादत आह- उपयुक्तमानसाः, ततः पूर्वपदेन विशेषणसमासस्तेषां, **पदात्यनीकाधिपतिर्देवस्तस्मिन् घण्टारवे 'निसंतपसंतंसि'**ति नितरां शान्तो निशान्तः-अत्यन्तमन्दीभूतस्ततः प्रकर्षेण-सर्वात्मना शान्तः प्रशान्तः, [2]ततश्छिन्नप्ररूढ इत्यादाविव विशेषणसमासस्तस्मिन् **महता महता शब्देन उद्घोषयन्नेवमवादीद्-'हन्द सुणंतु'** इत्यादि, हन्तेति हर्षे, उक्तं च-"**हन्त हर्षेऽनुकम्पायाम्**" [अमरकोशे ३।२४३] इत्यादि, हर्षश्च स्वामिनाऽऽदिष्टत्वात् श्रीमन्महावीर-पादवन्दनार्थं च [3]प्रस्थानसमारम्भात्, शृण्वन्तु **भवन्तो बहवः सूर्याभविमानवासिनो वैमानिकदेवा देव्यश्च, सूर्याभविमानपतेर्वचनं हितसुखार्थं** हितार्थं सुखार्थं चेत्यर्थः, तत्र हितं जन्मान्तरेऽपि कल्याणावहं तथाविधकुशलं, सुखं तस्मिन् भवे निरुपद्रवता, **आज्ञापयति भो** देवानांप्रियाः ! **सूर्याभो देवो** यथा **गच्छति भोः ! सूर्याभो देवो 'जम्बूद्वीपं द्वीपम्** इत्यादि तदेव यावद् **'अन्तिके [4]प्रादुर्भवत'** ॥ १५ ॥

सूत्र-१६ : तए णं ते सूरियाभविमाणवासिणो बहवे वेमाणिया देवा य देवीओ य पायत्ताणियाहिवइस्स देवस्स अंतिए एयमट्ठं सोच्चा णिसम्म हट्ठतुट्ठ जाव हियया अप्पेगइया वंदणवत्तियाए अप्पेगइया पूयणवत्तियाए अप्पेगइया सक्कारवत्तियाए अप्पेगइया संमाणवत्तियाए अप्पेगइया कोऊहलवत्तियाए अप्पेगइया असुयाइं सुणिस्सामो, सुयाइं [निस्संकियाइं करिस्सामो]अट्ठाइं हेऊइं पसिणाइं कारणाइं वागरणाइं पुच्छिस्सामो, [5]अप्पेगइया सूरियाभस्स देवस्स वयणं[6]मणुयत्तेमाणा अप्पेगतिया अन्नमन्नमणुयत्तेमाणा अप्पेगइया जिणभत्तिरागेणं अप्पेगइया धम्मो त्ति

१. एकाग्रघोषचित्ता-K ॥ २. तस्मिन् छि० G ॥ ३. J पा. ५-४, भा.१ बाबु. मध्ये प्रस्थान० नास्ति, मु. G अस्ति ॥ ४. प्रादुरभवत्-J । प्रादुरभावत-K ॥ ५. अप्पेगइया अट्ठविणिच्छय हेउं अप्पे० K बाबु. ॥ ६. °मणुमन्नेमाणा-भा. १-२ । °मणुयत्तमाणा-मु. । °मणुअत्तेमाणा-बाबु. ॥

अप्पेगइया जीयमेयं ति कट्टु सव्विड्ढीए जाव अकालपरिहीणा[१] चेव सूरियाभस्स देवस्स अंतियं पाउब्भवंति ॥ १६ ॥

[१६] **'तए णं ते'** इत्यादि, **ततस्ते सूर्याभविमानवासिनो बहवो वैमानिका देवा देव्यश्च पदात्यनीकाधिपतेर्देवस्य समीपे एनम्**-अनन्तरोदित**मर्थं श्रुत्वा 'णिसम्म हट्ठ तुट्ठ जाव[२] हियया'** इति यावत्करणाद् 'हट्ठतुट्ठचित्तमाणंदिया पीइमणा परमसोमणस्सिया हरिसवसविसप्पमाणहियया' इति परिग्रहः, **'अप्पेगइया वंदणवत्तियाए'** इति अपिः सम्भावनायाम्, एककाः-केचन वन्दनप्रत्ययं वन्दनम्-अभिवादनं प्रशस्तकायवाग्मनः-प्रवृत्तिरूपं तत्प्रत्ययं तद् मया भगवतः श्रीमन्महावीरस्य कर्त्तव्यमित्येवंनिमित्तम्, **अप्येककाः पूजनप्रत्ययं** पूजनं-गन्ध-माल्यादिभिः समभ्यर्चनम् **अप्येककाः सत्कारप्रत्ययं सत्कारः**-स्तुत्यादिगुणोन्नतिकरणम्, **अप्येककाः [सन्मानप्रत्ययं] सन्मानो**-मानसः प्रीतिविशेषः, **अप्येककाः कुतूहलजिनभक्तिरागेण[३]**-कुतूहलेन-कौतुकेन 'कीदृशो भगवान् सर्वज्ञः सर्वदर्शी श्रीमन्महावीरः' इत्येवंरूपेण यो जिने-भगवति वर्द्धमानस्वामिनि भक्तिरागो-भक्तिपूर्वकोऽनुरागस्तेन, **अप्येके सूर्याभस्य देवस्य वचनम्**-आज्ञा**मनुवर्त्तमानाः, अप्येककाः 'अश्रुतानि**-पूर्वमनाकर्णितानि स्वर्गमोक्षप्रसाधकानि वचांसि **श्रोष्यामः'** इति बुद्ध्या, अप्येकका**ः 'श्रुतानि**-पूर्वमाकर्णितानि यानि **शङ्कितानि** जातानि तानि इदानीं **निःशङ्कितानि करिष्यामः'** इति बुद्ध्या, **अप्येकका जीतमेतत्**-कल्प एष **इति कृत्वा, 'सव्विड्ढीए'** इत्यादि प्राग्वत् ॥ १६ ॥

सूत्र-१७ : तते णं से सूरियाभे देवे ते सूरियाभविमाणवासिणो बहवे वेमाणिया देवा य देवीओ य अकालपरिहीणा चेव अंतियं पाउब्भवमाणे पासति, पासित्ता हट्ठतुट्ठ जाव हियए आभिओगियं देवं सद्दावेति, सद्दावित्ता एवं वयासी-'खिप्पामेव भो देवाणुप्पिया ! अणेगखंभसयसन्निविट्ठं लीलट्ठियसालभंजियागं ईहामिय-उसभ-तुरग-नर-मगर-विहग-वालग-किंनर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलयभत्तिचित्तं खंभुग्गयवइरवेइयापरिगयाभिरामं विज्जाहर-जमलजुयल-जंतजुत्तं पिव अच्चीसहस्समालिणीयं

१. °णं-V । °णामेव-K एवमग्रेऽपि ॥ २. जाव हय हि° JK ॥ ३. सूत्रादर्श-टीकाकारप्राप्तपाठयोः भिन्नता दृश्यते ॥

रूवगसहस्सकलियं भिसमाणं भिब्भिसमाणं चक्खुल्लोयणलेसं सुहफासं सस्सिरीयरूवं घंटावलिचलियमहुरमणहरसरं सुहं कंतं दरिसणिज्जं निउणोचियमिसिमिसिंतमणिरयणघंटियाजालपरिक्खित्तं जोयणसयसहस्सवित्थिण्णं दिव्वं गमणसज्जं सिग्घगमणं णाम दिव्वं जाणविमाणं विउव्वाहि, विउव्वित्ता खिप्पामेव एयमाणत्तियं पच्चप्पिणाहि ॥ १७ ॥

[१७] '**तए णमि**'त्यादि '**अणेगखंभसयसन्निविट्ठ**'मिति अनेकेषु स्तम्भशतेषु सन्निविष्टं, '**लीलट्ठियसालिभंजियाग**'मिति लीलया स्थिता लीलास्थिताः, अनेन तासां पुत्तलिकानां सौभाग्यमावेदयति, लीलास्थिताः शालभञ्जिकाः-पुत्तलिका यत्र तत्तथा '**ईहामिय-उसभ-तुरग-नर-मगर-विहग-वालग-किन्नर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलय-भत्तिचि-त्तमि**'ति ईहामृगा-वृका व्यालाः-स्वापदभुजङ्गा ईहामृग-ऋषभ-तुरग-नर-मगर-विहग-व्याल-किन्नर-रुरु-सरभ-चमर-कुञ्जर-वनलता-पद्मलतानां भक्त्या-विच्छित्त्या चित्रम्[१]-आलेखो यत्र तत्तथा, तथा स्तम्भोद्गतया-स्तम्भोपरिवर्त्तिन्या वज्ररत्नमय्या वेदिकया परिगतं सत्[२] यदभिरामं तत् **स्तम्भोद्गतवज्रवेदिकापरिगताभिरामं, 'विज्जाहर-जमलजुगल-जंतजुत्तं पिव'** इति विद्याधरयोर्यद् यमलयुगलं-समश्रेणीकं द्वन्द्वं विद्याधरयमलयुगलं तच्च तद् यन्त्रं च-सञ्चरिष्णुपुरुषप्रतिमाद्वयरूपं तेन युक्तं तदिव[३] तथा, अर्चिषां-किरणानां सहस्रैर्मालनीयं-परिवारणीयम्[४] **अर्चिःसहस्रमालनीयं**[५], तथा **रूपकसहस्रकलितं, 'भिसमाणं ति'** दीप्यमानं, '**भिब्भिसमानम्**' अतिशयेन देदीप्यमानं, '**चक्खुल्लोयणलेसं**' ति चक्षुः कर्तृलोकने लिसतीव-दर्शनीयत्वातिशयात् श्लिष्यतीव यत्र तत्तथा, '**सुहफासं**' ति शुभः-कोमलः स्पर्शो यस्य तत्तथा, सश्रीकानि-सशोभकानि रूपाणि-रूपकाणि यत्र तत् **सश्रीकरूपं, 'घण्टावलिचलियमहुरमणहरसर**'मिति घण्टावलेः-घण्टापङ्क्तेर्वातवशेन चलितायाः-कम्पितायाः मधुरः-श्रोत्रप्रियो मनोहरो-मनोनिर्वृतिकरः स्वरो यत्र तत्तथा, चलितशब्दस्य विशेष्यात् परनिपातः प्राकृतत्वात्, '**शुभं**' यथोदितवास्तुलक्षणोपेतत्वात् '**कान्तं**' कमनीयम्, अत एव **दर्शनीयं**, तथा '**निउणोचियमिसिमिसिंतमणि-रयण-घंटियाजालपरिक्खित्त**'मिति निपुणमिति निपुणक्रियम् उचितानि-खचितानि 'मिसिमिसिंत'त्ति देदीप्यमानानि मणिरत्नानि यत्र घण्टिकाजाले तत्तथा तेन घण्टिकाजालेन-

१. विभ्रमो-K । विभ्रम-J ॥ २. सति सत्-KJ बाबु. ॥ ३. G । तदेव - मु. ॥ ४. परिचार° मु. एवमग्रेऽपि ॥ ५. °सहस्रकलितं दी° KJ पा० ५-४ भा.१ ॥

क्षुद्रघण्टिकासमूहेन परि-सामस्त्येन क्षिप्तं-व्याप्तं यत्तत्तथा, **योजनशतसहस्रविस्तीर्णं**-योजनलक्षविस्तारं '**दिव्यं**' प्रधानं '**गमनसज्जं**' गमनप्रवणं **शीघ्रगमननामधेयं** '**जाणविमाणं**' यानरूपं-वाहनरूपं विमानं यानविमानं, शेषं प्राग्वत् ॥ १७ ॥

सूत्र-१८ : तए णं से आभिओगिए देवे सूरियाभेणं देवेणं एवं वुत्ते समाणे हट्ठतुट्ठ जाव हियए करयलपरिग्गहियं जाव पडिसुणेइ, पडिसुणेत्ता उत्तरपुरत्थिमं दिसीभागं अवक्कमति, अवक्कमित्ता वेउव्वियसमुग्घाएणं समोहण्णइ, समोहणित्ता संखेज्जाइं जोयणाइं जाव अहाबायरे पोग्गले परिसाडेति, परिसाडित्ता अहासुहुमे पोग्गले परियाएइ, परियाइत्ता दोच्चं पि वेउव्वियसमुग्घाएणं समोहणति, समोहणित्ता अणेगखंभसयसन्निविट्ठं जाव दिव्वं जाणविमाणं विउव्विउं पवत्ते यावि होत्था ॥ १८ ॥

सूत्र-१९ : तते णं से आभिओगिए देवे तस्स दिव्वस्स जाणविमाणस्स तिदिसिं तओ तिसोवाणपडिरूवए[1] विउव्वति, तंजहा-पुरत्थिमेणं दाहिणेणं उत्तरेणं, तेसिं[2] तिसोवाणपडिरूवगाणं इमे एयारूवे वण्णावासे पण्णत्ते, तंजहा-वइरामया णिम्मा रिट्ठामया पतिट्ठाणा वेरुलियामया खंभा सुवण्णरुप्पमया फलगा लोहितक्खमइयाओ सूईओ वयरामया संधी णाणामणिमया अवलंबणा अवलंबणबाहाओ य पासादीया जाव पडिरूवा ॥ १९ ॥

[१९] '**तस्स ण**'मित्यादि, तस्य णमिति पूर्ववत्, **दिव्यस्य यानविमानस्य** '**तिदिसिं**' इति तिस्रो दिशः समाहृतास्त्रिदिक् तस्मिन् त्रिदिशि, तत्र '**तिसोवाण-पडिरूवए**' इति त्रीणि एकैकस्यां दिशि एकैकस्य भावात् त्रिसोपानप्रतिरूपकाणि प्रतिविशिष्टं रूपं येषां तानि प्रतिरूपकाणि, त्रयाणां सोपानानां समाहारस्त्रिसोपानं त्रिसोपानानि च तानि प्रतिरूपकाणि चेति विशेषणसमासः, विशेषणस्यात्र परनिपातः प्राकृतत्वात् । '**तेसि णमि**'त्यादि, **तेषां च त्रिसोपानप्रतिरूपकाणामयमेतद्रूपो-**

१. तिसोमाण° LBK । एवमग्रेऽपि ॥ २. इतः २३ सूत्रं यावत् तुला जीवाजीवाभिगमे ३।१।१२७ पत्र १९६ ॥

वक्ष्यमाणस्वरूपो '**वण्णावासो**' वर्णकनिवेशः **प्रज्ञप्तः**, **तद्यथा**-'**वज्रमया**' वज्ररत्नमया '**नेमा**'[1] भूमिकात ऊर्ध्वं निर्गच्छन्तः प्रदेशाः **रिष्टरत्नमयानि**[2] **प्रतिष्ठानानि** त्रिसोपान-मूलप्रदेशाः **वैडूर्यमयाः स्तम्भाः, सुवर्णरूप्यमयानि फलकानि**-त्रिसोपानाङ्गभूतानि, **लोहिताक्षमय्यः सूचयः**- फलकद्वयसम्बन्धविघटनाभावहेतुपादुकास्थानीयाः[3] '**वज्रमया**' वज्ररत्नपूरिताः '**सन्धयः**' फलकद्वयाऽपान्तरालप्रदेशाः **नानामणिमयानि** अवलम्ब्यन्ते इति **अवलम्बनानि**-अवतरतामुत्तरतां चालम्बनहेतुभूता अवलम्बनबाहातो विनिर्गताः केचिदवयवाः, '**अवलम्बणबाहाओ य**'त्ति अवलम्बनबाहाश्च नानामणिमय्यः, अवलम्बनबाहा नाम उभयोः पार्श्वयोरवलम्बनाश्रयभूता भित्तयः '**पासाईयाओ**' इत्यादि पदचतुष्टयं प्राग्वत् ॥ १९ ॥

सूत्र-२० : तेसि णं तिसोवाणपडिरूवगाणं पुरतो तोरणे विउव्वति, ते णं तोरणा [णाणामणिमया]णाणामणिमएसु थंभेसु उवनिविट्ठसंनिविट्ठ-विविहमुत्तंतरोवचिया विविहतारारूवोवचिया →ईहामिय-उसभ-तुरग-णर-मगर-विहग-वालग-किंनर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलय-भत्तिचित्ता खंभुग्गयवइरवेइयापरिगताभिरामा विज्जाहरजमलजुयलजंतजुत्ता विव अच्चीसहस्समालिणीया रूवगसहस्सकलिया भिसिमाणा भिब्भिसिमाणा चक्खुल्लोयणलेसा सुहफासा सस्सिरीयरूवा पासाईया← जाव पडिरूवा ॥२०॥

[२०] '**तेसि ण**' मित्यादि, **तेषां** 'णमि'ति वाक्यालङ्कारे, **त्रिसोपानप्रतिरूपकाणां पुरतः प्रत्येकं तोरणं प्रज्ञप्तं, तेषां च तोरणानामयमेतद्रूपो वर्णावासो**-वर्ण्णकनिवेशः **प्रज्ञप्तः**, तद्यथा-तोरणा नानामणिमया इत्यादि, क्वचिदेवं पाठः-'तेसि णं तिसोवाणपडिरूवगाणं पुरतो तोरणे विउव्वइ, तोरणा नाणामणिमया' इत्यादि, मणयः- चन्द्रकान्ताद्याः, विविधमणिमयानि तोरणानि नानामणिमयेषु स्तम्भेषु उपनिविष्टानि-सामीप्येन स्थितानि, तानि च कदाचिच्चलानि अथवा अपदपतितानि वाऽऽशङ्क्येरन् तत आह-सम्यक्-निश्चलतया अपदपरिहारेण च निविष्टानि, ततो विशेषणसमासः, उपनिविष्ट-सन्निविष्टानि, '**विविहमुत्तंतरो(रारूवो)वचिया**' इति विविधा-विविधविच्छित्तिकलिता

१. JKG । नेमी नेमिभूमिका तत्र ऊ॰ मु. ॥ २. °रत्न॰ JK नास्ति ॥ ३. पादका K भा. १-२ बाबु. ॥ ४. →←चिह्नद्वय मध्यवर्तिपाठः K बाबु. अस्ति, मु. मध्ये [ ] कोष्ठके वर्तते ॥ ५. सूत्रादर्श-वृत्तिकारसम्मतपाठयोः भिन्नता अत्राऽपि अस्ति ॥

मुक्ता-मुक्ताफलानि 'अन्तरे'ति अन्तराशब्दोऽगृहीतवीप्सोऽपि सामर्थ्याद्वीप्सां गमयति, अन्तरा[1] अन्तरा रूपोपचितानि यावता यत्र तानि तथा, **'विविहतारो(रारूवो)वचिया'** इति विविधैस्तारारूपैः-तारिकारूपैरूपचितानि, तोरणेषु हि शोभार्थं तारिका निबध्यन्ते इति प्रतीतं लोकेऽपीति विविधतारारुपोपचितानि 'जाव पडिरूवा' इति यावत्करणात् **'ईहा-मिग-उसभ-तुरग-नर-मगर-विहग-वालग-किंनर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलयभत्तिचित्ता खंभुग्गयवइरवेइयापरिगयाभिरामा विज्जाहरजमल-जुगल-जंतजुत्ता विव'** एवं नाम स्तम्भद्वयसन्निविष्टानि तोरणानि व्यवस्थितानि यथा विद्याधरयमलयुगलयन्त्रयुक्तानीव प्रतिभासन्ते इति, **'अच्चीसहस्समालणीया रूवगसहस्सकलिया भिसिमाणा भिब्भिसिमाणा चक्खुल्लोयणलेसा सुहफासा सस्सिरीयरूवा पासाईया दरिसणिज्जा अभिरूवा'** इति परिग्रहः, **क्वचिदेतत्साक्षाल्लिखितमपि** दृश्यते ॥२०॥

सूत्र-२१ : तेसिं णं तोरणाणं उप्पिं अट्ठट्ठमंगलगा पण्णत्ता, तंजहा-सोत्थिय-सिरिवच्छ-णंदियावत्त-वद्धमाणग-भद्दासण-कलस-मच्छ-दप्पणा जाव पडिरूवा ॥ २१ ॥

[२१] **'तेसिं तोरणाणं उप्पिं'** इत्यादि सुगमं, नवरं **'जाव पडिरूवा'** इति यावच्छब्दकरणाद् 'घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया समिरीया सउज्जोया पासाईया दरिसणिज्जा अभिरूवा' इति द्रष्टव्यम् ॥ २१ ॥

सूत्र-२२ : तेसिं च णं तोरणाणं उप्पिं बहवे किण्हचामरज्झए जाव सुक्किल्लचामरज्झए अच्छे सण्हे रुप्पपट्टे वइरामयदंडे जलयामलगंधिए सुरम्मे पासादीए दरिसणिज्जे अभिरूवे पडिरूवे विउव्वति ॥ २२ ॥

[२२] **'तेसिं णमि'**त्यादि, **तेषां तोरणानामुपरि बहवः** कृष्णचामरयुक्ता ध्वजाः **कृष्णचामरध्वजाः**, एवं बहवो नीलचामरध्वजाः, लोहितचामरध्वजाः, हारिद्र[2]चामरध्वजाः, **शुक्लचामरध्वजाः**, कथम्भूता एते सर्वेऽपीत्यत आह-**अच्छा**-आकाशस्फटिकवदतिनिर्मलाः **श्लक्ष्णा[3]ः**-श्लक्ष्णपुद्गलस्कन्धनिर्मापिताः **'रुप्पपट्टा'** इति रूप्यो-रूप्यमयो वज्रमयस्य दण्डस्योपरि पट्टो येषां ते रूप्यपट्टाः **'वइरदंडा'** इति वज्रो-वज्ररत्नमयो दण्डो रूप्यपट्ट-

---

१. अन्तरा ओचिया-आरोपिता यत्र-इति जीवाजीवाभिगमवृत्तौ प. १९९ A ॥ २. JG । हालिद्र॰ बाबु. । हरितचा॰ मु. ॥ ३. कृष्णाः कृष्णपुद्गल॰ इति जीवा. वृत्तौ ॥

मध्यवर्त्ती येषां ते वज्रदण्डाः, तथा जलजानामिव-जलजकुसुमानां पद्मादीनामिवामलो न तु कुद्रव्यगन्धसम्मिश्रो यो गन्धः स जलजामलगन्धः स विद्यते येषां ते **जलजाऽमलगन्धिकाः**, अत एव **सुरम्याः 'प्रासादीया'** इत्यादिविशेषणचतुष्टयं प्राग्वत् ॥ २२ ॥

सूत्र-२३ : तेसि णं तोरणाणं उप्पिं बहवे छत्तातिच्छत्ते घंटाजुगले पडागाइपडागे [चामरजुयले] उप्पलहत्थए कुमुद[1]-(पउम)णलिण-सुभग-सोगंधिय-पोंडरीय-महापोंडरीय-सतपत्त-सहस्सपत्त-सयसहस्सपत्त[2]-हत्थए सव्वरयणामए अच्छे जाव पडिरूवे विउव्वति ॥ २३ ॥

[२३] **'तेसि ण'**मित्यादि, तेषां **तोरणानामुपरि बहूनि छत्रातिच्छत्राणि**-छत्राद्-लोकप्रसिद्धाद् एकसङ्ख्याकाद् अतिशायीनि छत्राणि उपर्यधोभावेन द्विसङ्ख्यानि त्रिसङ्ख्यानि वा छत्रातिच्छत्राणि, बहव्यः[3] पताकाभ्यो लोकप्रसिद्धाभ्योऽतिशायिन्यो दीर्घत्वेन विस्तारेण च पताकाः **पताकातिपताकाः**, बहूनि **घण्टायुगलानि**, बहूनि **चामर-युगलानि**, बहव **उत्पलहस्ताः**-उत्पलाख्यजलजकुसुमसमूहविशेषाः, एवं बहवः **पद्महस्तकाः नलिनहस्तकाः सुभगहस्तकाः सौगन्धिकहस्तकाः पुण्डरीकहस्तकाः शतपत्रहस्तकाः सहस्रपत्रहस्तकाः**, पद्मादिविभागव्याख्यानं प्राग्वत्, एते च छत्रातिच्छत्रादयः **सर्वरत्नमया अच्छा**-आकाशस्फटिकवदतिनिर्मला **यावत्करणात्** 'सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा समिरीया सउज्जोया पासाईया दरिसणिज्जा अभिरूवा' इति परिग्रहः ॥ २३ ॥

सूत्र-२४ : तए णं से आभिओगिए देवे तस्स दिव्वस्स जाणविमाणस्स अंतो बहुसमरमणिज्जं भूमिभागं विउव्वति । से जहा णाम ए आलिंग-पुक्खरे ति वा मुइंगपुक्खरे ति वा [परिपुण्णे] सरतले इ वा करतले इ वा चंदमंडले ति वा सूरमंडले ति वा आयंसमंडले ति वा उरब्भचम्मे इ वा वसहचम्मे ति वा वराहचम्मे इ वा सीहचम्मे ति वा वग्घचम्मे इ वा

---

१. "अत्र सर्वासु प्रतिषु कुमुद इति पाठो लभ्यते, किन्तु वृत्तौ 'पद्महस्तकाः' पाठो व्याख्यातोऽस्ति तथा १३८ सूत्रे जांव 'पउमहत्था' एवंविधः पाठः प्राप्यते, तेनात्र 'पउम' इति पाठो युज्यते ।" इति V पृ. ९१ टि. ४ ॥ २. KB जीवा. अस्ति । सयसहस्सपत्त० मु. V बाबु. नास्ति ॥ ३. JKEP । बाह्य० मु. बहव्यः G नास्ति जीवा. वृत्तावस्ति॥

मिंगचम्मे ति वा [छगलचम्मे इ वा] दीवियचम्मे इ वा अणेग-संकुकीलगसहस्सवितते आवड-पच्चावड-सेढिपसेढि-सोत्थिय-[सोवत्थिय]-पूसमाणग[वद्धमाणग]-मच्छंडग-मगरंडग-जार-मार-फुल्लावलि-पउमपत्त-सागरतरंग-वसंतलय-पउमलयभत्तिचित्तेहिं सच्छाएहिं सप्पभेहिं समरीइएहिं सउज्जोएहिं णाणाविहपंचवण्णेहिं मणीहिं उवसोभिएहिं तंजहा-किण्हेहिं णीलेहिं लोहिएहिं हालिद्देहिं सुक्किल्लेहिं ॥ २४ ॥

[२४] '**तस्स णमि**'त्यादि, तस्स णमिति पूर्ववत् **दिव्यस्य यानविमानस्य अन्तः**-मध्ये **बहुसमः** सन् रमणीयो **बहु[सम]रमणीयो भूमिभागः** प्रज्ञप्तः, किंविशिष्ट ? इत्याह-

'**से जहा नाम ए**' इत्यादि, **तत्**-सकललोकप्रसिद्धं '**यथे**' ति दृष्टान्तोपदर्शने '**नाम**' इति शिष्यामन्त्रणे, '**ए**' इति वाक्यालङ्कारे, '**आलिंगपुक्खरे इ वे**'ति आलिङ्गो-मुरजनामा वाद्यविशेषः तस्य पुष्करं-चर्मपुलकं[२], तत्किलात्यन्तसममिति तेनोपमा क्रियते, इति-शब्दाः सर्वेऽपि स्वस्वोपमाभूतवस्तुपरिसमाप्तिद्योतकाः, वाशब्दाः समुच्चये, मृदङ्गो लोकप्रतीतो मर्दलस्तस्य पुष्करं **मृदङ्गपुष्करं** '**परिपूर्णं**' पानीयेन भृतं तडाकं सरस्तस्य तलम्-उपरितनो भागः **सरस्तलं, करतलं** प्रतीतं, **चन्द्रमण्डलं सूर्यमण्डलं च** यद्यपि तत्त्ववृत्त्या उत्तानीकृतार्द्धकपित्थाकारं[३] पीठप्रासादापेक्षया वृत्तालेखमिति तद्गतो दृश्यमानो भागो न समतलस्तथापि प्रतिभासते समतल इति तदुपादानम्, **आदर्शमण्डलं** सुप्रसिद्धम्, '**उरब्भचम्मे इ वे**'त्यादि, तत्र सर्वत्रापि '**अणेगसंकुकीलसहस्सवितते**' इति विशेषण-योगः, उरभ्रः-ऊरणः, **वृषभ-वराह-सिंह-व्याघ्र-च्छगलाः** प्रतीताः द्वीपी-चित्रकः, इत्येतेषां प्रत्येकं चर्म्म अनेकैः शङ्कुप्रमाणैः कीलकसहस्रैः, महद्भिर्हि कीलकैस्ताडितं प्रायो मध्ये क्षामं भवति, तथारूपताडासम्भवाद् अतः शङ्कुग्रहणं, 'विततं' विततीकृतं ताडितमिति भावः, यथाऽत्यन्तं बहुसमं भवति तथा तस्यापि यानविमानस्यान्तर्बहुसमो भूमिभागः । पुनः कथम्भूतः ? इत्याह-'**णाणाविहपंचवन्नेहिं मणीहिं उवसोभिते**' नानाविधाः-जातिभेदान्नाना-प्रकारा ये पञ्चवर्णा मणयस्तैरुपशोभितः, कथम्भूतैः ? इत्याह-'आवडे' इत्यादि, आवर्त्तादीनि मणीनां लक्षणानि, तत्र आवर्त्तः प्रतीतः, एकस्यावर्त्तस्य प्रत्यभिमुख आवर्त्तः प्रत्यावर्त्तः, श्रेणिः-तथाविधबिन्दुजातादेः पङ्क्तिः, तस्याश्च श्रेणेर्या च निर्गता अन्या श्रेणिः सा प्रश्रेणिः,

१. विग॰ जीवाजीवा॰ ३।२७७ ॥ २. JKEPG । चर्मपुटं त॰ मु. भा. २ चर्म्मपुटकं - जीवाभि. वृत्तौ ॥ ३. ॰कारपीठ॰ जीवा. वृत्तौ ॥

स्वस्तिकः प्रतीतः, सौवस्तिक-पुष्यमाणवौ लक्षणविशेषौ लोकात्प्रत्येतव्यौ वर्द्धमानकं-शरावसम्पुटं मत्स्यकाण्डक-मकरकाण्डके प्रतीते, 'जारमारेति'[१] लक्षणविशेषौ सम्यग्मणि-लक्षणवेदिनो लोकाद्वेदितव्यौ, पुष्पावलि-पद्मपत्र-सागरतरङ्ग-वासन्तीलता-पद्मलताः सुप्रतीताः, तासां भक्त्या-विच्छित्त्या चित्रम्-आलेखो येषु ते **आवर्त्त-प्रत्यावर्त्त-श्रेणि-प्रश्रेणि-स्वस्तिक-सौवस्तिक-पुष्यमाणव[२]-वर्द्धमानक-मत्स्याण्डक-मकराण्डक-जार-मार-पुष्पावलि-पद्मपत्र-सागरतरङ्ग-वासन्तीलता-पद्मलता-भक्तिचित्रास्तैः**, किमुक्तं भवति ?-आवर्त्तादिलक्षणोपेतैः, तथा सच्छायैः सती-शोभना छाया-निर्मलत्वरूपा येषां ते **सच्छायाः**, तथा सती-शोभना प्रभा-कान्तिर्येषां ते **सत्प्रभाः तैः**, **'समरीइएहिं'** इति समरीचिकैः-बहिर्विनिर्गतकिरणजालसहितैः **सोद्द्योतैः**-बहिर्व्यवस्थितप्रत्यासन्नवस्तुस्तोमप्रकाशकरोद्द्योत-सहितैः एवम्भूतैर्नानाजातीयैः **पञ्चवर्णै**र्मणिभि**रुपशोभितः**, तानेव पञ्चवर्णानाह-**'तंजहा-किण्हेहिं'** इत्यादि सुगमम् ॥ २४ ॥

सूत्र-२५ : [३]तत्थ णं जे ते किण्हा मणी, तेसि णं मणीणं इमे एतारूवे वण्णावासे पण्णत्ते, से जहा नाम ए [४]जीमूये इ वा अंजणे ति वा खंजणे ति वा कज्जले ति वा [५]मसी इ वा मसीगुलिया इ वा गवले ति वा गवलगुलिया ति वा भमरे ति वा भमरावलिया ति वा भमरपतंगसारे ति वा जंबूफले ति वा अद्दारिट्ठे ति वा [६]परपुट्ठे इ वा गए ति वा गयकलभे ति वा [७]किण्हसप्पे इ वा किण्हकेसरे इ वा आगासथिग्गले ति वा किण्हासोए ति वा किण्हकणवीरे इ वा किण्हबंधुजीवे इ वा, भवे एयारूवे सिया ?, णो इणट्ठे समट्ठे, [ओवम्मं समणाउसो !] ते णं किण्हा मणी इत्तो इट्ठतराए चेव कंततराए चेव मणामतराए चेव मणुण्णतराए चेव वण्णेणं पण्णत्ता ॥२५॥

[२५] **'तत्थ णमि'**त्यादि, **'तत्र'** तेषां पञ्चवर्णानां मणीनां मध्ये'णमि'ति वाक्यालङ्कारे, **ये ते कृष्णा मणयः**, [८]ये कृष्णमणय इत्येव सिद्धे [९]यें [ते] इति वचनं भाषाक्रमार्थं, **तेषां**

---

१. जारमारपुष्पावलीपद्मपत्रसागरतरङ्गवासन्तीलतापद्मलताभक्तिचित्रास्तैः- JK ॥ २. G । पुष्प-मु. ॥ ३. सूत्र २५-३१ तुला जीवाजीवाभिगमे-३।२७८-२-४ ॥ ४. K । जीमूतए इ वा - मु. V ॥ ५. VG । मसी इ वा मसीगुलिया इ वा LJB बावु मु. K नास्ति ॥ ६. परपुट्ठतेपि वा-LK । परपुट्ठए (ति) वा-जीवाभिगमे ॥ ७. किण्हसप्पे इ वा - LJK कखगघच नास्ति ॥ ८. JKE जीवा.वृत्तौ । ते-मु. ॥ ९. ते-G । ये ते-जीवाभि. वृत्तौ ॥

'णमि'ति पूर्ववत्, **अयम्**-अनन्तरमुद्दिश्यमान **एतद्रूपः**-अनन्तरमेव वक्ष्यमाणस्वरूपो **वर्णावासो**-वर्णकनिवेशः **प्रज्ञप्तः**, तद्यथा-'**से जहा नाम ए**' इत्यादि, स यथा नाम '**जीमूत**' इति जीमूतो-बलाहकः, स चेह प्रावृट्प्रारम्भसमये जलभृतो वेदितव्यः, तस्यैव प्रायोऽतिकालिमसम्भवात्, '**इति**'शब्द उपमाभूतवस्तूनामपरिसमाप्तिद्योतकः, वाशब्द उपमानान्तरापेक्षया समुच्चये, एवं सर्वत्र, **अञ्जनं**-सौवीराञ्जनं रत्नविशेषो वा, **खञ्जनं**-दीपमल्लिकामलः, **कज्जलं**-दीपशिखापतितं, **मषी**-तदेव कज्जलं ताम्रभाजनादिषु सामग्रीविशेषेण घोलितं, **मसीगुलिका**-घोलितकज्जलगुटिका, क्वचिद् '**मसी इति वा मसीगुलिया इति वा**' न दृश्यते, '**गवलं**' माहिषं शृङ्गम्, तदपि चोपरितनत्वग्भागापसारेण द्रष्टव्यं, तत्रैव विशिष्टस्य कालिम्नः सम्भवात्, तथा च तस्यैव माहिषशृङ्गनिबिडतर-सारनिर्वर्त्तिता गुटिका **गवलगुटिका, भ्रमरः**-प्रतीतः, **भ्रमरावली**-भ्रमरपङ्क्तिः, **भ्रमरपतङ्गसारः**-भ्रमरपक्षान्तर्गतो विशिष्टकालिमोपचितप्रदेशः, **जम्बूफलं** प्रतीतम्, **आर्द्राऽरिष्टः**-कोमलः काकः, **परपुष्टः**-कोकिलः, **गजो गजकलभश्च** प्रतीतः, **कृष्णसर्पः**-कृष्णवर्णसर्प्पजातिविशेषः, **कृष्णकेसरः**-कृष्णबकुलः, '**आकासथिग्गलं**' शरदि मेघविनिर्मुक्तमाकाशखण्डं, तद्धि कृष्णमतीव प्रतिभातीति तदुपादानं, **कृष्णाशोक-कृष्णकणवीर-कृष्णबन्धुजीवाः** अशोक-कणवीर-बन्धुजीववृक्षभेदाः, अशोकादयो हि पञ्चवर्णा भवन्ति, ततः शेषवर्णव्युदासार्थं कृष्णग्रहणम्, एतावत्युक्ते त्वरावानिव शिष्यः पृच्छति-'**भवे एयारूवे**' इति भवेद् मणीनां कृष्णो वर्णः 'एतद्रूपो' जीमूतादिरूपः ?, सूरिराह-**नायमर्थः समर्थः** नायमर्थ उपपन्नः, यदुत-एवम्भूतः कृष्णो वर्णो मणीनामिति, यद्येवं तर्हि किमर्थं जीमूतादीनां दृष्टान्तत्वेनोपादानम् अत आह-**औपम्यम्**-उपमामात्रमेतद् उदितं हे **श्रमण ! आयुष्मन् !**, यावता पुनस्ते कृष्णा मणयः '**इतो**' जीमूतादेरिष्टतरका एव-कृष्णेन वर्णेन **अभीप्सिततरका एव,** तत्र किञ्चिदकान्तमपि केषाञ्चिदिष्टतमं भवति, ततोऽकान्तताव्यवच्छित्त्यर्थमाह-**कान्ततरका एव** अतिस्निग्धमनोहारिकालिमोपचिततया जीमूतादेः कमनीयतरकाः, अत एव **मनोज्ञतरका एव**-मनसा ज्ञायते-अनुकूलतया स्वप्रवृत्तिविषयीक्रियते इति मनोज्ञं- मनोऽनुकूलं, ततः प्रकर्षविवक्षायां 'तरप्' प्रत्ययः, तत्र मनोज्ञतरमपि किञ्चिन्मध्यमं भवेत्, ततः सर्वोत्कर्षप्रतिपादनार्थमाह-'**मनआपतरका एव**'

---

१. ये - JKE ॥ २. ते - G ॥

द्रष्टॄणां मनांसि आप्नुवन्ति-आत्मवशतां नयन्तीति मनआपास्ततः प्रकर्षविवक्षायां तरप्प्रत्ययः, प्राकृतत्वाच्च पकारस्य मकारे मणामतरा इति भवति ॥ २५ ॥

सूत्र-२६ : तत्थ[1] णं जे ते नीला मणी, तेसि णं मणीणं इमे एयारूवे वण्णावासे पण्णत्ते, से जहा नाम ए भिंगे ति वा भिंगपत्ते ति वा सुए ति वा सुयपिच्छे[2] ति वा चासे ति वा चासपिच्छे[3] इ वा णीली इ वा णीलीभेदे ति वा णीलीगुलिया ति वा सामाए ति वा उच्चन्तगे[4] इ वा वणराती ति वा हलधरवसणे ति वा मोरग्गीवा ति वा [पारेवयग्गीवा इ वा] अयसिकुसुमे ति वा बाणकुसुमे ति वा इंदनीले[5] इ वा महानीले ति वा मरगते इ वा अंजणकेसियाकुसुमे ति वा नीलुप्पले ति वा णीलासोगे ति वा णीलबंधुजीवे ति वा णीलकणवीरे ति वा, भवेतारूवे सिया ?, णो इणट्ठे समट्ठे, ते णं णीला मणी एत्तो इट्ठतराए चेव जाव[6] वण्णेणं पण्णत्ता ॥२६॥

[२६] तथा '**तत्थ णमि**'त्यादि, तत्र **तेषां मणीनां** मध्ये **ये ते नीला मणयस्तेषामयमेतद्रूपो वर्णावासो**-वर्णकनिवेशः **प्रज्ञप्तः**, तद्यथा-'**से जहा नाम ए**' इत्यादि, स यथा नाम **भृङ्गः**-कीटविशेषः पक्ष्मलः, '**भृङ्गपत्रं**' तस्यैव भृङ्गाभिधानस्य कीटविशेषस्य पक्ष्म, **शुकः**-कीरः, **शुकपिच्छं**-शुकस्य पत्रं, **चाषः**-पक्षिविशेषः, '**चाषपिच्छं**' चाषपक्षः, **नीली** प्रतीता, **नीलीभेदो**-नीलीच्छेदः, **नीलीगुलिका**-गुलिकाद्रव्यगुटिका, **श्यामाको**-धान्यविशेषः, '**उच्चंतगो**' दन्तरागः, **वनराजी** प्रतीता, हलधरो-बलदेवस्तस्य वसनं **हलधरवसनं**, तच्च किल नीलं भवति सदैव, तथास्वभावतया, हलधरस्य नीलवस्त्रपरिधानाद्, **मयूरग्रीवा-पारापतग्रीवा-अतसीकुसुम-बाणवृक्षकुसुमानि** प्रतीतानि, इत ऊर्द्धवं क्वचिद् '**इंदनीले इ वा महानीले इ वा मरगते इ वा**' इति दृश्यते तत्रेन्द्रनील-महानील[7]-मरकता रत्नविशेषाः प्रतीताः, अञ्जनकेशिका-वनस्पतिविशेषस्तस्य कुसुम**मञ्जनकेसिकाकुसुमं**, **नीलोत्पलं**-कुवलयं, **नीलाशोक-कणवीर-नीलबन्धुजीवा**-अशोकादिवृक्षविशेषाः, '**भवेयारूवे**' इत्यादि प्राग्वद् व्याख्येयम् ॥ २६ ॥

१. तुला- प्रज्ञापना सूत्रे - सू. १२२७ ॥ २-३. °पिंछे - JB । एवमग्रेऽपि ॥ ४. VG । उच्यन्ते इ वा मु. । उच्यंतए इ वा - K जीवाभिगमे ॥ ५. J । इंदनीले इ वा महानीले इ वा मरगते इ वा - मु. VK नास्ति ॥ ६. द्र. सू. २५ ॥ ७. °महानील० JKE नास्ति ॥

सूत्र-२७ : तत्थ णं जे ते लोहिया मणी, तेसि णं मणीणं इमेतारूवे वण्णावासे पण्णत्ते, से जहा णाम ए उरब्भरुहिरे ति वा ससरुहिरे इ वा नररुहिरे ति वा (मणुस्सरुहिरे इ वा) वराहरुहिरे इ वा [महिसरुहिरे इ वा] बालिंदगोवे ति वा बालदिवाकरे ति वा संझब्भरागे ति वा गुंजद्धरागे ति वा जासुअणकुसुमे[1] ति वा किंसुयकुसुमे ति वा पालियायकुसुमे ति वा जाइहिंगुलए ति वा सिलप्पवाले ति वा पवालअंकुरे ति वा लोहियक्खमणी ति वा लक्खारसगे ति वा किमिराग[रत्त][2]कंबले ति वा चीणपिट्ठरासी ति वा रत्तुप्पले ति वा रत्तासोगे ति वा रत्तकणवीरे ति वा रत्तबंधुजीवे ति वा, भवेतारूवे सिया ?, णो इणट्ठे समट्ठे, ते णं लोहिया मणी इत्तो इट्ठतराए चेव जाव वण्णेणं पण्णत्ता ॥ २७ ॥

[२७] तथा **'तत्थ णमि'**त्यादि, **'तत्र'** तेषां मणीनां मध्ये **ये ते लोहिता मणयस्तेषामयमेतद्रूपो वर्णावासः प्रज्ञप्तः**, तद्यथा-**'से जहा नाम ए'** इत्यादि, तद्यथा नाम **शशकरुधिरम्, उरभ्रः**-ऊरणस्तस्य **रुधिरं, वराहः**-शूकरस्तस्य **रुधिरं, मनुष्यरुधिरं महिषरुधिरं** च प्रतीतम्, एतानि हि किल शेषरुधिरेभ्यो लोहितवर्णोत्कटानि भवन्ति, तत एतेषामुपादानं, **बालेन्द्रगोपकः**-सद्योजातेन्द्रगोपकः, स हि प्रवृद्धः सन्नीषत्पाण्डुरो रक्तो भवति, ततो बालग्रहणम्, इन्द्रगोपकः-प्रथमप्रावृट्कालभावी कीटविशेषः, **बालदिवाकरः**-प्रथममुद्गच्छन् सूर्यः, **सन्ध्याभ्ररागो**-वर्षासु सन्ध्यासमयभावी अभ्ररागः, गुञ्जा-लोकप्रतीता तस्या अर्द्धे रागो **गुञ्जार्द्धरागः**, गुञ्जाया हि अर्द्धमतिरक्तं भवति अर्द्धं चातिकृष्णमिति गुञ्जार्द्धग्रहणं, **जपाकुसुम-किंसुककुसुम-पारिजातकुसुम-जात्यहिङ्गुला** लोकप्रसिद्धाः, **शिलाप्रवालं**-प्रवालनामा रत्नविशेषः **प्रवालाङ्कुरः**-तस्यैव रत्नविशेषस्य प्रवालस्याङ्कुरः, स हि तत्प्रथमोद्गतत्वेनात्यन्तरक्तो भवति, ततस्तदुपादानं, **लोहिताक्षमणि**र्नाम रत्नविशेषः, **लाक्षारस-कृमिराग-रक्तकम्बल-चीनपिष्टराशि-रक्तोत्पल-रक्ताशोक-[रक्त] कणवीर-रक्तबन्धुजीवाः** प्रतीताः, **'भवेयारूवे'** इत्यादि प्राग्वत् ॥ २७ ॥

---

१. जासुअणु० JB क्ख ॥ २. किमिरागरत्तकंबले इ वा- जीवा० ३।२८० इति V पृ.९२ टि. १२ ॥ किमिरागकंबले इ वा - प्रज्ञापनासूत्रे १२२९ ॥

सूत्र-२८ : तत्थं णं जे ते हालिद्दा मणी, तेसि णं मणीणं इमेतारूवे वण्णावासे पण्णत्ते-से जहा णाम ए चंपे इ वा चंपछल्ली इ वा [[1]चंपगभेए इ वा] [2]हल्लिद्दा इ वा हलिद्दाभेदे इ वा हलिद्दगुलिया इ वा हरियालिया इ वा हरियालभेदे इ वा हरियालगुलिया इ वा चिउरे इ वा चिउरंगराते इ वा वरकणगे इ वा वरकणगनिघसे इ वा सुवण्णसिप्पिए[3] इ वा वरपुरिसवसणे इ वा अल्लकीकुसुमे इ वा चंपाकुसुमे इ वा कुहंडियाकुसुमे इ वा तडवडाकुसुमे इ वा घोसेडियाकुसुमे इ वा सुवण्णजूहियाकुसुमे इ वा सुहिरण्णकुसुमे इ वा कोरंटवरमल्लदामे इ वा बीययकुसुमे इ वा पीयासोगे इ वा पीयकणवीरे इ वा पीयबंधुजीवे इ वा, भवेयारूवे सिया ?, णो इणट्ठे समट्ठे, ते णं हालिद्दा मणी एत्तो इट्ठतराए चेव जाव[4] वण्णेणं पण्णत्ता ॥ २८ ॥

[२८] '**तत्थ णमि**'त्यादि, '**तत्र**' तेषां मणीनां मध्ये **ये हरिद्रा मणयस्तेषामेतद्रूपो वर्णावासः प्रज्ञप्तः**, तद्यथा-'**से जहा नाम ए**' इत्यादि, स यथा नाम **चम्पकः** सामान्यतः सुवर्णचम्पको वृक्षः, **चम्पकच्छल्ली**-सुवर्णचम्पकत्वक्, **चम्पकभेदः**-सुवर्णचम्पकच्छेदः, **हरिद्रा** प्रतीता, **हरिद्राभेदो**-हरिद्राच्छेदः, **हरिद्रागुटिका**-हरिद्रानिर्वर्तिता गुटिका, **हरितालिका**-पृथिवीविकाररूपा प्रतीता, **हरितालिकाभेदो**-हरितालिकाच्छेदः, **हरितालिकागुटिका**-हरितालिकासारनिर्वर्तिता गुलिका, **चिकुरो**-रागद्रव्यविशेषः, **चिकुराङ्गरागः**-चिकुरसंयोगनिर्मितो वस्त्रादौ रागः, वरकनकस्य-जात्यसुवर्णस्य यः कषपट्टके निघर्षः स **वरकनकनिघर्षः**, वरपुरुषो-वासुदेवस्तस्य वसनं **वरपुरुषवसनं**, तच्च किल पीतमेव भवतीति तदुपादानम्, **अल्लकीकुसुमं** लोकतोऽवसेयं, **चम्पककुसुमं**-सुवर्णचम्पकपुष्पं **कूष्माण्डीकुसुमं**-पुष्पफलीकुसुमं, कोरण्टकः-पुष्पजातिविशेषः तस्य दाम **कोरण्टकदाम** तडवडा-आउली तस्याः कुसुमं **तडवडाकुसुमं, घोशातकीकुसुमं सुवर्णयूथिकाकुसुमं** च प्रतीतं, सुहिरण्यका-वनस्पतिविशेषस्तस्याः कुसुमं **सुहिरण्यकाकुसुमं**, बीयको-वृक्षः प्रतीतः तस्य कुसुमं **बीयककुसुमं, पीताशोक-पीतकणवीर-पीतबन्धुजीवाः** प्रतीताः, '**भवेयारूवे**' त्यादि प्राग्वत् ॥ २८ ॥

---

१. चंपग भेए इ वा - जीवा. प्रज्ञापनायां (सू. १२३०) च अस्ति ॥ २. हा° V । एवमग्रेऽपि । तुला - प्रज्ञापनासूत्रे - सू. १२३० ॥ ३. सिप्पिए वा. - K । सिप्पि इ वा - प्रज्ञा. ॥ ४. द्र.सू. २५ ॥ ५. JKE । हरिद्रासारनि° मु. ॥

सूत्र-२९ : तत्थ णं जे ते सुक्किल्ला मणी, तेसि णं इमेयारूवे वण्णावासे पण्णत्ते । से जहा नाम ए अंके इ वा संखे इ वा चंदे इ वा कुंदे इ वा दंते[1] इ वा [कुमुदोदकदयरयदहिघणखीरखीरपूर] हंसावली इ वा कोंचावली इ वा हारावली इ वा चंदावली इ वा सारतियबलाहए इ वा धंतधोयरुप्पपट्टे इ वा सालिपिट्ठरासी इ वा कुंदपुप्फरासी इ वा कुमुदरासी इ वा सुक्कच्छिवाडी इ वा पिहुणमिंजिया इ वा भिसे इ वा मुणालिया इ वा गयदंते इ वा लवंगदलए इ वा पोंडरियदलए इ वा सेयासोगे इ वा सेयकणवीरे इ वा सेयबन्धुजीवे इ वा, भवेयारूवे सिया ?, णो इणट्ठे समट्ठे, ते णं सुक्किल्ला मणी एत्तो इट्ठतराए चेव जाव[2] वन्नेणं पण्णत्ता ॥२९॥

[२९] '**तत्थ णमि**'-त्यादि, '**तत्र**' तेषां मणीनां मध्ये ये **शुक्ला मणयस्तेषामयमेतद्रूपो वर्णावासः प्रज्ञप्तः**, तद्यथा '**से जहा नाम ए**' इत्यादि, स यथा नाम '**अङ्को**'रत्नविशेषः, **शङ्ख-चन्द्र-कुमुदोदकोदकरजो-दधिघन-क्षीर-क्षीरपूर-क्रौञ्चावलि-हारावलि-हंसावलि-बलाकाऽऽवलयः** प्रतीताः, **चन्द्रावली**-तडागादिषु जलमध्यप्रतिबिम्बितचन्द्रपङ्क्तिः, '**सारइयबलाहगे इति वा**' शारदिकः-शरत्कालभावी बलाहको-मेघः, '**धन्तधोयरुप्पपट्टे इ वेति**' ध्मातः-अग्निसम्पर्केण निर्मलीकृतो धौतः-भूतिखरण्टितहस्तसंमार्जनेन अतिनिशितीकृतो यो रूप्यपट्टो-रजतपत्रकं स ध्मातधौतरूप्यपट्टः, अन्ये तु व्याचक्षते-"ध्मातेन-अग्निसंयोगेन यो धौतः-शोधितो रूप्यपट्टः स ध्मातधौतरूप्यपट्टः", **शालिपिष्टराशिः**-शालिक्षोदपुञ्जः, **कुन्दपुष्पराशिः कुमुदराशिश्च** प्रतीतः, '**सुक्कछेवाडिया इ वे**' ति छेवाडिनाम-वल्लादिफलिका, सा च क्वचिद्देशविशेषे शुष्का सती अतीव शुक्ला भवति, ततस्तदुपादानं, '**पेहुणमिंजिया इ वेति**' पेहुं[3]णं-मयूरपिच्छं तन्मध्यवर्त्तिनी पेहुणमिञ्जिका सा चातिशुक्लेति तदुपन्यासः, '**बिसं**' पद्मिनीकन्दः, '**मृणालं**' पद्मतन्तुः **गजदन्त-लवङ्गदल-पुण्डरीकदल-श्वेताशोक-श्वेतकणवीर-श्वेतबन्धुजीवाः** प्रतीताः, '**भवेयारूवे सिया**' इत्यादि प्राग्वत् ॥ २९ ॥

---

१. दगे इ वा - इति प्रज्ञापनायां सू. १२३१ ॥ २. द्र. सू. २५ ॥ ३. 'पेहुण' शब्दो देश्यः- "पिच्छम्मि पेहुणं" देशीना. व. ६ गा. ५८ । इति G पृ. ९० टि. ॥

सूत्र-३० : [1]तेसि णं मणीणं इमेयारूवे गंधे पण्णत्ते, से जहा णाम ते कोट्ठपुडाण वा तगरपुडाण वा एलापुडाण वा चोयपुडाण वा चंपापुडाण वा दमणापुडाण वा कुंकुमपुडाण वा चंदणपुडाण वा उसीरपुडाण वा मरुयापुडाण वा [2]जातिपुडाण वा जूहियापुडाण वा मल्लियापुडाण वा ण्हाणमल्लियापुडाण वा केतगिपुडाण वा पाडलिपुडाण वा णोमालिया-पुडाण वा अगुरुपुडाण वा लवंगपुडाण वा वासपुडाण वा कप्पूरपुडाण वा अणुवायंसि वा ओभिज्जमाणाण वा कुट्टिज्जमाणाण वा [3]भंजिज्ज-माणाण वा उक्किरिज्जमाणाण वा विक्किरिज्जमाणाण वा परिभुज्जमाणाण वा भंडातो भंडं साहरिज्जमाणाण वा ओराला मणुण्णा मणहरा घाणमण-निव्वुतिकरा सव्वतो समंता गंधा [4]अभिनिस्सवंति भवेतारूवे सिया ? णो इणट्ठे समट्ठे, ते णं मणी एत्तो इट्ठतराए चेव जाव [5]गंधेणं पण्णत्ता ॥ ३० ॥

[३०] तदेवमुक्तं वर्णस्वरूपं, सम्प्रति गन्धस्वरूपं प्रतिपादनार्थमाह-

'**तेसि णमि**'त्यादि, **तेषां मणीनामयमेतद्रूपो गन्धः प्रज्ञप्तः**, तद्यथा-'**से जहा नाम ए**' इत्यादि, प्राकृतत्वात् 'से' इति बहुवचनार्थः प्रतिपत्तव्यः, ते यथा नाम गन्धा [6]अभिनिर्गच्छन्तीति सम्बन्धः, कोष्ठं-गन्धद्रव्यं तस्य पुटाः **कोष्ठपुटा**स्तेषां, वाशब्दाः सर्वत्रापि समुच्चये, इह एकस्य पुटस्य प्रायो न तादृशो गन्ध आयाति, द्रव्यस्याल्पत्वात्, ततो बहुवचनं, **तगरमपि** गन्धद्रव्यम्, **एलाः** प्रतीताः, **चोयं**-गन्धद्रव्यं, **चम्पक-दमनक-कुङ्कुम-चन्दनोशीर-मरुक-जाती-यूथिका-मल्लिका-स्नानमल्लिका-केतकी-पाटली-नवमालिका-ऽगुरु-लवङ्गकुसुम-वास-कर्पूराणि** प्रतीतानि, नवरमुशीरं-[7]वीरणीमूलं स्नानमल्लिका-स्नानयोग्यो मल्लिकाविशेषः, एतेषां पुटाना[8]मनुवाते-आघ्रायकविवक्षितपुरुषाणाम-नुकूलं[9] वाते वाति सति **उद्भिद्यमानाना**मुद्घाट्यमानानां, वाशब्दः सर्वत्रापि समुच्चये । '**कुट्टिज्जमाणाण वा**' इति इह पुटैः परिमितानि यानि कोष्ठादीनि गन्धद्रव्याणि तान्यपि परिमेये परिमाणोपचारात् कोष्ठपुटादीनीत्युच्यन्ते तेषां कुट्यमानानाम्-उदूखले [10]युज्यमानानां

---

१. तुला - जीवा० ३/२८३ । २. जोति० JB ॥ ३. रुचिज्जमाणाण (जी० ३/२८३) "अयं पेषणार्थे देशीधातु विद्यते" - इति V पृ. ३१३ टि. ८ । ४. अभिनिस्सदंति (क, ख, ग); अभिनिस्सरंति (छ, वृ); अभिनिस्सवन्ति (वृपा) । ५. द्र. सू. २५ । ६. अभिनिःश्रवन्तीति- जीवाभि. वृत्तौ ॥ ७. वीरुणी° JK । ८. °मनवाते-JK । ९. JKG । °ले - मु. जीवाभि. वृत्तौ ॥ १०. K । खुद्यमा मु. । कुट्यमा° G जीवाभि. वृत्तौ च ॥

'**भंजिज्जमाणाण वा**' इति श्लक्ष्णखण्डीक्रियमाणानाम्[१] एतच्च विशेषणद्वयं कोष्ठादिद्रव्याणामवसेयं, तेषामेव प्रायः कुट्टन-श्लक्ष्णखण्डीकरणसम्भवाद्, न तु यूथिकादीनां, '**उक्किरिज्जमाणाण वा**' इति क्षुरिकादिभिः कोष्ठादिपुटानां कोष्ठादिद्रव्याणां वा उत्कीर्यमाणानां '**विक्किरिज्जमाणाण वा**' इति विकीर्यमाणानामितस्ततो विप्रकीर्यमाणानां, '**परिभुज्जमाणाण वा**' परिभोगाय उपयुज्यमानानां, क्वचित् '**परिभाइज्जमाणाण वा**' इति पाठस्तत्र परिभाज्यमानानां-पार्श्ववर्त्तिभ्यो मनाग् मनाग् दीयमानानां, '**भंडाओ भंडं साहरिज्जमाणाण वा**' इति भाण्डात्-स्थानादेकस्मादन्यद् भाण्डं-भाजनान्तरं संह्रियमाणानाम् **उदाराः**-स्फारास्ते चाऽमनोज्ञा अपि स्युरत आह-**मनोज्ञा**-मनोऽनुकूलाः, तच्च मनोज्ञत्वं कुतः ? इत्याह-**मनोहराः**-मनो हरन्ति-आत्मवशं नयन्तीति मनोहराः, इतस्ततो विप्रकीर्यमाणानां[२] मनोहरत्वं कुतः ? इत्याह-**घ्राण-मनोनिर्वृतिकराः**, एवंभूताः **सर्वतः**-सर्वासु दिक्षु **समन्ततः**-सामस्त्येन **गन्धा अभिनिस्सरन्ति**, जिघ्रतामभिमुखं निस्सरन्ति, क्वचित् **अभिनिस्सवन्ती**ति पाठः, तत्रापि स एवार्थो नवरमभितः स्रवन्तीति शब्दसंस्कारः, एवमुक्ते शिष्यः पृच्छति-**भवेयारूवे सिया** स्यादेतद् यथा भवेद् एतद्रूपस्तेषां मणीनां गन्धः ?, सूरिराह-'**नो इणट्ठे समट्ठे**' इत्यादि प्राग्वत् ॥ ३० ॥

सूत्र-३१ : तेसि णं मणीणं इमेतारूवे फासे पण्णत्ते, से जहा नाम ए—आइणे ति वा रूते ति वा बूरे ति वा नवनीते ति वा हंसगब्भतूलिया ति वा सिरीसकुसुमनिचये इ वा बालकुमुदपत्तरासी[३] ति वा भवेतारूवे सिया ? णो इणट्ठे समट्ठे, ते णं मणी एत्तो इट्ठतराए चेव जाव[४] फासेणं पण्णत्ता ॥ ३१ ॥

[३१] '**तेसि णमि**'त्यादि, तेषां 'णमि'ति पूर्ववन्-**मणीनामयमेतद्रूपः स्पर्शः प्रज्ञप्तः**, तद्यथा-'**से जहा नाम ए**' इत्यादि, तद्यथा-**अजिनकं**-चर्ममयं वस्त्रं **रूतं**-प्रतीतं **बूरो**-वनस्पतिविशेषः **नवनीतं**-प्रक्षणं **हंसगर्भतूली शिरीषकुसुमनिचयश्च** प्रतीतः, '**बालकुमुदपत्तरासी इ वा**' इति बालानि-अचिरकालजातानि यानि कुमुदपत्राणि तेषां राशिर्बालकुमुदपत्रराशिः, क्वचिद् '**बालकुसुमपत्रराशिः**' इति पाठः, '**भवे एयारूवे**' इत्यादि प्राग्वत् ॥ ३१ ॥

---

१. °खण्ड° JK । २. JKG । °माणेन-मु. ॥ ३. जीवा. । बालकुसुमपत्तरासीइ JBK (क, ख, ग, घ, च, वृपा) । ४. द्र. सू. २५ ।

सूत्र-३२ : तते णं से आभिओगिए देवे तस्स दिव्वस्स जाणविमाणस्स बहुमज्झदेसभागे, एत्थ णं महं पिच्छाघरमंडवं विउव्वति–अणेगखंभसयसन्निविट्ठं अब्भुग्गय-सुकय-[१]वइरवेइयातोरण-वररइयसालभंजियागं सुसिलिट्ठ-विसिट्ठ-लट्ठ-संठिय-पसत्थ-वेरुलिय-विमलखंभं णाणामणिकणगरयणखचिय-उज्जलबहुसमसुविभत्तभूमिभागं[२] ईहामिय-उसभ-तुरग-नर-मगर-विहग-वालग-किन्नर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलयभत्तिचित्तं Δ [३]खंभुग्गय-वइरवेइयापरिगयाभिरामं विज्जाहरजमलजुयलजंतजुत्तं पिव अच्चीसहस्समालणीयं रूवगसहस्सकलियं भिसमाणं भिब्भिसमाणं चक्खुल्लोयणलेसं सुहफासं सस्सिरीयरूवं Δ कंचणमणिरयणथूभियागं णाणाविहपंचवण्णघंटापडागपरिमंडियग्गसिहरं चवलं [४]मरीतिकवयं विणिम्मुयंतं लाउल्लोइयमहियं गोसीस-सरस-रत्तचंदण-दद्दर-दिन्नपंचंगुलितलं उवचियवंदणकलसं वंदणघड-सुकय-तोरणपडिदुवारदेसभागं आसत्तोसत्तविउलवट्टवग्घारिय-मल्लदामकलावं पंचवण्णसरससुरभिमुक्कपुप्फपुंजोवयारकलियं कालागरु-पवरकुंदुरुक्क-तुरुक्क-[५]धूव-मघमघेंतगंधुद्धुयाभिरामं सुगंधवरगंधियं गंधवट्टिभूतं अच्छर-गण-संघ-संविकिण्णं दिव्वतुडियसद्दसंपणाइयं अच्छं [६]जाव पासादीयं दरिसणिज्जं अभिरूवं पडिरूवं ॥ ३२ ॥

[३२] **'तए णं'** इत्यादि, ततः **स आभियोगिको देवस्तस्य दिव्यस्य यानविमानस्य बहुमध्यदेशभागे अत्र महत्प्रेक्षागृहमण्डपं विकुर्वति,** कथम्भूतम् ? इत्याह-**अनेकस्तम्भशतसन्निविष्टं** तथा अभ्युद्गता-अत्युत्कटा सुकृता-सुष्ठु निष्पादिता [७]वरवेदिकानि तोरणानि वररचिताः शालभञ्जिकाश्च यत्र **तदभ्युद्गत-सुकृतवरवेदिका-**

१. वइरवेइया- BK । वरवेइया (क, ख, ग, घ, च, छ); "वृत्तावपि 'वरवेदिका' इति व्याख्यातमस्ति, किंतु जीवाजीवाभिगमस्य (३।३७२) सूत्रस्य तथा ज्ञाताधर्मकथायाः (१।१।८९) सूत्रस्य सन्दर्भे 'वइरवेइया' इति पाठ उपयुक्तोस्ति । प्रस्तुतसूत्रस्य (१७) सूत्रे यानविमानवर्णनेपि 'वइरवेइया' इति पाठो लभ्यते" । इति V पृ. ९४ टि. ४ ॥ २. °सुविभत्तदेसभायं BJLK (क, ख, ग, घ, च); °सुविभत्तदेसभूमिभायं (छ) ॥ ३. ΔΔ चिह्नद्वयमध्यवर्तिपाठः JLBK मु. नास्ति । V अस्ति ॥ ४. मिरीति° JBL (क, ख, ग, घ, च, छ) । °मिरीभि° K ॥ ५. धूव मघमघमघेंत-JBL ॥ ६. द्र. सू. ३-४ वृत्तौ ॥ ७. वरवेदिकाः - G । वज्रवेदिका - द्वारमुण्डकोपरि वज्ररत्नमयी वेदिका - इति जीवाभि. वृत्तौ ॥

तोरणवररचितशालभञ्जिकाकं, तथा सुश्लिष्टा विशिष्टा लष्टसंस्थिताः-मनोज्ञसंस्थानाः प्रशस्ताः-प्रशस्तवास्तुलक्षणोपेता वैडूर्यविमलस्तम्भा-वैडूर्यरत्नमया विमलाः स्तम्भा यत्र तत् **सुश्लिष्ट-विशिष्ट-लष्टसंस्थित-प्रशस्त-वैडूर्य-विमलस्तम्भं**, तथा नाना मणयः खचिता यत्र भूमिभागे स नानामणिखचितः, सुखादिदर्शनात् क्तान्तस्य[१] पाक्षिकः परनिपातः नाणामणिखचित उज्ज्वलो बहुसमः-अत्यन्तसमः सुविभक्तो भूमिभागो यत्र तद् **नानामणिखचितोज्ज्वलबहुसमसुविभक्तभूमिभागं**, तथा ईहामृगा-वृकाः, ऋषभाः-वृषभाः, तुरग-नर-मकर-विहगाः प्रतीताः व्यालाः-श्वापदभुजगाः, किंनरा-व्यन्तरविशेषाः रुरवो-मृगाः, सरभाः-आटव्या महाकायाः पशवः, चमरा-आटव्या गावः, कुञ्जरा-दन्तिनः, वनलता-अशोकादिलताः, पद्मलताः-पद्मिन्यः, एतासां भक्त्या-विच्छित्त्या चित्रम्-आलेखो यत्र **तदीहामृग-ऋषभ-तुरग-नर-मकर-विहग-व्याल-किन्नर-रुरु-सरभ-चमर-कुञ्जर-वनलता-पद्मलताभक्तिचित्रं**, तथा स्तम्भोद्गतया[२]-स्तम्भोपरिवर्त्तिन्या वज्ररत्नमय्या वेदिकया परिगतं सद् यदभिरामं तत् **स्तम्भोद्गत-वज्रवेदिकापरिगताभिरामं, विज्जाहरजमल-जुगलजन्तजुत्तं पिव अच्चीसहस्समालिणीय**मिति विद्या धरन्तीति विद्याधरा-विशिष्टविद्याशक्तिमन्तः तेषां यमल[३]युगलानि-समानशीलानि द्वन्द्वानि, तेषां यन्त्राणि-प्रपञ्चविशेषास्तैर्युक्तमिव, अर्चिषां-मणिरत्नप्रभाज्वालानां सहस्रैर्मालनीयं-परिवारणीयं, किमुक्तं भवति ?-एवं नाम अत्यद्भुतैर्मणिरत्नप्रभाजालैराकलितमिव भाति यथा नूनमिदं न स्वाभाविकं, किन्तु विशिष्टविद्याशक्तिमत्[४]पुरुषप्रपञ्चप्रभावितमिति, **रूवगसहस्सकलितं भिसिमाणं भिब्भिसमाणं चक्खुल्लोयण[५]लेसं सुहफासं सस्सिरीयरूव**मिति प्राग्वत्, क्वचिदेतन्न दृश्यते, **कञ्चणमणिरयणथूभियाग**मिति काञ्चनं च मणयश्च रत्नानि च काञ्चन-मणि-रत्नानि, तेषां-तन्मयी स्तूपिका-शिखरं यस्य तत्तथा, नानाविधाभिः-नाना-प्रकाराभिः पञ्च[६]वर्णाभिर्घण्टाभिः पताकाभिश्च परि-सामस्त्येन मण्डितमग्रं-शिखरं यस्य तद् **नानाविधपञ्चवर्ण्णघण्टापताकापरिमण्डिताग्रशिखरं, चपलं**-चलं[७], चिकचिकायमानत्वाद् **मरीचिकवचं**-किरणजालपरिक्षेपं **विनिर्मुञ्चद्, लाउल्लोइयमहिय**मिति लाइयं नाम-यद्भूमेर्गोमयादिनोपलेपनम् उल्लोइयं-कुड्यानां मालस्य च सेटिकादिभिः सम्मृष्टीकरणं लाउल्लोइयाभ्यामिव महितं-पूजितं लाउल्लोइयमहियं, तथा गोशीर्षेण-गोशीर्षनामकचन्दनेन सरसरक्तचन्दनेन च ददरेण-बहलेन चपेटाकारेण वा दत्ताः पञ्चाङ्गु[८]लयस्तला-हस्तका

---

१. "निष्ठान्तस्य परनिपातो भार्यादिदर्शनात् नानामणि" जीवा. वृत्तौ ॥ २. स्तम्भोद्गतया-JK नास्ति ॥ ३. यमल° JK नास्ति ॥ ४. °सत्पु° JK ॥ ५. °णतेसं-JK ॥ ६. पञ्चवर्णाभिः-JK नास्ति ॥ ७. KG । चञ्चलं-मु. ॥ ८. °गुलितला - G । °गुलाह- J ॥

गोशीर्षे[१] यत्र **तद्गोशीर्षसरसरक्तचन्दनदर्दरदत्तपञ्चाङ्गुलितलं,** तथा उपचिता-निवेशिताः वन्दनकलशा-मङ्गलकलशा यत्र **तदुपचितवन्दनकलशं, वंदणघडसुकयतोरणपडिदुवारदेसभाग**मिति वन्दनघटैः[२]-वन्दनकलशैः सुकृतानि-सुष्ठु कृतानि शोभितानीति तात्पर्यार्थः, यानि तोरणानि तानि वन्दनघटसुकृतानि तानि तोरणानि प्रति द्वारदेशभागं-द्वारदेशभागे यत्र तत् चन्दनघटसुकृततोरणप्रतिद्वारदेशभागं, तथा **'आसत्तोसत्तविपुलवट्टवग्घारियमल्लदामकलाव**'मिति आ-अवाङ्-अधोभूमौ सक्त आसक्तः-भूमौ लग्न इत्यर्थः, उत्सक्तम्-ऊर्ध्वसक्तम् उल्लोचतले उपरि सम्बद्ध इत्यर्थः विपुलो-विस्तीर्णः वृत्तो-वर्तुलः वग्घारिय इति-प्रलम्बितो माल्यदामकलापः-पुष्पमालासमूहो यत्र तदासक्तोत्सक्तविपुलवृत्तप्रलम्बितमाल्यदामकलापं, तथा पञ्चवर्ण्णेन सरसेन-सच्छायेन सुरभिणा मुक्तेन-क्षिप्तेन पुष्पपुञ्जलक्षणेनोपचारेण-पूजया कलितं **पञ्चवर्ण्णसरससुरभिमुक्तपुष्पपुञ्जोपचारकलितं, 'कालागुरुपवरकुन्दुरुक्कतुरुक्कधूवमघमघंतगन्धुद्धुयाभिरामं सुगंधवरगंधियं गंधवट्टिभूय**'मिति प्राग्वत्, तथा अप्सरोगणानां सङ्घः-समुदायस्तेन सम्यग्-रमणीयतया विकीर्ण्ण-व्याप्तम् **अप्सरोगणसङ्घसंविकीर्ण्णम्,** तथा दिव्यानां त्रुटितानाम् आतोद्यानां-वेणु-वीणा-मृदङ्गादीनां ये शब्दास्तैः सम्प्रणादितं[३]-सम्यक्-श्रोत्र-मनोहारितया प्रकर्षेण नादितं[४]-शब्दवद् **दिव्यत्रुटितशब्दसम्प्रणादितम्[५], 'अच्छं जाव पडिरूव**'मिति यावच्छब्दकरणात् 'अच्छं सण्हं घट्टं मट्ठं नीरयं निम्मलं निप्पंकं निक्कंकडच्छायं सप्पभं समिरियं सउज्जोयं पासाइयं दरिसणिज्जं अभिरूवं पडिरूव'मिति द्रष्टव्यम्, एतच्च प्राग्वद्व्याख्येयम् ॥ ३२ ॥

सूत्र-३३ : तस्स णं पिच्छाघरमंडवस्स [अंतो]बहुसमरमणिज्जं भूमिभागं विउव्वति, जाव[६] मणीणं फासो ॥ ३३ ॥

[३३] **'तस्स णमि**'त्यादि, तस्य 'णमि'ति प्राग्वत् **प्रेक्षागृहमण्डपस्यान्तः**-मध्ये **सबहुसमरमणीयं भूमि भागं विकुर्वति,** तद्यथा-आलिंगपुष्करमिति वेत्यादि, तदेव तावद्वक्तव्यं **यावन्मणिस्पर्श**सूत्रपर्यन्तः, तथा चाह-**'जाव मणीणं फासो'** इति ॥ ३३ ॥

सूत्र-३४ : तस्स णं पेच्छाघरमंडवस्स उल्लोयं विउव्वति—पउमलय[७]भत्तिचित्तं अच्छं जाव[८] पडिरूवं ॥ ३४ ॥

१. JK । गोशीर्षे-मु. जीवाभि.वृत्तौ नास्ति ॥ २. चन्दन-मु. G । एवमग्रेऽपि ॥ ३. °णदितं-JK ॥ ४. नादितश° JK ॥ ५. णदितम्-JK ॥ ६. द्र. सू.२४-३१ । ७. "जीवाजीवाभिगमे (३।३०८) 'पउमलयाभत्तिचित्ता जाव सामलयाभत्तिचित्ता सव्वतवणिज्जमया' इति पाठो लभ्यते । किन्तु प्रस्तुतसूत्रादर्शेषु केवलं पद्मलताया एव उल्लेखो विद्यते, वृत्तावपि इत्थमेवास्ति"। इति V पृ. ९५ टि.१ ॥ ८. द्र. सू. ३-४ वृत्तौ।

[३४] **'तस्स णमि'**त्यादि, तस्य णमिति पूर्ववत् **प्रेक्षागृहमण्डपस्य उल्लोकम्**-उपरिभागं **विकुर्वन्ति, पद्मलताभक्तिचित्रं 'जाव पडिरूवमि'**ति, यावच्छब्दकरणात् 'अच्छं सण्ह'मित्यादिविशेषणकदम्बकपरिग्रहः ॥ ३४ ॥

सूत्र-३५ : तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं महं एगं वइरामयं अक्खाडगं विउव्वति ॥ ३५ ॥

[३५] **'तस्स णमि'**त्यादि, **तस्य-बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्र 'ण'**मिति पूर्ववत् **एकं महान्तं वज्रमयमक्षपाटं[१] विकुर्वति** ॥ ३५ ॥

सूत्र-३६ : तस्स णं अक्खाडयस्स बहुमज्झदेसभागे एत्थ णं महेगं मणिपेढियं विउव्वति—अट्ठ[२] जोयणाइं आयामविक्खंभेणं, चत्तारि जोयणाइं बाहल्लेणं, सव्वमणिमयं अच्छं जाव पडिरूवं ॥ ३६ ॥

[३६] **तस्य चाक्षपाटकस्य बहुमध्यदेशभागे अत्रैकां महतीं मणिपीठिकां विकुर्व्वति, अष्टौ योजनानि आयाम-विष्कम्भाभ्यां, चत्वारि योजनानि बाहल्येन**-उच्चैस्त्वेनेति भावः, कथंभूतां तां विकुर्वति ? इत्यत आह **'सर्वमणिमयीं'** सर्वात्मना मणिमयीं यावत्करणाद् **अच्छा**मित्यादिविशेषणसमूहपरिग्रहः ॥ ३६ ॥

सूत्र-३७ : तीसे णं मणिपेढियाए उवरिं, एत्थ णं महेगं सीहासणं विउव्वइ । तस्स णं सीहासणस्स इमेतारूवे वण्णावासे पण्णत्ते—तं[३] जहा तवणिज्जमया चक्कला, रययामया सीहा, सोवण्णिया पाया, णाणामणिमयाइं पायसीसगाइं, जंबूणयमयाइं गत्ताइं, वइरामया संधी, णाणामणिमए वेच्चे, से णं सीहासणे ईहामिय-उसभ-तुरग-नर-मगर-विहग-वालग-किन्नर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलयभत्तिचित्ते ससारसारोवचियमणिरयणपायपीढे अत्थरग-मिउमसूरग-नवतयकुसंत-[४]लिंब-

---

१. वज्रमयम्-JK नास्ति ॥ २. मणिपेढीयाओ जोयणं आयाम-विक्खंभेणं अद्धजोयणं बाहल्लेणं-इति जीवा ३१० सूत्रे ॥ ३. तुला-जीवाभिगमे सू. ३११ । ४. "प्रस्तुतसूत्रे अस्य पदस्य द्वौ पाठभेदौ लभ्येते—लिक्ख (क); लिव्व BLK (ख, ग, घ, च, छ) । ज्ञाताधर्मकथायां (१।१।१८) अस्य पदस्य 'लिव्व' इति पाठभेदो विद्यते । जीवाजीवाभिगमे (३।३११) मूलपाठे 'लिच्च' इति पदं विद्यते, पाठान्तरे च 'लिक्ख' इति पदमस्ति । एतैः पाठभेदैर्ज्ञायते 'लिव्व' इति पाठस्य 'लिच्च' इति रूपे परावर्तनं जातम् । वृत्तिकारैर्यथा यथा पाठो लब्धस्तथा तथा

केसर-पच्चत्थुयाभिरामे आईणग-रूय-बूर-णवणीय-तूलफासे सुविरइय-रयत्ताणे उवचियखोमदुगुल्लपट्टपडिच्छायणे रत्तंसुयसंवुडे सुरम्मे पासातीए दरिसणिज्जे अभिरूवे पडिरूवे ॥ ३७ ॥

[३७] **तस्याश्च मणिपीठिकाया उपर्यत्र महदेकं सिंहासनं विकुर्वति, तस्य च सिंहासनस्यायमेतद्रूपो वर्णावासः प्रज्ञप्तः, तद्यथा-तपनीयमयाः चक्कला, रजतमयाः सिंहा** यैरुपशोभितं तत् सिंहासनमुच्यते, **सौवर्णिकाः**-सुवर्णमयाः **पादाः, नानामणिमयानि पादशीर्षकाणि**-पादानामुपरितना अवयवविशेषाः, **जाम्बूनदमयानि गात्राणि, वज्रमया**-वज्ररत्नापूरिताः **सन्धयो**-गात्राणां सन्धिमेलाः **नानामणिमयं वेच्चं**-तज्जातः, **'से णं सीहासणे'** इत्यादि, तत् सिंहासनम् **इहामृग-ऋषभ-तुरग-नर-मकर-व्यालक-किन्नर-रुरु-सरभ-चमर-वनलता-पद्मलताभक्तिचित्रं 'ससारसारोवचियमणिरयणपायपीढ'**मिति सारसारैः-प्रधानैः मणिरत्नैरुपचितेन पादपीठेन सह यत्तत्तथा, प्राकृतत्वाच्च पदोपन्यासव्यत्ययः **'अत्थरय-मउ-मसूरग-नवतयकुसन्त-लिम्ब-केसर-पच्चत्थुयाभिरामे'** इति आस्तरकम्-आच्छादकं मृदु यस्य मसूरकस्य तदास्तरकमृदु, विशेषणस्य परनिपातः प्राकृतत्वाद्, नवा त्वक् येषां ते नवत्वचः, कुशान्ताः-दर्भपर्यन्ताः, नवत्वचश्च ते कुशान्ताश्च नवत्वक्कुशान्ताः-प्रत्यग्रत्वग्दर्भपर्यन्तरूपाणि लिम्बानि-कोमलानि नमनशीलानि च केसराणि मध्ये यस्य मसूरकस्य तद् नवत्वक्कुशान्त-लिम्बकेशरम्, आस्तरकमृदुना मसूरकेण नवत्वक्कुशान्तलिम्बकेसरेण प्रत्यवस्तृतम्-आच्छादितं सद् यदभिरामं तत्तथा, विशेषणपूर्वापरनिपातो यादृच्छिकः प्राकृतत्वात्, **'आईणग-रुअ-बूर-नवणीय-तूलफासे'** इति पूर्ववत्, तथा **'सुविरइयरयत्ताणे'** तथा सुष्ठु विरचितं सुविरचितं रजस्त्राणमुपरि यस्य तत्सुविरचित-

---

व्याख्यातः— नायाधम्मकहाओ (वृत्तिपत्र १७) लिम्बो बालोरभ्रस्योर्णायुक्ता कृत्तिः । जीवाजीवाभिगमे (वृत्तिपत्र २१०) लिच्चानि—नमनशीलानि च केशराणि । रायपसेणइयवृत्तौ लिम्बानि कोमलानि नमनशीलानि च केशराणि मध्ये यस्य मसूरकस्य तत् नवत्वक्कुशान्तलिम्बकेशरम् । रायपसेणइयवृत्तौ कोमलानि, जीवाजीवाभिगमस्य वृत्तौ नमनशीलानि इति व्याख्यातमस्ति । अनेन अर्थसादृश्यं प्रतीयते । 'लिच्च' इति पदं लिपिकाराणां प्रमादत एवं जातमस्ति ।" इति V पृ. ९५ टि. ६ ॥ "हस्तलिखितादर्शेषु 'व-ब' इत्यक्षरयोः समानप्रायत्वात् अत्र 'लिंब' इति शुद्धं 'लिंव' इति वा इत्यत्र सन्देहः" इति ज्ञाताधर्मकथा म.वि.पृ.९ टि.१९ ॥

१. °फासमउए-KJBV क, ख, ग, घ, च, छ ॥ २. "चक्कलं कुण्डलं वर्तुलं दोलाफलकं विशालं चेति चतुरर्थः" देशीनाम० व.३, गा. २० । भाषायाम् 'चाकळा' इति प्रतिभाति" इति G पृ.९८ टि. ॥ ३. KG । स्तैमु. जीवाभि. वृत्तौ च ॥ ४. वेच्चं-व्युतम्-G ॥ वेच्चं व्यूतं वानमित्यर्थः, आह च चूर्णिकृत् "वेच्चे वाणक्कतेण" मित्यादि-इति जीवाभि.वृत्तौ ॥ ५. "भाषायाम्-गालमसूरियुं-इति प्रसिद्धम्" G पृ.९९ टिप्पणे ॥ ६. "क्वचित् सिंहकेसरेति पाठः...सिंहकेसरेति पाठपक्षे एकस्य केसरशब्दस्य शाकपार्थिवादिदर्शनाल्लोपः" इति जीवाभि. वृत्तौ ॥

रजस्त्राणम्, '**उवचियखोमदुगुल्लपट्टपडिच्छायण**'मिति, उपचितं-परिकर्मितं यत्क्षौमं दुकूलं-कार्पासिकं[१] वस्त्रं परिच्छादनं[२] रजस्त्राणस्योपरि द्वितीयमाच्छादनं यस्य तत्तथा, तत उपरि '**रत्तंसुयसंवुडे**' इति रक्तांशुकेन-अतिरमणीयेन रक्तेन वस्त्रेण संवृतम्-आच्छादितमत एव **सुरम्यं, 'पासाइए दरिसणिज्जे अभिरूवे पडिरूवे**' इति प्राग्वत् ॥ ३७ ॥

सूत्र-३८ : तस्स णं सीहासणस्स उवरिं, एत्थ णं महेगं विजयदूसं विउव्वति—सेंख[३]-कुंददगरय-अमयमहियफेणपुंजसन्निगासं सव्वरयणामयं अच्छं सण्हं पासादीयं दरिसणिज्जं अभिरूवं पडिरूवं ॥ ३८ ॥

[३८] '**तस्स णमि**'त्यादि, **तस्य सिंहासनस्योपर्युल्लोके** '**अत्र**' अस्मिन् स्थाने **महदेकं विजयदूष्यं**-वस्त्रविशेषः, आह च **जीवाभिगममूलटीकाकृत्**-"**विजयदूष्यं वस्त्रविशेषः**" इति तं **विकुर्वति**-स्वशक्त्या निष्पादयन्ति, कथम्भूतम् ? इत्याह-**शङ्ख-कुन्द-दकरजो-ऽमृतमथितफेनपुञ्जसन्निकाशं** शङ्खः प्रतीतः, कुन्देति-कुन्दकुसुमं, दकरजः-उदककणाः अमृतस्य-क्षीरोदधिजलस्य मथितस्य यः फेनपुञ्जो-डिण्डीरोत्करः तत्सन्निकाशं-तत्समप्रभं, पुनःकथम्भूतम् ? इत्याह-'**सव्वरयणामयं**' सर्वात्मना रत्नमयम् '**अच्छं सण्हं पासाइय**मि'त्यादिविशेषणजालं प्राग्वत् ॥ ३८ ॥

सूत्र-३९ : तस्स णं सीहासणस्स उवरिं विजयदूसस्स य बहुमज्झदेसभागे, एत्थ णं महं[४] एगं वयरामयं अंकुसं विउव्वति ॥ ३९ ॥

[३९] '**तस्स णमि**'त्यादि, तस्य **सिंहासनस्योपरि** तस्य **विजयदूष्यस्य बहुमध्यदेशभागेऽत्र महान्तमेकं वज्रमयं**-वज्ररत्नमयम् **अङ्कुशम्**-अङ्कुशाकारं मुक्तादामावलम्बनाश्रयं[५] **विकुर्व्वति** ॥ ३९ ॥

सूत्र-४० : तंसि च णं वयरामयंसि अंकुसंसि कुंभिक्कं मुत्तादामं विउव्वति। से णं कुंभिक्के मुत्तादामे अण्णेहिं चउहिं कुंभिक्केहिं[६] मुत्तादामेहिं तदद्धुच्चत्तपमाणेहिं सव्वतो समंता संपरिखित्ते । ते णं दामा तवणिज्जलंबूसगा[७]

१. "कार्पासिकमतसीमयं वा वस्त्रं, तस्य युगलापेक्षया यः पट्टः शाटकः स प्रतिच्छदनम् आच्छादनम् यस्य तत्तथा तत्र" ज्ञातासूत्र टी. ॥ २. प्रतिच्छा° जीवाभि.वृत्तौ ॥ ३. घ.छ. G जीवाभिगमे । संखंक-कुंद-मु. V ॥ ४. महं एगं-K नास्ति ॥ ५. श्रियं-JKA ॥ ६. अद्धकुं° बाबु. जीवाभिगमे च । ७. K । °गा सुवण्णपयरगमंडियागा (यग्गा-मु.) (ख, ग); °पइरमंडियागा (च); °पयरमंडियागा-V ॥ 'सुवन्नपयर मंडिया' इति पार्श्वतः सामस्त्येन सुवर्णप्रतरेण सुवर्णपत्रकेण मण्डितानि सुवर्णप्रतरमण्डितानि इति वृत्तौ सू. १३२ । °का सुवण्णपयरगमंडिता जाव चिट्ठंति-इति जीवा. सू.३१३ । द्र. सू. १३२। जीवाजीवाभिगमे ३/३०२ ।

णाणामणिरयणविविहहारद्धहारउवसोभियसमुदया[1] ईसिं अण्णमण्णमसंपत्ता पुव्वावरदाहिणुत्तरागतेहिं वातेहिं मंदायं-मंदायं [2]एज्जमाणा-एज्जमाणा पलंबमाणा-पलंबमाणा [3]पझंझमाणा-पझंझमाणा उरालेणं मणुण्णेणं मणहरेणं कण्णमणणिव्वुतिकरेणं सद्देणं ते पएसे सव्वतो समंता आपूरेमाणा-आपूरेमाणा सिरीए अतीव-अतीव उवसोभेमाणा-उवसोभेमाणा चिट्ठंति ॥ ४० ॥

[४०] **तस्मिंश्च वज्रमयेऽङ्कुशे** महदेकं **कुम्भाग्रं**[4]-मगधदेशप्रसिद्धं कुम्भपरिमाणं **मुक्तादाम विकुर्व्वति** । **'से णमि'**त्यादि, **तत्कुम्भाग्रं मुक्तादाम अन्यैश्चतुर्भिः कुम्भाग्रैः**-कुम्भपरिमाणै**र्मुक्तादामभिस्तदर्धोच्चत्वप्रमाणमात्रैः, सर्वतः** सर्वासु दिक्षु **समन्ततः**-सामस्त्येन **सम्परिक्षिप्तं**-व्याप्तम् । **'ते णं दामा'** इत्यादि, तानि पञ्चापि दामानि **'तवणिज्जलंबूसगा'** तपनीयमया लम्बूसगा-आभरणविशेषरूपा अग्रभागे येषां प्रलम्बमानानां तानि तथा, **नानामणिरत्नैः** नानामणिरत्नमयै**र्विविधैः**-विचित्रै**र्हारैरर्द्धहारैश्चोपशोभितः**-सामस्त्येनोपशोभितः **समुदायो** येषां तानि तथा, तथा **ईषत्**-मनाक् **अन्योऽन्यं**-परस्परम् **असम्प्राप्तानि**-असंलग्नानि **पूर्वापरदक्षिणोत्तरागतैः [वातैः] मन्दायं मन्दायं** इति-मन्दं मन्दम् **'एज्जमानानि'** कम्पमानानि, **"भृशाभीक्ष्ण्याऽविच्छेदे द्विः प्राक्तमबादेः"**[5] [सि.हे. ७-४-७३]इत्यविच्छेदे द्विर्वचनं यथा पचन्ति पचन्तीत्यत्र, एवमुत्तरत्रापि, ईषत्कम्पनवशादेव प्रकर्षत इतस्ततो मनाक् चलनेन **लम्बमानानि लम्बमानानि**, ततः परस्परं सम्पर्कवशतः **'[6]पझंझमाणा पझंझमाणा'** इति शब्दायमानानि शब्दायमानानि **उदारेण** स्फारेण शब्देनेति योगः, स च स्फारशब्दो मनःप्रतिकूलोऽपि भवति, तत आह-**'मनोज्ञेन'** मनोऽनुकूलेन, तच्च मनोऽनुकूलत्वं लेशतो स्यादत आह-**'मनोहरेण'** मनांसि श्रोतॄणां हरति-एकान्तेनात्मवशं नयतीति मनोहरो **'लिहादेराकृतिगणत्वा[7]द् च्'** **'अ प्रत्ययः'**, तेन,

---

१. °दाया-जीवाभिगमे ॥ २. एईज्जमाणाणं२ B (क, ख, ग); एइज्जमाणाणं२ J (घ); एइज्जमाणं एइज्जमाणं K (च); एयज्जमाणाणं एयज्जमाणाणं (छ) एइज्जमाणा-जीवाभि. वृत्तौ । ३. पडंकमाणा (क) 'पब्भकमाणा (ख, ग, च, छ) । पब्भक्कमाणाणि-B । ४. "अग्रं पुरस्तात्, उपरि, परिमाणे" इति मेदिनी [अमर० टी. पृ. ३२९] इति वचनात् अत्र 'अग्र' शब्दः परिणामवाची बोध्यः - इति G पृ. १०० टि. ॥ ५. मलयगिरिशब्दानुशासने 'भृश-आभीक्ष्णे पञ्चमी तस्मिन् तथार्थे' इति कृदन्ते ४/९९ ॥ ६. JK । पेज्जंजमाणा पेज्जंजमाणा-मु. ॥ ७. "लिहादिभ्यः"-इति मलय. कृ. १/३३ ॥ ८. °त्वादच् प्र° मु. ॥

तदपि मनोहरत्वं कुतः ? इत्याह-'**कर्ण्ण-मनोनिर्वृतिकरेण**' "**निमित्त-कारण-हेतुषु सर्वासां विभक्तीनां प्रायो दर्शन**" [ ] मिति वचनात् हेतौ तृतीया, ततोऽयमर्थः-प्रतिश्रोतृ कर्णयोर्मनसश्च निर्वृतिकरः-सुखोत्पादकस्ततो मनोहरस्तेनेत्थम्भूतेन शब्देन तान् प्रत्यासन्नान् **प्रदेशान् सर्वतो**-दिक्षु **समन्ततो**-विदिक्षु **आपूरयन्ति आपूरयन्ति,** शत्रन्तस्य[१] सौ इदं रूपं, अत एव श्रिया-शोभया अतीवोपशोभमानानि उपशोभमानानि तिष्ठन्ति ॥ ४० ॥

सूत्र-४१ : तते णं से आभिओगिए देवे तस्स सीहासणस्स अवरुत्तरेणं उत्तरेणं उत्तरपुरत्थिमेणं, एत्थ णं सूरियाभस्स देवस्स चउण्हं सामाणिय-साहस्सीणं चत्तारि भद्दासणसाहस्सीओ विउव्वति ॥ ४१ ॥

[४१] '**तए णमि**'त्यादि, ततः **स आभियोगिको देवस्तस्य सिंहासनस्य अवरुत्तरेण**-वायव्ये कोणे इत्यर्थः, **उत्तरेण** उत्तरस्याम् '**उत्तरपुरत्थिमेण**' ईशान्याम् '**अत्र**' एतासु तिसृषु दिक्षु **सूर्याभस्य देवस्य- चतुर्ण्णां सामानिकसहस्राणां** योग्यानि **चत्वारि भद्रासनसहस्राणि विकुर्व्वति** ॥ ४१ ॥

सूत्र-४२ : तस्स णं सीहासणस्स पुरत्थिमेणं, एत्थ णं सूरियाभस्स देवस्स चउण्हं अग्गमहिसीणं सपरिवाराणं चत्तारि भद्दासणसाहस्सीओ विउव्वति ॥ ४२ ॥

[४२] **पूर्वस्यां चतसृणामग्रमहिषीणां सपरिवाराणां चत्वारि भद्रासनसहस्राणि ॥ ४२ ॥**

सूत्र-४३ : तस्स णं सीहासणस्स दाहिणपुरत्थिमेणं, एत्थ णं सूरियाभस्स देवस्स अब्भिंतरपरिसाए अट्ठण्हं देवसाहस्सीणं अट्ठ भद्दासणसाहस्सीओ विउव्वइ । एवं–दाहिणेणं मज्झिमपरिसाए दसण्हं देवसाहस्सीणं दस भद्दासणसाहस्सीतो विउव्वति । दाहिणपच्चत्थिमेणं बाहिरपरिसाए बारसण्हं देवसाहस्सीणं बारस भद्दासणसाहस्सीतो विउव्वति । पच्चत्थिमेणं सत्तण्हं अणियाहिवतीणं सत्त भद्दासणे विउव्वति ॥ ४३ ॥

---

१. K पा. ४-५ भा.१ । शत्रन्तस्य स्यादाविदं-मु. पु. ॥ शत्रन्तस्य स्याद् इदं-भा.२ । "वर्तमानकालसूचकः 'शतृ' प्रत्ययः तेन आ + पूरय + अत् - 'आपूरयत्' इति प्रयोगे साधिते प्रथमा बहुवचने शौ 'आपूरयन्ति' " - इति G पृ. १०२ टिप्पणे ॥

[४३] **दक्षिणपूर्वस्यामभ्यन्तरपर्षदोऽष्टानां** देवसहस्त्राणां योग्यानि **अष्टौ भद्रासन-सहस्त्राणि, दक्षिणस्यां मध्यमपर्षदो दशानां देवसहस्त्राणां** योग्यानि **दश भद्रासन-सहस्त्राणि, दक्षिणाऽपरस्यां** नैर्ऋतकोणे इत्यर्थः, **बाह्यपर्षदो द्वादशानां देवसहस्त्राणां द्वादश भद्रासनसहस्त्राणि, पश्चिमायां सप्तानामनीकाधिपतीनां सप्त भद्रासनानि विकुर्वंति** ॥ ४३ ॥

सूत्र-४४ : तस्स णं सीहासणस्स चउद्दिसिं, एत्थ णं सूरियाभस्स देवस्स सोलसण्हं[1] आयरक्खदेवसाहस्सीणं सोलस भद्दासणसाहस्सीओ विउव्वति, तं जहा–पुरत्थिमेणं चत्तारि साहस्सीओ, दाहिणेणं चत्तारि साहस्सीओ, पच्चत्थिमेणं चत्तारि साहस्सीओ, उत्तरेणं चत्तारि साहस्सीओ ॥ ४४ ॥

[४४] तदनन्तरं **तस्य सिंहासनस्य चतसृषु दिक्षु अत्र** सामानिकादिदेवभद्रासनानां पृष्ठतः **सूर्याभस्य देवस्य** सम्बन्धिनां **षोडशानामात्मरक्षदेवसहस्त्राणां** योग्यानि **षोडश भद्रासनसहस्त्राणि विकुर्व्वंति, तद्यथा-चत्वारि** भद्रासन**सहस्त्राणि पूर्वस्यां, चत्वारि दक्षिणतश्चत्वारि पश्चिमायां, चत्वारि उत्तरतः**, सर्वसङ्ख्यया सप्ताधिकानि चतुःपञ्चा-शत्सहस्त्राणि ५४००७ भद्रासनानां विकुर्वति ॥ ४४ ॥

सूत्र-४५ : तस्स दिव्वस्स जाणविमाणस्स इमेयारूवे वण्णावासे पण्णत्ते, से जहा नाम ए अतिरुग्गयस्स वा हेमंतियबालियसूरियस्स वा, खयरिंगालाण वा रत्तिं पज्जलियाणं, जवाकुसुमवणस्स[2] वा केसुयवणस्स वा पारियायवणस्स वा सव्वतो समंता संकुसुमियस्स भवेतारूवे सिया ? णो इणट्ठे समट्ठे । तस्स णं दिव्वस्स जाणविमाणस्स एत्तो इट्ठतराए चेव[3] जाव वण्णे पण्णत्ते । गंधो य फासो य जहा[4] मणीणं ॥ ४५ ॥

[४५] **'तस्स णं दिव्वस्से**'त्यादि, तस्य 'णमि'ति पूर्ववद् **दिव्यस्य यानविमान-स्यायम्**-अनन्तरं वक्ष्यमाणस्वरूपो **वर्णावासो**-वर्णकनिवेशः **प्रज्ञप्तः**, तद्यथा-**'से जहा नाम ए'** इत्यादि, स यथा नाम **अचिरोद्गतस्य**-क्षणमात्रमुद्गतस्य **हैमन्तिकस्य**

१. °सण्हं भ° JBL ॥ २. जासुमणवणस्स-K । जासुमणस्स-क, ख, ग, घ, च ॥ ३. द्र. सू. ३०-३१ ॥ ४. द्र. सू. ३०,३१ ।

शिशिरकालभाविनो **बालसूर्यस्य स** ह्यत्यन्तमारक्तो भवति दीप्यमानश्चेत्युपादानं, **वा**शब्दाः सर्वेऽपि समुच्चये, **खादिराङ्गाराणि वा 'रत्ति'**मिति सप्तम्यर्थे द्वितीया प्राकृतत्वाद् यथा-"**उय[1] विणयतत्तिल्ले, पूरेमसि सिरिद्दहे गए सुरे । कत्तो रत्तिं मुद्धे, पाणियसद्धा सउणयाणं ।**" इत्यत्र, ततोऽयमर्थः-रात्रौ **प्रज्वलितानां जपाकुसुमवनस्य वा किंशुकवनस्य वा पारिजातवनस्य वा सर्वतः**-सर्वासु दिक्षु **समन्ततः**-सामस्त्येन **'सङ्कुसुमितस्य'** सम्यक् कुसुमितस्य, अत्रान्तरे शिष्यः पृच्छति-यादृग्रूप एतेषां वर्णः **'भवेयारूवे सिया'** इति स्यात्-कथञ्चिद् भवेदेतद्रूपस्तस्य दिव्यस्य यानविमानस्य वर्णः ?। सूरिराह-**'नो इणट्ठे समट्ठे, तस्स णं दिव्वस्स जाणविमाणस्स एत्तो इट्ठतराए चेव कंततरागे चेव मणुन्नतरागे चेव मणामतरागे चेव वण्णे पण्णत्ते'** इति प्राग्वद् व्याख्येयम्, **'गंधो फासो जहा मणीण'** मिति गन्धः स्पर्शः यथा प्राग्[2] मणीनामुक्तस्तथा वक्तव्यः, स चैवं-'तस्स णं दिव्वस्स जाणविमाणस्स इमे एयारूवे गंधे पण्णत्ते, तंजहा-से जहा नाम ए कोट्ठपुडाण वा[3] तगरपुडाण वा' इत्यादि ॥ ४५ ॥

सूत्र-४६ : तते णं से आभियोगिए देवे दिव्वं जाणविमाणं विउव्वइ, विउव्वित्ता जेणेव सूरियाभे देवे तेणेव उवागच्छइ, उवागच्छित्ता सूरियाभं देवं करयलपरिग्गहियं [4]जाव पच्चप्पिणति ॥ ४६ ॥

---

१. 'उय' इति 'पश्य' पदभावसूचको निपातः । "उअ पश्य"-(८-२-२१८ हैमश०) 'तत्तिल्ल' शब्दः तत्परवाची देश्यः । "तत्तिल्लो तल्लिच्छो य तप्परे"-देशीनाम० व० ५ गा० ३ । 'पूरेमसि' अस्य पदस्य भावः सम्यग् न अवगम्यते परंतु तात्पर्यानुसारी 'पूर्णे' इति अर्थः कल्प्यते । 'सिरिद्दहे'=अयं शब्दः खगपानभाजनवाचिना देश्य-'सिरिद्दही' ["'सिरिद्दही' खगपानभाजनम्"-देशीना० व०८ गा०३२] शब्देन समानः प्रतीयते, ततः प्रस्तुत-'सिरिद्दह'पदस्यापि स एव अर्थो गम्यते । 'रत्तिं' इति द्वितीयान्तमपि पदं सप्तम्यर्थसूचकं ज्ञेयम्। यथा च प्रस्तुतगाथायां 'रत्तिं' शब्दः सप्तम्यर्थं बोधयति तथा अत्र मूलसूत्रगतं 'रत्तिं'पदमपि सप्तमीभावसूचकं बोध्यम् । एतदर्थस्पष्टनार्थं च विवरणकारेण इयं गाथा उदाहरणरूपेण दर्शिता । उत विनयतत्परे ! पूरिमे? श्रीद्रहे? गते सूर्ये । कुतः रात्री मुग्धे ! पानीयशब्दाः शकुनकानाम् ॥ इति शब्दसंस्कारः । समग्रगाथायाः भावस्तु इत्थं बोध्यः-हे विनयपरायणे ! मुग्धे ! सूर्यः अस्तंगतः रात्रिर्जाता अतः जलपूर्णे खगपानभाजने पक्षिणां पानीयशब्दाः कुतः कारणात् स्युः ? रात्रौ हि पक्षिणः शेरत एव, न जलं पिबन्ति, नापि किञ्चिद् भक्षयन्ति, अतस्तेषां निवासे शान्तिरेव युक्ता, तथापि अद्य रात्रौ पक्षिजलभाजने पक्षिणां पानीयशब्दो जायते, ततस्तस्यावश्यं किमपि कारणं भवेत् । अत्र "एकान्तनिर्जनस्थानं मत्वा आवां समागतौ तथापि नात्र एकान्तनिर्जनं प्रतिभाति" इत्येवं स्वीयं भावं कश्चिद् वल्लभः मुग्धायै सूचयति-एष गाथाध्वनिः ।" इति G संस्करणे पृ. १०५-१०६ टिप्पणे ॥ उय विणयभत्तिल्ले पूरमसिसिरे दहे गए सूरे । कत्तो रत्तिं सुद्धे, पानीयसद्धा सउणयाणं - इति मु. मध्ये पाठः । पानीयश्रद्धा = जलेच्छा सम्भाव्यते इति आ.श्री कुलचन्द्रसूरीणामभिप्रायः । २. द्र. सू. ३०-३१ ॥ ३. वा-JKE नास्ति ॥ ४. द्र. सू. १२ ।

[४६] **'तए णं से आभिओगिए देवे'** इत्यादि, यावत्करणात् 'करयलपरिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेइ, वद्धावित्ता एयमाणत्तिय-मि'ति द्रष्टव्यम् ॥ ४६ ॥

सूत्र-४७ : तते णं से सूरियाभे देवे आभियोगस्स देवस्स अंतिए एतमट्ठं सोच्चा निसम्म हट्ठ जाव[1] हियए दिव्वं जिणिंदाभिगमणजोग्गं उत्तर-वेउव्वियरूवं विउव्वति, विउव्वित्ता चउहिं अग्गमहिसीहिं सपरिवाराहिं, दोहिं अणिएहिं, तं जहा—गंधव्वाणिएण य नट्टाणिएण य सद्धिं संपरिवुडे तं दिव्वं जाणविमाणं अणुपयाहिणीकरेमाणे अणुपयाहिणीकरेमाणे पुरत्थिमिल्लेणं तिसोमाणपडिरूवएणं दुरुहति, दुरुहित्ता जेणेव सीहासणे तेणेव उवागच्छइ, उवागच्छित्ता सीहासणवरगए पुरत्थाभिमुहे सण्णिसण्णे ॥ ४७ ॥

[४७] **'तए णं से सूरियाभे देवे'** इत्यादि, **दिव्यं**-प्रधानं जिनेन्द्रस्य-भगवतो वर्द्धमानस्वामिनोऽभिगमनाय-अभिमुखं गमनाय योग्यम्-उचितं **जिनेन्द्राभिगमनयोग्य-मुत्तरवैक्रियं रूपं विकुर्व्वति, विकुर्व्वित्वा[2] चतसृभिरग्रमहिषीभिः सपरिवाराभि-र्द्वाभ्यामनीकाभ्यां, तद्यथा-गन्धर्वानीकेन नाट्यानीकेन च सार्द्धं**, तत्र सहभावः स्वस्वामिभावमन्तरेणापि दृष्टः, यथा समानगुणविभवयोर्द्वयोर्मित्रयोः, अतः स्वस्वामिभाव-प्रकटनार्थमाह-**'संपरिवुडे'** सम्यगाराधकभावं बिभ्राणैः परिवृतः-सम्परिवृतः **तद् दिव्यं यानविमानमनुप्रदक्षिणीकुर्वन्**-पूर्वतोरणानुकूल्येन प्रदक्षिणीकुर्वन् **पूर्वेण[3]** तोरणेनानु-प्रविशति[4]-प्रविशन् पूर्वेण **'त्रिसोपानप्रतिरूपकेण'** प्रतिविशिष्टरूपेण त्रिसोपानेन तद् यानविमानं **'दुरुहइ'**त्ति आरोहति, **आरुह्य** च **'जेणेवे'**ति यस्मिन्नेव देशे तस्य मणिपीठिकाया उपरि **सिंहासनं तत्रोपागच्छति, उपागत्य** च **सिंहासनवरगतः** सन् **पूर्वाभिमुखः सन्निषण्णः** सम्यक्-सकलसेवकजनचमत्कारकारिण्या उपवेशनस्थित्योपविष्टः ॥ ४७ ॥

---

१. द्र. सू. ८ । ३. 'वि' पूर्वात् 'कुर्व' धातोः 'विकुर्व्य' इति पदं साधु । 'विकुर्वित्वा' इति तु छान्दसमेतत्-इति G पृ. १०६ टिप्पणे । ३. पूर्वेण तोरणेनानुप्रविशति-अस्य मूलं सूत्रे न दृश्यते ॥ ४. JEKG । °ति स्वसिंहासनानुकूलं प्रविशति प्रविशन्-मु. पा. २ ॥

सूत्र-४८ : तते णं तस्स सूरियाभस्स देवस्स चत्तारि सामाणिय-साहस्सीओ तं दिव्वं जाणविमाणं अणुपयाहिणीकरेमाणा उत्तरिल्लेणं तिसोमाणपडिरूवएणं दुरुहंति, दुरुहित्ता पत्तेयं-पत्तेयं पुव्वणत्थेहिं भद्दासणेहिं णिसीयंति । अवसेसा देवा य देवीओ य तं दिव्वं जाणविमाणं [१]जाव दाहिणिल्लेणं तिसोमाणपडिरूवएणं दुरुहंति, दुरुहित्ता पत्तेयं-पत्तेयं पुव्वणत्थेहिं भद्दासणेहिं निसीयंति ॥ ४८ ॥

[४८] **'तए णमि'**त्यादि, ततस्तस्य **सूर्याभस्य देवस्य चत्वारि सामानिकदेव-सहस्राणि तद् दिव्यं यानविमानमनुप्रदक्षिणीकुर्वन्ति, उत्तरेण त्रिसोपानप्रतिरूपकेणारोहन्ति, 'पुव्वणत्थेहिं'** इत्यादि, अत्र सप्तम्यर्थे तृतीया, पूर्वन्यस्तेषु **भद्रासनेषु निषीदन्ति, अवशेषाः**-अभ्यन्तरपर्षदादयो **देवा देव्यश्च दक्षिणेन त्रिसोपानप्रतिरूपकेणाऽऽरोहन्ति, आरुह्य च** स्वेषु **भद्रासनेषु निषीदन्ति** ॥ ४८ ॥

सूत्र-४९ : तते णं तस्स सूरियाभस्स देवस्स तं दिव्वं जाणविमाणं दुरूढस्स समाणस्स अट्ठट्ठ मंगलगा पुरतो अहाणुपुव्वीए संपत्थिता, तं जहा—सोत्थिय-सिरिवच्छ [२]जाव दप्पणा ॥ ४९ ॥

[४९] **'तए णमि'** त्यादि, ततस्तस्य **सूर्याभस्य देवस्य तद् दिव्यं यानविमानमारूढस्य पुरतोऽष्टाष्ट[३]मङ्गलकानि यथानुपूर्व्या**-वक्ष्यमाणपाठक्रमेणेत्यर्थः, **सम्प्रस्थितानि, तद्यथा-'सोत्थिय-सिरिवच्छे'**त्यादि, पूर्वं स्वस्तिकः तदनन्तरं श्रीवत्सः इत्यादि ॥ ४९ ॥

सूत्र-५० : तयणंतरं च णं पुण्णकलसभिंगार-[४]दिव्वायवत्तपडागा सचामरा दंसणरइया आलोयदरिसणिज्जा वाऊद्धुयविजयवेजयंतीपडागा ऊसिया गगणतलमणुलिहंती पुरतो अहाणुपुव्वीए संपत्थिया ॥ ५० ॥

[५०] **तदनन्तरं पूर्णकलशभृङ्गार-दिव्यातपत्रपताकाः सचामराः**, कथम्भूताः ? इत्याह-**'दर्शनरतिका'**दर्शने-अवलोकने रतिर्यासु ता दर्शनरतिकाः, इह दर्शनरतिकमपि किञ्चिदालोकदर्शनीयं न भवत्यमङ्गलत्वाद् यथा गर्भवती युवतिः, अत आह-**आलोके**-बहिः

---

१. द्र. सू. ४७ । २. द्र. सू. २१ । ३. °ष्टौ ष्टौ म° J । °ष्टोष्ट° K ॥ ४. "दिव्वा य छत्तपडागा मु. (ओ० सू० ६४, जंबू० ३।१७८) ।" इति V पृ. ९८ टि. ४ ॥

प्रस्थानसमयभाविनि **दर्शनीयाः**-द्रष्टुं योग्या माङ्गल्यत्वात्, अन्ये त्वाहुः-"**आलोके दर्शनीया न पुनरत्युच्चा आलोकदर्शनीया**", तथा **वातोद्धूता** विजयसूचिका वैजयन्तीति **विजय-वैजयन्ती** च **उत्सृता**-ऊर्ध्वीकृता **गगनतलम्**-अम्बरतल**मनुलिखन्ती**-अभिलङ्घयन्ती **'पुरतो' यथानुपूर्व्या सम्प्रस्थिता** ॥ ५० ॥

सूत्र-५१ : तयणंतरं[1] च णं वेरुलियभिसंतविमलदंडं पलंबकोरंट-मल्लदामोवसोभितं चंदमंडलनिभं समुस्सियं विमलमायवत्तं पवरसीहासणं च मणिरयणभत्तिचित्तं सपायपीढं सपाउयाजोयसमाउत्तं[2] बहुकिंकरामरपरिग्गहियं पुरतो अहाणुपुव्वीए संपत्थियं ॥ ५१ ॥

[५१] **'तयणंतरं च णमि'**त्यादि, **तदनन्तरं 'वेरुलियभिसंतविमलदंड'**मिति 'वैडूर्यो' वैडूर्यरत्नमयो भिसंतो-दीप्यमानो विमलो-निर्मल दण्डो यस्य तत्तथा **'पलंब-कोरंटमल्लदामोवसोहियमि'**ति, प्रलम्बते इति प्रलम्ब[3]ः तेन-प्रलम्बमानेन कोरण्ट-माल्यदाम्ना-कोरण्टपुष्पमालयोपशोभितं प्रलम्बकोरण्टमाल्यदामोपशोभितं, **चन्द्रमण्डलनिभं** दीप्त्या शोभया वर्तुलतया चन्द्रमण्डलाकारं, **समुत्सृतं** सम्यगूर्ध्वीकृतं **विमलमातपत्रं** तथा **प्रवरसिंहासनं** मणिरत्नैः भक्त्या-विच्छित्त्या चित्रं यत्-**तन्मणिरत्नभक्तिचित्रम्,** सह पादपीठं यस्य तत्**सपादपीठं**, तथा **'सपाउयाजोगसमाजुत्त'**मिति, पादुकायोगः-पादुका-द्वितयं, तस्य समायोजनसमायुक्तं सह पादुकायोगसमायुक्तं यस्य तत्तथा **'बहुकिङ्करामर-परिग्गहियमि'**ति बहुभिः किङ्करैः-किङ्करकल्पैरमरैः परिगृहीतं **'पुरतो' यथानुपूर्व्या सम्प्रस्थितम्** ॥ ५१ ॥

सूत्र-५२ : तयणंतरं च णं वइरामय-वट्ट-लट्ठ-संठिय-सुसिलिट्ठ-परिघट्ठ-मट्ठ-सुपतिट्ठिए विसिट्ठे अणेगवरपंचवण्णकुडभीसहस्सपरिमंडि-याभिरामे वाऊद्धुयविजयवेजयंतीपडागच्छत्तातिच्छत्तकलिते तुंगे गगण-तलमणुलिहंत[4]सिहरे जोयणसहस्समूसिए महतिमहालए महिंदज्झए पुरतो अहाणुपुव्वीए संपत्थिए ॥ ५२ ॥

---

१. तयाणंतरं JBLK (क, ख, ग, घ, च, छ) । एवमग्रेऽपि क्वचित् । २. समाउया° B (क, ख, ग, च) । ३. JKE । °म्बि मु. ॥ ४. मभिकंखमाणसिहरे-K ॥

[५२] **तदनन्तरं 'वइरामय-वट्ट-लट्ठ-संठिय-सुसिलिट्ठ-परिघट्ठ-मट्ठ-सुपइट्ठिए**त्ति, वज्रमयो-वज्ररत्नमयः तथा वृत्तं-वर्तुलं, लष्टं-मनोज्ञं, संस्थितं-संस्थानमाकारो यस्य स वृत्तलष्टसंस्थितः तथा सुश्लिष्टः-सुश्लेषापन्नावयवो मसृण इत्यर्थः परिघृष्ट इव परिघृष्टः खरशानया पाषाणप्रतिमावद्, मृष्ट[१] इव मृष्टः सुकुमारशाणया पाषाणप्रतिमेव, सुप्रतिष्ठितो न तु तिर्यक्पतिततया वक्रः, तत एतेषां पदानां पदद्वयमीलनेन कर्म्मधारयः, अत एव शेषध्वजेभ्यो **विशिष्टः**-अतिशायी, तथा अनेकानि-अनेकसङ्ख्याकानि वराणि-प्रधानानि पञ्चवर्णानि कुडभीसहस्राणि उत्सृतानि यत्र सोऽ**नेकवरपञ्चवर्णकुडभी[२]सहस्रोत्सृतः**, क्तान्तस्य परनिपातो सुखादिदर्शनात्, **वातोद्धूतविजयवैजयन्तीपताकाच्छत्रातिच्छत्रकलितः**, **तुङ्गः**-अत्युच्चो योजनसहस्रप्रमाणोच्छ्रयत्वात्, तथा **गगनतलम्**-अम्बरतल**मनुलिखत्** **शिखरम्**-अग्रभागो यस्य स तथा **योजनसहस्रमुत्सृतः** अत एव **'महइमहालए'** इति, अतिशयेन महान् **महेन्द्रध्वजः 'पुरतो' यथानुपूर्व्या संप्रस्थितः** ॥ ५२ ॥

सूत्र-५३ : तयणंतरं च णं सुरूव[३]-णेवत्थ-परिकच्छिया सुसज्जा सव्वालंकारभूसिया महया भड-चडगर-पहकरेणं पंच[४] अणिया पंच अणीयाहिवइणो पुरतो अहाणुपुव्वीए संपत्थिया ॥ ५३ ॥

[५३] **तदनन्तरं 'सुरूवनेवत्थपरिकच्छिया'** इति, सुरूपं नेपथ्यं परिकक्षितं-परिगृहीतं यैस्ते तथा, तथा **सुष्ठु**-अतिशयेन **सज्जाः**-परिपूर्णाः स्वसामग्रीसमायुक्ततया प्रगुणीभूताः-**सर्वालङ्कारविभूषिताः, 'महता भडचडगरपहकरेणं**ति महता-अतिशयेन भटचटकर-पहकरेण-चटकरप्रधानभटसमूहेन **पञ्चानीकानि पञ्चानीकाधिपतयः 'पुरतो' यथाऽनुपूर्व्या सम्प्रस्थिताः** ॥ ५३ ॥

सूत्र-५४ : तयणंतरं च णं बहवे आभियोगिया देवा देवीओ य सएहिं-सएहिं रूवेहिं, सएहिं-सएहिं, वेसेहिं[५], सएहिं सएहिं विहवेहिं[६], सएहिं-सएहिं णियोएहिं[७], सएहिं-सएहिं णेवत्थेहिं पुरतो अहाणुपुव्वीए संपत्थिया ॥ ५४ ॥

---

१. घृष्ट इव घृष्ट-जे. ॥ २. कुडभी स्थाने 'लघुपताका' इति जीवाभिगम वृत्तौ पाठः ॥ ३. सरूव JBL (क, ख, ग, घ, च, छ) । सरुवत्थपरि° B । ४. K । पंच अणिया-मु.GV नास्ति ॥ ५. L । विसेसेहिं JBV मु. ॥ "जम्बूद्वीपप्रज्ञप्तौ (३।१७८) एतादृशः पाठो विद्यते–'एवं वेसेहिं चिंधेहिं निओएहिं' । अस्य पाठस्य 'वेसेहिं' इति पदं सम्यक् प्रतिभाति । 'विसेसेहिं' इति पदस्य कश्चिद् विशिष्टोऽर्थो नैव ज्ञायते ।" इति V पृ. ९८ टि. १२ ॥ ६. विदेहिं- G मु. ॥ ७. णियोएहिं-K । णिज्जोएहिं- V णेज्जाएहिं-G मु. ॥

सूत्र-५५ : तयणंतरं च णं सूरियाभविमाणवासिणो बहवे वेमाणिया देवा य देवीओ य सव्विड्ढीए [1]जाव रवेणं सूरियाभं देवं पुरतो पासतो य मग्गतो य समणुगच्छंति ॥ ५५ ॥

[५५] तदनन्तरं च सूर्याभविमानवासिनो बहवो वैमानिका देवा देव्यश्च सर्वर्द्ध्या यावत्करणात् 'सव्वजुईए सव्वबलेणं'इत्यादि परिग्रहः **सूर्याभं देवं पुरतः पार्श्वतो [2]मार्गतः**-पृष्ठतः **समनुगच्छन्ति** ॥ ५५ ॥

सूत्र-५६ : तते णं से सूरियाभे देवे तेणं पंचाणियपरिखित्तेणं वइरामयवट्ट-लट्ठ-संठिय [3]जाव जोयणसहस्समूसिएणं महतिमहालतेणं महिंदज्झएणं पुरतो पकड्ढिज्जमाणेणं पकड्ढिज्जमाणेणं चउहिं सामाणिय-साहस्सीहिं [4]जाव सोलसहिं आयरक्खदेवसाहस्सीहिं अण्णेहि य बहूहिं सूरियाभविमाणवासीहिं वेमाणिएहिं देवेहिं देवीहि य सद्धिं संपरिवुडे सव्विड्ढीए [5]जाव रवेणं सोधम्मस्स कप्पस्स मज्झंमज्झेणं तं दिव्वं देविड्ढिं दिव्वं देवजुतिं दिव्वं देवाणुभावं उवदंसेमाणे उवदंसेमाणे पडिजागरेमाणे-पडिजागरेमाणे जेणेव सोधम्मस्स कप्पस्स उत्तरिल्ले णिज्जाणमग्गे तेणेव उवागच्छति, उवागच्छित्ता जोयणसयसाहस्सितेहिं विग्गहेहिं ओवयमाणे वीतीवयमाणे जाव ताए उक्किट्ठाए [6]जाव तिरियमसंखेज्जाणं दीवसमुद्दाणं मज्झंमज्झेणं वीतीवयमाणे-वीतीवयमाणे जेणेव नंदीसरवरे दीवे जेणेव [7]दाहिणिल्लपुरत्थिमिल्ले रतिकरपव्वते तेणेव उवागच्छति, उवागच्छित्ता तं दिव्वं देविड्ढिं [8]जाव दिव्वं देवाणुभावं पडिसाहरेमाणे-पडिसाहरेमाणे पडिसंखेवेमाणे-पडिसंखेवेमाणे जेणेव जंबुद्दीवे दीवे जेणेव भारहे वासे जेणेव आमलकप्पा नयरी जेणेव अंबसालवणे चेतिते जेणेव समणे

---

१. द्र. सू. १३ । JBLK । जाव नाइयरयेणं-V । २. "मग्गो पश्चात्" देशीना. व. ६ गा. १११ । अधुनातनमहाराष्ट्रीयभाषायां 'पश्चात्' इत्यर्थे 'मग' प्रसिद्धः" इति G पृ. ११० टि. । ३. द्र. सू. ५२ । ४. द्र. सू. ७ । ५. द्र. सू. १३ वृत्तौ । JBLK । जाव णाइयरवेणं-V । ६. द्र. सू. १० । ७. JBLK । दाहिणपु० मु. V । ८. द्र. अत्रैव सूत्रे ।

भगवं महावीरे तेणेव उवागच्छइ, उवागच्छित्ता समणं भगवं महावीरं तेणं दिव्वेणं जाणविमाणेणं तिक्खुत्तो आयाहिणपयाहिणं करेति, करेत्ता समणस्स भगवतो महावीरस्स उत्तरपुरत्थिमे दिसीभागे तं दिव्वं जाणविमाणं ईसिं चउरंगुलमसंपत्तं धरणितलंसि ठवेति, ठवेत्ता चउहिं अग्गमहिसीहिं सपरिवाराहिं, [१]दोहिं अणिएहि य तं जहा—गंधव्वाणितेण य [२]णट्टाणिएण य सद्धिं संपरिवुडे ताओ दिव्वाओ जाणविमाणाओ पुरत्थिमिल्लेणं तिसोमाणपडिरूवएणं पच्चोरुहति ॥ ५६ ॥

[५६] '**तएण**'मित्यादि ततः **स सूर्याभो देवः तेन पञ्चानीकपरिक्षिप्तेन** यथोक्तविशेषणविशिष्टेन **महेन्द्रध्वजेन पुरतः प्रकृष्यमाणेन चतुर्भिः सामानिकसहस्रैश्चतसृभिः** सपरिवाराभिरग्रमहिषीभिस्तिसृभिः पर्षद्भिः सप्तभिरनीकाधिपतिभिः **षोडशभिरात्मरक्षदेवसहस्रैः अन्यैश्च बहुभिः सूर्याभविमानवासिभिर्वैमानिकैर्देवैर्देवीभिश्च सार्द्धं सम्परिवृतः सर्वर्द्ध्या** सर्वद्युत्या **यावत्**करणात्-'सव्वबलेणं सव्वसमुदएणं सव्वादरेणं सव्वविभूसाए सव्वविभूइए सव्वसंभमेणं सव्वपुप्फवत्थगंधमल्लालंकारेणं सव्वदिव्वतुडियसद्दसन्निनाएणं महया इड्ढीए महया जुईए महया बलेणं महया समुदएणं महया वरतुडियजमगसमगपडुप्पवाइयरवेणं संख-पणव-पडह-भेरि-झल्लरि-खरमुहि-हुडुक्क-मुरय-मुइंग-दुंदुभिनिग्घोसनाइयरवेण' इति परिगृह्यते, **सौधर्मस्य कल्पस्य मध्येन तां दिव्यां देवर्द्धिं दिव्यां देवद्युतिं दिव्यां देवानुभूतिं**[३] उपदर्शयन् उपदर्शयन् 'उवलालेमाणे उवलालेमाणे' इति उपलालयन् उपलालयन् लीलया उपभुञ्जान इति भावः । **येनैव सौधर्मस्य कल्पस्योत्तराहो निर्याणमार्गो**-निर्गमनमार्गस्तेनैव पार्श्वेनोपागच्छति, '**ताए उक्किट्ठाए**' इत्यादि पूर्ववद्यावद् दिव्यया देवगत्या **योजनशतसहस्रवैः**-योजनलक्षप्रमाणै**र्विग्रहैः**-क्रमैः **अवपतन्**-अधस्तादवतरन् **व्यतिव्रजंश्च**-गच्छंश्च **तिर्यग् असङ्ख्येयानां द्वीप-समुद्राणां मध्यंमध्येन** '[४]**जेणेव**'त्ति **यस्मिन्नेव** प्रदेशे **नन्दीश्वरो द्वीपः यस्मिन्नेव** च प्रदेशे तस्मिन्नन्दीश्वरे द्वीपे **दक्षिणपूर्वः**-आग्नेयकोणवर्त्ती **रतिकरनामा पर्वतस्तस्मिन्नुपागच्छति, उपागत्य च तां दिव्यां देवर्द्धिं यावद् दिव्यं देवानुभावं** शनैः शनैः **प्रतिसंहरन् प्रतिसंहरन्** एतदेव

---

१. दोहिं-K नास्ति ॥ २. णट्टाणिएण य-K नास्ति ॥ ३. JK । °भूतिं लालेमाणे लालेमाणे-मु. ॥ ४. JK । जेणेवत्ति नन्दीश्वरो द्वीपः यस्मिन् प्रदेशे यस्मिन्नेव च प्रदेशे तस्मि° मु. ॥

पर्यायेण व्याचष्टे-**प्रतिसङ्क्षिपन् प्रतिसङ्क्षिपन् यस्मिन् प्रदेशे जम्बूद्वीपो द्वीपः** तत्र जम्बूद्वीपे **यस्मिन्** प्रदेशे **भरतवर्षः**[1] तस्मिंश्च भरतवर्षे **यस्मिन्** प्रदेशे **आमलकल्पा नगरी** तस्याश्चाऽऽमलकल्पाया नगर्या बहिर्**यस्मिन्प्रदेशे आम्रशालवनं चैत्यं** तस्मिंश्च चैत्ये **यस्मिन् प्रदेशे श्रमणो भगवान् महावीरः** '**तेणेव**'ति तत्रो**पागच्छति,** सर्वत्र तृतीया सप्तम्यर्थे द्रष्टव्या प्राकृतत्वात्, **उपागत्य** च **श्रमणं भगवन्तं महावीरं तेन**-प्रागुक्तस्वरूपेण **दिव्येन यानविमानेन** सह **त्रिकृत्वः**-त्रीन् वारान् **आदक्षिणप्रदक्षिणीकरोति,** आदक्षिणप्रदक्षिणीकृत्य च **श्रमणस्य भगवतो महावीरस्या**पेक्षया य **उत्तरपूर्वो दिग्भागस्तमपक्रामति**-गच्छति, अपक्रम्य च **तद् दिव्यं यानविमानमीषद्** एतदेव प्रकटयति-**चतुरङ्गुलं**-चतुर्भिरङ्गुलैरित्यर्थः **असम्प्राप्तं** सद् **धरणीतले स्थापयति, स्थापयित्वा चतसृभिरग्रमहिषीभिः सपरिवाराभिः द्वाभ्यामनीकाभ्यां तद्यथा-गन्धर्वानीकेन नाट्यानीकेन च सार्द्धं सम्परिवृतस्तस्माद् दिव्याद् यानविमानात् पूर्वेण त्रिसोपानप्रतिरूपकेण प्रत्यवतरति** ॥ ५६ ॥

सूत्र-५७ : तते णं तस्स सूरियाभस्स देवस्स चत्तारि सामाणियसाहस्सीतो ताओ दिव्वाओ जाणविमाणाओ उत्तरिल्लेणं तिसोमाणपडिरूवएणं पच्चोरुहंति । अवसेसा देवा य देवीओ य तातो दिव्वाओ जाणविमाणाओ दाहिणिल्लेणं तिसोमाणपडिरूवएणं पच्चोरुहंति ॥ ५७ ॥

[५७] चत्वारि सामानिकदेवसहस्राण्युत्तरेण, शेषा दक्षिणेन ॥ ५७ ॥

सूत्र-५८ : तए णं से सूरियाभे देवे चउहिं[2] अग्गमहिसीहिं जाव[3] सोलसहिं आयरक्खदेव-साहस्सीहिं अण्णेहि य बहूहिं सूरियाभविमाणवासीहिं वेमाणिएहिं देवेहिं देवीहि य सद्धिं संपरिवुडे सव्विड्ढीए जाव[4] णाइयरवेणं जेणेव समणे भगवं महावीरे तेणेव उवागच्छति, उवागच्छित्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेति, करेत्ता वंदति नमंसति, वंदित्ता नमंसित्ता एवं वयासी-अहण्णं भंते ! सूरियाभे देवे देवाणुप्पियं[5] वंदामि नमंसामि जाव[6] पज्जुवासामि ॥ ५८ ॥

१. JK । भारत० मु. अग्रेऽपि ॥ २. सप्तमसूत्रे इतः पूर्वं चउहिं सामाणियसाहस्सीहिं-इति पाठः वर्तते ॥ ३. द्र. सू. ७ ॥ ४. द्र. सू. १३ ॥ ५. देवाणुप्पियाणं-मु. G ॥ ६. द्र. सू. ९ ॥

[५८] '**तए णमि**' त्यादि, '**वंदामि नमंसामि जाव पज्जुवासामि**' इत्यत्र **यावच्छब्दकरणात्** 'सक्कारेमि सम्माणेमि कल्लाणं मंगलं देवयं चेइयं पज्जुवासेमि'इति परिग्रहः ॥५८॥

सूत्र-५९ : सूरियाभाति समणे भगवं महावीरे सूरियाभं देवं एवं वयासी–पोराणमेयं सूरियाभा! जीयमेयं सूरियाभा! किच्चमेयं सूरियाभा! करणिज्जमेयं सूरियाभा ! आइण्णमेयं सूरियाभा ! अब्भणुण्णायमेयं सूरियाभा ! जण्णं भवणवति-वाणमंतर-जोतिस-वेमाणिया देवा अरहंते भगवंते वंदंति नमंसंति, वंदित्ता नमंसित्ता ततो पच्छा साइं-साइं नाम-गोत्ताइं [१]साहिंति, तं पोराणमेयं सूरियाभा ! जाव अब्भणुण्णायमेयं सूरियाभा ! ॥ ५९ ॥

[५९] ततः '**सूरियाभाइ**' इत्यादि, [२]सूर्याभात् आदिः-मुख्यः पर्युपासकतया यस्य स सूर्याभादिः **श्रमणो भगवान् महावीरस्तं सूर्याभं देवमेवमवादीत्**-'**पोराणेयं**' इत्यादि प्राग्वत् ॥ ५९ ॥

सूत्र-६० : तते णं से सूरियाभे देवे समणेणं भगवया महावीरेण एवं वुत्ते समाणे हट्ठ [३]जाव समणं भगवं महावीरं वंदति नमंसति, वंदित्ता नमंसित्ता नच्चासण्णे नातिदूरे सुस्सूसमाणे णमंसमाणे अभिमुहे विणएणं पंजलिउडे पज्जुवासति ॥ ६० ॥

[६०] '**नच्चासन्ने**' इत्यादि, नात्यासन्नः-नातिनिकटोऽवग्रहपरिहाराद् नात्यासन्ने वा स्थाने वर्त्तमान इति गम्यम्, '**नाइदूरे**' इति न-नैवाऽतिदूरः-अतिविप्रकृष्टोऽनौचित्यपरिहाराद् नातिदूरे वा, '**सुस्सूसमाणे**' इति भगवद्वचनानि श्रोतुमिच्छन् '**अभिमुहे**' इति भगवन्तं लक्ष्यीकृत्य मुखमस्येति अभिमुखो, भगवतः सम्मुख इत्यर्थः, **विनयेन** हेतुना '**पंजलिउडे**' इति प्रकृष्टः-प्रधानो ललाटतट-घटितत्वेन अञ्जलिः-हस्तन्यासविशेषः कृतो येन स प्राञ्जलिकृतः, सुखादिदर्शनात् क्तान्तस्य परनिपातः, **पर्युपास्ते**-सेवते ॥ ६० ॥

---

१. सावेंति-LK ॥ २. K। सूरियाभात् - मु. । सूर्याभ आदिः -G 'अत्राऽपि सूरियाभा ! 'इ' इति पदद्वयमेव संगतम्' इति पं. बेचरदासस्य मतः G पृ.११४ टिप्पणे ॥ ३. द्र. सू. ८ । ४. JK । इति अभि भग॰ मु.॥

सूत्र-६१ : तते णं समणे भगवं महावीरे सूरियाभस्स देवस्स तीसे य महतिमहालियाए परिसाए [1]जाव परिसा जामेव दिसिं[2] पाउब्भूया तामेव दिसिं पडिगया ॥ ६१ ॥

[६१] **ततः श्रमणो भगवान् महावीरः सूर्याभस्य देवस्य** श्वेतस्य राज्ञो धारणी-प्रमुखानां च देवीनां **तस्याश्च 'महइमहालिताए'** इति अतिशयेन महत्या **'इसिपरिसाए'** इति ऋषयः-त्रिकालदर्शिनिनस्तेषां पर्षत् तस्याः, अवध्यादिजिनपर्षद इत्यर्थः, **मुनिपर्षदो[3]**-यथोक्तानुष्ठानानुष्ठायिसाधुपर्षदः, **'जतिपरिसाए'** इति यतन्ते उत्तरगुणेषु विशेषत इति यतयो-विचित्रद्रव्याद्यभिग्रहाद्युपेताः साधवस्तेषां पर्षदो यतिपर्षदः, **'विदुपरिसाए'** इति विद्वत्परिषदः-अनेक[4]विज्ञानपर्षदो **देवपर्षदः क्षत्रियपर्षदः इक्ष्वाकुपर्षदः कौरव्यपर्षदः** कथम्भूतायाः इत्याह- **'अणेगसयाए'** इति अनेकानि पुरुषाणां शतानि सङ्ख्यया यस्यां सा अनेकशता तस्याः, **'अणेगवंदाए'** इति अनेकानि वृन्दानि यस्याः सा तथा तस्याः, **'अणेगसयवंद-परिवाराए'** इति अनेकशतानि-अनेकशतसङ्ख्यानि वृन्दानि परिवारो यस्याः सा तथा तस्याः, 'महतिमहालियाए **परिसाए** अतिशयेन महत्या पर्षदः **'ओहबले'** इति ओघेन-प्रवाहेण बलं यस्य, न तु कथयतो बलहानिरुपजायते इति भावः, **'एवं जहा उववाइए तहा भाणियव्वं'** इति, एवं यथा **औपपातिके** ग्रन्थे [सू. ७१-७९] तथा वक्तव्यं, तच्चैवं- **"अइबले महाबले अपरिमियबल-वीरिय-तेय-माहप्प-कंतिजुत्ते सारदनवथणियमहुरगंभीर-कुंचनिग्घोस-दुंदुभिस्सरे उरे वित्थडाए कंठे वट्टियाए सिरे समावन्नाए [5]अगरलाए अमम्मणाए फुडविसयमहुरगंभीरगाहिगाए [6]सव्वक्खरसन्निवाइयाए गिराए सव्वभासाणुगामिणीए सव्वसंसय-विमोयणीए [7]अपुणरुत्ताए सरस्सईए जोयणनीहारिणा सरेणं अद्धमागहाए भासाए भासइ, अरिहा धम्मं परिकहेइ, तं जहा-अत्थि लोए, अत्थि अलोए, अत्थि जीवे, अत्थि अजीवे"** त्यादि, तावत् यावत् **"तए णं सा महइमहालिया मणुस्सपरिसा समणस्स भगवतो महावीरस्स अंतिए धम्मं सोच्चा निसम्म हट्ठतुट्ठा समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेइ, करित्ता वंदइ नमंसइ, नमंसित्ता एवं वयासी-सुयक्खाए णं भंते ! निग्गंथे पावयणे, नत्थि णं केई समणे माहणे वा एरिसं धम्ममाइक्खित्तए, एवं वइत्ता जामेव दिसिं पाउब्भूता तामेव दिसिं पडिगया । तए णं [8]सेए राया समणस्स भगवतो महावीरस्स अंतिए धम्मं सोच्चा निसम्म**

---

१. द्र. औपपातिक सूत्रे ७१ तः ७९ ॥ २. दिसं-K एवमग्रेऽपि ॥ ३. °दोक्तोनुमामानुष्ठायिसा° K ॥ ४. °विद्वज्जनपर्षदो-G ॥ ५. अणेगग्गयाए-JK । ६. सुव्वत्तक्ख° औप. सू. ७१ V । JK नास्ति सव्वक्खरसन्निवाइयाए गिराए- पाठः ॥ ७. पुण्णरत्ताए इति औपपातिकसूत्रे ७१ । 'पूर्णा च स्वरकलाभिः रक्ता च-गेयरागानुरक्ता या स तथा तया' इति तत्रैव अभयदेवसूरिवृत्तौ पृ. १३७ । ८. से राया-G ॥

हट्ठतुट्ठचित्तमाणंदिए जाव हरिसवसविसप्पमाणहियए समणं भगवंतं महावीरं वंदइ नमंसइ, वंदित्ता नमंसित्ता पसिणाइं पुच्छइ, पुच्छित्ता अट्ठाइं परियाएइ, परियाइत्ता उट्ठाए उट्ठेइ, उट्ठित्ता समणं भगवं महावीरं वंदइ नमंसइ, वंदित्ता नमंसित्ता एवं वयासी-सुयक्खाए णं भंते ! निग्गंथे पावयणे जाव एरिसं धम्ममाइक्खित्तए, एवं वइत्ता हत्थिं दुरूहइ, दुरूहित्ता समणस्स भगवतो महावीरस्स अंतियाओ अंबसालवणाओ चेइयाओ पडिनिक्खमइ, पडिनिक्खमित्ता **जामेव दिसिं पाउब्भूए तामेव दिसिं पडिगते**' इति, इदं च प्रायः सकलमपि सुगमं नवरं यामेव दिशमवलम्ब्य, किमुक्तं भवति? -यतो दिशः सकाशात् प्रादुर्भूतः-समवसरणे समागतस्तामेव दिशं प्रतिगतः ॥६१॥

सूत्र-६२ : तते णं से सूरियाभे देवे समणस्स भगवओ महावीरस्स अंतिए धम्मं सोच्चा निसम्म हट्ठतुट्ठ-[1]जाव उट्ठाते उट्ठेति, उट्ठेत्ता समणं भगवं महावीरं वंदति नमंसति, वंदित्ता नमंसित्ता एवं वयासी-[2]अहण्णं भंते ! सूरियाभे देवे किं भवसिद्धिते ? अभवसिद्धिते ? सम्मदिट्ठी ? मिच्छदिट्ठी? परित्तसंसारिते ? अणंतसंसारिते ? सुलभबोहिते ? दुल्लभबोहिते ? आराहते ? विराहते ? चरिमे ? अचरिमे ? [3]सूरियाभाति समणे भगवं महावीरे सूरियाभं देवं एवं वदासी-सूरियाभा ! तुमं णं भवसिद्धिते, [4]नो अभवसिद्धिए जाव चरिमे, नो अचरिमे ॥ ६२ ॥

[६२] सम्प्रति सूर्याभो देवो धर्मदेशनाश्रवणतो जातप्रभूततरसंसारविरागः स्वविषयं भव्यत्वादिकं पिपृच्छिषुर्यत्करोति तदाह- '**तए णमि**'त्यादि, '**भवसिद्धिए**' इति भवैः सिद्धिर्यस्यासौ भवसिद्धिकः- भव्य इत्यर्थः, →[5]तद्विपरीतः **अभवसिद्धिकः**- अभव्य इत्यर्थः,← भव्योऽपि कश्चिन्मिथ्यादृष्टिर्भवति कश्चित्सम्यग्दृष्टिस्तत आत्मनः सम्यग्दृष्टित्वनिश्चयाय पृच्छति- →[6]**सम्यग्दृष्टिको मिथ्यादृष्टिकः** ?, सम्यग्दृष्टिरपि कश्चित्परिमितसंसारो भवति कश्चिदपरिमितसंसारः, उपशमश्रेणिशिरःप्राप्तानामपि केषाञ्चिदनन्तसंसारभावाद्, अतः पृच्छति← -**परीत्तसंसारिकोऽनन्तसंसारिकः** ?, परीत्तः-परिमितः स चासौ संसारश्च परीत्तसंसारः, सोऽस्यास्तीति परीत्तसंसारिकः, '**अतोऽनेकस्वरात्**' [मलय. त. ७/१४] 'इक'

---

१. द्र. सू. ८ । २. अहं णं-GK ॥ ३. सूरियाभादि-K सूरियाभा समणे-भा.२ ॥ ४. नो अभवसिद्धिए-K बाबु नास्ति ॥ ५. →← चिह्नद्वयमध्यवर्तिपाठः - JK बाबु नास्ति ॥ ६. →← चिह्नद्वयमध्यवर्तिपाठः - JK बाबु नास्ति ॥

प्रत्ययः, एवमनन्तश्चासौ संसारश्चानन्तसंसारः, सोऽस्यास्तीति **अनन्तसंसारिकः**, परीत्त-संसारिकोऽपि कश्चित् **सुलभबोधिको** भवति यथा **शालिभद्रादिकः**, कश्चि**दुर्लभबोधिको** यथा **पुरोहितपुत्रजीवः**, ततः पृच्छति सुलभा बोधिः-भवान्तरे जिनधर्म्मप्राप्तिर्यस्यासौ **सुलभबोधिकः ?** एवं **दुर्लभबोधिकः**, सुलभबोधिकोऽपि कश्चिद्बोधिं लब्ध्वा विराधयति ततः पृच्छति-आराधयति-सम्यक् पालयति बोधिमिति **आराधकः**, तद्विपरीतो **विराधकः**, आराधकोऽपि कश्चित्तद्भवमोक्षगामी न भवति, ततः पृच्छति-**चरमोऽचरमो** वा ?, चरमोऽनन्तरभावी भवो यस्यासौ चरमः "**अश्वादिभ्यः**" [मलय. त. ७/४१] इति मत्वर्थीयः 'अ'प्रत्ययस्तद्विपरीतोऽचरमः, एवमुक्ते **सूर्याभादिः श्रमणो भगवान् महावीरस्तं सूर्याभं देवमेवमवादीत्**-भोः **सूर्याभ ! त्वं भवसिद्धिको नाऽभवसिद्धिकः, यावत्करणात्** 'सम्मद्दिट्ठी, नो[2] मिच्छादिट्ठी परित्तसंसारिए, नो अणंतसंसारिए सुलभबोहिए, नो दुलभबोहिए आराहए, नो विराहए' इति परिग्रहः ॥ ६२ ॥

सूत्र-६३ : तते णं से सूरियाभे देवे समणेणं भगवया महावीरेणं एवं वुत्ते समाणे हट्ठतुट्ठचित्तमाणंदिए परमसोमणस्सिए[3] समणं भगवं महावीरं वंदति नमंसति, वंदित्ता नमंसित्ता एवं वदासी–तुब्भे णं भंते ! सव्वं जाणह सव्वं पासह, [सव्वओ जाणह पासह] सव्वं कालं जाणह, सव्वं कालं पासह, सव्वे भावे जाणह, सव्वे भावे पासह । जाणंति णं देवाणुप्पिया ! मम पुव्विं वा पच्छा वा ममेयरूवं दिव्वं देविड्ढिं दिव्वं देवजुइं दिव्वं देवाणुभावं लद्धं पत्तं अभिसमण्णागयं[4] तं इच्छामि णं देवाणुप्पियाणं भत्तिपुव्वगं गोयमातियाणं समणाणं निग्गंथाणं दिव्वं देविड्ढिं दिव्वं देवजुइं दिव्वं देवाणुभावं दिव्वं बत्तीसतिबद्धं नट्टविहिं उवदंसित्तए ॥ ६३ ॥

---

१. "पुरोहितपुत्रस्य विशेषसंज्ञा नावगता तथाऽपि तस्य कथाऽपि प्रसिद्धा । सा च श्रीपुण्य० पञ्चकल्पभाष्ये लि० पृ. १८-१९ 'सारणी' प्रव्रज्योदाहरणे" इति G पृ. ११८ टि. ॥ २. नो मिच्छादिट्ठी - JK बाबु नास्ति ॥ ३. °सोमणसे BJL (क, ख, ग, च, छ) । °सोमणस्से-मु. । ४. °JBL । गयंति तं - मु. । गयं ति ते-V ।

[६३] **'तुब्भे णं भंते !'** तुब्भे इति यूयं णमिति वाक्यालङ्कारे, **भदन्त ! सर्वं** केवलवेदसा **जानीथ, सर्वं** केवलदर्शनेन **पश्यथ,** अनेन द्रव्यपरिग्रहः, तत्र सर्वशब्दो देशकात्स्न्येंऽपि वर्त्तते यथा अस्य सर्वस्यापि ग्रामस्यायमधिपतिः' इति सचराचरविषयज्ञान-दर्शन-प्रतिपादनार्थमाह-**'सव्वतो जाणह[1] पासह'** सर्वतः सर्वत्र दिक्षु विदिक्षु[2] ऊर्ध्वमधो लोकेऽलोके चेति भावः, जानीथ पश्यथ च, अनेन क्षेत्रपरिग्रहः, तत्र सर्वद्रव्य-सर्वक्षेत्रविषयं वार्त्तमानिकमात्रमपि ज्ञानं दर्शनं वा सम्भाव्येत, ततः सकलकालविषयज्ञान-दर्शनप्रतिपादनार्थमाह-**सर्वकालम्**-अतीतमनागतं वर्त्तमानं च **जानीथ पश्यथ,** एतेन कालपरिग्रहः, तत्र कश्चित् सर्वद्रव्य-सर्वक्षेत्र-सर्वकालविषयमपि ज्ञानं सर्वपर्यायविषयं न सम्भावयेत्, यथा मीमांसकादिः, अत आह-**सर्वान् भावान्**-पर्यायान् प्रतिद्रव्यमात्मीयान् परकीयांश्च केवलवेदसा **जानीथ** केवलदर्शनेन पश्यथ । अथ भावा दर्शनविषया न भवन्ति ततः कथमुक्तं-**'सव्वे भावे पासह'** इति ?, नैष दोषः, उत्कलितरूपतया हि ते भावा दर्शनविषया न भवन्ति, अनुत्कलितरूपतया तु ते भवन्त्येव, तथा चोक्तम्-"**निर्विशेषं विशेषाणां, ग्रहो दर्शन मुच्यते**" [ ] इति, **ततो 'जाणंति णं'** इति पूर्ववत् । **देवानांप्रियाः ! पूर्वमपि** अनन्तरमुपदर्श्यमाननाट्यविधेः **पश्चादपि** च उपदर्श्यमाननाट्यविधेः उत्तरकालं **मम एतद्रूपां दिव्यां देवर्द्धिं दिव्यां देवद्युतिं दिव्यं देवानुभावं लब्धं** देशान्तरगतमपि किञ्चिद्भवति तत आह-प्राप्तं, प्राप्तमपि किञ्चिदन्तरायवशादनात्मवशं भवति तत आह-**अभिसमन्वागतम्, तत 'इच्छामि णं'** इत्यादि, इच्छामि णमितिपूर्ववत् **देवानांप्रियाणां पुरतो भक्तिपूर्वकं**-बहुमानपुरस्सरं **गौतमादीनां श्रमणानां निर्ग्रन्थानां दिव्यां देवर्द्धिं दिव्यां देवद्युतिं दिव्यं देवानुभाव**मुपदर्शयितुं **द्वात्रिंशद्विधं**-द्वात्रिंशत्प्रकारं **नाट्यविधिं**-नाट्यविधानमुपदर्शयितु-**मिति ॥ ६३ ॥**

सूत्र-६४ : तते णं समणे भगवं महावीरे सूरियाभेणं देवेणं एवं वुत्ते समाणे सूरियाभस्स देवस्स एयमट्ठं णो आढाति, णो परियाणति, तुसिणीते संचिट्ठति ॥ ६४ ॥

[६४] **'तए णमि'** त्यादि, **ततः श्रमणो भगवान् महावीरः सूर्याभेण देवेन एवमुक्तः सन् सूर्याभस्य देवस्यैनम्-अनन्तरोदितमर्थं नाऽऽद्रियते**-न तदर्थकरणायाऽऽदरपरो भवति, **नापि परिजानाति**-अनुमन्यते, स्वतो वीतरागत्वात् गौतमादीनां च नाट्यविधेः[3] स्वाध्यायादिविघातकारित्वात्, केवलं **तूष्णीकोऽवतिष्ठते,** ॥ ६४ ॥

---

१. JK बाबु । °ह सव्वओ पासह -मु. ॥ २. JK बाबु । विदिक्षु-मु. नास्ति ॥ ३. °धिः - JK ॥

सूत्र-६५ : तते[1] णं से सूरियाभे देवे समणं भगवं महावीरं दोच्चं पि तच्चं पि एवं वयासी–तुब्भे णं भंते ! सव्वं जाणह जाव[2] उवदंसित्तएत्ति कट्टु समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेइ, करेत्ता वंदति नमंसति, वंदित्ता नमंसित्ता उत्तरपुरत्थिमं दिसीभागं अवक्कमति, अवक्कमित्ता वेउव्वियसमुग्घाएणं समोहण्णति[3], समोहणित्ता संखेज्जाइं जोयणाइं दंडं निसिरति[4], [तं जहा–रयणाणं वइराणं वेरुलियाणं लोहियक्खाणं मसारगल्लाणं हंसगब्भाणं पुलगाणं सोगंधियाणं जोईरसाणं अंजणाणं अंजणपुलगाणं रययाणं जायरूवाणं अंकाणं फलिहाणं रिट्ठाणं] अहाबायरे[5] [पोग्गले परिसाडेति, परिसाडेत्ता अहासुहुमे पोग्गले परियाएइ, परियाइत्ता] दोच्चं पि वेउव्वियसमुग्घाएणं जाव बहुसमरमणिज्जं भूमिभागं विउव्वति, से जहा नाम ते–आलिंगपुक्खरेइ वा जाव[6] मणीणं फासो ॥ ६५ ॥

[६५] **एवं द्वितीयमपि वारं, तृतीयमपि** वारमुक्तः सन् भगवानेवमेव तिष्ठति **'तए णमि'**त्यादि, ततः पारिणामिक्या बुद्ध्या तत्त्वमवगम्य 'मौनमेव भगवत उचितं न पुनः किमपि वक्तुं, केवलं मया भक्तिरात्मीयोपदर्शनीया'इति प्रमोदातिशयतो जातपुलकः सन् **सूर्याभो देवः श्रमणं भगवन्तं महावीरं वन्दते**-स्तौति **नमस्यति**-कायेन **वन्दित्वा नमस्यित्वा** च **'उत्तरपुरत्थिमं दिसीभागमि'** त्यादि सुगमम् ॥ ६५ ॥

सूत्र-६६ : तस्स णं बहुसमरमणिज्जस्स[7] भूमिभागस्स बहुमज्झदेसभागे पिच्छाघरमंडवं विउव्वति–अणेगखंभसयसन्निविट्ठं वण्णतो[8] अंतो बहुसमरमणिज्जं भूमिभागं विउव्वति उल्लोयं अक्खाडगं मणिपेढियं च विउव्वति ॥ ६६ ॥

---

१. अत्र सूत्र-वृत्त्योः भिन्नता दृश्यते ॥ २. द्र. सू. ६३ ॥ ३. V । समोहणइ K (क, ख, ग, च, छ) । ४. निसि(स्सि-G, स्स-मु.)रति ५. अहाबायरे अहासुहुमे दोच्चंपि वेउव्वियसमुग्घाएणं जाव बहुसम° GK मु.बाबु । ६. द्र. सू. २४-३१ । ७. °स्स देसभागस्स देसभागे-K ॥ ८. द्र. सू. ३२-३६ ।

सूत्र-६७ : तीसे णं मणिपेढियाए उवरिं सीहासणं सपरिवारं [१]जाव दामा चिट्ठंति ॥ ६७ ॥

[६६-६७] नवरं बहुसमभूमिवर्ण्णन-प्रेक्षागृहमण्डपवर्णन-मणिपीठिकासिंहासन-तदुपर्युल्लोचाङ्कुश-मुक्तादामवर्णनानि च [२]प्राग्वद् भावनीयानि ॥ ६६-६७ ॥

सूत्र-६८ : तते णं से सूरियाभे देवे समणस्स भगवतो महावीरस्स आलोए पणामं करेति, करेत्ता अणुजाणउ मे भगवंति कट्टु सीहासणवरगए तित्थगराभिमुहे सण्णिसण्णे ॥ ६८ ॥

[६८] **'तए णमि'**त्यादि, **ततः सूर्याभो** देवस्तीर्थङ्करस्य **भगवतः आलोके प्रणामं करोति, कृत्वा च 'अनुजानातु भगवान्** माम्' इत्यनुज्ञापनां **कृत्वा सिंहासनवरगतः सन् तीर्थकराभिमुखः सन्निषण्णः** ॥ ६८ ॥

सूत्र-६९ : तते णं [से] सूरियाभे देवे तप्पढमयाए नाणामणिकणगरयणविमल-महरिह-'[३]निउण-ओवित'-मिसिमिसें[४]तविरचियमहाभरण-कडग-तुडियवरभूसणुज्जलं पीवरं पलंबं दाहिणं भुयं पसारेति । तओ णं सरिसयाणं सरित्तयाणं सरिव्वयाणं सरिसलावण्ण-रूव-जोव्वण-गुणोववेयाणं एगाभरण-वसणगहियणिज्जोयाणं दुहओ संवेल्लियग्गणियत्थाणं आविद्धतिलयामेलाणं पिणिद्धगेवेज्जकंचुयाणं उप्पीलिय-चित्त-पट्ट-परियर-सफेणगावत्तरइय-संगय-पलंब-वत्थंत-[चित्त]चिल्लग-नियंसणाणं एगावलि-कंठरइय-सोभंत-वच्छ-परिहत्थ-भूसणाणं अट्ठसयं नट्टसज्जाणं देवकुमाराणं णिग्गच्छति ॥ ६९ ॥

[६९] **'तए णमि'** त्यादि, **ततः सूर्याभो देवः 'तत्प्रथमतया'** तस्य-नाट्यविधेः प्रथमतायां **दक्षिणं भुजं प्रसारयति,** कथम्भूतम्' ? इत्याह-**'नानामणिकणगरयणविमल-महारिह-निपुणोव[५]चिय-मिसिमिसंतविरइयमहाभरण-कडग-तुडियवर-भूसणुज्जलं'** इति नानाविधानि मणि-कनक-रत्नानि येषु तानि नानामणि-कनक-रत्नानि,

---

१. द्र. सू. ३७-४४ । २. सूत्र ३२ तः ४० इति ज्ञेयम् ॥ ३. निउणो वि° K क, ख, ग ॥ ४. °रतित° JLB । °रतिय° K ॥ ५. °यविय° JK बाबु ॥

मणयो नानाविधाश्चन्द्रकान्तादयः, कनकानि[१] नानावर्ण्णतया, रत्नानि नानाविधानि कर्केतनादीनि, तथा विमलानि-निर्मलानि तथा महान्तमुपभोक्तारमर्हन्ति यदि वा महम्-उत्सवं क्षणमर्हन्तीति महार्हाणि तथा निपुणं-निपुणबुद्धिगम्यं यथा भवति एवम् 'ओविया' इति परिकर्मितानि, 'मिसिमिसंतत्ति' दीप्यमानानि विरचितानि महाभरणानि यानि कटकानि-कलाचिकाभरणानि, तुटितानि-बाहुरक्षिका[२], अन्यानि च यानि वरभूषणानि तैरुज्ज्वलं-भास्वरं तथा **पीवरं**-स्थूलं, **प्रलम्बं**-दीर्घम् । **'तओ णं'** इत्यादि, ततः-**तस्माद्** दक्षिणभुजाद् **अष्टशतम्**-अष्टाधिकं शतं **देवकुमाराणां निर्गच्छति,** कथम्भूतानाम् ? इत्याह-**सदृशानां,** समानाकाराणामित्यर्थः, तत्राकारेण कस्यचित् सदृशोऽपि वर्णतः सदृशो न भवति ततः सदृग्वर्ण्णत्व[३]प्रतिपादनार्थमाह-**'सरित्तयाण'** मिति, सदृशी-सदृग् वर्ण्णत्वग् येषां ते तथा, सदृक्त्वगपि कश्चिद् वयसा विसदृशः सम्भाव्येत तत आह-**'सरिव्वयाणं'** सदृक्-समानं वयो तेषां ते तथा तेषां, **'सरिसलावण्ण-रूव-जोव्वण-गुणोववेयाण'**मिति सदृ[४]शेन लावण्येन-लवणिम्ना अतिसुभगया शरीरकान्त्येति भावः, रूपेण-आकृत्या, यौवनेन-यौवनिकया, गुणैः-दक्षत्व-प्रियंवदत्वादिभिरुपपेताः सदृशलावण्य-रूप-यौवन-गुणोपपेतास्तेषाम्, **'एगाभरण-वसन-गहियनिज्जोगाणमि'**ति एकः-समा[५]नैः आभरण-वसनलक्षणो गृहीतो निर्योगः-उपकरणम्-अर्थान्नाट्योपकरणं यैस्ते तथा तेषां, **'दुहतो संवेल्लियग्गनियत्थाणं'** ति द्विधातो-द्वयोः पार्श्वयोः संवेल्लितानि-[६]संवृत्तानि अग्राणि यस्य तद् द्विधातःसंवेल्लिताग्रं न्यस्तं सामर्थ्यादु[७]त्तरीयं यैस्ते तथा तेषां, तथा **'उप्पीलिय-चित्तपट्ट-परियर-सफेणगावत्तरइय-संगय-पलंब-वत्थंत-चित्तचिल्लग-नियंसणाण'**मिति, उत्पीडितः-अत्यन्ताबद्धश्चित्रपट्टो-विचित्रवर्ण्ण-पट्टरूपः परिकरो यैस्ते तथा यस्मिन्नावर्त्तने च फेनविनिर्गमो भवति स स[८]फेनकावर्त्त उच्यते ततः सफेनकावर्त्तेन रचिताः सङ्गताः-नाट्यविधौ उपपन्नाः प्रलम्बा वस्त्रान्ता यस्य निवसनस्य तत्तथा तद्, चित्रं-चित्रवर्ण्णं चिल्लगं-देदीप्यमानं निवसनं-परिधानं येषां ते तथा, ततः पूर्वपदेन विशेषणसमासस्तेषाम्, **'एगावलि-कंठरइय-सोभंत-वच्छ-परिहत्थ-भूसणाण'** मिति, एकावलिर्या कण्ठे रचिता तया शोभमानं वक्षो येषां ते तथा, प[९]रिहत्थशब्दो देश्यः

---

१. JK बाबु । °नि नानाविधानि नानावर्ण° मु. ॥ २. JK बाबु । बाहुरक्षका-मु. ॥ ३. KG बाबु । °त्वक्प्र° मु. ॥ ४. सादृश्येन लावण्येन लाक° JK बाबु ॥ ५. G । °नः आभरणवसना(दिः-मु.)नि आभ° JK बाबु पा. ५ भा. १-२ ॥ ६. संवृत्तानि - JK बाबु नास्ति ॥ ७. °दत्तरं-JK बाबु ॥ ८. सफेनकावर्त उच्यते ततः - JK बाबु नास्ति ॥ ९. "पुण्णम्मि पडिहत्थ पोणियया" "पडिहत्थो तथा पोणिओ पूर्णः" देशीनाममाला व. ६ गा. २८ - इति G पृ. १२४ टि. ॥

परिपूर्णवाचकः, पडिहत्थानि-पूर्णानि भूषणानि येषां ते तथा, ततः पूर्वपदेन कर्म्मधारयस्तेषां, '**नट्टसज्जाणं**' नृत्ये सज्जाः प्रगुणीभूता नृत्यसज्जास्तेषाम् ॥ ६९ ॥

सूत्र-७० : तयाणंतरं च णं नानामणि जाव पीवरं पलंबं वामं भुयं पसारेति ।

ततो णं सरिसयाणं सरित्तयाणं सरिव्वतीणं सरिसलावण्ण-रूव-जोव्वण-गुणोववेयाणं एगाभरण-वसणगहियणिज्जोतीणं दुहतो संवेल्लिय-ग्गणियत्थीणं आविद्धतिलयामेलीणं पिणद्धगेवेज्जकंचुतीणं नानामणि-[कणग]-रयण-भूसण-विराइयंगमंगीणं चंदाणणाणं चंदद्धसमनिलाडाणं चंदाहियसोमदंसणाणं उक्का इव उज्जोवेमाणीणं सिंगारागारचारुवेसाणं संगयगय-हसिय-भणिय-चिट्ठिय-विलासललिय-संलावनिउणजुत्तोवयार-कुसलाणं गहियाउज्जाणं अट्ठसयं नट्टसज्जाणं देवकुमारीणं णिग्गच्छइ ॥ ७० ॥

[७०] **तदनन्तरं च** यथोक्तविशेषणविशिष्टं **वामं भुजं प्रसारयति, तस्माद्**-वामभुजात् **अष्टशतं देवकुमारिकाणां विनिर्गच्छति,** कथम्भूतम् ? इत्याह-'**सरिसयाणं सरित्तयाणं सरिव्वयाणं सरिसलावण्ण-रूव-जोव्वण-गुणोववेयाणं एगाभरण-वसणगहियनिज्जोईणं दुहतो संवेल्लियग्गनियत्थीणं**' इति पूर्ववद् '**आविद्धतिलया-मेलीणं**' आविद्धस्तिलक आमेलश्च-शेखरको यकाभिस्ता आविद्धतिलकामेलास्तासां '**पिणद्धगेवेज्जकंचुकीण**'मिति, पिनद्धं ग्रैवेयकं-ग्रीवाभरणं कञ्चुकश्च यकाभिस्तास्तथा तासां, '**नानामणि-कणग-रयण-भूसण-विराइयंगमंगीण**' मिति, नानाविधानि मणि-कनक-रत्नानि येषु भूषणेषु तानि नानामणि-कनक-रत्नानि, तैः नानामणि-कनक-रत्न-भूषणैर्विराजितान्यङ्गमङ्गानि-अङ्गप्रत्यङ्गानि यासां तास्तथा तासां, '**चंदाणणाणं चन्दद्ध-समनिडालाणं चन्दाहियसोमदंसणाणं उक्का इव उज्जोवेमाणीण**'मिति सुगमं, '**सिंगारागारचारुवेसाणं हसियभणियचिट्ठिय-विलासललियसंलावणिउणजुत्तोवयार-कुसलाणं गहियाउज्जाणं नट्टसज्जाण**'मिति पूर्ववत् ॥ ७० ॥

---

१. द्र. सू. ६८ । २. °मेलाणं मु.G (छ) । मेत्तीणं – JBL । ३. "आचार्यहेमचन्द्रः प्राकृतम् 'आमेल' शब्दं संस्कृत 'आपीड' शब्दस्य विकृतोच्चारणं सूचयति [सि.हे. ८-१-२३४] इति G पृ. १२५ टि. ॥"

सूत्र-७१ : तए णं से सूरियाभे देवे अट्ठसयं संखाणं विउव्वइ, अट्ठसयं संखवायाणं विउव्वइ, अट्ठसयं सिंगाणं विउव्वइ, अट्ठसयं सिंगवायाणं विउव्वइ, अट्ठसयं संखियाणं विउव्वइ, अट्ठसयं संखियवायाणं विउव्वइ, अट्ठसयं खरमुहीणं विउव्वइ, अट्ठसयं खरमुहिवायाणं विउव्वइ, अट्ठसयं पेयाणं विउव्वइ, अट्ठसयं पेयावा[1]यगाणं विउव्वइ,अट्ठसयं पिरिपिरियाणं विउव्वति, अट्ठसयं पिरिपिरियावा[2]यगाणं विउव्वति, एवमाइयाइं एगूणपण्णं आउज्जविहाणाइं विउव्वइ, विउव्वित्ता तते णं ते बहवे देवकुमारा य देवकुमारीयातो य सद्दावेति ॥ ७१ ॥

[७१] **'तए णं से सूरियाभे देवे'** इत्यादि, ततः [स] सूर्याभो देवोऽष्टशतं शं[3]ङ्खानां **विकुर्वति, अष्टशतं शङ्खवादकानाम् १, अष्टशतं शृङ्गाणामष्टशतं शृङ्गवादकानाम् २, अष्टशतं शङ्खिकानाम् अष्टशतं शङ्खिकावादकानां ३,** ह्रस्वः शङ्खो जात्यन्तरात्मकः शङ्खिका, तस्या हि स्वरो मनाक् तीक्ष्णो भवति, न तु शङ्खवदतिगम्भीरः, तथा **अष्टशतं खरमुखीनां**-काहलानाम् **अष्टशतं खरमुखीवादकानाम् ४, अष्टशतं पेयानां,** पेया नाम महती काहला, **अष्टशतं पेयावादकानाम् ५, अष्टशतं पिं[4]रिपिरिकाणां**-कोलिकपुटावनद्धमुखवाद्यविशेषरूपाणा**मष्टशतं पिरिपिरिवादकानाम् ६,** अष्टशतं पणवानां, पणवो- भाण्डपटहो लघुपटहो वा, अष्टशतं पणववादकानाम् ७, अष्टशतं पटहानाम् अष्टशतं पटहवादिकानाम् ८, → अ[5]ष्टशतं भम्भानां, भम्भा-ढक्का, अष्टशतं भम्भावादकानाम् ← ९, अष्टशतं होरम्भाणां, होरम्भा-म[6]हाढक्का, अष्टशतं होरम्भावादकानाम् १०, अष्टशतं भेरीणां-ढक्काकृतिवाद्यविशेषरूपाणामष्टशतं भेरीवादकानाम् ११, अष्टशतं झल्लरीणां, झल्लरीनाम-चर्मावनद्धा विस्तीर्णवलयाकारा, अष्टशतं झल्लरीवादकानाम् १२, अष्टशतं दुन्दुभीनामष्टशतं दुन्दुभिवादकानां, दुन्दुभिः-भेर्याकारा सङ्कटमुखी देवातोद्यविशेषः १३, अष्टशतं मुरुजानां महाप्रमाणो मर्दलो मुरुजः अष्टशतं मुरुजवादकानाम् १४, अष्टशतं मृदङ्गानां, लघुमर्दलो मृदङ्गोऽष्टशतं मृदङ्गवादकानाम् १५, अष्टशतं नन्दीमृदङ्गानां, नन्दीमृदङ्गो नाम एकतः सङ्कीर्णोऽन्यत्र विस्तृतो मुरजविशेषः, अष्टशतं नन्दीमृदङ्गवादकानाम् १६, अष्टशतमालिङ्गानाम्, आलिङ्गो-

---

१. °वायाण — JBL । २. °वायाण-K ॥ ३. वाद्यानां विशेषस्वरूपज्ञानार्थं चित्रानां च दर्शनार्थं द्रष्टव्यं- "जैन आगम वाद्यकोश" प्र. जैन विश्वभारती संस्थान लाडनू ॥ ४. K बाबु । पीरिपीरि° मु. एवमग्रेऽपि ॥ ५. →← चिह्नद्वयमध्यवर्तिपाठः - JK नास्ति ॥ ६. महा° JK नास्ति ॥

मुरजवाद्यविशेष एव, अष्टशतमालिङ्गवादकानाम् १७, अष्टशतं कुस्तुम्बानां, कुस्तुम्बः-चर्मावनद्धपुटो वाद्यविशेषः, अष्टशतं कुस्तुम्बवादकानाम् १८, अष्टशतं गोमुखीनां, गोमुखी लोकतोऽवसेया, अष्टशतं गोमुखीवादकानाम् १९, अष्टशतं मर्दलानां, मर्दलः-उभयतः समः, अष्टशतं मर्दलवादकानाम् २०, अष्टशतं विपञ्चीनां, विपञ्ची-त्रितन्त्री वीणा, अष्टशतं विपञ्चीवादकानाम् २१, अष्टशतं वल्लकीनां, वल्लकी[१]-सामान्यतो वीणा, अष्टशतं वल्लकी-वादकानाम् २२, अष्टशतं भ्रामरीणामष्टशतं भ्रामरीवादकानाम् २३, अष्टशतं षड्भ्रामरीणा-मष्टशतं षड्भ्रामरीवादकानाम् २४, अष्टशतं परिवादिनीनां, परिवादिनी-सप्ततन्त्री वीणा, अष्टशतं परिवादिनीवादकानाम् २५, अष्टशतं वव्वीसा[३]नामष्टशतं वव्वीसावादकानाम् २६, अष्टशतं सुघोषाणामष्टशतं सुघोषावादकानाम् २७, अष्टशतं नन्दिघोषाणामष्टशतं नन्दीघोष-वादकानाम् २८, अष्टशतं महतीनां, महती-शततन्त्रिका वीणा, अष्टशतं महतीवादकानाम् २९, अष्टशतं कच्छभीनामष्टशतं कच्छभीवादकानाम् ३०, अष्टशतं चित्रवीणानाम् अष्टशतं चित्रवीणावादकानाम् ३१, अष्टशतमामोदानामष्टशतं आमोदवादकानाम् ३२, अष्टशतं झ[४]ञ्झानामष्टशतं झञ्झावादकानाम् ३३, अष्टशतं नकुलानाम् अष्टशतं नकुलवादकानाम् ३४, अष्टशतं तूणानामष्टशतं तूणावादकानाम् ३५, अष्टशतं तुम्बवीणानां, तुम्बयुक्ता वीणा या तुम्बवीणा अ[५]द्यकल्पे प्रसिद्धा, अष्टशतं तुम्बवीणावादकानाम् ३६, अष्टशतं मुकुन्दानां, मुकुन्दो-मुरुजवाद्यविशेषो योऽतिलीनं प्रायो वाद्यते, अष्टशतं मुकुन्दवादकानाम् ३७, अष्टशतं हुडुक्कानामष्टशतं हुडुक्कावादकानां, हुडुक्का प्रतीता ३८, अष्टशतं विचिक्कीनामष्टशतं विचिक्कीवादकानां ३९, अष्टशतं करटीनामष्टशतं करटीवादकानां, क[६]रटी प्रतीता ४०, अष्टशतं डिण्डिमानामष्टशतं डिण्डिमवादकानां, प्रथमप्रस्तावनासूचकः प्रणवविशेषः डिण्डिमः ४१, अष्टशतं किणितानामष्टशतं किणितवादकानाम् ४२, अष्टशतं क[७]डवानामष्टशतं कडवावादकानां, कडवा-करटिका ४३, अष्टशतं दर्दरकाणामष्टशतं दर्दरवादकानां, दर्दरकः प्रतीतः ४४, अष्टशतं दर्दरिकाणामष्टशतं दर्दरिकावादकानां, लघुदर्दरको दर्दरिका ४५, अष्टशतं कुस्तुम्बराणामष्टशतं कुस्तुम्बरवादकानाम् ४६, अष्टशतं कलशिकानामष्टशतं कलशिकावादकानाम् ४७, अष्टशतं कलशानामष्टशतं कलशवादकानाम् ४८, अष्टशतं तालानामष्टशतं तालवादकानाम् ४९, अष्टशतं कांस्यतालानामष्टशतं कांस्यतालवादकानाम्

---

१. वल्लकी - JK नास्ति ॥ २. भ्रम° K बाबु एवमग्रेऽपि ॥ ३. बव्वी° G । चर्चसानां-बाबु । ४. डंडानाम् - J बाबु. पा. ४-५ । दण्डानाम् - भा. १ ॥ ५. K । अद्यकल्यप्र° J मु. ॥ ६. करटी प्रतीता - JKE नास्ति ॥ ७. कंडकानां - भा. २ । कण्डवानां - बाबु ॥

५०, अष्टशतं रिंगिसिकानामष्टशतं रिंगिसिकावादकानाम् ५१, अष्टशतमङ्गरिकाणामष्टशतमङ्गरिकावादकानाम् ५२, अष्टशतं शिशुमारिकाणामष्टशतं शिशुमारिकावादकानाम् ५३, अष्टशतं वंशानामष्टशतं वंशवादकानाम् ५४ अष्टशतं वालीनामष्टशतं वालीवादकानां, वाली-तूणविशेषः, स हि मुखे दत्त्वा वाद्यते ५५, अष्टशतं वेणूनामष्टशतं वेणुवादकानाम् ५६, अष्टशतं परिलीनामष्टशतं परिलीवादकानाम् ५७, अष्टशतं बद्धकानामष्टशतं बद्धकवादकानां, बद्धकस्तूणविशेषः ५८, अव्याख्यातास्तु भेदा लोकतः प्रत्येतव्याः, **एवमादीनि बहून्यातोद्यानि आतोद्यवादकांश्च विकुर्वंति,** सर्वसङ्ख्यया तु मूलभेदापेक्षयाऽऽतोद्यभेदा **एकोनपञ्चाशत्,** शेषास्तु भेदा एतेष्वेवान्तर्भवन्ति, यथा वंशातोद्यविधाने बाली-वेणु-परिली-बद्धगा इति । तथा चाह-'**एवमाइयाइं एगुणपण्णं आतोज्जविहाणाइं विउव्वइ' इति, विकुर्व्वित्वा च तान् स्वयंविकुर्वितान् देवकुमारान् देवकुमारिकाश्च शब्दयति ॥ ७१ ॥**

सूत्र-७२ : तए णं ते बहवे देवकुमारा य देवकुमारीओ य सूरियाभेणं देवेणं सद्दाविया समाणा हट्ठ जाव जेणेव सूरियाभे देवे तेणेव उवागच्छंति, उवागच्छित्ता सूरियाभं देवं करयलपरिग्गहियं जाव वद्धावेत्ता एवं वयासी—संदिसंतु णं देवाणुप्पिया ! जं अम्हेहिं कायव्वं ॥ ७२ ॥

[७२] **ते च शब्दिता हृष्टतुष्टानन्दितचित्ताः सूर्याभसमीपमागच्छन्ति, आगत्य** च **करतलपरिगृहीतं** दशनखं शिरसावर्त्तं च मस्तकेऽञ्जलिं कृत्वा जयेन विजयेन **वर्द्धापयित्वा एवमवादिषुः-सन्दिशन्तु देवानांप्रिया ! यदस्माभिः कर्त्तव्यम् ॥ ७२ ॥**

सूत्र-७३ : तए णं से सूरियाभे देवे ते बहवे देवकुमारा य देवकुमारीओ य एवं वयासी—गच्छह णं तुब्भे देवाणुप्पिया ! समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेह, करेत्ता वंदह नमंसह, वंदित्ता नमंसित्ता गोयमातियाणं समणाणं निग्गंथाणं तं दिव्वं देविड्ढिं दिव्वं देवजुत्तिं दिव्वं

---

१. °मगरिका° भा. २ ॥ २. प्राचीन घनवाद्य-इति जै. आ. वा. पृ. ४३ ॥ ३. बाली° मु. । 'बंसुरी सदृश' इति जैन आगमवाद्यकेशे पृ. ३७ ॥ ४. तृणविशेषः - G । 'पूंगी सदृश' इति जैन आगमवाद्यकोशे पृ. २७ ॥ ५. GK । वव्वगा° मु. ॥ ६. JKE । तथा चाह-मु. नास्ति ॥ यथा चाह-बाबु. ॥ ७. द्र. सू. ८ । ८. द्र. सू. १२ । ९. विजयेन - JK नास्ति ॥

देवाणुभावं दिव्वं बत्तीसइबद्धं णट्टविहिं उवदंसेह, उवदंसित्ता खिप्पामेव एयमाणत्तियं पच्चप्पिणह ॥ ७३ ॥

[७३] ततः स सूर्याभो देवस्तान् [बहून्] देवकुमारकान् देवकुमारिकाश्च एवमवादीद्-गच्छत यूयं देवानांप्रियाः ! श्रमणं भगवन्तं महावीरं त्रिकृत्व आदक्षिणप्रदक्षिणं कुरुत, कृत्वा च वन्दध्वं नमस्यत वन्दित्वा नमस्यित्वा गौतमादीनां श्रमणानां निर्ग्रन्थानां तां देवजनप्रसिद्धां दिव्यां देवर्द्धिं दिव्यां देवद्युतिं दिव्यं देवानुभावं दिव्यं द्वात्रिंशद्विधं नाट्यविधिमुपदर्शयत, उपदर्श्य चैतामाज्ञप्तिकां क्षिप्रमेव प्रत्यर्पयत ॥ ७३ ॥

सूत्र-७४ : तते णं ते बहवे देवकुमारा य देवकुमारीओ य सूरियाभेणं देवेणं एवं वुत्ता समाणा हट्ठ जाव[१] पडिसुणंति, पडिसुणित्ता जेणेव समणे भगवं महावीरे तेणेव उवागच्छंति, उवागच्छित्ता समणं भगवं महावीरं जाव[२] नमंसित्ता जेणेव गोयमादिया समणा निग्गंथा तेणेव [३]निग्गच्छंति ॥ ७४ ॥

[७४] 'तए णमि'त्यादि, ततस्ते **बहवो देवकुमारा देवकुमारिकाश्च सूर्याभेन देवेन एवमुक्ताः सन्तो हृष्टा यावत्प्रतिशृण्वन्ति,** अभ्युपगच्छन्तीत्यर्थः, **प्रतिश्रुत्य** च **यत्र श्रमणो भगवान्महावीरस्तत्रोपागच्छति, उपागत्य च श्रमणं भगवन्तं महावीरं** त्रिकृत्व आदक्षिणप्रदक्षिणीकुर्वन्ति कृत्वा च वन्दन्ते नमस्यन्ति, वन्दित्वा **नमस्यित्वा च यस्मिन्प्रदेशे गौतमादयः श्रमणास्तत्र** ॥ ७४ ॥

सूत्र-७५ : तते णं ते बहवे देवकुमारा य देवकुमारीतो य समामेव समोसरणं करेंति, करेत्ता समामेव पंतीतो बंधंति, बंधित्ता समामेव ओणमंति, ओणमित्ता समामेव उण्णमंति, उण्णमित्ता एवं सहियामेव ओणमंति, ओणमित्ता सहियामेव उण्णमंति, उण्णमित्ता संगयामेव ओणमंति, ओणमित्ता संगयामेव उण्णमंति, उण्णमित्ता [४]थिमियामेव

---

१. द्र. सू. ८ । २. द्र. सू. १२ । ३. उवागच्छंति - मु. । ४. थिमियमेव J (क, घ, च); थिमियामेव LB (छ) ।

ओणमंति, ओणमित्ता थिमियामेव उण्णमंति, उण्णमित्ता समामेव पसरंति, पसरित्ता समामेव आउज्जविहाणाइं गेण्हंति, गेण्हित्ता समामेव पवाएंसु, [समामेव] पगाइंसु, [समामेव] पणच्चिंसु ॥ ७५ ॥

[७५] **समकालमेव**-एककालमेव **समवसरन्ति**, मिलन्तीत्यर्थः, **समवसृत्य च समकमेव**-एककालमेव **अवनमन्ति**-अधो नीत्वा भवन्ति, **अवनम्य च समकमेव उन्नमन्ति**, ऊर्ध्वमवतिष्ठन्ते इति भावः, तदनन्तरं चैवं क्रमेण **सहितं सङ्गतं स्तिमितं चावनमनमुन्नमनं** च वाच्यम्, अमीषां च सहितादीनां भेदः सम्यक्कौशलोपेतनाट्योपाध्यायादेवावगन्तव्यः, ततः **स्तिमितं समकमुन्नम्य समकमेव प्रसरन्ति, प्रसृत्य** च **समकमेव** यथायोगमातोद्यविधानानि **गृह्णन्ति, गृहीत्वा च** [१]**समकमेव प्रवादितवन्तः, समकमेव प्रगीतवन्तः, समकमेव** [२]**प्रनर्तितवन्तः** ॥ ७५ ॥

सूत्र-७६ : किं ते ? उरेण मंदं, सिरेण तारं, कंठेण वितारं, तिविहं तिसमय-रेयग-रइयं गुंजाऽवंककुहरोवगूढं रत्तं तिट्ठाणकरणसुद्धं [३]**सकुहरगुजंत-वंस-तंती-तल-ताल-लय-गहसुसंपउत्तं महुरं समं सललियं मणोहरं मउरिभियपयसंचारं सुरइं सुणंतिं वरचारुरूवं दिव्वं णट्टसज्जं गेयं पगीया वि होत्था ॥ ७६ ॥**

[७६] '**किं ते**' इत्यादि, किञ्च ते देवकुमारा देवकुमारिकाश्च एवं प्रगीता अप्यभवन्निति योगः, कथमित्याह-'**उरेण मंद**'मिति, सर्वत्र सप्तम्यर्थे तृतीया, उरसि मन्दं यथा भवति एवं प्रगीताः, '**शिरेण तारं कण्ठेन** [४]**वितार**'[५]मिति शिरसि तारं कण्ठे च वितारम् अतिशयेन यथावल्लक्षणोपेतं, किमुक्तं भवति ?-उरसि प्रथमतो गीतमुत्क्षिप्यते उत्क्षेपकाले च गीतं मन्दं भवति, ''आदिमिउं आरभंता'' [ ] इति वचनात्, अन्यथा गीतगुणक्षतेः[६], तत उक्तम् 'उरसि मन्द'मिति, ततो गायतां मूर्द्धानमभिघ्नन् स्वर उच्चैस्तरो भवति, स्थानकं च द्वितीयं तृतीयं वा समधिरोहति, ततः 'शिरसि तार'मित्युक्तं, शिरसश्च प्रतिनिवृत्तः सन् स्वरः कण्ठे घुलति घुलंश्चातिमधुरो भवति ततः 'कण्ठे वितार'मित्युक्तं, '**तिविहं, तिसमय-**

---

१. समकमेव प्रवादितवन्तः - JKE नास्ति ॥ २. प्रवर्ति° JKE ॥ ३. K। सकुहरकुजंत B (क, ख, ग, च) । ४. वतारं-JKE । ५. G । मिति शिरसि कंठे च तारं-मु. । JKE नास्ति । ६. °क्षितेः JKE ॥

रेयग-रइय'मिति, '**गुंजाऽवंककुहरोवगूढं**' गुञ्जनं गुञ्जा[१], गुञ्जाप्रधानानि यानि अवक्राणि-शब्दमार्ग्गाप्रतिकूलानि कुहराणि, तेषूपगूढं गुञ्जाऽवक्रकुहरोपगूढं, किमुक्तं भवति ?-तेषां देवकुमाराणां देवकुमारिकाणां च तस्मिन् प्रेक्षागृहमण्डपे गायतां गीतं तेषु प्रेक्षागृह-मण्डपसक्तेष्वन्येषु च कुहरेषु स्वानुरूपाणि[२] प्रतिशब्दसहस्राण्युत्थापयद्वर्त्तते इति, '**रत्तमि**'ति रक्तम् इह यद् गेयरागानुरक्तेन गीतं गीयते तद् रक्तमिति तद्विदां प्रसिद्धं, '**तिट्ठाण-करणसुद्ध**'मिति[३] त्रीणि स्थानानि-उरःप्रभृतीनि, तेषु करणेन-क्रियया शुद्धं त्रिस्थान-करणशुद्धं, तद्यथा-उरःशुद्धं कण्ठशुद्धं शिरोविशुद्धं च, तत्र यदि उरसि स्वरः स्वभूमिकानुसारेण विशालो भवति तत उरोविशुद्धं, स एव यदि कण्ठे वर्त्तितो भवति अस्फुटितश्च ततः कण्ठविशुद्धं, यदि पुनः शिरःप्राप्तः सन् सानुनासिको भवति ततः शिरोविशुद्धं, यदि वा यत उरः-कण्ठ-शिरोभिः श्लेष्मणा अव्याकुलितैर्विशुद्धैर्गीयते, तत उरः-कण्ठ-शिरोविशुद्धत्वात् त्रिस्थानकरणविशुद्धं, तथा सकुहरो[४] गुञ्जन् यो वंशो ये च तन्त्री-तल-ताल-लयग्रहास्तेषु सुष्ठु-अतिशयेन सम्प्रयुक्तं **सकुहरगुञ्जद्वंश-तन्त्री-तल-ताल-लय-ग्रहसुसम्प्रयुक्तं**, किमुक्तं भवति ?-सकुहरे वंशे गुञ्जति तन्त्र्यां च वाद्यमानायां यद्वंश-तन्त्रीस्वरेणाविरुद्धं[५], तत् सकुहरगुञ्जद्वंश-तन्त्रीसुसम्प्रयुक्तं, तथा परस्परहतहस्ततलस्वरानुवर्त्ति[६] यत् तत् तलसुसम्प्रयुक्तं[७], यद् मुरज-कंशिकादीनामातोद्यानामाहतानां यो ध्वनिपादोत्क्षेपो यश्च नृत्यतां(न्त्याः) नर्त्तिका(क्याः)पादोत्क्षेपस्तेन समं तत् तालसुसम्प्रयुक्तं, तथा शृङ्गमयो दारुमयो दन्तमयो वा योऽङ्गुलिकौशिक[१०]स्तेनाऽऽहतायास्तन्त्र्याः स्वरप्रकारो लयस्तमनुसरद् गेयं[११] लयसुसम्प्रयुक्तं, तथा यः प्रथमं वंश-तन्त्र्यादिभिः स्वरो गृहीतस्तन्मार्ग्गानुसारि ग्रहसु-सम्प्रयुक्तं, तथा '**महुरमि**'ति मधुरस्वरेण गीयमानं, मधुरं कोकिलारुतवत्, तथा '**सममि**'ति[१२] तल-वंशस्वरादिसमनुगतं समं '**सललियं**' ति यत्स्वरघोलनाप्रकारेण ललतीव तत्, सह ललितेन-ललनेन वर्त्तते इति सललितं, यदि वा इति, यत् श्रोत्रेन्द्रियस्य शब्दस्पर्शनमतीव सूक्ष्ममुत्पादयति, सुकुमारमिव च प्रतिभासते तत्[१३]सललितमिति, अत एव **मनोहरं**, पुनः कथम्भूतम् इत्याह-'**मउरिभितपदसञ्चारं**' तत्र मृदुर्मृदुना[१४]स्वरेण युक्तो न निष्ठुरेण तथा यत्र

---

१. मु. G । गुञ्जा - JKE नास्ति ॥ २. स्वानिरू॰ JKE ॥ ३. तुला जीवाभिगम ३।१।१२७ वि.प्र.पृ. १९५ पं. ३ ॥ ४. सुकु॰ JKE ॥ ५. यत्तन्त्री॰ इति जीवाभि. वृत्तौ ॥ ६-७. ताल॰ जीवाभि. वृत्तौ । ८. K बाबु । ध्वनिः पादोत्क्षेपः. - मु. । ध्वनिः = पादोत्क्षेपः (?) - G "ध्वनिः यश्च नृत्यन्त्या नर्तक्याः पादोत्क्षेपः तेन" इत्यादि जीवा॰ वि.प्र.पृ. १९५ पं. ९ इति G पृ. १३२ टि. द्र.जम्बू.टी. ४०B ॥ ९. नृत्यता नर्तकाः पादो॰ JK ॥ १०. कौशस्ते॰ इति जीवाभि. वृत्तौ ॥ ११. गेयं लय॰ इति J बाबु जीवाभि. वृत्तौ च । गेयलय॰ मु. । १२. ताल॰ इति जीवाभि. वृत्तौ ॥ १३. तत्सलिलमिति-JK ॥ १४. मृदु - मृदुना - बाबु. जीवाभि. वृत्तौ ।

स्वरोऽक्षरेषु घोलनास्वरविशेषेषु च सञ्चरन् रङ्गतीव प्रतिभासते स पदसञ्चारो रिभित[१] उच्यते, मृदुः रिभितः पदेषु गेयनिबद्धेषु संचारो यत्र गेये तन्मृदुरिभितपदसञ्चारं, तथा **'सुरइं'** इति शोभना रतिर्यस्मिन् श्रोतृणां तत् सुरति, तथा शोभना नति[२]र्-नामः-अवसानो यस्मिन् तत् **सुनति,** तथा वरं-प्रधानं चारु-विशिष्टचङ्गिमोपेतं रूपं-स्वरूपं यस्य तद्वरचारुरूपं **दिव्यं**-प्रधानं **नृत्तसज्जं गेयं प्रगीता अप्यभवन्** ॥ ७६ ॥

सूत्र-७७ : किं ते ? उद्धुमंताणं–संखाणं सिंगाणं संखियाणं खरमुहीणं पेयाणं पिरिपिरियाणं, आहम्मंताणं–पणवाणं पडहाणं, अप्फालिज्जमाणाणं–भंभाणं होरंभाणं, तालिज्जंतीणं–भेरीणं झल्लरीणं दुंदुहीणं, [३]आलवंताणं–[४]मुरयाणं मुइंगाणं नंदीमुइंगाणं, उत्तालिज्जंताणं–आलिंगाणं कुतुंबाणं गोमुहीणं मद्दलाणं, मुच्छिज्जंतीणं–वीणाणं विपंचीणं वल्लकीणं, कुट्टिज्जंतीणं–महंतीणं कच्छभीणं चित्तवीणाणं, सारिज्जंताणं–बद्धीसाणं सुघोसाणं नंदिघोसाणं, फुट्टिज्जंतीणं–भामरीणं छब्भामरीणं परिवायणीणं, छिप्पंताणं–तूणाणं तुंबवीणाणं, आमोडिज्जंताणं–[५]आमोटाणं [६]झंझाणं नउलाणं, अच्छिज्जंतीणं–[७]मुगुंदाणं हुडुक्कीणं विचिक्कीणं, वाइज्जंताणं–करडाणं डिंडिमाणं [८]किणियाणं [९]कडंबाणं, [१०]तोंडिज्जंताणं–दद्दरगाणं दद्दरिगाणं [११]कुंतुंबराणं कलसियाणं मड्डयाणं [१२]आतोडिज्जंताणं–तलाणं तालाणं कंसतालाणं, घट्टिज्जंताणं–[१३]रिंगिसियाणं लत्तियाणं मगरियाणं सुंसुमारियाणं, फूमिज्जंताणं–वंसाणं वेलूणं वालीणं [१४]परिलीणं बद्धगाणं [१५] ॥ ७७ ॥

१. °तमुच्यते - जीवाभि. वृत्तौ ॥ २. नतिस्वनामो-J । नतिरवनामो-K । नतिः रचनातोऽवसाने यस्मिन् - इति जीवाभि. वृत्तौ ३।१।१२७ पत्र १९५ B। ३. आलिंपंताणं JLB K (क, ख, ग, घ, च, छ) आलिवंताणं - मु. । ४. मुरयवराणं (क, छ); मुरजवराणं (घ) । मुरवराणं - JB बाबु । ५. आमोताणं BK (क, च, छ) । आमोतणं - JL । ६. कुंभाणं (क, ख, ग, घ, च छ) । ७. मुदंगाणं-K ॥ ८. K । किरियाणं (क, ख, ग, घ) । ९. करंबाणं (क) । १०. वाइज्जं° K JLB । ११. कुतुंबाणं BJL KG (क, ख, ग, घ, च, छ); ७१ सूत्रवृत्तावपि कुस्तुम्बराणम् इति पाठः । १२. आवडिज्जंताणं JB (क, ख, ग, च, छ) उत्ता० बाबु । १३. गिरिसियाएणं (क); गिरिसियाणं BJL (ख, ग, घ, च, छ) गिरिस० बाबु । रिंगिरिसि० G । १४. परिल्लीणं - G । परिल्लीणं-मु. ॥ १५. पव्वगाणं BLJ (क, ख, ग, घ, च, छ) बाबु ।

[७७] **'किं ते'** इत्यादि, किञ्च ते देवकुमारा देवकुमारिकाश्च प्रगीतवन्तः प्रनर्त्तितवन्तश्च **'उद्धुमंताणं संखाणमि'**[१]त्यादि, अत्र सर्वत्रापि षष्ठी सप्तम्यर्थे, ततोऽयमर्थो-यथायोगमुद्ध्मायमानादिषु शङ्खादिषु, इह **शङ्ख-शृङ्ग-शङ्खिका-खरमुही-पेया-पिरिपिरिकाणां** वादनम् 'उद्ध्मानमिति प्रसिद्धं, **पणव-पटहानाम्**[२] **आमोटनं, भंभा-होरम्भाणाम् आस्फालनं, भेरी-झल्लरी-दुन्दुभीनां ताडनं, मुरज-मृदङ्ग-नन्दीमृदङ्गानाम् आलपनम्, आलिङ्ग**[३]**-कुस्तुम्ब-गोमुखी-मर्दलानाम् उत्तालनं, वीणा-विपञ्ची-वल्लकीनां मूर्च्छनं, भ्रामरी-षड्भ्रामरी**[४]**-परिवादनीनां स्पन्दनं**[५] **वध्वीसा-सुघोषा-नन्दिघोषाणां**[६] **सारणं, महती-कच्छपी-चित्र-वीणानां कुट्टनम्, आमोट-झर्झ्झा**[७]**-नकुलानाम् आमोटनं तूण-तुम्बवीणानां स्पर्शनं, मुकुन्द-हुहुक्का-विचिक्की**[८]**नां मूर्च्छनं करटा-डिंडिम-किणिक-कडम्बानां वादनं, दर्दर-दर्दरिका-कुस्तुम्बरु-कलसिका-मडुकानाम् उत्ताडनं, तल-ताल-कंसतालानाम् आताडनं, रिङ्गिसिका-लत्तिका-मकरिका-शिशुमारिकाणां घट्टनं, वंश-वेणु-वाली-पिरली**[९]**-बद्ध-गानां फुंकन**मत उक्तम् 'उद्धुमंताणं संखाणं'इत्यादि ॥ ७७ ॥

सूत्र-७८ : तते णं से दिव्वे गीए दिव्वे नट्टे दिव्वे वाइए, एवं अब्भुए [गीए अब्भुए नट्टे अब्भुए वाइए], सिंगारे [गीए सिंगारे नट्टे सिंगारे वाइए, उराले गीए उराले नट्टे] उराले [वाइए, मणुण्णे गीए मणुण्णे नट्टे] मणुण्णे [वाइए०] मणहरे गीए मणहरे नट्टे मणहरे वाइए, उप्पिंजलभूते कहकहभूते दिव्वे देवरमणे पवत्ते यावि होत्था ॥ ७८ ॥

[७८] **'तए णं से दिव्वे गीए'** इत्यादि, यत एवं प्रगीतवन्त इत्यादि, ततो णमिति पूर्ववत्, तद्दिव्यं गीतं **दिव्यं वादितं दिव्यं नृत्तम्**[११]**भवदितियोगः**, दिव्यं नाम प्रधानं, **'एवमब्भुए गीए अब्भुए वाइए अब्भुए नट्टे'** अद्भुतम्-आश्चर्यकारि **'सिंगारे वाइए सिंगारे नट्टे'** सिंगारं-शृङ्गारं शृङ्गाररसोपेतत्वात्, अथवा शृङ्गारं नाम अलङ्कृतमुच्यते, तत्र[१२] यदन्यान्यविशेषकरणेनालङ्कृतमिव गीतं वादनं नृत्तं वा तत् शृङ्गारमिति, **'उराले गीए**

१. JK बाबु । उद्धु० मु. ॥ २. K । प्रण० मु. ॥ ३. आलिंग्य० JK बाबु ॥ ४. ०षड्भ्रामरी० JK बाबु नास्ति ॥ ५. G बाबु । स्यन्दनं.-मु. । आस्पन्दनं-K । "मूलपाठानुसारेण अत्र 'स्फोटनम्' इति उचितं स्यात्" इति G पृ. १३४ टि. ॥ ६. JKG । वध्वासा (वच्चीसा)-मु. । वच्छीसा-भा. २ ॥ ७. JKG । आमोद० मु. । ८. झण्डा-पा. ४ ॥ ९. JKG बाबु । ०क्की कडवानां-मु. ॥ १०. JKG बाबु. पिरली पिरली-मु. । पिवली. भा.२ ॥ ११. ०मभूत्तदिति० JK बाबु । मभूदिति - E ॥ १२. यत्र यदन्येभ्य विशे० K । तत्र यदन्यस्यविशे० J ॥

उराले वाइए उराले नट्टे' उदारं-स्फारं परिपूर्णगुणोपेतत्वाद्, न तु क्वचिदपि हीनं, 'मणुण्णे गीए मणुण्णे वाइए मणुन्ने नट्टे' मनोज्ञं-मनोऽनुकूलं, द्रष्टृणां श्रोतृणां च मनोनिर्वृतिकरमिति भावः, तच्च मनोनिर्वृतिकरत्वं सामान्यतोऽपि स्याद् अतः प्रकर्षविशेषप्रतिपादनार्थमाह- 'मणहर' इति, **'मणहरे गीए मणहरे वाइए मणहरे नट्टे'** मनो हरति-आत्मवशं नयति तद्विदामप्यतिचमत्कारकारितयेति मनोहरम्, एतदेवाह-**'उप्पिंजलभूते'** उत्पिञ्जलम्-आकुलकम् उत्पिञ्जलभूते-आकुलके भूते, किमुक्तं भवति ?-महर्द्धिकदेवानामप्यतिशायितया परमक्षोभोत्पादकत्वेन सकलदेवा-ऽसुर-मनुजसमूहचित्ताक्षेपकारि इति, **'कहकहभूते'** इति 'कहकह'-इत्यनुकरणं, कहकह इति भूतं-प्राप्तं **कहकहभूतं**, किमुक्तं भवति ?-निरन्तरं तत्तद्विशेषदर्शनतः समुच्छलितप्रमोदभरपरवशसकलदिक्चक्रवालवर्त्तिप्रेक्षकजनकृतप्रशंसावचनबोलकोलाहलव्याकुलीभूतमिति, अत एव **दिव्यं देवरमण**मपि देवानामपि रमणं-क्रीडनं **प्रवृत्तमभूत्** ॥ ७८ ॥

सूत्र-७९ : तए णं ते बहवे देवकुमारा य देवकुमारीओ य समणस्स भगवओ महावीरस्स सोत्थिय-सिरिवच्छ-नंदियावत्त-वद्धमाणग-भद्दासण-कलस-मच्छ-दप्पण-मंगलभत्तिचित्तं नामं दिव्वं नट्टविधिं उवदंसेंति ॥७९॥

[७९] **'तए णं ते बहवे[1] देवकुमारा य'** इत्यादि, ततस्ते बहवो देवकुमारा **देवकुमारिकाश्च श्रमणस्य भगवतो महावीरस्स** पुरतो गौतमादिश्रमणानां स्वस्तिक-श्रीवत्स-नन्द्यावर्त्त-वर्द्धमानक-भद्रासन-कलश-मत्स्य-दर्पणरूपाणामष्टानां मङ्गलकानां[2] भक्त्या-विच्छित्त्या चित्रम्-आलेखनम्[3] आकाराभिधानं वा यस्मिन् स **स्वस्तिक-श्रीवत्स-नन्द्यावर्त्त-वर्द्धमानक-भद्रासन-कलश-मत्स्य-दर्पणमङ्गलभक्तिचित्रः**, एवं सर्वत्रापि व्युत्पत्तिमात्रं यथायोगं परिभावनीयं, सम्यग्भावना तु कर्तुं न शक्यते, यतोऽमीषां नाट्यविधीनां सम्यक् स्वरूपप्रतिपादनं पूर्वान्तर्गते नाट्यविधिप्राभृते, तच्चेदानीं व्यवच्छिन्नमिति प्रथमं **दिव्यं नाट्यविधिमुपदर्शयन्ति** ॥ ७९ ॥

सूत्र-८० : तते णं ते बहवे देवकुमारा य देवकुमारीओ य समामेव समोसरणं करेंति, करेत्ता तं चेव भाणियव्वं जाव[4] दिव्वे देवरमणे पवत्ते यावि होत्था ॥ ८० ॥

---

१. बहवे-JKE नास्ति ॥ २. मङ्गलानां-G ॥ ३. आलेखनमाकाराभिधानयोर्यस्मिन्-JKE बाबु ॥ ४. द्र. सू. ७५-७८ ।

[८०] ततो द्वितीयं नाट्यविधिमुपदर्शयितुकामा भूयोऽपि प्रागुक्तप्रकारेण समकं समवसरणादिकं कुर्वन्ति, तथा चाह-**'तए णं ते बहवे देवकुमारा य देवकुमारीओ य समकमेव समोसरणं करेंति'** इत्यादि प्रागुक्तं तदेव तावद्वक्तव्यं यावद् **'दिव्वे देवरमणे पवत्ते यावि होत्था'** इति ॥ ८० ॥

सूत्र-८१ : तते णं ते बहवे देवकुमारा य देवकुमारीओ य समणस्स भगवओ महावीरस्स आवड-पच्चावड-सेढि-पसेढिय-सोत्थिय-सोवत्थिय-पूसमाणव[१]-वद्धमाणग-मच्छंड[२]-मगरंड-जार-मार-फुल्लावलि-पउमपत्त-सागरतरंग-वसंत[३]लय-पउमलयभत्तिचित्तं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ८१ ॥

[८१] **'तए णमि'**त्यादि, **ततस्ते बहवो देवकुमारा देवकुमारिकाश्च श्रमणस्य भगवतो महावीरस्य** पुरतो गौतमादीनां श्रमणानां **आवर्त्त[४]-प्रत्यावर्त्त-श्रेणि-प्रश्रेणि-**

---

१. पूसमाणग JL बाबु (क, ख, ग, च, छ); पूसमाण (घ) । २. G । मच्छंडमगरंडजारामारा-मु. । मच्छंडा-मगरंडा-जारा-मारा-V ॥ ३. वासंतिलय- जीवाभिगमे ३।२७७ ॥ ४. इदं तु ध्येयं नाट्यविषयकस्यास्य अधिकारस्य विवेचनं पद्मसुन्दररचितायां राजप्रश्नीयनाट्यपदभञ्जिकायाम् उपलभ्यते । अत्र तु ततः किञ्चित् उपयोगी तत् तत् स्थाने प्रदर्श्यते- "तत्र सृष्टिक्रमेण भ्रमद् भ्रमरिकादानैर्नर्तनम् आवर्तः, तद्विपरितक्रमेण भ्रमरिकादानैर्नर्तनम् प्रत्यावर्तः । "

एकरूपाणां देवानां देवीनां वा एकपंक्तिगतानां नाट्यं **श्रेणि**रिति ।
दैवीनां वा समुभयपङ्क्तिगतानां नर्त्तनम् "**प्रश्रेणिः**" ।

स्वस्तिकाकारेण नर्त्तनम् प्रतीतम्,
पुष्पमाणः[वः] कुम्भस्योपरि कुम्भो ध्रियमाणो मङ्गलत्वेन मान्यः ।

यतस्तदाकारेण नर्त्तनम् । तथा सरावकस्योपरि सरावको ध्रियमाणो
मंगलमहोत्सवादौ क्रियमाणस्तदाकारेण नर्त्तनम् "**वर्द्धमानकः**" ।

[मुकुलस्तु यदा हस्तः कपित्थपरिवेष्टितः । वर्धमानः स विज्ञेयः कर्म चाऽस्य निबोधत ॥ इति नाट्यशास्त्रे ९-१५८]

मत्स्यांडक-मकराण्डकाकारेण विक्रियाकरणम् **'मत्स्याण्डक-मकराण्डककरं'** नाट्यं, यद्वा मत्स्यानामण्डकमिव उत्पत्तिस्थानम् पानीयम्, तत्र यथा मत्स्याः परिवर्त्तन-भ्रमण-विवर्त्त-खे[ल]नादीनि कुर्व्वन्ति तद्वद् मत्स्याण्डकं नृत्यम्, तथैव मकराण्डकम् । एतत्तु सागरतरंगाद्यभिनये एतद्द्वयस्याभिनयस्य करणं युक्तमेव सम्भाव्यते । ["पातकौ तु यदा हस्तावूर्ध्वाङ्गूष्ठावधोमुखौ । उपर्युपरि विन्यस्तौ तदा स मकरः करः ॥" इति ना. शा. ९।१५२]

स्वस्तिक-सौवस्तिक-पुष्यमाणवक-वर्द्धमानक-मत्स्याण्डक-मकराण्डक-जार-मार-पुष्पावलि-पद्मपत्र-सागरतरङ्ग-वासन्तीलता-पद्मलताभक्तिचित्रं नाम द्वितीयं **नाट्यविधिमुप-दर्शयन्ति** २ ॥ ८१ ॥

सूत्र-८२ : एवं च एक्किक्कियाए णट्टविहीए समोसरणादिए एसा वत्तव्वया जाव दिव्वे देवरमणे पवत्ते यावि होत्था ॥ ८२ ॥

[८२] तदनन्तरं तृतीयं नाट्यविधिमुपदर्शयितुं भूयस्तथैव समवसरणादिकं कुर्वन्ति, एवं समवसरणादिकरणविधिरे**कैकस्मिन्नाट्यविधौ** प्रत्येकं प्रत्येकं तावद्वक्तव्यो **यावद्देव-रमणे पवत्ते यावि होत्था** इति ॥ ८२ ॥

सूत्र-८३ : तते णं ते बहवे देवकुमारा य देवकुमारियाओ य समणस्स भगवओ महावीरस्स ईहामिअ-उसभ-तुरग-नर-मगर-विहग-वालग-किन्नर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलयभत्तिचित्तं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ८३ ॥

[८३] **तत ईहामृग-ऋषभ-तुरग-नर-मकर-विहग-व्याल-किन्नर-रुरु-सरभ-चमर-कुञ्जर-वनलता-पद्मलताभक्तिचित्रं** नाम तृतीयं **दिव्यं नाट्यविधिमुपदर्शयन्ति** ३ ॥८३॥

सूत्र-८४ : एगतो वंकं, एगओ खहं दुहओ खहं, एगओ चक्कवालं दुहओचक्कवालं चक्कद्धचक्कवालं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ८४ ॥

[८४] तदनन्तरं भूयोऽपि समवसरणादिविधिकरणानन्तर**मेकतो वक्रं-एकतश्चक्रवालं द्विधातश्चक्रवालं चक्रार्द्धं चक्रवालं नाम** चतुर्थं **दिव्यं नाट्यविधिमुपदर्शयन्ति** ४ ॥८४॥

तत्र जारमारशब्दौ रुढीगम्यौ, अत्र र-लयोः सावर्ण्यात् जालम् "इन्द्रजालम्" तत्र नाट्ये लोको 'दर'विवरवर्त्तिनां पदार्थानां क्षणदृष्टनष्टत्वेनाभिनयं दर्शयामासुरिति **जारः** । तथा मारस्त्वनङ्गस्तद्वन्नाट्यावसरे जगज्जनचमत्कारणाय तत्क्षणादृश्यत्वेन निजाङ्गविलयनाभिनयो '**मारः**' इति । वासन्ती = माधवीलता अन्यानि पदानि सुगमानि" ॥ तुला जम्बूद्विप प्र. टीक पृ. ४१४ । नाट्यशास्त्रे - "प्रसादं कुञ्चितं पादं पुनरावर्तयेद् द्रुतम् । प्रयोगवशगौ हस्तौ तदावर्तमुदाहृतम् ।" ४.११९ B १२० A ॥ १. G । पुष्प० मु. ॥ २. द्र. सू. ७५-७८ । ३. भमर-पा. K ४-५ ॥ ४. नटानामेकस्यां दिशि धनुराकारश्रेण्या नर्तनम् । द्वयोः परस्पराभिमुखदृशोः धनुराकारश्रेण्या नर्तनम् ॥ इति जम्बूद्विपप्र. ४१४ ॥ ५. चक्रं-मु. ॥ ६. तथा मण्डलाकारेण देवानां देवीनां च प्रत्येकमेकतः सङ्गतानां मण्डलीभूय नर्तनम् एकतश्चक्रवालम् । एतत्तु सङ्गीतशास्त्रे 'हल्लीशकं' नाम नर्तनं गदितम् । [अनुसन्धनम् अग्रेतनपृष्ठे] →

सूत्र-८५ : चंदावलिपविभत्तिं च सूरावलिपविभत्तिं च वलयावलिपविभत्तिं च हंसावलिपविभत्तिं च एगावलिपविभत्तिं च तारावलिपविभत्तिं च मुत्तावलिपविभत्तिं च कणगावलिपविभत्तिं च रयणावलिपविभत्तिं च आवलिपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ८५ ॥

[८५] तदनन्तरमुक्तविधिपुरस्सरं **चन्द्रावलिप्रविभक्ति-सूर्यावलिप्रविभक्ति-वलयावलिप्रविभक्ति-हंसावलिप्रविभक्ति-एकावलिप्रविभक्ति-तारावलिप्रविभक्ति-मुक्तावलिप्रविभक्ति-कनकावलिप्रविभक्ति-रत्नावलिप्रविभक्त**यभिनयात्मक**मावलिप्रविभक्तिं** नाम पञ्चमं **नाट्यविधिमुपदर्शयन्ति** ५ ॥ ८५ ॥

सूत्र-८६ : चंदुग्गमणपविभत्तिं च सूरुग्गमणपविभत्तिं च उग्गमणुग्गमणपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ८६ ॥

[८६] तदनन्तरमुक्तक्रमेण **चन्द्रोद्गमप्रविभक्ति-सूर्योद्गमप्रविभक्ति**युक्तम् **उद्गमनोद्गमनप्रविभक्तिं नाम** षष्ठं **नाट्यविधिमुपदर्शयन्ति** ६ ॥ ८६ ॥

सूत्र-८७ : चंदागमणपविभत्तिं च सूरागमणपविभत्तिं च आगमणागमणपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ८७ ॥

[८७] तत उक्त प्रकारेण **चन्द्रागमनप्रविभक्तिसूर्यागमनप्रविभक्ति**युक्तम् **आगमनप्रविभक्तिनाम** सप्तमं **नाट्यविधिमुपदर्शयन्ति** ७ ॥ ८७ ॥

← तथा द्विधातश्चक्रवालं मध्ये मण्डलाकारेण, ततो बहिरपि द्वितीयमण्डलाकारेण देवानां देवीनाञ्च प्रत्येकमेकतः सङ्गतानां द्विवलयीकृतमण्डलाकारेण नर्तनं द्विधातश्चक्रवालमिति ।

तथा चक्रस्य रथाङ्गस्यार्द्धं चक्रार्द्धम् तद्रूपं चक्रवालं चक्रार्द्धचक्रवालम्-अर्द्धमण्डलाकारश्रेण्या देवदेवीसत्कया नर्तनम् **चक्रार्द्धचक्रवालं** नाम ।

१. तुला-जीवाजीवाभिगमवृत्तिः (पत्र २४६) । २. सूर्यानाम् आवलिः-श्रेणिः यथाऽऽकाशे द्योतते तद्वत् सूर्यावलिवत् प्रविभक्तिः विच्छित्तिः रचनाविशेषः इत्यर्थः, तस्याभिनयनम्-इति **नाट्यपदभञ्जिका** । तुला-जम्बूद्विपप्र. ४१४ ॥ ३. "तर्जनी-मध्यमाङ्गुष्ठे(ष्ठं)स्त्रेताग्निस्था निरन्तराः । भवेयुर्हंसवक्त्रस्य शेषे द्वे सम्प्रसारिते ॥ समाः प्रसारितास्त्रिस्रस्तथा चोर्ध्वा कनीयसी । अङ्गुष्ठः कुञ्चितस्यैव हंसपक्षः इति स्मृतः ॥" इति **नाट्यशास्त्रे** ९/१०४,१०६ ॥ ४. "अत्राऽपि चन्द्रोद्गमस्य राकायां क्रमेण गगने यथोद्गच्छद् दर्श्यते तद्वच्चन्द्रोद्गमाभिनयं दर्शयामासुः" **नाट्यपदभञ्जिका** ॥ ५. "चन्द्रागमनप्रतिमानस्य आगमनम् आकाश[शा?]वदवतरणम्" **नाट्यपदभञ्जिका** ॥

सूत्र-८८ : चंदावरणपविभत्तिं च सूरावरणपविभत्तिं च आवरणावरणपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ८८ ॥

[८८] तदनन्तरमुक्तक्रमेण चन्द्रावरणप्रविभक्ति[१]-सूर्यावरणप्रविभक्तियुक्तम् आवरणावरणप्रविभक्तिनामकमष्टमं **नाट्यविधिम्** ८ ॥ ८८ ॥

सूत्र-८९ : चंदत्थमणपविभत्तिं च सूरत्थमणपविभत्तिं च अत्थमणत्थमणपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ८९ ॥

[८९] तत उक्तक्रमेणैव चन्द्रास्तमयनप्रविभक्ति[२]-सूर्यास्तमयनप्रविभक्तियुक्तम् अस्तमयनप्रविभक्तिनामकं नवमं **नाट्यविधिम्** ९ ॥ ८९ ॥

सूत्र-९० : चंदमंडलपविभत्तिं च सूरमंडलपविभत्तिं च नागमंडलपविभत्तिं च जक्खमंडलपविभत्तिं च भूतमंडलपविभत्तिं च रक्खसमहोरग-गंधव्वमंडलपविभत्तिं च मंडलपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ९० ॥

[९०] तत उक्तप्रकारेण चन्द्रमण्डलप्रविभक्ति-सूर्य[३]मंडलप्रविभक्ति- नागमण्डलप्रविभक्ति-यक्षमण्डलप्रविभक्ति-भूतमण्डलप्रविभक्तियुक्तं मण्डलप्रविभक्तिनामकं दशमं **दिव्यं नाट्यविधिम्** १० ॥ ९१ ॥

सूत्र-९१ : उसभ[४]मंडलपविभत्तिं च सीहमंडलपविभत्तिं च, हयविलंबियं गयविलंबियं, [हयविलसियं गयविलसियं] मत्तहयविलसियं मत्तगयविलसियं, [मत्तहयविलंबियं मत्तगयविलंबियं] दुयविलंबियं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ९१ ॥

---

१. "चन्द्रस्य पूर्णशशिन आवरणम् उपसूर्यकेन परिवेषरूपेण कुण्डलीकरणं चन्द्रबिम्बस्य स्थगनम्" **नाट्यपदभञ्जिका** ॥

२. "उद्गतस्य चन्द्रस्य निशादौ अस्तमयनस्य प्रविभक्तिनिदर्शनम्... एवं दिनादावुद्गतस्य सूर्यस्यास्तमयननिदर्शनम्" **नाट्यपदभञ्जिका** ॥

३. "एवं बहुसूर्याणां मण्डलाकारपङ्क्त्या निदर्शनम्" **नाट्यपदभञ्जिका** ॥

४. उसभललियविक्कंतं सीहललियविक्कंतं BJLK (क, ख, ग, घ, च, छ) ।

[९१] तदनन्तरं उक्तक्रमेण [१]**ऋषभमण्डलप्रविभक्ति-सिंहमण्डलप्रविभक्ति-हय[२]विलम्बित-गजविलम्बित-हय[३]विलसित-गजविलसित-मत्तहयविलसित-मत्तगजविलसित-मत्तहयविलंबित-मत्तगजविलंबितं** विलंबिताभिनयं **द्रुतविलम्बितं** नाम एकादशं **नाट्यविधिम्** ११ ॥ ९१ ॥

सूत्र-९२ : [४]सागरपविभत्तिं च नागरपविभत्तिं च सागर-नागरपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ९२ ॥

[९२] तदनन्तरं [५]**सागरप्रविभक्ति-नागरप्रविभक्ति**अभिनयात्मकं **सागर-नागरप्रविभक्तिनाम** द्वादशं **नाट्यविधिम्** १२ ॥ ९२ ॥

सूत्र-९३ : नंदापविभत्तिं च चंपापविभत्तिं च नंदा-चंपापविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ९३ ॥

[९३] ततो [६]**नन्दाप्रविभक्तिचम्पाप्रविभक्ति**यात्मकं **नन्दा-चम्पाप्रविभक्तिनाम** त्रयोदशं **नाट्यविधिम्** १३ ॥ ९३ ॥

सूत्र-९४ : मच्छंडापविभत्तिं च मयरंडापविभत्तिं च जारापविभत्तिं च मारापविभत्तिं च मच्छंडा-मयरंडा-जारा-मारापविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ९४ ॥

[९४] ततो **मत्स्याण्डकप्रविभक्ति-मकराण्डकप्रविभक्ति-जारप्रविभक्ति-मारप्रविभक्ति**युक्तं [७]**मत्स्याण्डक-मकराण्डक-जार-मारप्रविभक्तिनाम** चतुर्दशं **नाट्यविधिम्** १४ ॥ ९४ ॥

---

१. "ऋषभरूपाणां-वृषभरूपाणां ललितेन-लीलागत्या विक्रान्तं पराक्रमरूपेण च निदर्शनम्" **नाट्यपदभञ्जिका** ॥ २. "हयानां विलम्बितगतस्य निदर्शनम्" **नाट्यपदभञ्जिका** ॥ ३. "हयानां विलसितम् आस्कन्दित-धौरितकादिगत्या प्रसर्पणम्... गजानां विलसितेन सलावण्यगमनं प्रसर्प्पणम्... मत्तहयस्य विलसितम् वल्गित-प्लुतादिविलासगत्या खुरलिलिंखेन" उद्दामतया विशृंखलत्वेन सञ्चरणं मत्तगजविलसितम् **नाट्यपदभञ्जिका** ॥ ४. सगडुद्धियपविभत्तिं च सागर JBLK (क, ख, ग, घ, च, छ) । ५. "सर्वतः कल्लोलप्रसरण-वडवानल-तिमितिर्मिगलादिमत्स्यविवर्तनम् गम्भीरगर्जितप्रतिध्वनादिनिदर्शनम् सागरप्रविभक्तिः"... नगरवासिलोकानां नगरादौ क्रीडासंचरणम्. ॥ ६. "नन्दनवल्लीः... तदाकाराभिनयदर्शनम्" **ना.प.भ.** ७. "चतुर्णां नाट्यविधिः... उर्व्यामिश्रित इति भेदाः" **नाट्यपदभ.** ॥

सूत्र-९५ : 'क' त्ति ककारपविभत्तिं च 'ख' त्ति खकारपविभत्तिं च 'ग' त्ति गकारपविभत्तिं च 'घ' त्ति घकारपविभत्तिं च 'ङ' त्ति ङकारपविभत्तिं च ककार-खकार-गकार-घकार-ङकार-पविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ९५ ॥

[९५] तदनन्तरं क्रमेण **'क' इति ककारप्रविभक्तिः**[१], **'ख' इति खकारप्रविभक्तिः, 'ग' इति गकारप्रविभक्तिः, 'घ' इति घकारप्रविभक्तिः, 'ङ' इति ङकारप्रविभक्ति**रित्येवं क्रमभाविककारादिप्रविभक्त्यभिनयात्मकं **ककार-खकार-गकार-घकार-ङकारप्रविभक्तिनामकं** पञ्चदशं **दिव्यं नाट्यविधिम्** १५ ॥ ९५ ॥

सूत्र-९६ : एवं – चकारवग्गो वि ॥ ९६ ॥

[९६] **एवं चकार**-छकार-जकार-झकार-ञकारप्रविभक्तिनामकं षोडशं दिव्यं नाट्यविधिम् १६ ॥ ९६ ॥

सूत्र-९७ : टकारवग्गो वि ॥ ९७ ॥

[९७] **टकार**-ठकार-डकार-ढकार-णकारप्रविभक्तिनामकं सप्तदशं दिव्यं नाट्यविधिम् १७ ॥ ९७ ॥

सूत्र-९८ : तकारवग्गो वि ॥ ९८ ॥

[९८] **तकार**[२]-थकार-दकार-धकार-नकारप्रविभक्तिनामकम् अष्टादशं नाट्यविधिम् १८ ॥ ९८ ॥

सूत्र-९९ : पकारवग्गो वि ॥ ९९ ॥

---

१. "अत्र ककारस्याऽऽकारेणाऽभिनयदर्शनम् ककारप्रविभक्तिरिति व्याख्या शिथिला सम्भाव्यते, लिपीनां नानात्वात् ककाराकारस्य नानात्वं स्यात्ततो अत्र ककारशब्दोद्घटनेन चपु(प्पु)ट चव्वपुटादौ कंकि किंकी इत्यादि वाचिकाभिनयस्य प्रवृत्त्या नर्तनं ककारप्रविभक्तिः । एवं कादि-ङान्तानां शब्दानामुद्गातृत्वेन कखगघङकारप्रविभक्तिनामकं पञ्चदशं नाट्यविधिमुपदर्शयन्ति" **नाट्यपदभञ्जिका** । "अत्र नर्तनप्रकारे 'अ'कार-इकार-इत्यादयः स्वरा नोल्लिखिताः, तथा व्यञ्जनाक्षरेष्वपि वर्गीया एव वर्णा दर्शिताः, यकार-रकार-लकार-वकार-सकार-हकारादयो वर्णा न दर्शिताः तत्र किमपि ऐतिहासिकं कारणं वा न इति चिन्तनीयम् । अथवा देवानां लिपौ ये वर्णाः, ते एव अत्र दर्शिताः, इत्यपि चिन्तनीयम् ।" इति G पृ. १४१ टिप्पणे । "य-र-ल-वाः सन्ध्यक्षराः, न स्वतन्त्राः, श-ष-स-हाः तालव्य-मूर्धन्य-दन्त्य-कण्ठ्येष्वन्तःपतिता इत्यतः अदर्शने सङ्गतिश्चिन्तनीया" इत्याचार्यश्री कुलचन्द्रसूरीणामभिप्रायः ॥ २. "एवं तकार-थकार-दकार-धकार-नकार प्रविभक्तिनामकं तीकटि-धिक्कटि-धाकटि-दोदोनाकटिप्रभृतिशब्दस्य परिवर्त्तरूपम् अष्टादशं नाट्यविधिमुपदर्शयन्ति" । **नाट्यपदभञ्जिका** ।

[९९] **पकार**-फकार-बकार-भकार-मकारप्रविभक्तिनामकमेकोनविंशतितमं दिव्यं नाट्यविधिम् १९ ॥ ९९ ॥

सूत्र-१०० : असोयपल्लवपविभत्तिं च अंबपल्लवपविभत्तिं च जंबूपल्लवपविभत्तिं च कोसंबपल्लवपविभत्तिं च पल्लवपविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ १०० ॥

[१००] ततोऽशोकपल्लवप्रविभक्ति-आम्रपल्लवप्रविभक्ति-जम्बूपल्लवप्रविभक्ति-कोशम्बपल्लवप्रविभक्त्यभिनयात्मकं **पल्लवप्रविभक्तिनामकं** विंशतितमं **दिव्यं नाट्यविधिम्** २० ॥ १०० ॥

सूत्र-१०१ : पउमलयापविभत्तिं जाव सामलयापविभत्तिं च लयापविभत्तिं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ १०१ ॥

[१०१] तदनन्तरं **पद्मलताप्रविभक्ति**-नागलताप्रविभक्ति-अशोकलताप्रविभक्ति-चम्पकलताप्रविभक्ति-चूतलताप्रविभक्ति-वनलताप्रविभक्ति-वासन्तीलताप्रविभक्ति-कुन्दलताप्रविभक्ति-अतिमुक्तकलताप्रविभक्ति-**श्यामलताप्रविभक्ति**-अभिनयात्मकं **लताप्रविभक्तिनामकमेकविंशतितमं दिव्यं नाट्यविधिम्** २१ ॥ १०१ ॥

सूत्र-१०२ : दुयं णामं [दिव्वं]णट्टविहिं उवदंसेंति ॥ १०२ ॥

[१०२] तदनन्तरं **द्रुतं नाम** द्वाविंशतितमं **नाट्यविधिम्** २२ ॥ १०२ ॥

सूत्र-१०३ : विलंबियं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ १०३ ॥

[१०३] ततो **विलम्बितं नाम** त्रयोविंशतितमम् २३ ॥ १०३ ॥

सूत्र-१०४ : दुयविलंबियं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ १०४ ॥

---

१. पल्लव २ पविभत्तिं च K (क, ख, ग, घ) । २. द्र. औपपातिके सूत्र ११ । ३. लया २ पविभत्तिं JB (घ) । LK नास्ति ॥ ४. "तत्र नागलता-ताम्बूलवल्ली, वासन्ती-माधवीलता, कुन्दमार्घ्यं पुष्पं तस्य लता, श्यामलता-प्रियङ्गुलता, शेषाः प्रतीता एव, एतासां लतानां मन्दमारुतसमीरितानां या प्रविभक्तिः नृत्यचातुरी तदभिनयात्मकलताप्रविभक्तिनामकं..." **नाट्यपदभञ्जिका** । ५. "द्रुतमिति शीघ्रं गीतशब्द-वाच्यशब्दयोः यमकशमकप्रयातेन पादतलशब्दस्यापि निपातः समकालमेवेति..." **नाट्यपदभञ्जिका** । ६. "विलम्बिते गीतशब्दे स्वरघोलनाप्रकारेण यतिभेदेन विश्रान्ते तथैव वाद्यशब्देऽपि यतितालरूपेण वाद्यमाने पदसञ्चारिणाऽपि तथैव गीतवाद्यशब्दयतिमार्गानुवर्तिना नर्त्तनं विलम्बितं नाम" **नाट्यपदभञ्जिका** ।

[१०४] द्रुतविलम्बितं[१] **नाम** चतुर्विंशतितमम् २४ ॥ १०४ ॥

सूत्र-१०५ : अंचियं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ १०५ ॥

[१०५] **अञ्चितं**[२] **नाम** पञ्चविंशतितमम् २५ ॥ १०५ ॥

सूत्र-१०६ : रिभियं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ १०६ ॥

[१०६] **रिभितं**[३] **नाम** षड्विंशतितमम् २६ ॥ १०६ ॥

सूत्र-१०७ : अंचियरिभियं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ १०७ ॥

[१०७] **अञ्चितरिभितं**[४] **नाम** सप्तविंशतितमम् २७ ॥ १०७ ॥

सूत्र-१०८ : आरभडं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ १०८ ॥

[१०८] **आरभटं**[५] **नाम** अष्टाविंशतितमम् २८ ॥ १०८ ॥

सूत्र-१०९ : भसोलं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ १०९ ॥

[१०९] **भसोलं**[६] **नाम** एकोनत्रिंशति(त्त)मम् २९ ॥ १०९ ॥

---

१. "उभयथाऽपि नर्त्तनं द्रुतविलम्बितं नाम... तथा वृद्धास्तु एतयोर्नाम-ताल-काल-रूपेण-प्राहुः- विलम्बितं १, द्रुतं २, मध्यं ३, तत्त्वं ४, मोघो ५, घनं, ६, क्रमात् । "तालः कालः क्रिया मानं लयः साम्यः मघास्त्रियाम् । इत्यमरः" - इति **नाट्यपदभञ्जिका** । २. "तथा अञ्चितं नाम मृदुना पदरिंगितेन तथा हंसमुख-खटकामुखादिहस्तकदेशीविशेषणे 'अञ्चितम्' पूजितं यन्नृत्यं तदञ्चितम्, अनेनाऽङ्गिकाभिनयोपेतं नाट्यं सूचितम् ।" **नाट्यपदभञ्जिका** । तुला-"पार्ष्णिर्यस्याञ्चिता भूमौ पादमग्रतलं तथा । अङ्गुल्यश्चाञ्चिताः सर्वाः स पादस्त्वञ्चितः स्मृतः ॥" **नाट्यशास्त्रे** ९/२७६ । ३. "तथा रिभितं मृदुपदसञ्चाररूपमिति वृद्धाः, 'पट रेभृङ् शब्दे' इति धातुप्रयोगात् । रेभितं तु कलस्वरेण गीतोद्गातृत्वम्, अनेन वाचिकाभिनययुक्तं नृत्यमभाणि ।" **नाट्यपदभञ्जिका** । ४. "उभयथापि नर्तनम् अञ्चितरेभितम्" **नाट्यपदभञ्जिका** । ५. "तथा आरभटं आरभट्या वृत्त्या निष्पन्नं यन्नृत्यं तदारभटम् तत्तु खड्ग-खेटकादिकर्षणेन द्वयोर्नट्योः परस्परं युद्धाभिनयनिदर्शनेन निष्पद्यमानं भवति ।" **नाट्यपदभञ्जिका** । "मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः । संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता" इति आप्टेरचित **संस्कृत-हिन्दी शब्दकोशे** पृ. २२६ ॥ ६. "भसोलत्ति प्राकृतत्त्वादाकारलोप उद्वृत्तस्वरेणसन्धिश्च भाषाभूषणानां दीप्त्या आकुलं भासाकुलम् । यद्वा भानां-नक्षत्राणां सा(या)-दिप्तिस्तया आकुलता साकुलं हाराद्यलङ्कारभूषणैर्नक्षत्रश्रेणितिरस्कारकारकं यन्नाट्यं तद् भसोलम् अनेनाहार्याभिनययुक्तं नाट्यं सूचितम् । यद्वा भाषाभिः संस्कृत-प्राकृता[दि]भि प्रवं प्रसूडादि(?) ग्रथितादिभिर्यन्नाट्यं तद् भाषाकुलम्, एतत्तु वाचिकाभिनययुक्तं नव्यं भवतीति" **नाट्यपदभञ्जिका** । स्थानाङ्गे ४-४-६३३ पृ. ४३९ द्रष्टव्यम् ॥ तुला-'त्रिकस्य वलनाच्चैव ज्ञेयं भ्रमरकं तु तत्' इति **नाट्यशास्त्रे** ४/९९ ॥ भसोल = भ्रमरः - इति प्राकृतकोशे ॥

सूत्र-११० : आरभडभसोलं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ११० ॥

[११०] [१]आरभटभसोलं नाम त्रिंशत्तमम् ३० ॥ ११० ॥

सूत्र-१११ : उप्पायनिवायपसत्तं[२] संकुचिय-पसारियं रियारियं[३] भंतसंभंतं णामं दिव्वं णट्टविहिं उवदंसेंति ॥ १११ ॥

[१११] [४]तदनन्तरमुत्पात-निपातप्रसक्तं सङ्कुचित-प्रसारित-रेचकरचितं भ्रान्त-सम्भ्रान्तं नाम एकत्रिंशत्तमं दिव्यं नाट्यविधिमुपदर्शयन्ति ३१ ॥ १११ ॥

सूत्र-११२ : तते तं ते बहवे देवकुमारा य देवकुमारीओ य समामेव समोसरणं करेंति [५]जाव दिव्वे देवरमणे पवत्ते यावि होत्था ॥ ११२ ॥

सूत्र-११३ : तते णं ते बहवे देवकुमारा य देवकुमारीओ य समणस्स भगवतो महावीरस्स [६]चरमपुव्वभवणिबद्धं च चरमचवणनिबद्धं च चरमसाहरणनिबद्धं च चरमजम्मणनिबद्धं च चरमअभिसेअनिबद्धं च चरमबालभावनिबद्धं च चरमजोव्वणनिबद्धं च चरमकामभोगनिबद्धं च चरमनिक्खमणनिबद्धं च चरमतवचरणनिबद्धं च चरमणाणुप्पायनिबद्धं च चरमतित्थपवत्तणनिबद्धं च चरमपरिनिव्वाणनिबद्धं च चरमचरिय-निबद्धं च णामं दिव्वं णट्टविहिं उवदंसेंति ॥ ११३ ॥

---

१. "उभयथा क्रियमाणम् आरभट[भ]सोलनामं" **नाट्यपदभञ्जिका** । २. °पवत्तं JLBK (क, ख, ग, घ, च); उप्पायनिवायपविभत्तं (छ) । ३. रयारइयं JLBG (क, ख, ग, घ, च, छ) । रया (खेय) रइय° मु. । रयारतियंतं णामं - पा. १ । रयारइए-K । ४. "तत्र उत्पतनम् ऊर्ध्वमभिनयगत्या हस्तपादादीनामूर्ध्वं क्षेपणम् 'उत्पातः', तेषामेव अधः क्षेपणं 'निपातः,' ताभ्यां प्रसक्तं-सहितं यन्नाट्यं तदुत्पातनिपातप्रसक्तम् । एवं हस्तपादाभ्याम् अङ्गहारार्थं सङ्कुचित-प्रसारिताभ्यां क्रियमाणं सङ्कुचितप्रसारितम् । रेचकैर्भ्रमरिकागतिभिः रेचितं निष्पाद्यं रेचकरेचितम् । आकाशादुत्पतनेनाऽद्भुतकारिचरित्रदर्शनेन भ्रान्तसम्भ्रान्तम् ।" **नाट्यपदभञ्जिका** । तुला "एक-भुजमुपाधाय संप्रसारितजानुकम् । स्थानं प्रसारितं नाम सुखसुप्तस्य कारयेत् ।" इति **नाट्यशास्त्रे** १२/२३१ । "पुनस्तेनैव योगेन गात्रमानम्य(मय्य) रेचयेद् । रेचितं करणं कार्यमुरोमण्डलमेव च ।" **नाट्यशास्त्रे** ४/२३४, २३५ । ५. द्र. सू. ७५-७८ । ६. V । पुव्वभवचरियनिबद्धं च देवलोयचरियणिबद्धं च [G नास्ति] चवणचरियणिबद्धं च सा(सं-मु.G)हारण-चरियणिबद्धं च जम्मणचरियणिबद्धं च अभिसेअचरियनिबद्धं च बालभावचरियनिबद्धं च [जोव्वणचरियनिबद्धं-G] कामभोगचरियनिबद्धं च [निक्खमणचरियनिबद्धं च JBL मु.] तवचरणचरियनिबद्धं च [नाणुप्पायचरियनिबद्धं-L] तित्थपव[तित्थुप्पाय-L]त्तणचरियनिबद्धं च परिनिव्वाणचरियनिबद्धं च चरिमचरियनिबद्धं च JBLKG मु. (क, ख, ग, घ, च, छ) ।

[११२-११३] तदनन्तरं च श्रमणस्य भगवतो महावीरस्य **चरमपूर्वमनुष्यभव-चरम-च्यवन-चरमगर्भसंहरण-चरम**भरतक्षेत्रावसर्पिणीतीर्थकर**जन्माऽभिषेक-चरमबालभाव-चरमयौवन-चरमकामभोग-चरमनिष्क्रमण-चरमतपश्चरण-चरमज्ञानोत्पाद-चरम-तीर्थप्रवर्त्तन-चरमपरिनिर्वाणनिबद्धं चरमनिबद्धं नाम** द्वात्रिंशत्तमं **दिव्यं नाट्य-विधिमुपदर्शयन्ति** ३२ ॥ ११२-११३ ॥

सूत्र-११४ : तते णं ते बहवे देवकुमारा य देवकुमारीयातो य चउव्विहं वाइत्तं वाएंति, तं जहा—ततं विततं घणं [1]सुसिरं ॥ ११४ ॥

[११४] **तदनन्तरं बहवो देवकुमारा देवकुमारिकाश्च** नाट्यविधिपरिसमाप्तिमङ्गलभूतं **चतुर्विधं वादित्रं वादयन्ति, तद्यथा-ततं**-मृदङ्ग-पटहादि, **विततं**-वीणादि, **घनं**-कंसिकादि, **शुषिरं**[2]-शङ्ख-काहलादि ॥ ११४ ॥

सूत्र-११५ : तते णं ते बहवे देवकुमारा य देवकुमारियातो य चउव्विहं गेयं गायंति, तं जहा—उक्खित्तं [3]पायंतं मंदाय रोइयावसाणं च ॥ ११५ ॥

[११५] **तदनन्तरं चतुर्विधं गीतं गायन्ति, तद्यथा-[4]उत्क्षिप्तं** प्रथमतः समारभ्यमाणं, **पादान्तं** पादवृद्धं वृद्धादिचतुर्भागरूपपादबद्धमितिभावः, **'मन्दाय'** इति मध्यभागे मूर्च्छनादि-गुणोपेततया मन्दं मन्दं घोलनात्मकं, **रोचितावसान**मिति-रोचितं-यथोक्तलक्षणोपेततया भावितं सत्यापितामितियावद् अवसानं यस्य तद् रोचितावसानम् ॥ ११५ ॥

सूत्र- ११६. तते णं ते बहवे देवकुमारा य देवकुमारियातो य चउव्विहं णट्टविहिं उवदंसेंति, तं जहा—अंचियं रिभियं आरभडं भसोलं च ॥ ११६ ॥

[११६] **'तए णं'** इत्यादि, ततश्च**तुर्विधं नर्त्तनविधिमुपदर्शयन्ति, तद्यथा-'अञ्चित'**-मित्यादि ॥ ११६ ॥

---

१. झुसिरं (जी० ३।४४७) मु.G । २. KG । सुषिरं-मु. ॥ ३. पायत्तं-B । पवत्तं - जीवाभिगमे (सू. ३।४४७) तुला-स्थानाङ्गसूत्रे ४।६३४ । प्रवृत्तम् उत्क्षेपावस्थातो विक्रान्तं मनाग्भरेण प्रवर्त्तमानं इति तत्रैव वृत्तौ ॥ ४. "तत्रोत्क्षिप्तम् उत्क्षिप्त प्रथमप्रारम्भ एव तारस्वरेण समारभ्यमाणम् । पादेन चतुर्भङ्गीरूपपादबन्धेन आत्तम्-गृहीतम् पादात्तं, चतुर्भागपादवृद्ध्या वर्धमानं गीतमित्यर्थः । मन्दमयते गच्छतीति मन्दायम् ।... रोचितं ग्रामत्रयविश्रामलक्षणेन भावितम् ।" **नाट्यपदभञ्जिका ।**

सूत्र-११७ : तए णं ते बहवे देवकुमारा य देवकुमारारियातो य चउव्विहं अभिणयं अभिणेंति, तं जहा–'दिट्ठंतियं [१]पाडंतियं [२]सामन्न-ओविणिवाइय [३]लोगमज्झावसाणियं च ॥ ११७ ॥

[११७] **'तए ण'**मित्यादि, ततश्चतुर्विधमभिनयमभिनयन्ति, तद्यथा-**दार्ष्टान्तिकं प्रात्यन्तिकं सामान्यतो विनिपातं लोकमध्यावसानिक**मिति, एते नर्त्तनविधयोऽभिनय-विधयश्च नाट्यकुशलेभ्यो वेदितव्याः ॥ ११७ ॥

सूत्र-११८ : तते णं ते बहवे देवकुमारा य देवकुमारियातो य गोयमादियाणं समणाणं निग्गंथाणं दिव्वं देविड्ढिं दिव्वं देवजुतिं दिव्वं देवाणुभावं दिव्वं बत्तीसइबद्धं नट्टविहिं उवदंसेत्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेंति, करेत्ता वंदंति नमंसंति, वंदित्ता नमंसित्ता जेणेव सूरियाभे देवे तेणेव उवागच्छति, उवागच्छित्ता सूरियाभं देवं करयलपरिग्गहियं[दसणहं]सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति, वद्धावेत्ता एतमाणत्तियं पच्चप्पिणंति ॥ ११८ ॥

[११८] **'तए णं ते बहवे देवकुमारा देवकुमारीओ य'** इत्यादि उपसंहारसूत्रं सुगमम् ॥ ११८ ॥

---

१. पाडियंतियं K भा.२ पा. १-२ (क, घ); पाडियं JB पा.३ (ख, ग, च, छ); पार्डितियं-G २८१ सूत्रेपि सर्वप्रतिषु 'पाडंतियं' पाठो विद्यते । पाडिसुते-इति स्थानांगे ४ । ६३७, पाडिसुयं - जीवाजीवाभिगमे ३/४४७ प्रतिश्रुतिकम् - इति तत्रैव वृत्तौ द्र. V पृ. १०९ टि. २, ५ ॥ २. सामंतोवणिवाइ(ई B)यं JLBK (क, ख, ग, घ, च, छ) । द्र. स्थानांगे ४/६३७, जीवाभिगमे ३/४४७ । "सम्भवतः 'सामन्नओ' स्थाने 'सामन्नो' जातः अस्यैव सामन्तोरूपे परिवर्तनं जातमिति प्रतीयते" इति V पृ. १०९ टि. ५ ॥ ३. K । अंतोमज्झावसाणियं JBG (क, ख, ग, घ); '२८१ सूत्रे एतत्तुल्यप्रकरणे सर्वासु प्रतिषु 'लोगमज्झावसाणियं' इति पाठोस्ति तथा जीवाजीवाभिगमे (३ । ४४७) पि एष पाठो लभ्यते । इति V पृ. १०९ टि. ५ ॥ ४. "तत्र दृष्टान्ते भवं दार्ष्टान्तिकं रामायणं भारतादिचिरन्तनप्रबन्धनिबद्धमभिनयम् । प्राप्तान्तिकं प्रात्यन्तिकं वा। तत्र प्रात्यन्ते भवं प्रात्यन्तिकं, यथा चरमतीर्थकरचरमचक्रवर्त्यादिप्रबन्धनिबद्धमभिनयमित्यर्थः । सामान्यतो विनिपतनं यस्य तद् सामान्यतो विनिपातं पताका-त्रिदताकाद्यभिनयदर्शनम् । लोकमध्ये ये पदार्था लोकमध्यास्त एवावसानं यस्य यत्र भवन्तं लोकमध्यावसानिकमिति चतुर्विधं, शेषं तु वृत्तिकृता व्याख्याततरम् । अत्रान्यापि व्युत्पत्तिः बहुश्रुतैरुन्नेया । राजप्रश्नीयटीकायामनुक्तं सुरनाटके पदं तत् पञ्जिकामात्रं निर्ममे **पद्मसुन्दरैः** । इति राजप्रश्नीया **नाट्यपदभञ्जिका** पूर्णा ॥"

सूत्र-११९ : तते णं से सूरियाभे देवे तं दिव्वं देविड्ढिं दिव्वं देवजुइं दिव्वं देवाणुभावं पडिसाहरइ, पडिसाहरेत्ता खणेणं जाते एगे एगभूते ॥ ११९॥

[११९] नवरं '**एगभूए**' इति एकभूतः-अनेकीभूयैकत्वं प्राप्त इत्यर्थः ॥ ११९ ॥

सूत्र-१२० : तते णं से सूरियाभे देवे[1] समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेति, वंदति, नमंसति, वंदित्ता नमंसित्ता नियगपरिवालसद्धिं संपरिवुडे तमेव दिव्वं जाणविमाणं दुरुहति, दुरुहित्ता जामेव दिसिं पाउब्भूते तामेव दिसिं पडिगते ॥ १२० ॥

[१२०] '**नियगपरिवालसद्धिं संपरिवुडे**' इति, निजकपरिवारेण सार्द्धं संपरिवृतः ॥१२०॥

सूत्र-१२१ : 'भंतेति ! भगवं गोयमे समणं भगवं महावीरं वंदति नमंसति, वंदित्ता नमंसित्ता एवं वदासी' ॥ १२१ ॥

[१२१] **भंतेति भयवं गोयमे**त्यादि, **भदन्त !** इत्यामन्त्रणपुरस्सरं **भगवान् गौतमः श्रमणं भगवन्तं महावीरं वन्दते नमस्यति, वन्दित्वा नमस्यित्वा 'एवं'** वक्ष्यमाणप्रकारेणऽ**वादीत्**, पुस्तकान्तरे त्विदं वाचनान्तरं दृश्यते, 'तेणं[2] कालेणं तेणं समएणं समणस्स भगवतो महावीरस्स जिट्ठे अंतेवासी' इत्यादि, अस्य व्याख्या-तस्मिन् काले तस्मिन् समये णंशब्दो वाक्यालङ्कारार्थः, श्रमणस्य भगवतो महावीरस्य 'ज्येष्ठ' इति प्रथमोऽन्तेवासीशिष्यः, अनेन पदद्वयेन[3] तस्य सकलसङ्घाधिपतित्वमावेदयति, 'इन्द्रभूतिः' इति मातापितृकृतं नामधेयं, नामेतिप्राकृतत्वात् विभक्तिपरिणामेन नाम्नेति द्रष्टव्यम्, एवमन्यत्रापि यथायोगं भावनीयम्, अन्तेवासी च किल विवक्षायां श्रावकोऽपि स्यादतस्तदाशङ्काव्यवच्छेदार्थमाह-'अनगारः' न विद्यते अगारं-गृहमस्येत्यनगारः, अयं च विगीतगोत्रोऽपि सम्भाव्येतात आह-'गौतमो गोत्रेण' गौतमाह्वयगोत्रसमन्वित इत्यर्थः, अयं च तत्कालोचितदेहपरिमाणापेक्षया न्यूनाधिकदेहोऽपि स्यादत आह-'सप्तोत्सेधः'-सप्तहस्तप्रमाणशरीरोच्छ्रायः, अयं चेत्थम्भूतो लक्षणहीनोऽपि शङ्क्येताऽतस्तदाशङ्कापनोदार्थमाह-'समचउरंससंठाणसंठिए' इति, समाः-शरीरलक्षणशास्त्रोक्तप्रमाणाविसंवादिन्यश्चतस्रोऽस्रयो यस्य तत् समचतुरस्रं अस्रयस्त्विह चतुर्दिग्विभागोपलक्षिताः शरीरावयवा द्रष्टव्याः ।

अन्ये त्वाहुः-''समा-अन्यूनाधिकाश्चतस्रोऽप्यस्रयो यत्र तत् समचतुरस्रं तच्च[3] तत् संस्थानं च, संस्थानम्-आकारः, तच्च वाम-दक्षिणजान्वोरन्तरम्, आसनस्य ललाटोपरिभागस्य

१. भगवंतं-G एवमग्रेऽपि ॥ २. तुला-औपपातिकसूत्र. ८२-८३ ॥ ३. पदद्वयस्य तस्य JEK । ३. तच्च - JEK नास्ति ॥

चान्तरं, वामस्कन्धस्य दक्षिणजानुनश्चान्तरम्" इति । अपरे त्वाहुः-"विस्तारोत्सेधयोः समत्वात् समचतुरस्रं, तच्च तत्संस्थानं च, संस्थानम्-आकारस्तेन संस्थितो-व्यवस्थितो यः स तथा" । 'जाव उट्ठाए उट्ठेइ' इति यावत्करणात् 'वज्जरिसहसंघयणे कणगपुलगनिघसपम्हगोरे उग्गतवे दित्ततवे तत्ततवे महातवे उराले घोरे घोरगुणे घोरतवस्सी घोरबंभचेरवासी उच्छूढसरीरे संखित्तविपुलतेयलेसे चउदसपुव्वी चउनाणोवगए सव्वक्खरसन्निवाई समणस्स भगवतो महावीरस्स अदूरसामन्ते उड्ढंजाणू अहोसिरे झाणकोट्ठोवगए संजमेणं तवसा अप्पाणं भावेमाणे विहरइ ।

तए णं से भगवं गोयमे जायसड्ढे जायसंसए जायकोऊहल्ले उप्पन्नसड्ढे उप्पन्नसंसए उप्पन्नकोऊहल्ले संजायसड्ढे संजायसंसए संजायकोऊहल्ले समुप्पण्णसड्ढे समुप्पण्णसंसए समुप्पण्णकोऊहल्ले उट्ठाए उट्ठेइ' इति द्रष्टव्यम्, तत्र नाराचमुभयतो मर्कटबन्धः, ऋषभस्तदुपरि वेष्टनपट्टः, कीलिका अस्थित्रयस्यापि भेदकमस्थि, एवंरूपं संहननं यस्य स तथा । तथा कनकस्य-सुवर्ण्णस्य यः पुलकः-लवस्तस्य यो निकषः-कषपट्टके रेखारूपस्तथा 'पद्म'ग्रहणेन 'पद्मकेसराणि' उच्यन्ते, 'अवयवे समुदायोपचारात्' यथा देवदत्तस्य हस्ताग्ररूपोऽवयवोऽपि देवदत्तः, तथा च देवदत्तस्य हस्ताग्रं स्पृष्ट्वा लोको वदति-'स्पृष्टो मया देवदत्त' इति, कनकपुलकनिकषवत् पद्मवच्च यो गौरः स कनकपुलकनिकषपद्मगौरः, अथवा कनकस्य यः पुलकः-द्रवत्वे सति बिन्दुस्तस्य निकषो वर्णतः सदृशः कनकपुलकनिकषः, तथा पद्मवत्-पद्मकेसरवत् यो गौरः स पद्मगौरः, ततः पदद्वयस्य कर्म्मधारयसमासः, अयं च विशिष्टचरणरहितोऽपि शङ्क्येत, तत आह-'उग्गतवे' इति उग्रम्-अधृष्यं तपः-अनशनादि यस्य स तथा, यदन्येन प्राकृतेन पुंसा न शक्यते चिन्तयितुमपि मनसा, तद्विधेन तपसा युक्त इत्यर्थः, तथा दीप्तं-जाज्वल्यमानदहन इव कर्म्मवनगहनदहनसमर्थतया ज्वलितं तपो-धर्म्मध्यानादि यस्य स तथा, 'तत्ततवे' इति तप्तं तपो येन स तप्ततपाः, एवं हि तेन तपस्तप्तं येन सर्वाण्यपि अशुभानि कर्म्माणि भस्मसात् कृतानीति, 'महातवे' इति महत्-प्रशस्तम्[१] आशंसादोषरहितत्वात् तपो यस्य स महातपाः, तथा 'उराले' इति उदारः-प्रधानः, अथवा उरालो-भीष्मः उग्रादिविशिष्टतपःकरणतः पार्श्वस्थानाम्-अल्पसत्त्वानामतिभयानक इति भावः, तथा घोरो-निर्घृणः परीषहेन्द्रियादिरिपुगणविनाशमधिकृत्य निर्दय इति यावत्, तथा घोरा-अन्यैर्दुरनुचरा गुणा[२] मूलगुणादयो यस्य स घोरगुणः, तथा घोरैस्तपोभिस्तपस्वी

१. प्रशस्तं प्रधानं तपो - JEK । २. गुणादयो यस्य - JEK ।

घोरतपस्वी, 'घोरबंभचेरवासी' इति घोरं-दारुणमल्पसत्त्वैर्दुरनुचरत्वात् ब्रह्मचर्यं यत् तत्र वस्तुं शीलं यस्य स तथा, 'उच्छूढसरीरे' इति उच्छूढम्-उज्झितमिवोज्झितं संस्कारपरित्यागात् शरीरं येन स उच्छूढशरीरः, 'संखित्तविउलतेउलेसे' इति सङ्क्षिप्ता-शरीरान्तर्गतत्वेन ह्रस्वतां गता विपुला-विस्तीर्णा अनेकयोजनप्रमाणक्षेत्राश्रितवस्तुदहनसमर्थत्वात् तेजोलेश्या-विशिष्ट-तपोजन्यलब्धिविशेषप्रभवा तेजोज्वाला यस्य स तथा, 'चउदसपुव्वी' इति चतुर्दश पूर्व्वाणि विद्यन्ते यस्य, तेनैव तेषां रचितत्वाद् असौ चतुर्दशपूर्वी, अनेन तस्य श्रुतकेवलितामाह[१], स चावधिज्ञानादिविकलोऽपि स्यादत आह-'चउनाणोवगए' मति-श्रुता-ऽवधि-मनःपर्याय-ज्ञानचतुष्टयसमन्वितः[२], उक्तविशेषणद्वययुक्तोऽपि कश्चिन्न समग्रश्रुतविषयव्यापिज्ञानो भवति, चतुर्दशपूर्वविदामपि षट्स्थानपतितत्वेन श्रवणादत आह-'सर्वाक्षरसन्निपाती' अक्षराणां सन्निपाताः-संयोगाः अक्षरसन्निपाताः, सर्वे च ते अक्षरसन्निपाताश्च सर्वाक्षरसन्निपातास्ते यस्य ज्ञेयाः स तथा, किमुक्तं भवति ?-या काचित् जगति पदानुपूर्व्वी वाक्यानुपूर्व्वी वा सम्भवति, ताः सर्वा अपि जानातीति, एवंगुणविशिष्टो भगवान् विनयराशिरिव साक्षादितिकृत्वा शिष्याचारत्वाच्च श्रमणस्य भगवतो महावीरस्यादूरसामन्ते विहरतीति योगः, तत्र दूरं-विप्रकृष्टं, सामन्तं-सन्निकृष्टं तत्प्रतिषेधाददूरसामन्तं, ततो नातिदूरे नातिनिकटे इत्यर्थः, किंविशिष्टः सन् तत्र विहरति इत्यत आह-'ऊड्ढंजाणू अहोसिरे' ऊर्ध्वं जानुनी यस्यासावूर्ध्वजानुः, अधःशिरा[३] नोर्ध्वं तिर्यग्वा विक्षिप्तदृष्टिः किन्तु नियतभूभागनियमित-दृष्टिरित्यर्थः, 'झाणकोट्ठोवगए' इति ध्यानं-धर्मध्यानं शुक्लध्यानं च, तदेव कोष्ठः-कुशूलो ध्यानकोष्ठस्तमुपगतो[४] ध्यानकोष्ठोपगतो, यथा हि कोष्ठके धान्यं प्रक्षिप्तमविप्रसृतं भवति, एवं भगवानपि ध्यानतोऽविप्रकीर्णेन्द्रियान्तःकरणवृत्तिरित्यर्थः, 'संयमेन' पञ्चाश्रवणनिरोधादि-लक्षणेन तपसा-अनशनादिना, 'च'शब्दोऽत्र समुच्चयार्थो लुप्तो द्रष्टव्यः, संयमतपोग्रहण-मनयोः प्रधानमोक्षाङ्गताख्यापनार्थं, प्राधान्यं संयमस्य नवकर्मानुपादानहेतुत्वेन तपसश्च पुराणकर्म्मनिर्जराहेतुत्वेन, तथाहि-अभिनवकर्म्मानुपादानात् पुराणकर्म्मक्षपणाच्च जायते सकलकर्म्मक्षयलक्षणो मोक्षस्ततो भवति संयमतपसोर्मोक्षं प्रति प्राधान्यमिति । 'अप्पाणं भावेमाणे विहरति' इति, आत्मानं वासयन् तिष्ठति ।

'तए णं' इत्यादि, ततो ध्यानकोष्ठोपगतविहरणादनन्तरं 'ण'मिति वाक्यालङ्कारे, स भगवान् गौतमो 'जातसड्ढे' इत्यादि, जातश्रद्धादिविशेषणविशिष्टः सन् उत्तिष्ठतीति योगः, तत्र जाता-

---

१. वलित्वमाह - G । २. ज्ञानरूपचतु - JEK । ३. ेरो - JEK ॥ ४. ध्यानमु - JEK ॥

प्रवृत्ता श्रद्धा-इच्छा वक्ष्यमाणार्थतत्त्वावगमं प्रति यस्याऽसौ जातश्रद्धः, तथा जातः संशयो यस्य स जातसंशयः, संशयो नाम अनवधारितार्थज्ञानं, स चैवम्-इत्थं नाम अस्य दिव्या देवर्द्धिर्विस्तृता अभवद् इदानीं सा क्व गता ? इति, तथा 'जायकुतूहले' इति जातं कुतूहलं यस्य स जातकुतूहलः, जातौत्सुक्य इत्यर्थः, यथा 'कथममुमर्थं भगवान् प्ररूपयिष्यति ?' इति, तथा 'उप्पन्नसड्ढे इति' उत्पन्ना प्रागभूता सती भूता श्रद्धा यस्याऽसौ उत्पन्नश्रद्धः, अथ 'जातश्रद्धः इत्येतदेवास्तु, किमर्थमुत्पन्नश्रद्धः? इति, प्रवृत्तश्रद्धत्वेनैवोत्पन्नश्रद्धत्वस्य लब्धत्वात्, न हि अनुत्पन्ना श्रद्धा प्रवर्त्तते' इति, अत्रोच्यते, हेतुत्वप्रदर्शनार्थं, तथाहि-कथं प्रवृत्तश्रद्धः ?, उच्यते, यत उत्पन्नश्रद्धः इति हेतुत्वदर्शनं चोपपन्नं, तस्य काव्यालङ्कारत्वात् यथा '**प्रवृत्तदीपाम-प्रवृत्तभास्करां, प्रकाशचन्द्रां बुबुधे विभावरीम्**' [ ] इत्यत्र, अत्र हि यद्यपि प्रवृत्तदीपादित्वादेवाऽ-प्रवृत्तभास्करत्वमवगतं तथाप्यप्रवृत्तभास्करत्वं प्रवृत्तदीपत्वादेर्हेतुतयोपन्यस्तमिति सम्यक्, 'उप्पन्नसड्ढे उप्पन्नसंसये' इति प्राग्वत्, तथा 'संजायसड्ढे' इत्यादि पदषट्कं प्राग्वत्, नवरमिह 'सम्'शब्दः प्रकर्षादिवचनो वेदितव्यः, 'उट्ठाए उट्ठेइ' त्ति उत्थानमुत्था-ऊर्द्ध्वं वर्त्तनं, तया उत्तिष्ठति, इह 'उट्ठेइ' इत्युक्ते क्रियारम्भमात्रमपि प्रतीयेत, यथा वक्तुमुत्तिष्ठते[१] ततस्तद्व्यवच्छेदार्थमुत्थायेत्युक्तं उत्थया उत्थाय 'जेणेवे'त्यादि, यस्मिन् दिग्भागे श्रमणो भगवान् महावीरो वर्त्तते 'तेणेवे'ति तस्मिन्नेव दिग्भागे उपागच्छति, उपागत्य च श्रमणं त्रिकृत्वः-त्रीन् वारान् आदक्षिणप्रदक्षिणीकरोति, आदक्षिणप्रदक्षिणीकृत्य च वन्दते नमस्यति, वन्दित्वा नमस्यित्वा एवमवादीत् ॥ १२१ ॥

सूत्र-१२२ : सूरियाभस्स णं भंते ! देवस्स एसा दिव्वा देविड्ढी दिव्वा देवज्जुती दिव्वे देवाणुभावे कहिं गते कहिं अणुप्पविट्ठे ? गोयमा ! सरीरं गते सरीरं अणुप्पविट्ठे ॥ १२२ ॥

[१२२] '**सूरियाभस्स णं भंते !**' इत्यादि, '**कहिं गए**' इति क्व गतः ?, तत्र[२] गमनमन्तरप्रवेशाभावेऽपि दृष्टं, यथा भित्तौ गता धूलिरिति, एषोऽपि दिव्यानुभावो यद्येवं क्वचित्प्रत्यासन्ने प्रदेशे गतः स्यात्ततो दृश्येत-न चासौ दृश्यते, ततो भूयः पृच्छति-'**कहिं अणुपविट्ठे**' इति क्वाऽनुप्रविष्टः ? क्वाऽन्तर्लीनः इति भावः । भगवानाह-**गौतम ! शरीरं गतः शरीरमनुप्रविष्टः** ॥ १२२ ॥

---

१. ०मुत्तिष्ठति - G । ०मुपतिष्ठते ततः-पा० ५-इति G पृ. १४९ टि. ॥ २. तत्र गमन० JEK नास्ति । तत्र गमनम् अन्तरमनु प्र० G ॥

सूत्र-१२३. से केणट्ठेणं भंते ! एवं वुच्चति–सरीरं गते सरीरं अणुप्पविट्ठे ? गोयमा ! से जहानामए कूडागारसाला सिया–दुहतो लित्ता गुत्ता गुत्तदुवारा णिवाया णिवायगंभीरा । तीसे णं कूडागारसालाए अदूरसामंते, एत्थ णं महेगे जणसमूहे चिट्ठइ, तए णं से जणसमूहे एगं महं अब्भवद्दलगं वा वासवद्दलं वा महावायं वा एज्जमाणं पासति, पासित्ता तं कूडागारसालं अंतो अणुप्पविसित्ता णं चिट्ठति । से तेणट्ठेणं गोयमा ! एवं वुच्चति–सरीरं गए, सरीरं अणुप्पविट्ठे ॥ १२३ ॥

[१२३] पुनः पृच्छति-'**से केणट्ठेण**'मित्यादि, 'अथ केनार्थेन-केन हेतुना **भदन्त ! एवमुच्यते-शरीरं गतः शरीरमनुप्रविष्टः ?**', भगवानाह-'**गौतम ! 'से जहानामए'** इत्यादि, कूटस्येव-पर्वतशिखरस्येवाकारो यस्याः सा कूटाकारा, यस्या उपरि आच्छादनं शिखराकारं सा कूटाकारेति भावः, कूटाकारा चासौ शाला च कूटाकारशाला, यदि वा कूटाकारेण शिखराकृत्योपलक्षिता शाला **कूटाकारशाला स्यात्, 'दुहतो लित्ता'** इति बहिरन्तश्च गोमयादिना लिप्ता **गुप्ता**[१]-बहिः प्राकारावृता गुप्तद्वारा द्वारस्थगनाद्, यदि वा **गुप्ता-गुप्तद्वारा**-केषाञ्चित् द्वाराणां स्थगितत्वात् केषाञ्चिच्चास्थगितत्वादिति, **निवाता**-वायोरप्रवेशात्, किल महद् गृहं निवातं प्रायो न भवति तत आह-**निवातगम्भीरा**-निवाता सती → गम्भीरा[२] निवातगम्भीरा, निवाता सती ← विशाला इत्यर्थः, ततस्तस्याः **कूटाकारशालाया अदूर-सामन्ते**-नातिदूरे निकटे वा प्रदेशे **महान् एकोऽन्यतरो जनसमूहस्तिष्ठति,** स च **एकं महत्** अभ्ररूपं वार्द्दलं **अभ्रवार्द्दलं,** धारानिपातरहितं सम्भाव्यवर्षं वार्दलमित्यर्थः, वर्षप्रधानं वार्दलकं **वर्षवार्दलकं** वर्षं [३]कुर्वन्तं वार्दलकं, **महावातं वा 'एज्जमाण**'मिति आयान्तम्-आगच्छन्तं **पश्यति, दृष्ट्वा** च तं '**कूडागारसालं**' द्वितीया षष्ठ्यर्थे, तस्याः कूटाकारशालाया **अन्तरं** ततोऽनुप्रविश्य **तिष्ठति,** एवं सूर्याभस्यापि देवस्य सा तथा विशाला दिव्या देवर्धिर्दिव्या देवद्युतिर्दिव्यो देवानुभावः शरीरमनुप्रविष्टः '[४]**से एणट्ठेण**'मित्यादि, अनेन [५]कारणेन **गौतम ! एवमुच्यते**-'सूरियाभस्से'त्यादि ॥ १२३ ॥ भूयो गौतमः पृच्छति-

सूत्र-१२४: 'कहिं णं' भंते! सूरियाभस्स देवस्स सूरियाभे नामं विमाणे

---

१. गुप्ता JEK नास्ति ॥ २. → ←चिह्नद्वयमध्यवर्ति पाठः - JEK नास्ति ॥ ३. कुर्वत् - G ॥ ४. तएण - JKEII ५. प्रकारेण-मु । प्रकारेण न गौ - KII

पण्णत्ते? गोयमा ! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जातो भूमिभागातो उड्ढं चंदिम-सूरिय-गहगण-नक्खत्त-तारारूवाणं [पुरओ] बहूतिं जोयणाइं बहूतिं जोयण-सयाइं एवं सहस्साइं सयसहस्साइं बहुगीतो जोयणकोडीतो बहुगीतो जोयणकोडाकोडीतो →बहुगीतो जोयणसयसहस्सकोडीतो← उड्ढं दूरं वीतीवइत्ता, एत्थ णं सोहम्मे नामं कप्पे पण्णत्ते–पाईणपडीणायते उदीणदाहिणवित्थिण्णे अद्धचंदसंठाणसंठिते अच्चिमालिभासरासि-वण्णाभे, असंखेज्जातो जोयणकोडाकोडीतो आयामविक्खंभेणं, असंखेज्जाओ जोयणकोडाकोडीतो परिक्खेवेणं, [सव्वरयणामए अच्छे सण्हे लण्हे घट्ठे मट्ठे णीरए निम्मले निप्पंके निक्कंकडच्छाए सप्पभे समरीइए सउज्जोए पासादीए दरिसणिज्जे अभिरूवे पडिरूवे] एत्थ णं सोधम्माणं देवाणं बत्तीसं विमाणावाससयसहस्साइं भवंति इति मक्खायं । ते णं विमाणा सव्वरयणामया अच्छा जाव पडिरूवा ॥ १२४ ॥

[१२४] **क्व सूर्याभस्य देवस्य सूर्याभं विमानं प्रज्ञप्तं ?**, भगवानाह-**गौतम !** अस्मिन् **जम्बूद्वीपे** यो **मन्दरः पर्वतस्तस्य दक्षिणतोऽस्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद् भूमिभागादूर्ध्वं चन्द्र-सूर्य-ग्रहगण-नक्षत्र-तारारूपाणामपि पुरतो बहूनि योजनानि बहूनि योजनशतानि** ततो बुद्ध्या बहुबहुतरोत्प्लवनेन बहूनि योजनसहस्राण्येवमेव बहूनि योजनशतसहस्राणि एवमेव च **बह्वीर्योजनकोटीः** एवमेव च **बह्वीर्योजनकोटीकोटीरूर्ध्वं दूरमुत्प्लुत्य अत्र**-सार्द्धरज्जुप्रमाणे प्रदेशे **सौधर्म्मो नाम कल्पः प्रज्ञप्तः**, स च **प्राचीनाऽपाचीनाऽऽयतः**, पूर्वापराऽऽयतः इत्यर्थः, **उदग्दक्षिणविस्तीर्णः**, **अर्द्धचन्द्रसंस्थानसंस्थितो**, द्वौ हि सौधर्मेशानदेवलोकौ समुदितौ परिपूर्णचन्द्रमण्डलसंस्थान-संस्थितौ, तयोश्च मेरोर्दक्षिणवर्ती सौधर्मकल्प उत्तरवर्ती ईशानकल्पः, ततो भवति सौधर्म्मकल्पः [अर्ध] **चन्द्रसंस्थानसंस्थितः**, '**अच्चिमाली**'इति अर्चींषि-किरणानि तेषां माला अर्च्चि-

१. वहुगीतो जोयणसयसहस्सकोडीतो - GV नास्ति । मु. आदर्शेषु अस्ति ॥ २. मक्खाया JLB (क, ख, ग, घ, च, छ) । "मे अक्खायं - मक्खायं-इति G टिप्पणे पृ. १५३ ॥ ३. °हुतरोल्लङ्घनेन - G ॥ ४. °शानौ देव° - G ॥ ५. अर्चीनि - G । अर्चिस्-अर्ची सन्तेदन्तौ-शब्दरत्नाकर का० ४ ..... इति G पृ. १५१ टि. ॥

माला सा अस्यास्तीति अर्च्चिमाली, किरणमालासङ्कुल इत्यर्थः, **असङ्ख्येययोजनकोटीकोटीः 'आयामविक्खंभेणं'** ति आयामश्च विष्कम्भश्चायामविष्कम्भं समाहारो द्वन्द्वस्तेन, आयामेन च विष्कम्भेन चेत्यर्थः, **असङ्ख्येया योजनकोटीकोटीः 'परिक्खेवेणं'** परिधिना **'सव्वरयणामए'** इति सर्वात्मना रत्नमयः **'जाव पडिरूवे'** इति यावत्करणात् 'अच्छे सण्हे घट्ठे मट्ठे' इत्यादिविशेषकदम्बकपरिग्रहः, **'तत्थ ण'**मित्यादि, तत्र **सौधर्म्मे कल्पे द्वात्रिंशत् विमानशतसहस्राणि भवन्ति इत्याख्यातं** मया शेषैश्च तीर्थकृद्भिः। **'ते णं विमाणे'**त्यादि, तानि च विमानानि सूत्रे पुंस्त्वं प्राकृतत्वात् **सर्वरत्नमयानि**-सामस्त्येन रत्नमयानि **'अच्छानि'** आकाशस्फटिकवदतिनिर्म्मलानि, अत्रापि **यावत्**करणात् 'सण्हा लण्हा घट्ठा [२]मट्ठा नीरया' इत्यादि विशेषणजातं द्रष्टव्यं, तच्च प्रागेवानेकशो व्याख्यातम् ॥ १२४ ॥

सूत्र - १२५ : तेसिं णं विमाणाणं बहुमज्झदेसभाए पंच वडेंसगा पन्नत्ता, तं जहा—असोगवडेंसते सत्तवण्णवडेंसते चंपगवडेंसते चूयवडेंसते मज्झे सोधम्मवडेंसगे ते णं वडेंसगा सव्वरयणामया अच्छा [३]जाव पडिरूवा ॥ १२५ ॥

[१२५] **'तेसिं ण'**मित्यादि, तेषां **विमानानां बहुमध्यदेशभागे** त्रयोदशप्रस्तटे सर्वत्रापि विमानावतंसकानां स्वस्वकल्पचरमप्रस्तटवर्तित्वात् **पञ्चावतंसकाः प्रज्ञप्ताः, तद्यथा-अशोकावतंसकः**-अशोकावतंसकनामा, स च पूर्वस्यां दिशि, ततो दक्षिणस्यां **सप्तपर्णावतंसकः**, पश्चिमायां **चम्पकावतंसकः**, उत्तरस्यां **चूतावतंसकः, मध्ये सौधर्मावतंसकः, [४]ते च** पञ्चापि विमाना**वतंसकाः सर्वरत्नमया 'अच्छा जाव पडिरूवा'** इति **यावत्**करणादत्रापि 'सण्हा लण्हा घट्ठा मट्ठा' इत्यादि विशेषणजातमवगन्तव्यम् ॥ १२५ ॥

सूत्र-१२६ : तस्स णं सोधम्मवडेंसगस्स महाविमाणस्स पुरत्थिमेणं तिरियं असंखेज्जाइं जोयणसयसहस्साइं वीतीवइत्ता, एत्थ णं सूरियाभस्स देवस्स सूरियाभे नामं विमाणे पण्णत्ते—अद्धतेरस जोयणसयसहस्साइं आयामविक्खंभेणं [५]ऊयालीसं च सयसहस्साइं बावन्नं च सहस्साइं अट्ठ य

---

१. जनकोटीः - पा. ५-४ भा-१ इति G टिप्पणे पृ. १५३ ॥ २. मट्ठा - G नास्ति ॥ ३. द्र. सू० २१ । ४. तेऽपि प° - G ॥ ५. JBL । गुणयालीसं-मु. V । जयालीसं-K ।

अडयाले जोयणसते परिक्खेवेणं, [सव्वरयणामए अच्छे जाव पडिरूवे] ॥ १२६ ॥

[१२६] [१]तस्य च **सौधर्मावतंसकस्य पूर्वस्यां** दिशि **तिर्यक् असङ्ख्येयानि योजनशतसहस्राणि व्यतिव्रज्य**-अतिक्रम्याऽत्र **सूर्याभस्य देवस्य सूर्याभं नाम विमानं प्रज्ञप्तम्,** अर्द्धं त्रयोदशं येषां तानि **अर्द्धत्रयोदशानि,** सार्द्धानि द्वादशेत्यर्थः, **योजनशतसहस्राणि आयामविष्कम्भेन, एकोनचत्वारिंशत् योजनशतसहस्राणि द्विपञ्चाशत्[२]सहस्राणि अष्टौ च योजनशतानि अष्टचत्वारिंशानि** अष्टचत्वारिंशदधिकानि ३९५२८४८ किञ्चिद्विशेषाधिकानि **'परिक्षेपेण'** परिधिना, इदं च परिक्षेपपरिमाणं **"विक्खंभवग्गदहगुण करणी वट्टस्स परिरओ होइ[४]"** [लघुसं.ग्र.,] इति करणवशात् स्वयमानेतव्यं, सुगमत्वात् ॥ १२६ ॥

सूत्र-१२७ : से णं एगेणं पागारेणं सव्वतो समंता संपरिक्खित्ते । से णं पागारे तिण्णि जोयणसयाइं उड्ढं उच्चत्तेणं, मूले एगं जोयणसयं विक्खंभेणं, मज्झे पन्नासं जोयणाइं विक्खंभेणं उप्पिं पणवीसं जोयणाइं विक्खंभेणं । मूले वित्थिण्णे मज्झे संखित्ते उप्पिं तणुए, गोपुच्छसंठाणसंठिते [५]सव्वकणगा(रयणा)मते अच्छे [६]जाव पडिरूवे ॥ १२७ ॥

[१२७] **'से णं एगेण'**मित्यादि, तद्विमानमेकेन **प्राकारेण सर्वतः**-सर्वासु दिक्षु **समन्ततः**-सामस्त्येन **परिक्षिप्तम्** । **'से णं पागारे'** इत्यादि, स प्राकारः **त्रीणि योजनशतानि ऊर्ध्वम्-उच्चैस्त्वेन, मूले एकं योजनशतं विष्कम्भेण, मध्यभागे पञ्चाशत्,** मूलादारभ्य मध्यभागं यावत् योजने योजने योजनत्रिभागस्य विष्कम्भतस्त्रुटितत्वात्, **उपरि**-मस्तके **पञ्चविंशतियोजनानि विष्कम्भेण,** मध्यभागादारभ्योपरितनमस्तकं यावत् योजने योजने योजनषड्भागस्य विष्कम्भतो हीयमानतया लभ्यमानत्वात्, अत एव **मूले विस्तीर्णो मध्ये संक्षिप्तः,** पञ्चाशतो योजनानां त्रुटितत्वात्, **उपरि तनुकः** पञ्चविंशतियोजनमात्रविस्तारात्मकत्वात्, अत एव **गोपुच्छसंस्थानसंस्थितः, 'सव्वरयणामए अच्छे'** इत्यादि विशेषणजातं प्राग्वत् ॥ १२७ ॥

---

१. अस्य च-मु. । अस्यैव सौ॰ - G ॥ २. द्विपञ्चाशत्सहस्राणि JBE नास्ति ॥ ३. अयमर्थो मूले न प्रतिभाति - इति - G टिप्पणे पृ. १५४ ॥ ४. जम्बूद्वीपप्रज्ञप्तिवृत्तिः पृ. १९ द्रष्टव्या । ५. सव्वकणगामते JBLK मु. (क, ख, ग, घ, च, छ) । ६. द्र० सू० २३ ।

सूत्र-१२८ : से णं पागारे [1]णाणाविहपंचवण्णेहिं कविसीसएहिं उवसोभिते, तं जहा–किण्हेहिं नीलेहिं लोहितेहिं हालिद्देहिं सुक्किलेहिं कविसीसएहिं । ते णं कविसीसगा [एगं] जोयणं आयामेणं, अद्धजोयणं विक्खंभेणं, देसूणं जोयणं उड्ढं उच्चत्तेणं, [2]सव्वमणि(रयणा)मया अच्छा जाव पडिरूवा ॥ १२८ ॥

[१२८] **'से णं पागारे'** इत्यादि, 'स प्राकारो' **'णाणाविहपंचवन्नेहिं'** इति नानाविधानि च तानि पञ्चवर्णानि च नानाविधपञ्चवर्णानि तैः, नानाविधत्वं च पञ्चवर्णापेक्षया द्रष्टव्यं कृष्णादिवर्णतारतम्यापेक्षया वा, पञ्चवर्णत्वमेव प्रकटयति- **'कण्हेहिं'** इत्यादि, **'ते णं कविसीसगा'** इत्यादि, तानि कपिशीर्षकाणि प्रत्येकं **योजनमेकमायामतो**-दैर्घ्येण, **अर्द्धं योजनं विष्कम्भेण, देशोनयोजनमुच्चैस्त्वेन, 'सव्वरयणामया'** इत्यादि विशेषणजातं प्राग्वत् ॥ १२८ ॥

सूत्र-१२९ : सूरियाभस्स णं विमाणस्स एगमेगाते बाहाते दारसहस्सं-दारसहस्सं भवतीति मक्खायं । ते णं दारा पंच जोयणसयाइं उड्ढं उच्चत्तेणं, अड्ढाइज्जाइं जोयणसयाइं विक्खंभेणं, तावइयं चेव पवेसेणं, सेता वरकण-गथूभियागा ईहामिय-उसभ-तुरग-णर-मगर-विहग-वालग-किन्नर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलयभत्तिचित्ता खंभुग्गय-वइरवेतिया-परिगयाभिरामा विज्जाहर-जमल-जुयल-जंतजुत्ता पिव अच्चीसहस्स-[3]मालिणीया रूवगसहस्सकलिया भिसमाणा भिब्भिसमाणा चक्खुल्लोयण-लेसा सुहफासा [4]सस्सिरीयरूवा ॥ १२९ ॥

[१२९] **'सूरियाभस्स ण'**मित्यादि, **एकैकस्यां बाहायां द्वारसहस्र**मिति सर्व-सङ्ख्यया चत्वारि द्वारसहस्राणि, **तानि च द्वाराणि** प्रत्येकं **पञ्चयोजनशतान्यूर्ध्वम् उच्चैस्त्वेन, अर्द्धतृतीयानि योजनशतानि विष्कम्भतः, 'तावइयं चेवे'** ति अर्द्धतृतीयान्येव

१. णाणामणिपंचवण्णेहिं B (क, ख, ग, घ, च, छ) । २. सव्वमणिमया JBLK (क, ख, ग, घ, च, छ) । सव्वरयणामया-G । ३. JBL मु. (क, ख, ग, घ, च, छ) । °मालणीया - VG ॥ ४. सिस्सि° BL । सिस्सी° J ।

योजनशतानि **प्रवेशतः**, '**सेया**' इत्यादि, तानि च द्वाराणि [१]सर्वाण्यपि श्वेतानि-श्वेतवर्णोपेतानि बाहुल्येनाङ्करत्नमयत्वाद्, '**वरकणगथूभियागा**' इति वरकनका-वरकनकमयी स्तूपिका-शिखरं येषां तानि तथा, '**ईहामिगउसभतुरगनरमगरविहगवालगकिन्नररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्ता खंभुग्गयवयरवेइयापरिगयाभिरामा विज्जाहरजमलजुयलजंतजुत्ता विव अच्चीसहस्समालिणीया रूवगसहस्सकलिया भिसमाणा भिब्भिसमाणा चक्खुल्लोयणलेसा सुहफासा सस्सिरीयरूवा**' इति विशेषणजातं यानविमानवद्भावनीयम् ॥ १२९ ॥

सूत्र-१३० : वण्णो दाराणं तेसिं होति, तं जहा—वइरामया णिम्मा, रिट्ठामया पइट्ठाणा, [२]वेरुलियमया खंभा, जायरूवोवचियपवरपंचवण्णणाणामणिरयणकोट्टिमतला, हंसगब्भमया एलुया, गोमेज्जमया इंदकीला, लोहियक्खमतीतो दारचेडाओ, जोईरसमया उत्तरंगा[३], लोहियक्खमतीतो सूतीतो वइरामया संधी, नाणामणिमया समुग्गया, वइरामया अग्गला अग्गलपासाया, रय[४]यामतीतो आवत्तणपेढियातो, अंकुत्तरपासगा, निरंतरियघणकवाडा, भित्तीसु चेव भित्तिगुलिया छप्पन्ना तिण्णि होंति, गोमाणसिता तत्तिया, णाणामणिरयणवालरूवग-लीलट्ठियसालभंजियागा, वइरामया कूडा, [५]रययामया उस्सेहा, सव्वतवणिज्जमया उल्लोया, णाणामणिरयण-जालपंजर-मणिवंस[६]ग-लोहियक्ख-पडिवंस[७]ग-रययभोम[८]ा, अंकामया पक्खा पक्खबाहातो, जोतीरस[९]मया वंसा वंसकवेल्लुयातो, रययामईतो पट्टियातो, जायरूवमतीतो ओहाडणीतो, वइरामतीतो उवरिपुंछणीतो, रयणामईतो पट्टियातो, सव्वसेयरययामते छायणे, [१०]अंकमया कणगकूड-

---

१. JEKG । सर्वाण्युपरि श्वे॰. मु. भा. २ ॥ २. वेरुलियरुइल (र-LK) खंभा-BJLK । ३. "अतः परं जीवाभिगमे ३।३०० 'वेरुलियामया कवाडा' इति पाठो विद्यते ।" इति V पृ. ११२ टि.३ ॥ ४. वइरामई (जी॰ ३।३००); आह च जीवाभिगममूलटीकाकारः - 'अर्गलाप्रासादा यत्रार्गला नियम्यते' इति । एतौ द्वौ अपि वज्ररत्नमयौ (वृ) । रयणमतीतो - LK ॥ ५. रययामय-B मूल । रयणा (ण-J)मय B संशो. J (क, ख, ग, घ, च, छ); द्र. जीवाजीवाभिगमे (३।३००) ६-७. °वंस° JLBK (क, ख, ग, घ, च, छ) । ८. °भोम्मा K (क, ख, ग, च) । ९. °रसा° K (क, ख, ग, च) । १०. JBL । अंकमय° V ।

तवणिज्जथूभियागा, सेया संखतल-विमल-निम्मल-दधिघण-गोखीर-फेण-रययणिगरप्पगासा, तिलगरयणद्धचंदचित्ता, नाणामणिदामालंकिया, अंतो बहिं च सण्हा, तवणिज्ज-वालुया-पत्थडा, सुहफासा सस्सिरीयरूवा पासादीया दरिसणिज्जा अभिरूवा पडिरूवा ॥ १३० ॥

[१३०] **'वन्नो दाराणं तेसिं होइ'** इति तेषां द्वाराणां वर्णः-स्वरूपव्यावर्णनम् अयं भवति, तमेव कथयति-**'तं जहे'**त्यादि, तद्यथा-**'वइरामया णिम्मा'** इति नेमा नाम द्वाराणां भूमिभागादूर्ध्वं निष्क्रामन्तः प्रदेशास्ते सर्वे वज्रमया-वज्ररत्नमयाः, वज्रशब्दस्य दीर्घत्वं प्राकृतत्वात्, एवमन्यत्रापि द्रष्टव्यम् । **'रिट्ठामया पइट्ठाणा'** रिष्टमयानि-रिष्टरत्नमयानि प्रतिष्ठानानि-मूलपादाः, **'वेरुलियमया खंभा'** इति वैडूर्यरत्नमयाः स्तम्भाः, **'जायरूवोवचियपवरपंचवन्नमणिरयणकुट्टिमतला'** जातरूपेण-सुवर्णेन उपचितैः-युक्तैः प्रवरैः-प्रधानैः पञ्चवर्णैर्मणिभिः-चन्द्रकान्तादिभिः रत्नैः-कर्केतनादिभिः कुट्टिमतलं-बद्धभूमितलं येषां ते, तथा **'हंसगब्भमया एलुया'** हंसगर्भमया-हंसगर्भाख्यरत्नमया एलुका-देहल्यः, **'गोमेज्जमया इंदकीला'** इति गोमेज्जकरत्नमया इन्द्रकीलाः, **'लोहियक्खमईओ'** लोहिताक्षरत्नमय्यः **'चेडाओ'** इति द्वारशाखाः, **'जोइरसमया उत्तरंगा'** इति द्वारस्योपरि तिर्यग्व्यवस्थितम् उत्तरङ्गं तानि ज्योतीरसमयानि-ज्योतीरसाख्यरत्नात्मकानि, **'लोहियक्खमईओ'** लोहिताक्षमय्यो लोहिताक्षरत्नात्मिकाः सूचयः-फलकद्वयसम्बन्धविघटनाऽभावहेतुपादुकास्थानीयाः, **'वइरामया संधी'** वज्रमयाः सन्धयः सन्धिमेलाः फलकानां, किमुक्तं भवति? -वज्ररत्नपूरिताः फलकानां सन्धयः, **'नाणामणिमया समुग्गया'** इति समुद्गका इव समुद्गकाः- शूचिकागृहाणि तानि नानामणिमयानि, **'वयरामया अग्गला अग्गलपासाया'** अर्गलाः-प्रतीताः, अर्गलाप्रासादा यत्रार्गला नियम्यन्ते, आह च **जीवाभिगममूलटीकाकारः-** **"अर्गलाप्रासादा यत्राऽर्गला नियम्यन्ते"** [ ] इति एतौ द्वौ अपि वज्ररत्नमय्यौ,

---

१. GJ । रिष्ठमया-रिष्ठरत्न° मु. ॥ २. "भाषायां 'डेलि' इति प्रसिद्धम् । ज्ञाताधर्मकथासूत्रे मूलपाठे 'देहं बलि' शब्दः समागतः- "देहं बलियाए" पृ. १९९ प्र.पं.११ । एतस्य वृत्तौ "देह बलिन्" इति एतस्य आख्यानं देहबलिका....अनुस्वारो नैपातिकः" पृ.२०० प्र.पं. १० । अनयोः देहलि-देहंबलिकाशब्दयोः साम्यं प्रतिभाति । यत्र स्थित्वा 'देह बलिम्' इति कथ्यते तत् स्थानं 'देहबलिका देहली' इति उचितं व्युत्पादनम्" । इति G पृ. १५७ टिप्पणे ॥ ३. K । लोहिताख्यर° विवरणसर्वप्रतिषु- इति G पृ. १५७ टि. ॥ ४. भाषायाम् 'बारसाख' इति G पृ. १५७ टि. ॥ ५. 'ओतरंग' इति भाषाप्रतीतम्-इति G पृ. १५७ टि. ॥ ६. शूतिकागृहाणि-विवरणसर्वप्रतिषु-इति G पृ. १५८ टि. ॥ ७. GE । एते द्वये अपि -मु. ॥

'**रययामयीओ आवत्तणपेढियीओ**' इति आवर्त्तनपीठिका नाम यत्रेन्द्रकीलको भवति, उक्तञ्च विजयद्वारचिन्तायां **जीवाभिगममूलटीकाकारेण**- "**आवर्त्तनपीठिका यत्रेन्द्रकीलको भवति**" [ ] इति, '**अंकुत्तरपासगा**' इति अङ्का-अङ्करत्नमया उत्तरपार्श्वा येषां द्वाराणां तानि अङ्कोत्तरपार्श्वकाणि, '**निरंतरियघणकवाडा**' इति निर्गता अन्तरिका-लघ्वन्तररूपा येषां ते निरन्तरिका, अत एव घना निरन्तरिका घनाः कपाटा येषां द्वाराणां तानि निरन्तरिकघनकपाटानि, '**भित्तिसु चेव भित्तिगुलिया छप्पन्ना तिन्नि होंति**' इति तेषां द्वाराणां प्रत्येकमुभयोः पार्श्वयोः भित्तिषु भित्तिगताः[१] भित्तिगुलिकाः-पीठकस्थानीयाः [२]तिस्रः षट्पञ्चाशत्प्रमाणा भवन्ति, '**गोमाणसिया**' इति गोमनस्यः शय्या '**तत्तिया**' इति तावन्मात्राः षट्पञ्चाशत्त्रिकसङ्ख्याका इत्यर्थः, '**णाणामणिरयणवालरूवगलीलट्ठियसालभंजियागा**' इति इदं द्वारविशेषणमेव, नानामणिरत्नानि-नानामणिरत्नमयानि व्यालरूपकाणि लीलास्थितशालभञ्जिकाश्च-लीलास्थितपुत्तलिका[३] येषु तानि तथा, '**वयरामया कूडा रययामया उस्सेहा**' इति कूडो-माडभागः, [**रजतमयः**] उच्छ्रयः-शिखरम्, आह च **जीवाभिगममूलटीकाकृत्**-"[४]**कूडो माडभाग उच्छ्रयः शिखरम्**" [ ] इति, नवरमत्र शिखराणि तेषामेव माडभागानां सम्बन्धीनि वेदितव्यानि, द्वारशिखराणामुक्तत्वाद् वक्ष्यमाणत्वाच्च, '**सव्वतवणिज्जमया उल्लोया**' उल्लोका-उपरिभागाः सर्वतपनीयमयाः-सर्वात्मना तपनीयरूपसुवर्णविशेषमयाः, '**णाणामणिरयणजालपंजर-मणिवंसग-लोहियक्खपडिवंसग-रययभोमा**' इति मणयो-मणिमया वंशा येषु तानि मणिमयवंशकानि, [५]लोहिताक्षानि-लोहिताक्षमयाः प्रतिवंशा येषु तानि लोहिताक्षप्रतिवंशकानि रजता-रजतमयी भूमिर्येषां तानि रजतभूमानि, प्राकृतत्वात्समासान्तः, मणि-वंशकानि लोहिताक्षप्रतिवंशकानि रजतभूमानि नानामणिरत्नानि-नानामणिरत्नमयानि जालपञ्जराणि-गवाक्षापरपर्यायाणि येषु तानि तथा, पदानां[६]मन्यथोपनिपातः प्राकृतत्वात्, '**अंकामया पक्खा पक्खबाहाओ**' इति अङ्को-रत्नविशेषस्तन्मयाः पक्षास्तदेकदेशभूताः पक्षबाहवोऽपि तदेकदेशभूता एवाङ्कमय्यः, आह च **जीवाभिगममूलटीकाकृत्**-"[७]**अङ्कमयाः पक्षास्तदेकदेशभूता एवं पक्षबाहवोऽपि द्रष्टव्या**" [ ] इति, '**जोईरसामया वंसा वंसकवेल्लुका य**' इति ज्योतीरसं नाम रत्नं तन्मया वंशाः-महान्तः पृष्ठवंशाः, 'वंसकवेल्लुया य' इति महतां

---

१. भित्तिगताः-JKE नास्ति ॥ २. तिषट्पञ्चाशत् त्रिकप्रमाणा- JE पा. ५ । त्रिषट्पञ्चाशत् त्रिक प्रमाणा-भा. १ ॥ ३. पुत्रका JKE । ०पुत्रिकाः जीवा.टी. ॥ ४. 'कूडो माडभागः रजतमयः उत्सेधः शिखरम्' इति जीवाभिगमे - पृ. २०४ पं.१३ इति G पृ. १५९ टि. ॥ ५. JKEG । लोहिताख्यानि-मु. । एवमग्रेऽपि ॥ ६. JKE जीवा.टी. । ०मनन्वयोप० मु. G ॥ ७. तुला -जीवाभिगम. पृ. १८० पं. ८ ॥

पृष्ठवंशानामुभयतस्तिर्यक् स्थाप्यमाना वंशाः, [1]कवेल्लुकानि प्रतीतानि, '**रययामईओ पट्टिआओ**' इति रजतमय्यः पट्टिका-वंशानामुपरि कम्बास्थानीयाः, '**जायरूवमईओ ओहाडणीयो**' जातरूपं-सुवर्णविशेषस्तन्मय्यः 'ओहाडणीओ' अवघाटिन्यः आच्छादनहेतु-कम्बोपरिस्थाप्यमानमहाप्रमाणकिलिञ्चस्थानीयाः, '**वयरामईओ उवरिपुञ्छणीओ**' इति वज्रमय्यो-वज्ररत्नात्मिका अवघाटनीनामुपरि पुञ्छन्यो-निबिडतराच्छादनहेतुश्लक्ष्णतरतृण-विशेषस्थानीयाः, उक्तं च **जीवाभिगममूलटीकाकारेण**-"[2]**ओहाडणीहारग्रहणं महत् क्षुल्लकं तु पुञ्छनी**" [ ] इति '[3]**सव्वसेयरययामयाच्छायणे**' इति सर्वश्वेतं रजतमयं पुञ्छनीनामुपरि कवेल्लुकानामध आच्छादनम् '**अङ्कमयकणगकूडतवणिज्जथूभियागा**' अङ्कमयानि बाहुल्ये-नाङ्करत्नमयानि पक्ष-पक्षबाह्वादीनामङ्करत्नात्मकत्वात्, [4]कनकानि-कनकमयानि कूटानि-महान्ति शिखराणि येषां तानि कनककूटानि, तपनीयाः[5]-तपनीयस्तूपिकानि, ततः पदत्रयस्यापि कर्म्म-धारयः, एतेन यत् प्राक् [6]सामान्यत उत्क्षिप्तं 'सेयावरकणगथूभियागा' इति तदेव प्रपञ्चतो भावितमिति, सम्प्रति तदेव श्वेतत्वमुपसंहारव्याजेन भूय उपदर्शयति-'**सेया**-श्वेतानि, श्वेतत्व-मेवोपमया द्रढयति-'**संखतल-विमल-निम्मल-दधिघण-गोखीरफेण-रययनिगरप्प-गासा**' इति विमलं विगतं मलं यत् शङ्खतलं-शङ्खस्योपरितनो भागो यश्च निर्मलो दधिघनः-घनीभूतं दधि गोक्षीरफेनो रजतनिकरश्च तद्वत् प्रकाशः-प्रतिभासो येषां तानि तथा '**तिलगरयणद्धचंदचित्ता**' इति तिलकरत्नानि-पुण्ड्रविशेषास्तैरर्द्धचन्द्रैश्च चित्राणि-नाना-रूपाणि तिलकरत्नार्द्धचन्द्रचित्राणि, क्वचित् 'सङ्खतलविमलनिम्मलदहिघणगोखीरफेणरय-यनियरप्पगासद्धचंदचित्ताइं' इति पाठः, तत्र पूर्ववत् पृथक् पृथक् व्युत्पत्तिं कृत्वा पश्चात् पदद्वयस्य कर्मधारयः, '**नाणामणिदामालंकिया**' इति नानामणयो-नानामणिमयानि दामानि-मालास्तैरलङ्कृतानि नानामणिदामालङ्कृतानि **अन्तर्बहिश्च श्लक्ष्णानि**-श्लक्ष्णपुद्गल-स्कन्धनिर्मापितानि '**तवणिज्जवालुकापत्थडा**' इति तपनीयाः-तपनीयमय्यो या वालुकाः-सिकतास्तासां प्रस्टटः-प्रस्तरो येषु तानि तथा, '**सुहफासा**' इति सुखः-सुखहेतुः स्पर्शो येषु तानि सुखस्पर्शानि **सश्रीकरूपाणि प्रासादीयानी**त्यादि प्राग्वत् ॥ १३० ॥

---

१. "हिन्दीभाषायां 'कवलु'शब्देन प्रतीतानि गुजरातीभाषायां 'नलियां' शब्दवाच्यानि" इति G पृ. १६० टि. ॥ २. KG । ओहाडणाग्रहणं-मु । ओहाडणाहीरग्रहणं- जीवाभि. पृ. १८० पं. १४ । "अस्य 'हार' इत्यंशस्य संपूर्णो भावो नावगतः" इति G पृ. १६० टि. ॥ ३. सव्व JKE नास्ति ॥ ४. °बाहा° J ॥ ५. JKEG । यानि- मु. ॥ ६. JKE । सामान्येन - मु. G ॥

सूत्र-१३१ : तेसि णं दाराणं उभतो पासे दुहतो निसीहियाए सोलस-सोलस वंदणकलसपरिवाडीतो पण्णत्तातो । ते णं वंदणकलसा वर-कमलपइट्ठाणा सुरभिवरवारिपडिपुण्णा चंदणकयचच्चागा आविद्धकंठे-गुणा पउमुप्पलपिधाणा सव्वरयणामया अच्छा [१]जाव पडिरूवा महया-महया [२]महिंदकुंभसमाणा पण्णत्ता समणाउसो ! ॥ १३१ ॥

[१३१] **तेषां द्वाराणां** प्रत्येक**मुभयोः पार्श्वयो**रेकैकनैषेधिकीभावेन '**दुहतो**' इति द्विधातो द्विप्रकारायां **नैषेधिक्यां**, नैषेधिकी-निषीदनस्थानं, आह च **जीवाभिगममूल-टीकाकृत्**-"**नैषेधिकी निषीदनस्थान**" [ ] मिति, प्रत्येकं **षोडश षोडश वन्दनकलश-परिपाट्यः** प्रज्ञप्ताः, ते च वन्दनकलशा 'वरकमलपइट्ठाणा' इति वरं-प्रधानं यत्कमलं तत् प्रतिष्ठानम्-आधारो येषां ते वरकमलप्रतिष्ठानाः, तथा **सुरभिवरवारिप्रतिपूर्णाश्चन्दन-कृतचर्चाकाः**-चन्दनकृतोपरागाः, '**आविद्ध[३]कण्ठेगुणा**' इति आविद्धः-आरोपितः कण्ठे गुणो-रक्तसूत्ररूपो येषां ते आविद्धकण्ठेगुणाः, 'कण्ठेकाल'वत् सप्तम्या अलुक्, '**पउमुप्पलपिहाणा**' इति पद्ममुत्पलं च यथायोगं पिधानं येषां ते पद्मोत्पलपिधानाः, '**सव्वरयणामया अच्छा सण्हा लण्हा**' इत्यादि **यावत्** '**पडिरूवगा**' इति विशेषण-कदम्बकं प्राग्वद्, '**महया**' इति अतिशयेन महान्तः [४]महेन्द्रः कुम्भानामिन्द्र इन्द्रकुम्भो राज-दन्तादिदर्शनादिन्द्रशब्दस्य पूर्वनिपातः, महाँश्चासौ इन्द्रकुम्भश्च तस्य समाना **महेन्द्रकुम्भ-समानाः**-महाकलशप्रमाणाः **प्रज्ञप्ता** हे **श्रमण** ! हे **आयुष्मन्** ॥ १३१ ॥

सूत्र-१३२ : तेसि णं दाराणं उभतो पासे दुहतो णिसीहियाए सोलस-सोलस णागदंतपरिवाडीतो पण्णत्तातो । ते णं नागदंता मुत्ताजालंतरु-सियहेमजाल-गवक्खजाल-[५]खिंखिणीघंटाजालपरिक्खित्ता अब्भुग्गया अभिणिसिट्ठा तिरियं सुसंपग्गहिया अहेपन्नगद्ध[६]रूवा पन्नगद्धसंठाणसंठिया सव्ववइरामया अच्छा [७]जाव पडिरूवा महया महया गयदंतसमाणा पण्णत्ता समणाउसो !

---

१. द्र० सू० २१ । २. इंदकुंभसमाणा BKG मु. (क, ख, ग, घ, च, छ); "जीवाजीवाभिगमे (३।३०१) पि 'महिंदकुंभसमाणा' इति पाठो विद्यते ।" इति V पृ. ११३ टि. ३ । ३. द्धइति गुणा JKE ॥ ४. JKE । महेन्द्रकुम्भसमानाः G । मु. नास्ति ॥ ५. खिंखिणीजाल° JBLK (क, ख, ग, घ, च, छ) । ६. JLB मु. । °रूवगा-V । ७. द्र० सू० २१ ।

तेसु णं णागदंतएसु बहवे किण्हसुत्तबद्धा वग्घारितमल्लदामकलावा णीलसुत्तबद्धा वग्घारियमल्लदामकलावा लोहित-हालिद्द-सुक्किलसुत्तबद्धा वग्घारितमल्लदामकलावा !

ते णं दामा तवणिज्जलंबूसगा सुवण्णपयरगमंडितगा[1] नाणा-मणिरयणविविहहारद्धहारउवसोभियसमुदया जाव[2] सिरीए अतीव अतीव उवसोभेमाणा उवसोभेमाणा चिट्ठंति ।

तेसि णं णागदंताणं उवरिं अण्णाओ सोलस-सोलस नागदंत-परिवाडीतो पण्णत्ताओ । ते णं नागदंता तं चेव जाव महया-महया गयदंतसमाणा पण्णत्ता समणाउसो !

तेसु णं णागदंतएसु बहवे रययामया सिक्कगा पण्णत्ता । तेसु णं रययामएसु सिक्कएसु बहवे वेरुलियामतीतो धूवघडीतो →पण्णत्ताओ[3] । ताओ णं धूवघडीओ← कालागरुपवरकुंदुरुक्कतुरुक्क-धूव-मघमघेंतगंधुद्-धुयाभिरामातो सुगंधवरगंधितातो गंधवट्टिभूतातो ओरालेणं मणुण्णेणं मणहरेणं घाणमणणेव्वुतिकरेणं गंधेणं ते पदेसे सव्वतो समंता जाव[4] चिट्ठंति ॥ १३२ ॥

[१३२] **'तेसि णं दाराण'**मित्यादि, तेषां द्वाराणां प्रत्येक**मुभयोः पार्श्वयो**रेकैक-नैषेधिकीभावेन या **द्विधा नैषेधिकी** तस्यां प्रत्येकं **षोडश षोडश नागदन्तपरिपाट्यः प्रज्ञप्ताः**, नागदन्ता[5]-अङ्कुटकाः, **ते च नागदन्ता 'मुत्ताजालंतरुसियहेमजाल-गवक्ख-जाल-खिंखिणि[घंटा]जालपरिखित्ता'** इति मुक्ताजालानामन्तरेषु यानि उत्सृतानि-लम्ब-मानानि हेमजालानि-सुवर्णमयदामसमूहा यानि च गवाक्षजालानि[6]-गवाक्षाकृतिरत्नविशेष-मालासमूहा यानि च किङ्किणीघण्टाजालानि-क्षुद्रघण्टासमूहास्तैः परिक्षिप्ताः-सर्वतो व्याप्ताः,

---

१. "°पतरगमंडिता (जी° ३।३०२); प्रस्तुतागमस्य चत्वारिंशत्तमे सूत्रे '°पयरमंडियागा' इति पाठो विद्यते।" इति V पृ. ११३ टि. ७ ॥ २. द्र. सू. ४० ॥ ३. →← चिह्नद्वयमध्यवर्तिपाठः K नास्ति ॥ ४. द्र. सू. ४१ ॥ ५. "नागदन्तौ नर्कुटकौ अंकुटकौ इत्यर्थः" जीवाभिगम. वि. पृ. २०५ पं. ११ । भाषाप्रतीत 'नकूचा'शब्देन नर्कुटस्य साम्यं प्रतिभाति 'अंकोडा' इति भाषायाम्'इति G पृ. १६२ टि. ॥ ६. गवाक्षजालानि JKE नास्ति ॥

'**अब्भुग्गया**' इति अभिमुखमुद्गताः, अग्रिमभागे मनाग् उन्नता इति भावः, '**अभिनिसिट्ठा**' इति अभिमुखं-बहिर्भागाभिमुखं निसृष्टा-निर्गता अभिनिसृष्टाः, '**तिरियं सुसंपग्गहिया**'[१] इति तिर्यग् भित्तिप्रदेशैः सुष्ठु-अतिशयेन सम्यग्-मनागप्यचलनेन परिगृहीताः सुसम्परिगृहीताः, '**अहेपन्नगद्धरूवा**' इति अधः-अधस्तनं यत् पन्नगस्य सर्प्पस्यार्द्धं तस्येव रूपम्-आकारो येषां ते अधःपन्नगार्धरूपाः[२], अधःपन्नगार्द्धवदतिसरला दीर्घाश्चेति भावः, एतदेव व्याचष्टे-'**पन्नगार्द्धसंस्थानसंस्थिताः**' अधःपन्नगार्द्धसंस्थानाः, '**सव्ववयरामया**' सर्वात्मना वज्रमया, '**अच्छा सण्हा**' इत्यारभ्य '**जाव पडिरूवा**' इति विशेषणजातं प्राग्वद्, '**महया**' इति अतिशयेन महान्तो **गजदन्तसमाना**-गजदन्ताकाराः **प्रज्ञप्ता** हे **श्रमण**[३] ! हे **आयुष्मन्** !।

'**तेसु णं णागदंतएसु**[४] **बहवे किण्हसुतबद्धा**' तेषु नागदन्तकेषु बहवः कृष्णसूत्रबद्धा '**वग्घारिय**' इति अवलम्बिता **माल्यदामकलापाः**-पुष्पमालासमूहाः, बहवो **नीलसूत्रावलम्बितमाल्यदामकलापाः**, एवं **लोहित-हारिद्र-शुक्लसूत्रबद्धा** अपि वाच्याः । '**ते णं दामा**' इत्यादि, तानि दामानि '**तवणिज्जलंबूसगा**' इति तपनीयः[५] तपनीयमयो लम्बूसगो-दाम्नामग्रिमभागे मण्डनविशेषो येषां तानि तथा, जाव[६] लंबूसकानि, '**सुवन्नपयरगमंडिया**' इति पार्श्वतः सामस्त्येन सुवर्णप्रतरेण-सुवर्णपत्रकेण मण्डितानि सुवर्णप्रतरमण्डितानि, '**नाणाविहमणिरयण-विविहहारद्धहार**[७]**उवसोहियसमुदया**' इति नानारूपाणां मणीनां रत्नानां च विविधा-विचित्रवर्णा हारा-अष्टादशसरिका अर्द्धहारा-नवसरिकास्तैरुपशोभितः[८] समुदायो येषां तानि तथा, '**जाव सिरीए अईव अईव उवसोभेमाणा चिट्ठंति**' इति अत्र यावत्करणादेवं →परिपूर्णः[९] पाठो द्रष्टव्यः 'ईसिं अण्णोण्णमसंपत्ता पुव्वावरदाहिणुत्तरागएहिं वाएहिं मंदायं मंदायं एइज्जमाणा एइज्जमाणा पलंबमाणा पलंबमाणा पझंझमाणा पझंझमाणा ओरालेण मणुण्णेणं मणहरेणं कण्णमणनिव्वुइकरेणं सद्देणं ते पएसे सव्वओ समंता आपूरेमाणा आपूरेमाणा सिरीए अईव अईव उवसोभेमाणा चिट्ठंति' एतच्च प्रागेव[१०]← यानविमानवर्णने व्याख्यातमिति न भूयो व्याख्यायते ।

'**तेसि णं णागदंताण**'मित्यादि, **तेषां नागदन्तकानामुपरि**[११] प्रत्येकमन्याः **षोडश षोडश नागदन्तपरिपाट्यः प्रज्ञप्ताः, ते च नागदन्ता यावत्करणाद्** 'मुत्ताजालंतरुसिय-

---

१. JKE । परिग्ग मु. G ॥ २. पन्नगार्धरूपा - JKE नास्ति ॥ ३. श्रमण - JKE नास्ति ॥ ४. सु इत्यादि, तेषु - JKE ॥ ५. तपनीयः - JKE नास्ति ॥ ६. 'जाव लंवूसकानि' स्थाने G मध्ये पार्श्वतः सामस्त्येन ॥ ७. JKE । °द्धहार मु. G नास्ति ॥ ८. "भाषायाम् 'नवसरो हार' इति" G पृ. १६३ टि. ॥ ९. →← चिह्नद्वयमध्यवर्तिपाठः - JKE नास्ति ॥ १०. द्र. सू. ४० ॥ ११. JKEG । °दन्ताना° मु. ॥

हेमजाल-गवक्खजाल-खिंखिणिघंटाजालपरिखित्ता' इत्यादि प्रागुक्तं सर्वं द्रष्टव्यं यावद् **गजदन्तसमानाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! । 'तेसु णं णागदंतएसु'** । इत्यादि, तेषु नागदन्तकेषु[१] **बहूनि रजतमयानि सिक्कानि[२] प्रज्ञप्तानि, तेषु च रजतमयेषु सिक्केषु बहवो**-बह्व्यो **वैडूर्यमय्यो**-वैडूर्यरत्नात्मिका **धूपघटिकाः 'कालागुरुपवर-कुंदुरुक्कतुरुक्कधूवमघमघेंते'** त्यादि प्राग्वद्, नवरं **'घाणमणनिव्वुइकरेण'** मिति घ्राणेन्द्रिय-मनोनिर्वृतिकरेण ॥ १३२॥

सूत्र-१३३ : तेसिं णं दाराणं उभतो पासे दुहतो णिसीहियाए सोलस-सोलस सालभंजियापरिवाडीतो पण्णत्तातो । तातो णं[३] सालभंजियातो लीलट्ठियातो सुपइट्ठियातो [सुअलंकियाओ] णाणाविहरागवसणातो णाणामल्लपिणद्धाओ मुट्ठिगेज्झसुमज्झाओ आमेलग-जमल-जुयल-वट्टिय-अब्भुण्णय-पीण-रइय-संठियपओहराओ[४] रत्तावंगातो असितकेसीतो मिउ-विसय-पसत्थ-लक्खण-संवेल्लियग्गसिरयातो ईसिं असोगवरपायवसमुट्ठि तातो वामहत्थगहियग्गसालातो ईसिं अद्धच्छिकडक्खचिट्ठितेहिं[५] लूसमा-णीतो विव, चक्खुल्लोयणलेसेहिं[६] य अण्णमण्णं खिज्जमाणीतो विव पुढवि-परिणामातो सासयभावमुवगयातो Δचंदाणणाओ[७] चंदविलासिणीओ चंदद्ध-समणिडालाओ चंदाहियसोमदंसणाओ उक्का विव उज्जोवेमाणाओ विज्जु-घण-मिरिय-सूर-दिप्पंत-तेय-अहिययरसन्निकासाओ सिंगारागार-चारु-वेसाओ पासाईयाओΔ जाव चिट्ठंति ॥ १३३ ॥

[१३३] **'तेसि ण'** मित्यादि, तेषां **द्वाराणां** प्रत्येकमुभयोः **पार्श्वयोरे**कैकनैषेधिकी-भावेन **द्विधातो**-द्विप्रकारायां **नैषेधिक्यां षोडश षोडश शालभञ्जिकापरिपाट्यः**

---

१. दन्तेषु E ॥ २. "भाषायाम् 'शीकुं वा छीकुं' इति प्रसिद्धम्" इति G पृ. १६४ टि. ॥ ३. K । सालि° JB । एवमग्रेऽपि ॥ ४. संठियपीवरपओहराओ GJBLK (क, ख, ग, घ, च, छ) । ५. °कडक° JB (क, घ, च); °कडक्क° (ख, ग); कडच्छि - K । "वृत्तिकारेण 'अर्धं' तिर्यग् वलितं इति व्याख्यातम् । जीवाजीवाभिगमस्य (पत्र २०७) वृत्तौ 'अड्ड' तिर्यग् वलितं इति व्याख्यातमस्ति । अत्रापि 'अड्ड' इति पदं युक्तमस्ति । एतद् देशीभाषा पदं विद्यते, 'आडो' इति भाषायाम् ।" इति V पृ. ११४ टि. ३ ॥ ६. °लेसातो JB (क, ख, ग, घ) । ७. ΔΔ चिह्नद्वयमध्यवर्तिपाठः JBLK नास्ति, मु. G. V अस्ति ॥

प्रज्ञप्ताः, ताश्च शालभञ्जिका लीलया-ललिताङ्गनिवेशरूपया स्थिता **लीलास्थिताः, 'सुपइट्ठियाओ'** इति सुष्ठु-मनोज्ञतया प्रतिष्ठिताः सुप्रतिष्ठिताः, **'सुअलंकियाओ'** सुष्ठु-अतिशयेन रमणीयतया अलङ्कृताः स्वलङ्कृताः, **'णाणाविहरागवसणाओ'** इति नाना-विधो-नानाप्रकारो रागो येषां तानि नानाविधरागाणि तानि वसनानि-वस्त्राणि यासां तास्तथा, **'नानामल्लपिनद्धाओ'** इति नानारूपाणि माल्यानि-पुष्पाणि पिनद्धानि-आविद्धानि यासां ता नानामाल्यपिनद्धाः, क्तान्तस्य परनिपातः सुखादिदर्शनाद्, **'मुट्ठिगिज्झसुमज्झाओ'** इति मुष्टिग्राह्यं सुष्ठु-शोभनं मध्यं-मध्यभागो यासां तास्तथा, **'आमेलग-जमल-जुगल-वट्टिय-अब्भुन्नय-पीण-रइय-संठियपओहराओ'**[१] पीनं-पीवरं रचितं संस्थितं-संस्थानं यकाभ्यां तौ पीनरचितसंस्थानौ, आमेलकः-आपीडः शेखरक इत्यर्थः, तस्य यमलयुगलं-समश्रेणिकं यद्युगलं तद्वद् वर्त्तितौ-बद्धस्वभावौ-उपचितकठिनभावाविति भावः, अभ्युन्नतौ पीनरचितसंस्थानौ च पयोधरौ यासां तास्तथा, **'रत्तावंगाओ'** इति रक्तोऽपाङ्गो-नयनो-पान्तरूपो यासां तास्तथा, **'असियकेसिओ'** इति असिताः-कृष्णाः केशा यासां ता असित-केश्यः[२], एतदेव सविशेषमाचष्टे-**'मिउविसय-पसत्थ-लक्खण-संवेल्लियग्गसिरयाओ'** मृदवः-कोमला विशदा-निर्मलाः प्रशस्तानि-शोभनानि अस्फुटिताग्रत्वप्रभृतीनि लक्षणानि येषां ते प्रशस्तलक्षणाः 'संवेल्लितं' संवृतमग्रं येषां ते संवेल्लिताग्राः शिरोजाः-केशा यासां ता मृदुविशदप्रशस्तलक्षणसंवेल्लिताग्रशिरोजाः, **'ईसिं असोगवरपायवसमुट्ठियाओ'** ईषद्-मनाक् अशोकवरपादपे समुपस्थिताः-आश्रिता ईषदशोकवरपादपसमुपस्थितास्तथा **'वामहत्थग्गहियग्गसालाओ'**[३] वामहस्तेन गृहीतमग्रं शालायाः-शाखायाः अर्थादशोकपादपस्य यकाभिस्ता वामहस्तगृहीताग्रशालाः, **'ईसिं अद्धच्छिकडक्खचिट्ठिएहि**[४] **लूसमाणीओ विवे'**ति ईषद्-मनाक् अर्द्ध-तिर्यग् वलितमक्षि येषु कटाक्षरूपेषु चेष्टितेसु तैः, मुष्णन्त्य इव सुरजनानां मनांसि, **'चक्खुल्लोयणलेसेहिं**[५] **अन्नमन्नं खिज्जमाणीओ विव'** अन्योऽन्यं परस्परं चक्षुषां लोकनेन-अवलोकनेन ये लेशाः-संश्लेषास्तैः खिद्यमाना इव, किमुक्तं भवति ?-एवं नाम[६] तास्तिर्यग्वलिताक्षिकटाक्षैः परस्परमवलोकमाना अवतिष्ठन्ति यथा नूनं परस्परं सौभाग्यासहनतस्तिर्यग्वलिताक्षिकटाक्षैः परस्परं खिद्यन्ति इवेति, **'पुढविपरिणामाओ'** इति पृथिवीपरिणामरूपाः **शाश्वतभावमुपगता** विमानवद्

---

१. JKE । यपीवरप.° मु. G ॥ २. शाः - JKE ॥ ३. वामहत्थग्गहियग्गसालाओ - JKE नास्ति ॥ ४. JKE । चिट्ठिएण - मु. ॥ ५. °हिं य अ° मु. ॥ ६. JKEG । नामानस्ति(म)र्य° मु. ॥

'**चंदाणणाओ**' इति चन्द्र इवाननं-मुखं यासां तास्तथा '**चंदविलासिणीओ**' इति चन्द्रवद् मनोहरं विलसन्तीत्येवंशीलाश्चन्द्रविलासिन्यः, '**चंदद्धसमनिडालाओ**' इति चन्द्रार्द्धसमम्-अष्टमीचन्द्रसमानं ललाटं यासां तास्तथा, '**चंदाहियसोमदंसणाओ**' इति चन्द्रादपि अधिकं सोमं-सुभगकान्तिमद् दर्शनम्-आकारो यासां तास्तथा **उल्का इव उद्द्योतमानाः 'विज्जु-घण-मरिचि-सूर-दिप्पंत-तेय-अहिययर-सन्निकासातो'** इति विद्युतो ये घना-बहलतरा मरीचयस्तेभ्यो यच्च सूर्यस्य दीप्यमानं-दीप्तं तेजस्तस्मादपि अधिकतरः सन्निकाशः-प्रकाशो यासां तास्तथा **'सिंगारागारचारुवेसाओ पासाइयाओ दरिसणिज्जाओ पडिरूवाओ अभिरूवाओ चिट्ठंति'** इति प्राग्वत् ॥ १३३ ॥

सूत्र-१३४ : तेसि णं दाराणं उभतो पासे [दुहओ] णिसीहियातो सोलस-सोलस जालकडगपरिवाडीतो पण्णत्तातो । ते णं जालकडगा सव्वरयणामया अच्छा जाव पडिरूवा ॥ १३४ ॥

[१३४] '**तेसि ण**'मित्यादि, **तेषां द्वाराणां** प्रत्येकमुभयोः **पार्श्वयो**रेकैकनैषेधिकीभावेन या द्विधा **नैषेधिकी** तस्यां **षोडश षोडश जालकटकाः प्रज्ञप्ताः**, जालकटको-जालकाकीर्णो रम्यसंस्थानः प्रदेशविशेषः, **ते च जालकटकाः 'सव्वरयणामया अच्छा सण्हा जाव पडिरूवा'** इति प्राग्वत् ॥ १३४ ॥

सूत्र-१३५ : तेसि णं दाराणं उभतो पासे दुहतो निसीहियातो सोलस-सोलस घंटापरिवाडीतो पण्णत्तातो । तासि णं घंटाणं इमेतारूवे वण्णावासे पण्णत्ते तं जहा—जंबूणयामतीतो घंटातो वइरामतीतो लालातो, णाणामणिमता घंटापासा, तवणिज्जामतीतो संकलातो, रययामयातो रज्जूतो । तातो णं घंटातो ओहस्सरातो मेहस्सराओ हंसस्सराओ[1] कोंचस्सराओ सीहस्सराओ दुंदुहिस्सराओ णंदिस्सराओ णंदिघोसाओ मंजुस्सराओ मंजुघोसातो सुस्सराओ सुस्सरघोसाओ ओरालेणं मणुण्णेणं मणहरेणं कण्णमणनिव्वुतिकरेणं सद्देणं ते पदेसे सव्वओ समंता आपूरेमाणीतो आपूरेमाणीतो जाव चिट्ठंति ॥ १३५ ॥

---

१. हंसस्सराओ - JBL नास्ति, अन्य पदानामपि क्रमभेदः दृश्यते ।

[१३५] '**तेसि ण**'मित्यादि, **तेषां द्वाराणां** प्रत्येकमुभयोः **पार्श्वयोर्द्विधातो नैषेधिक्यां षोडश षोडश घण्टापरिपाट्यः प्रज्ञप्ताः, तासां च घण्टानामयमेतद्रूपो वर्णावासो**-वर्णकनिवेशः **प्रज्ञप्तः, तद्यथा-जम्बूनदमय्यो घण्टा वज्रमय्यो लालाः नानामणिमया घण्टापार्श्वाः तपनीयमय्यः शृङ्खला** यासु ता अवलम्बितास्तिष्ठन्ति **रजतमय्यो रज्जवः,** '**ताओ णं घण्टाओ**' इत्यादि, ताश्च घण्टा ओघेन-प्रवाहेण स्वरो यासां ता **ओघस्वराः,** मेघस्येवातिदीर्घः स्वरो यासां ता **मेघस्वराः,** हंसस्येव मधुरः स्वरो यासां ता **हंसस्वराः,** एवं[1] **क्रौञ्चस्वराः,** सिंहस्येव च प्रभूतदेशव्यापी स्वरो यासां ताः **सिंहस्वराः,** एवं **दुन्दुभिस्वराः, नन्दिस्वराः,** द्वादशविधतूर्यसङ्घातो नन्दिः, नन्दिवद् घोषो-ह्रादो[2] यासां ता **नन्दिघोषाः,** मञ्जुः-प्रियः स्वरो यासां ता **मञ्जुस्वराः,** एवं **मञ्जुघोषाः,** किं बहुना ?, **सुस्वराः, सुस्वरघोषाः,** '**ओरालेण**'मित्यादि प्राग्वत्[3] ॥ १३५ ॥

सूत्र-१३६ : तेसि णं दाराणं उभतो पासे दुहतो णिसीहिताए सोलस-सोलस वणमालापरिवाडीतो पण्णत्तातो । तातो णं वणमालातो णाणादुम-लय-किसलय-पल्लव-समाउलातो छप्पयपरिभुज्जमाण-सोहंत-सस्सिरीयातो पासातीयातो ॥ १३६ ॥

[१३६] '**तेसि ण**'मित्यादि, **तेषां द्वाराणां** प्रत्येकमुभयोः **पार्श्वयोः द्विधातो नैषेधिक्यां षोडश षोडश वनमालापरिपाट्यः प्रज्ञप्ताः, ताश्च वनमाला नानाद्रुमाणां नानालतानां** च यानि **किशलयानि** ये च **पल्लवास्तैः समाकुलाः**-सम्मिश्राः, '**छप्पय-परिभुज्जमाणसोभन्तसस्सिरीया**' इति षट्पदैः परिभुज्यमानाः सत्यः शोभमानाः षट्पद-परिभुज्यमानशोभमानाः अत एव सश्रीकाः, '**पासाईयाओ**' इत्यादि पदचतुष्टयं प्राग्वत्[4] ॥ १३६ ॥

सूत्र-१३७ : तेसि णं दाराणं उभतो पासेसु दुहओ णिसीहियाए सोलस-सोलस पगंठगा पण्णत्ता । ते णं पगंठगा अड्ढाइज्जाइं जोयणसयाइं आयाम-विक्खंभेणं, पणुवीसं जोयणसयं बाहल्लेणं, सव्ववइरामया अच्छा जाव[5] पडिरूवा । तेसि णं पगंठगाणं उवरिं पत्तेयं-पत्तेयं पासायवडेंसगा

---

१. मु. G । एवं क्रौञ्चस्वराः - JKE नास्ति ॥ २. ल्हादो - J ॥ ३. द्र. सू. ४० ॥ ४. द्र. सू० २१ ।

पण्णत्ता । ते णं पासायवडेंसगा अड्ढाइज्जाइं जोयणसयाइं उड्ढं उच्चत्तेणं, पणुवीसं जोयणसयं विक्खंभेणं[1], अब्भुग्गयमूसिय-पहसिता इव, विविह-मणिरयणभत्तिचित्ता वाउद्धुयविजयवेजयंतीपडागच्छत्ताइच्छत्तकलिया तुंगा गगणतलमणुलिहंतसिहरा जालंतररयण पंजरुम्मिलियव्व मणिकण-गथूभियागा वियसियसयवत्त-पोंडरीय-तिलगरयणद्धचंदचित्ता[2] णाणा- 5 मणिदामालंकिया अंतो बहिं च सण्हा तवणिज्ज-वालुयापत्थडा सुहफासा सस्सिरीयरूवा पासादीया दरिसणिज्जा अभिरूवा पडिरूवा जाव[3] दामा ॥ १३७ ॥

[१३७] **'तेसि णं दाराण'** मित्यादि, **तेषां द्वाराणां** प्रत्येकमुभयोः **पार्श्वयोरेकैक**-नैषेधिकीभावेन या **द्विधा नैषेधिकी**, तस्यां **षोडश षोडश प्रकण्ठकाः प्रज्ञप्ताः**, 10 प्रकण्ठको नाम पीठविशेषः, आह च[4] **जीवाभिगममूलटीकाकारः-'प्रकण्ठौ पीठविशेषौ'** [ ] इति, **ते च प्रकण्ठकाः** प्रत्येकमर्द्धतृतीयानि **योजनशतान्यायाम-विष्कम्भाभ्यां पञ्चविंशं**-पञ्चविंशत्यधिकं **योजनशतं बाहल्येन** पिण्डभावेन **'सव्ववयरामया'** इति सर्वात्मना ते प्रकण्ठकाः वज्रमया-वज्ररत्नमयाः, **'अच्छा सण्हा'** इत्यादि विशेषणजातं प्राग्वत् । **'तेसि णं**[5] **पगंठगाण'**मित्यादि, तेषां प्रकण्ठकानाम् **उपरि प्रत्येकं प्रत्येकम्**-इह 15 एकं प्रति प्रत्येकमित्याभिमुख्ये वर्त्तमानः प्रतिशब्दः समस्यते[6] ततो वीप्सा-विवक्षायां द्विर्वचनं, **प्रासादावतंसकाः प्रज्ञप्ताः**, प्रासादावतंसका नाम प्रासादविशेषाः, उक्तं च[7] **जीवाभिगममूलटीकायां-"प्रासादावतंसकौ-प्रासादविशेषौ"** [ ] इति, **ते च प्रासादावतंसका अर्धतृतीयानि योजनशतानि ऊर्ध्वम् उच्चैस्त्वेन, पञ्चविंशं योजनशतं**

---

१. "अत्र 'आयाम-विक्खंभेणं' इति पाठः अपेक्षितोऽस्ति । जीवाजीवाभिगमे (३।३०७) एतत्तुल्यप्रकरणे 'आयाम-विक्खंभेणं' इति पाठो विद्यते ।" इति V पृ. ११५ टि. ३ ॥ २. JLB । "अतोऽग्रे आदर्शेषु 'णाणामणिदामालंकिया' इति पाठो लभ्यते । वृत्तौ नास्ति व्याख्यातोऽसौ । जीवाजीवाभिगमवृत्तावपि (पत्र २०९) नास्ति व्याख्यातः । जम्बूद्वीपप्रज्ञप्तेर्वृत्तित्रयेऽसौ व्याख्यातो दृश्यते ।" इति V पृ. ११५ टि. ७ ॥ ३. जाव दामा उवरिं पगंठगाणं झया छत्ताइच्छत्ता JBL (क, ख, ग, घ, च, छ) जाव दामा उवरिं अट्ठट्ठ मंगलगा झया छत्ताइछत्ता-K " 'दामा' इति पाठग्रहणेन ३३-४० सूत्रस्य 'चिट्ठंति' पर्यन्तः पाठो ग्राह्यः ।" इति V पृ. ११५ टि. ९ । ४. "जीवा. प्र. पृ. २०९ पं. ४ । चूर्णिकारस्तु एवमाह - आदर्शवृत्तौ पर्यान्तावनतप्रदेशौ पीठौ प्रकण्ठौ इति" जीवा. वि. प्र. पृ. २०९ पं. ४ । इति G । पृ. १६८ टि. ॥ ५. पकंठ० JKE ॥ ६. ०ते न वीप्सायाम् JKE ॥ ७. जीवाभिगमवृत्तौ -पृ. २०९ ॥

विष्कम्भेन, 'अब्भुग्गयमूसियपहसिया विव' अभ्युद्गता-आभिमुख्येन सर्वतो विनिर्गता उत्सृताः-प्रबलतया सर्वासु दिक्षु प्रसृता या प्रभा तया सिता इव-बद्धा इव तिष्ठन्तीति गम्यते, अन्यथा कथमिव ते अत्युच्चा[१] निरालम्बाः तिष्ठन्तीति भावः, **'विविहमणिरयणभत्तिचित्ता'** विविधा-अनेकप्रकारा ये मणयः-चन्द्रकान्तादयो यानि च रत्नानि-कर्केतनादीनि तेषां भक्तिभिः-विच्छित्तिविशेषैश्चित्रा-नानारूपाः आश्चर्यवन्तो वा नानाविधमणिरत्नभक्तिचित्राः, **'वाउद्धुयविजयवेजयंतीपडागच्छत्ताइच्छत्तकलिया'** वातोद्धूता-वायुकम्पिता विजयः[२]-अभ्युदयस्तत्सूचिका वैजयन्त्यभिधाना याः पताकाः, अथवा विजया इति वैजयन्तीनां पार्श्वकर्णिका उच्यन्ते तत्प्रधाना वैजयन्त्यो विजयवैजयन्त्यः, पताकास्ता एव विजयवर्जिता वैजयन्त्यः[३], छत्रातिच्छत्राणि-उपर्युपरि स्थितान्यातपत्राणि तैः कलिता वातोद्धूतविजयवैजयन्तीपताकाछत्रातिच्छत्रकलिताः, **तुङ्गा**-उच्चा उच्चैस्त्वेनार्द्धतृतीययोजनशतप्रमाणत्वाद् अत एव **'गगनतलमणुलिहंतसिहरा'** इति गगनतलम् -अम्बरतलम् अनुलिखन्ति-अभिलङ्घयन्ति शिखराणि येषां ते तथा, जालानि-जालकानि तानि च भवनभित्तिषु लोके प्रतीतानि, तदन्तरेषु विशिष्टशोभानिमित्तं रत्नानि येषु ते **जालान्तररत्नाः**, सूत्रे चात्र विभक्तिलोपः प्राकृतत्वात्, तथा पञ्जराद् उन्मीलिता इव-बहिष्कृता इव **पञ्जरोन्मीलिता इव**, यथा हि किल किमपि वस्तु पञ्जराद्-वंशादिमयाच्छादनविशेषाद् बहिष्कृतमत्यन्तमविनष्टच्छायत्वात् शोभते एवं तेऽपि प्रासादावतंसका इति भावः, तथा मणिकनकानि-मणिकनकमय्यः स्तूपिकाः-शिखराणि येषां ते **मणिकनकस्तूपिकाः**[४], तथा विकसितानि यानि शतपत्राणि पुण्डरीकाणि च द्वारादौ प्रतिकृतित्वेन[५] स्थितानि तिलकरत्नानि-भित्त्यादिषु पुण्ड्रविशेषा अर्द्धचन्द्राश्च द्वारादिषु तैश्चित्राः-[६]तथा नानारूपा आश्चर्यभूता वा **विकसितशतपत्रपुण्डरीकतिलकरत्नार्द्धचन्द्रचित्राः**, [तथा नाना-अनेकरूपाणि यानि मणिदामानि-मणिमयपुष्पमालास्तैरलङ्कृतानि-शोभितानि **नानामणिदामालङ्कृतानि**] तथा **अन्तर्बहिश्च श्लक्ष्णा**-मसृणाः, तथा तपनीयं-सुवर्णविशेषस्तन्मय्या वालुकायाः प्रस्तटः-प्रस्तारो येषु ते **तपनीयवालुकाप्रस्तटाः 'सुहफासा सस्सिरीयरूवा पासाईया'** इत्यादि प्राग्वत्तेषां च प्रासादावतंसकानामन्तर्भूमिवर्णनमुपर्युल्लोकवर्णनं सिंहासनवर्णनमुपरि[७]

---

१. JKEG । । अभ्युद्गतानि -मु. ॥ २. मु. G । ण्या-JE ॥ ३. JKEG । वैजयन्त्यः - मु. नास्ति ॥ ४. स्तूपिकाकाः - JE ॥ ५. प्रकृति° - JKE पा. ४ भा. १ ॥ ६. तथा - JKE नास्ति ॥ ७. सू. ३३, ३४, ३७, ३८, ३९, ४० ॥

विजयदूष्यवर्णनं वज्राङ्कुशवर्णनं मुक्तादामवर्णनं च यथा प्राग् यानविमाने भावितं तथा भावनीयम् ॥ १३७ ॥

सूत्र-१३८ : तेसि णं दाराणं उभओ पासे [दुहओ णिसीहियाए] सोलस-सोलस तोरणा पण्णत्ता, णाणामणिमया णाणामणिमएसु खंभेसु उवणिविट्ठसन्निविट्ठा [1]जाव पउमहत्थगा ॥ १३८ ॥

[१३८] **'तेसि ण'**मित्यादि, **तेषां द्वाराणां** प्रत्येक**मुभयोः पार्श्वयो**रेकैकनैषेधिकीभावेन या **द्विधा नैषेधिकी,** तस्यां **षोडश षोडश तोरणानि प्रज्ञप्तानि,** तानि च तोरणानि **नानामणिमयानी**त्यादि तोरणवर्णनं यानविमानमिव निरवशेषं भावनीयम् ॥ १३८ ॥

सूत्र-१३९ : तेसि णं तोरणाणं पुरतो दो दो सालिभंजियातो पण्णत्तातो । जहा हेट्ठा [2]तहेव ॥

[१३९] **'तेसि णं तोरणाणं पुरतो'** इत्यादि, तेषां तोरणानां पुरतः प्रत्येकं **द्वे द्वे शालभञ्जिके,** शालभञ्जिकावर्णनं प्राग्वत् ॥ १३९ ॥

सूत्र-१४० : तेसि णं तोरणाणं पुरतो नागदंतगा पण्णत्ता । जहा हेट्ठा [3]जाव दामा ॥ १४० ॥

[१४०] **'तेसि ण'**मित्यादि, **तेषां तोरणानां पुरतो द्वौ द्वौ नागदन्तकौ प्रज्ञप्तौ,** तेषां च नागदन्तकानां वर्णनं **यथाऽधस्तादनन्तरमुक्तं तथा** वक्तव्यं, नवरमत्रोपरि नागदन्तका न वक्तव्या अभावात् ॥ १४० ॥

सूत्र-१४१ : तेसि णं तोरणाणं पुरतो दो दो हयसंघाडा गयसंघाडा नरसंघाडा किन्नरसंघाडा किंपुरिससंघाडा महोरगसंघाडा गंधव्वसंघाडा उसभसंघाडा सव्वरयणामया अच्छा [4]जाव [5]पडिरूवा ॥ १४१ ॥

[१४१] **'तेसि णं'** इत्यादि **तेषां तोरणानां पुरतो द्वौ द्वौ हयसङ्घाटौ,** सङ्घाटशब्दो युग्मवाची यथा साधुसङ्घाट इत्यत्र, ततो द्वे द्वे हययुग्मे इत्यर्थः, एवं **गज-नर-किन्नर-**

---

१. द्र. सू० २०-२३ । २. द्र. सू० १३३ । ३. द्र. सू० १३२ । ४. द्र. सू० २१ । ५. "अतः परं जीवाजीवाभिगमे (३।३१८) संक्षिप्तपाठ एव स्वीकृतोस्ति ।" इति V पृ. ११५ टि. १७ ॥

किंपुरुष-महोरग-गन्धर्व-वृषभसङ्घाटा अपि वाच्याः, एते च कथम्भूताः? इत्याह-'**सव्वरयणामया अच्छा सण्हा**' इत्यादि प्राग्वत् ॥ १४१ ॥

सूत्र-१४२-१४४ : एवं वीहीतो पंतीतो मिहुणाइं ॥ १४२-१४४ ॥

[१४२-१४४] यथा चामीषां हयादीनामष्टानां सङ्घाटा उक्तास्तथा **पङ्क्तयो**ऽपि **वीथयो**ऽपि **मिथुनकानि** च वाच्यानि, तत्र सङ्घाटाः-समानलिङ्गयुग्मरूपा पुष्पावकीर्णकाश्च, एकदिग्व्यवस्थिताः, श्रेणिः-पङ्क्तिः, उभयोः पार्श्वयोरेकैकश्रेणिभावेन यत् श्रेणिद्वयं सा वीथिः, स्त्रीपुरुषयुग्मं मिथुनकम् ॥ १४२-१४४ ॥

सूत्र-१४५ : तेसि णं तोरणाणं पुरतो दो दो पउमलयातो जाव सामलयाओ णिच्चं कुसुमियाओ जाव [णिच्चं माइयाओ णिच्चं लवइयाओ णिच्चं थवइयाओ णिच्चं गुलइयाओ णिच्चं गोच्छियाओ णिच्चं जमलियाओ णिच्चं जुयलियाओ णिच्चं विणमियाओ णिच्चं पणमियाओ णिच्चं सुविभत्त-पिंडि-मंजरि-वडेंसगधरीओ णिच्चं कुसुमिय-मउलिय-लवइय-थवइय-गुलइय-गोच्छिय-जमलिय-जुवलिय-विणमिय-पणमिय-सुविभत्त-पडि-मंजरि-वडेंसगधरीओ] सव्वरयणामतीतो अच्छातो जाव पडिरूवातो ॥ १४५ ॥

[१४५] '**तेसि ण**'मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे पद्मलते यावत्**करणाद् द्वे द्वे नागलते, द्वे द्वे अशोकलते, द्वे द्वे चम्पकलते, द्वे द्वे चूतलते, द्वे द्वे वासन्तीलते, द्वे द्वे कुन्दलते, द्वे द्वे अतिमुक्तकलते इति [२]परिगृह्यते, द्वे द्वे **श्यामलते**, एताश्च कथम्भूताः इत्याह-'**णिच्चं कुसुमियाओ**' इत्यादि **यावत्**करणाद् 'निच्चं मउलियाओ निच्चं लवइयाओ निच्चं थवइयाओ निच्चं गुच्छियाओ निच्चं जमलियाओ निच्चं जुयलियाओ निच्चं विनमियाओ निच्चं पणमियाओ निच्चं सुविभत्तपडिमञ्जरिवडिंसगधरीओ निच्चं कुसुमियमउलिय-लवइय-थवइय-गुलइय-गोच्छिय-विणमिय-पणमिय-सुविभत्तपडिमञ्जरिवडिंसगधरीओ' इति परिगृह्यते, अस्य व्याख्यानं [३]प्राग्वत्, पुनः कथम्भूताः ? इत्याह-'**सव्वरयणामया जाव पडिरूवा**' इति, अत्रापि **यावत्**करणात् 'अच्छा सण्हा' इत्यादि विशेषणसमूहपरिग्रहः, स च प्राग्वद्भावनीयः ॥ १४५ ॥

---

१. द्र० सू. १४१ । २. परिग्रहः - JKE ॥ ३. द्रष्टव्या सूत्र ३-४ वृत्तिः ॥

सूत्र-१४६ : तेसि णं तोरणाणं पुरतो दो दो[1] दिसासोवत्थिया पण्णत्ता-सव्वरयणामया अच्छा जाव पडिरूवा ॥ १४६ ॥

[१४६] '**तेसि ण**'मित्यादि, **तेषां तोरणानां पुरतः** प्रत्येकं **द्वौ द्वौ दिक्सौवस्तिकौ**-दिक्प्रोक्षकौ, ते च सर्वे 'जाम्बूनदमयाः' क्वचित्पाठः '**सव्वरयणामया अच्छा**' इत्यादि प्राग्वत् ॥ १४६ ॥

सूत्र-१४७ : तेसि णं तोरणाणं पुरतो दो दो वंदणकलसा पण्णत्ता । [ते णं वंदणकलसा] वरकमलपइट्ठाणा तहेव ॥ १४७ ॥

[१४७] '**तेसि ण**'मित्यादि, **द्वौ द्वौ वन्दनकलशौ प्रज्ञप्तौ**, वर्णकः वन्दनकलशानां '**वरकमलपइट्ठाणा**'[2] इत्यादिरूपः सर्वः प्राक्तनो वक्तव्यः ॥ १४७ ॥

सूत्र-१४८ : तेसि णं तोरणाणं पुरतो दो दो भिंगारा पण्णत्ता । ते णं भिंगारा वरकमलपइट्ठाणा जाव [सुरभिवरवारिपडिपुण्णा चंदणकयचच्चागा आविद्धकंठेगुणा पउमुप्पलपिधाणा सव्वरयणामया अच्छा जाव पडिरूवा] महया मत्तगय[महा]मुहाकतिसमाणा पण्णत्ता समणाउसो ! ॥ १४८ ॥

[१४८] '**तेसि ण**'मित्यादि **द्वौ द्वौ भृङ्गारौ**, तेषामपि कलशानामिव वर्णको वक्तव्यः, नवरं पर्यन्ते '**महया मत्तगयमहामुहागिइसमाणा पन्नत्ता समणाउसो !**' इति वक्तव्यं 'मत्तगयमहामुहागिइसमाणा' इति मत्तो यो गजस्तस्य महद्-अतिविशालं यद् मुखं तस्याऽऽकृतिः-आकारस्तत्समानाः-तत्सदृशाः प्रज्ञप्ताः ॥ १४८ ॥

सूत्र-१४९ : तेसि णं तोरणाणं पुरतो दो दो आयंसा पण्णत्ता । तेसि णं आयंसाणं इमेयारूवे वण्णावासे पण्णत्ते, तं जहा–तवणिज्जमया पगंठगा →वेरुलियमया[3] थरुया[4] वइरामया दोवारंगा णाणामणिमया[वलक्खा]←–

१. VG । दो अक्खयसोवत्थिया मु. JLK (क,ख,ग,घ,च,छ) । २. द्र.सू. १३१ ॥ ३. →←चिह्नद्वयमध्यवर्तिपाठः JLBK आदिषु वर्तते, "वृत्तौ नास्ति व्याख्यातः जीवाजीवाभिगमादर्शेषु ३/३२२ एष पाठः किञ्चिद्भेदेनोपलभ्यते - 'वेरुलियामया छरुहा वइरामया वरंगा णाणामणिमया वलक्खा अंकमया मंडला ।' तस्य वृत्तावपि [वैडूर्यमया थंभया-आदर्शगण्डप्रतिबन्धप्रदेशाः, आदर्शगण्डानां मुष्टिग्रहणयोग्याः प्रदेशा इति भावः, वज्ररत्नमया वराङ्गा-गण्डा इत्यर्थः, नानामणिमया वलक्षाः-वलक्षो नाम शृङ्खलादिरूपमवलम्बनम्] (पत्र-२१३) असौ व्याख्यातोऽस्ति ।" इति V पृ.११६-११७ टि. ११ ॥ ४. सुरया- G पृ. १७४ टि. ॥

[अंकामया] मंडला अणुग्घसितनिम्मलाते छाताते समणुबद्धा, चंदमंडल-पडिणिकासा महया-महया अद्धकायसमाणा पण्णत्ता समणाउसो ! ॥ १४९ ॥

[१४९] **'तेसि ण'**मित्यादि, **तेषां तोरणानां पुरतो द्वौ द्वावादर्शकौ प्रज्ञप्तौ, तेषां चाऽऽदर्शकानामयमेतद्रूपो वर्णावासो**-वर्णकनिवेशः **प्रज्ञप्तः, तद्यथा-तपनीयमयाः प्रकण्ठकाः**-पीठविशेषाः, **अङ्कमयानि**-अङ्करत्नमयानि **मण्डलानि** यत्र प्रतिबिम्बसम्भूतिः, **'अणोग्घसियनिम्मलाए'** इति अवघर्षणमवघर्षितं, भावे क्तप्रत्ययः, भूत्यादिना निर्मार्जनमित्यर्थः, अवघर्षितस्याभावोऽनवघर्षितं तेन निर्म्मला अनवघर्षितनिर्म्मला तया, **छायया समनुबद्धा**-युक्ताः, **'चन्दमण्डलपडिनिकासा'** इति चन्द्रमण्डलसदृशाः **'महया महया'** अतिशयेन महान्तोऽर्द्धकायसमानाः-कायार्द्धप्रमाणाः **प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् !** ॥ १४९ ॥

सूत्र-१५० : तेसि णं तोरणाणं पुरतो दो दो वइरनाभा थाला पण्णत्ता-अच्छ-तिच्छडियसालि-तंदुल-णहसंदिट्ठ-पडिपुण्णा इव चिट्ठंति सव्वजंबूणयमया अच्छा जाव पडिरूवा महता-महता रहचक्कसमाणा[१] पण्णत्ता समणाउसो ! ॥ १५० ॥

[१५०] **'तेसि ण'**मित्यादि **तेषां तोरणानां पुरतो द्वे द्वे वज्रनाभे**-वज्रमयो नाभिर्ययोस्ते वज्रनाभे **स्थाले प्रज्ञप्ते** तानि च स्थालानि तिष्ठन्ति, **'अच्छ-तिच्छडिय-[सालि]तंदुल-नहसंदट्ठ-पडिपुन्ना इव चिट्ठंति'** 'अच्छा' निर्मलाः, शुद्धाः स्फटिकवत्, त्रिच्छटिताः-त्रीन् वारान् छटिताः[२], अत एव 'नखसन्दष्टाः' नखाः-नखिकाः सन्दष्टा[३] मुशलादिभिः त्रुटिता[४] येषां ते तथा, सुखादिदर्शनात् क्तान्तस्य परनिपातः, अच्छैस्त्रिच्छटितैः शालितन्दुलैर्नखसन्दष्टैः[५] परिपूर्णानीव[६], पृथिवीपरिणामरूपाणि तानि तथा केवलमेवमाकाराणीत्युपमा, तथा चाह-**'सव्वजम्बूणयमया'** सर्वात्मना जम्बूनदमयानि **'अच्छा**

---

१. रहचक्कवालसमाणा JBLK (क, ख, ग, घ, च, छ); "वृत्तौ 'रथचक्रसमानानि' इति व्याख्यातमस्ति। जीवाजीवाभिगमे (३।३२३) पि 'रहचक्कसमाणा' इति पाठोऽस्ति। इति V पृ. ११७ टि. ३।" २. "भाषायाम् छडेला चोखा" - इति G पृ. १७४ टि. ॥ ३. सन्दिष्टा -JK ॥ ४. G। छटिता-मु.। चुम्बिता JKE जीवा. टी. ३२३ ॥ ५. °सन्दिष्टैः - K ॥ ६. G। पूर्णाः पृथ्वी प° मु. ॥ पूर्णा नवपृथिवी - JKE पा. ४-५ भा. १ ॥

सण्हा' इत्यादि प्राग्वद्, **'महया महया'** इति अतिशयेन महान्ति **रथचक्रसमानानि प्रज्ञप्तानि हे श्रमण ! हे आयुष्मन् !** ॥ १५० ॥

सूत्र-१५१ : तेसि णं तोरणाणं पुरतो दो दो पातीतो पण्णत्तातो । तातो णं पातीतो अच्छोदगपरिहत्थातो [१]णाणाविहस्स फलहरियगस्स बहुपडिपुण्णातो विव चिट्ठंति सव्वरयणामतीतो अच्छातो जाव पडिरूवातो महता-महता [२]गोकलिंजगचक्कसमाणीतो पण्णत्तातो समणाउसो ! ॥ १५१ ॥

[१५१] **'तेसि णं'** इत्यादि **तेषां तोरणानां पुरतो द्वे द्वे 'पाईओ'** इति पात्र्यौ **प्रज्ञप्ते, ताश्च पात्र्यः '[३]अच्छोदगपडिहत्थाओ'** इति स्वच्छपानीयपरिपूर्णाः **'णाणाविहस्स फलहरियस्स बहुपडिपुन्नाओ विवे'** ति अत्र षष्ठी तृतीयार्थे, "[४]बहु वचने"ति चैकवचनं प्राकृतत्वाद्, नानाविधैः फलहरितैः-हरितफलैर्बहु-प्रभूतं प्रतिपूर्णा इव **तिष्ठन्ति,** न खलु तानि फलानि, किंतु तथारूपाः शाश्वतभावमुपागताः पृथिवीपरिणामास्ततः उपमानमिति । **'सव्वरयणामईओ'** इत्यादि प्राग्वद्, **'महये'**ति अतिशयेन महत्यो **गोकलिञ्ज[५]रचक्रसमानाः प्रज्ञप्ताः हे श्रमण ! हे आयुष्मन् !** ॥ १५१ ॥

सूत्र-१५२ : तेसि णं तोरणाणं पुरतो दो दो सुपतिट्ठा पण्णत्ता । [[६]ते णं सुपइट्ठगा सुसव्वोसहिपडिपुण्णा] [७]णाणाविहस्स च पसाधणभंडस्स बहुपडिपुण्णा इव चिट्ठंति सव्वरयणामया अच्छा जाव पडिरूवा ॥ १५२ ॥

[१५२] **'तेसि ण'**मित्यादि, **तेषां तोरणानां पुरतो द्वौ सुप्रतिष्ठकौ**-आधारविशेषौ **प्रज्ञप्तौ, ते च सुप्रतिष्ठकाः सुसर्वौषधिप्रतिपूर्णा नानाविधैः** पञ्चवर्णैः **प्रसाधनभाण्डैश्च बहुपरिपूर्णा इव तिष्ठन्ति,** उपमाभावना प्राग्वत्, **'सव्वरयणामया'** इत्यादि तथैव ॥ १५२ ॥

---

१. णाणामणिपंचवण्णस्स JBLK मु. (क, ख, ग, घ, छ) । २. गोकलिंजर० (क, ख, ग, घ, च, छ) । गोकलिंगच० JBK । गोकलिंगजच० L । ३. JKE । सच्छो मु.G । ४. JKEG । बहु पडिपुन्नेति चै मु. ॥ ५. G । ञ्जगच मु. । ञ्जच JK ॥ ६. कोष्ठकमध्यवर्ति "मूलपाठः वृत्त्याधारेण स्वीकृतोऽस्ति । जीवाजीवाभिगमे (३।३२५) ऽपि एतादृश एव पाठो दृश्यते ।" इति V पृ. ११७ टि. ८ । ७. णाणाविहभंडविरइया इव चिट्ठंति- JBLKG मु. (क, ख, ग, घ, च, छ) । "अत्रैव स्थले जीवाजीवाभिगमसूत्रे 'णाणाविधपसाहणगभंडविरचिया सव्वोसधिपडिपुण्णा' इति पाठो लभ्यते (पृ. २११ पं.९) ।

सूत्र-१५३ : तेसि णं तोरणाणं पुरओ दो दो मणोगुलियातो पण्णत्तातो। तासु णं मणोगुलियासु बहवे सुवण्णरुप्पामया फलगा पण्णत्ता । तेसु णं सुवण्णरुप्पामएसु फलगेसु बहवे वइरामया नागदंतया पण्णत्ता । तेसु णं वइरामएसु णागदंतगेसु बहवे [1]रययामया सिक्कगा पण्णत्ता । तेसु णं [2]रययामएसु सिक्कगेसु बहवे वायकरगा पण्णत्ता । ते णं वायकरगा किण्हसुत्तसि[3]क्कगागवच्छिता णीलसुत्तसिक्कगा-गवच्छिता लोहियसुत्त-सिक्कगा-गवच्छिता हालिद्दसुत्तसिक्कगा-गवच्छिता सुक्किलसुत्तसिक्कगा-गवच्छिता सव्ववेरुलियमया अच्छा जाव पडिरूवा ॥ १५३ ॥

(१५३) '**तेसि ण**'मित्यादि, **तेषां** तोरणानां पुरतो द्वे द्वे मनोगुलिके प्रज्ञप्ते, मनोगुलिका नाम पीठिका, उक्तं च [4]**जीवाभिगममूलटीकायां**-"**मनोगुलिका नाम पीठिका**" [ ] इति, [5]ताश्च मनोगुलिकाः सर्वात्मना वैडूर्यमय्यो 'अच्छा' इत्यादि प्राग्वत् । '**तासु णं मणोगुलियासु बहवे**' इत्यादि, तासु मनोगुलिकासु **सुवर्णमयानि रूप्यमयानि च फलकानि प्रज्ञप्तानि, तेषु सुवर्णरूप्यमयेषु फलकेषु च बहवो वज्रमया नागदन्तकाः**-अङ्कुटकाः, **तेषु च नागदन्तकेषु बहूनि रजतमयानि सिक्कानि** प्रज्ञप्तानि, **तेषु च रजतमयेषु सिक्ककेषु बहवो वातकरका**-जलशून्याः करका[6]ः प्रज्ञप्ताः, तद्यथा-'**किण्ह-सुत्ते**'[7]त्यादि, गवच्छः-आच्छादनं गवच्छा सञ्जाता एष्विति गवच्छिताः, कृष्णसूत्रैः-कृष्ण-सूत्रमयैर्गवच्छैरिति गम्यते, सिक्ककेषु गवच्छिताः **कृष्णसूत्रसिक्कगगवच्छिताः**, एवं **नीलसूत्र-सिक्कगगवच्छिता** इत्याद्यपि भावनीयं, ते च वातकरकाः **सर्वात्मना वैडूर्यमया 'अच्छा'** इत्यादि प्राग्वत् ॥ १५३ ॥

---

१. वइरामया JBLK मु. (क, ख, ग, घ, च, छ); "वृत्तौ तथा जीवाजीवाभिगमस्य (३।३२६) आदर्शेषु वृत्तावपि (पत्र २१४) च रजतपदमुपलभ्यते । प्रस्तुतागमस्यादर्शेषु 'वइर' इति पदं केनापि लिपिदोषादिकारणेन प्रविष्टमभूत् ।" इति V पृ. ११७ टि. १० । २. वइरामएसु (क, ख, ग, घ, च, छ) । JBLK मु. ॥ ३. °सिक्का (क, ख, ग, घ, च, छ) । सिक्कगाच्छिता-K । सिक्कागवच्छिता-J एवमग्रेऽपि । ४. द्र. जीवाभि. टीका. पृ. २१३ पं. १२ ॥ ५. "प्राप्तप्रतिमूलपाठे अस्य वाक्यस्य मूलपाठो न दृश्यते । अत्र स्थले मुद्रितजीवाजीवाभिगमसूत्रेऽपि एवमेव पृ. २११ पं. १० ।" इति G पृ. १७६ टि. ॥ ६. °का इत्यर्थः प्रज्ञप्ताः - JKEG ॥ ७. G । गवच्छं - मु. । "जीवाजीवाभिगमविवरणे 'गवस्थ' शब्दो लभ्यते प्र. पृ. २१४ पं. ३।" इति G पृ. १७८ टि. ॥

सूत्र-१५४ : तेसि णं तोरणाणं पुरतो दो दो चित्ता रयणकरंडगा पण्णत्ता–से जहाणामए रण्णो चाउरंतचक्कवट्टिस्स चित्ते रयणकरंडगे वेरुलियमणि-फालिहपडलपच्चोयडे[1] साते पभाते ते पतेसे सव्वतो समंता ओभासति उज्जोवेति तावेति पभासेति[2], एवमेव तेवि चित्ता रयणकरंडगा साते पभाते ते पतेसे सव्वतो समंता ओभासेंति उज्जोवेंति तावेंति पभासेंति[3] ॥ १५४ ॥

[१५४] '**तेसि ण**'मित्यादि, **तेषां तोरणानां पुरतो द्वौ द्वौ चित्रौ**-आश्चर्यभूतौ **रत्नकरण्डकौ प्रज्ञप्तौ** '**से जहानामए**' इत्यादि, स यथा नाम **राज्ञश्चतुरन्तचक्रवर्त्तिनः**-चतुर्षु पूर्वा-ऽपर-दक्षिणोत्तररूपेषु अन्तेषु-पृथिवीपर्यन्तेषु चक्रेण वर्त्तितुं शीलं यस्य तस्य **चित्रः**-आश्चर्यभूतो नानामणिमयत्वेन नानावर्णो वा, '**वेरुलियमणि-फालियपडलपच्चोयडे**[4]' इति बाहुल्येन वैडूर्यमणिमयः 'फालिहपडलपच्चोयडे' इति स्फाटिकपटलावच्छादितः, '**साए पभाए**' इत्यादि, स्वकया प्रभया **तान्** प्रत्यासन्नान् **प्रदेशान् सर्वतः**-सर्वासु दिक्षु **समन्ततः**-सामस्त्येन **अवभासयति** एतदेव पर्यायत्रयेण व्याचष्टे-**उद्द्योतयति तापयति प्रभासयति** '**एवमेवे**'त्यादि सुगमम् ॥ १५४ ॥

सूत्र-१५५ : तेसि णं तोरणाणं पुरओ दो दो हयकंठा गयकंठा नरकंठा किन्नरकंठा किंपुरिसकंठा महोरगकंठा गंधव्वकंठा उसभकंठा सव्वरय[5]णामया अच्छा जाव पडिरूवा ॥ १५५ ॥

[१५५] '**तेसि णं तोरणाण**'मित्यादि, तेषां तोरणानां **पुरतो द्वौ द्वौ हयकण्ठौ**-हयकण्ठप्रमाणौ रत्नविशेषौ, एवं **गज-नर-किन्नर-किंपुरुष-महोरग-गन्धर्व-वृषभकण्ठा** अपि वाच्याः, उक्तं च जीवाभिगममूलटीकाकारेण[6]-''**हयकण्ठौ-हयकण्ठप्रमाणौ रत्नविशेषौ**'' एवं सर्वेऽपि कण्ठा वाच्या' इति, तथा चाह-'**सव्वरयणामया**' इति, सर्वे रत्नमया-रत्नविशेषरूपाः '**अच्छा**' इत्यादि प्राग्वत् ॥ १५५ ॥

---

१. फलिय° JLK । (क,ख,ग,घ,च,छ) । फालिय° V ॥ २. पगासति J (क,ख,ग,घ,च,छ) । पभासति-LK । भासति-मु. ॥ ३. पगासंति-मु. K । पगासेंति-JL (क, ख, ग, घ) ॥ ४. JKE। फलि मु. । एवमग्रेऽपि ॥ ५. °वइरामया JL (क, ख, ग, घ, च, छ) । ६. द्र. जीवाभि. पृ. २१४ पं. ११ ॥

सूत्र-१५६ : [1]तेसि णं तोरणाणं पुरओ दो दो पुप्फचंगेरीतो → [2]मल्ल-चंगेरीओ चुन्नचंगेरीओ गंधचंगेरीओ ← वत्थचंगेरीतो आभरणचंगेरीतो सिद्धत्थचंगेरीतो लोमहत्थचंगेरीतो पन्नत्तातो सव्वरयणामतीतो अच्छातो जाव पडिरूवातो ॥ १५६ ॥

[१५६] **'तेसि ण'**मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे पुष्पचङ्गेर्यौ प्रज्ञप्ते, एवं माल्य-चूर्ण-गन्ध-वस्त्रा-ऽऽभरण-सिद्धार्थक-लोमहस्तकचङ्गेर्योऽपि** वक्तव्याः, एताश्च सर्वा अपि **सर्वात्मना रत्नमया 'अच्छा'**इत्यादि प्राग्वत् ॥ १५६ ॥

सूत्र-१५७ : [3]तेसि णं तोरणाणं पुरओ दो दो पुप्फपडलगाति जाव लोमहत्थपडलगाइं पण्णत्ताइं सव्वरयणामयाइं अच्छाइं जाव पडिरूवाइं ॥ १५७ ॥

[१५७] एवं पुष्पादीनामष्टानां पटलकान्यपि द्विद्विसङ्ख्याकानि वाच्यानि ॥ १५७ ॥

सूत्र-१५८ : तेसि णं तोरणाणं पुरतो दो दो सीहासणा पण्णत्ता । तेसि णं सीहासणाणं वण्णतो [4]जाव दामा ॥ १५८ ॥

[१५८] **'तेसि णं [5]तोरणाण'** मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे सिंहासने प्रज्ञप्ते, तेषां च सिंहासनानां वर्णकः** [6]प्रागुक्तो निरवशेषो वक्तव्यः ॥ १५८ ॥

सूत्र-१५९ : तेसि णं तोरणाणं पुरतो दो दो [7]रुप्पमया छत्ता पण्णत्ता । ते णं छत्ता वेरुलियविमलदंडा जंबूणयकण्णिया वइरसंधी मुत्ताजाल-परिगया अट्ठसहस्सवरकंचणसलागा दद्दरमलयसुगंधि-सव्वोउतसुरभिसीय-लच्छाया मंगलभत्तिचित्ता चंदागारोवमा ॥ १५९ ॥

---

१. तेसु णं हयकंठएसु जाव उसभकंठएसु दो J मु. (क, ख, ग, घ, च, छ) । तेसु णं हयकंठएसु दो-K । २. →← चिह्नद्वयमध्यवर्ति पाठः JL नास्ति ॥ ३. तासु णं पुप्फचंगेरीसु जाव लोमहत्थचंगेरीसु दो JLK मु. (क, ख, ग, घ, च, छ) । ४. द्र० सू० ३७-४० । ५. तोरणाण - JKE नास्ति ॥ ६. द्र. सू. ३७-४० ॥ ७. रुप्पच्छदा (जीवा० ३।३३२) । ८. VG । तिविट्ठदंडा (क, ख, ग); निविट्ठदंडा (घ) । निविडदंडा-JLK ॥

[१५९] '**तेसि ण**'मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे छत्रे रूप्यमये प्रज्ञप्ते, तानि च छत्राणि वैडूर्यरत्नमयविमलदण्डानि जाम्बूनदकर्णिकानि वज्रसन्धीनि**-वज्ररत्नापूरितदण्डशलाकासन्धीनि **मुक्ताजालपरिगतानि अष्टौ सहस्राणि**-अष्टसहस्रसङ्ख्या **वरकाञ्चनशलाका**-वरकाञ्चनमय्यः शलाका येषु तानि, तथा '**दद्दरमलयसुगंधि-सव्वोउय-सुरभिसीयलच्छाया**' इति दर्दरः-चीवरावनद्धं-कुण्डिकादिभाजनमुखं तेन गालितास्तत्र पक्वा वा ये मलया इति-मलयोद्भवं श्रीखण्डं तत्सम्बधिनः सुगन्धा[१] ये गन्धवासास्तद्वत् सर्वेषु ऋतुषु सुरभिः शीतला च छाया येषां तानि तथा, '**मंगलभत्तिचित्ता**' अष्टानां स्वस्तिकादीनां मङ्गलानां भक्त्या-विच्छित्त्या चित्रम्-आलेखो येषां तानि तथा, '**चंदागारोवमा**' चन्द्राकारः-चन्द्राकृतिः सा उपमा येषां तानि तथा, चन्द्रमण्डलवत् वृत्तानीति भावः ॥ १५९ ॥

सूत्र-१६० : तेसि णं तोरणाणं पुरतो दो दो चामरातो पण्णत्तातो । तातो णं चामरातो 'चंदप्पभ-वेरुलिय-वइर-→नानामणिरयणखचियचित्तदंडाओ'← 'सुहुमरययदीहवालातो संखंक-कुंद-दगरय-अमयमहियफेणपुंजसन्निगासातो'[३] सव्वरयणामतीतो अच्छातो जाव पडिरूवातो ॥ १६० ॥

[१६०] '**तेसि ण**'मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे चामरे प्रज्ञप्ते, तानि च चामराणि 'चंदप्पभ-वेरुलिय-वइर-नाणामणिरयणखचितचित्तदंडाओ**' इति चन्द्रप्रभः-चन्द्रकान्तो वज्रं वैडूर्यं च प्रतीतं, चन्द्रप्रभ-वज्र-वैडूर्याणि शेषाणि च नानामणिरत्नानि खचितानि येषु ते तथा, एवंरूपाश्चित्रा-नानाकारा दण्डा येषां चामराणां तानि तथा, '**सुहुमरययदीहवालाओ**' इति सूक्ष्मा रजतमया दीर्घा वाला येषां तानि तथा, '**संखंक-कुंद-दगरयअमयमहियफेणपुंजसन्निकासाओ**' इति 'शङ्खः' प्रतीतः, अङ्को-रत्नविशेषः, 'कुंदे'ति कुन्दपुष्पं, दकरज-उदककणाः, अमृतमथितफेणपुञ्जः-क्षीरोदजलमथनसमुत्थः फेनपुञ्जस्तेषामिव सन्निकाशः-प्रभा येषां तानि तथा, '**अच्छा**' इत्यादि प्राग्वत् ॥ १६० ॥

---

१. सुगन्धयो वासा. JKE ॥ २. JLK मु. । णाणामणिकणगरयणविमलमहरिहतवणिज्जुज्जलविचित्तदंडाओ चिल्लियाओ (क, ख, ग, घ, च, छ) । ३. °साओ सुहुमरययदीहवालाओ सव्व० JLK (क, ख, ग, घ, च, छ) ।

सूत्र-१६१ : तेसि णं तोरणाणं पुरतो दो दो तेल्लसमुग्गा कोट्ठसमुग्गा पत्तसमुग्गा चोयगसमुग्गा तगरसमुग्गा एलासमुग्गा हरियालसमुग्गा हिंगुलयसमुग्गा मणोसिलासमुग्गा अंजणसमुग्गा सव्वरयणामया अच्छा जाव पडिरूवा ॥ १६१ ॥

[१६१] '**तेसि णं**' इत्यादि, तेषां तोरणानां **पुरतो द्वौ द्वौ तैलसमुद्गकौ**-सुगन्धितैलाधार-विशेषौ, उक्तं च **जीवाभिगममूल**[१]**टीकायां**-"**तैलसमुद्गकौ-सुगन्धितैलाधारौ**" एवं **कोष्टादि**समुद्गका अपि वाच्याः, अत्र [२]**सङ्ग्रहणिगाथा**-"**तिल्ले कोट्ठस**[३]**मुग्गे पत्ते चोए य तगर एला य । हरियाले हिंगुलए मणोसिला अंजणसमुग्गा**" ॥१॥ '**सव्वरयणामया**' इति एते सर्वेऽपि सर्वात्मना रत्नमया '**अच्छा**'इत्यादि प्राग्वत् ॥ १६१ ॥

सूत्र-१६२ : सूरियाभे णं विमाणे एगमेगे [४]**दारे अट्ठसयं चक्कज्झयाणं, अट्ठसयं मिगज्झयाणं [एवं] गरुलज्झयाणं** [५]**ऋच्छज्झयाणं छत्तज्झयाणं पिच्छज्झयाणं सउणिज्झयाणं सीहज्झयाणं, उसभज्झयाणं, अट्ठसयं सेयाणं चउविसाणाणं नागवरकेऊणं ॥ १६२ ॥**

[१६२] '**सूरियाभे णं विमाणे एगमेगे दारे अट्ठसयं चक्कज्झयाणं**' मित्यादि, तस्मिन् सूर्याभे विमाने एकैकस्मिन् द्वारे अष्टाधिकं शतं चक्रध्वजानां-चक्रलेखरूप-चिह्नोपेतानां ध्वजाना**मेवं मृग-गरुड-रुद्धछत्र-पिच्छ-शकुनि-सिंह-वृषभ-चतुर्दन्तहस्ति-ध्वजानामपि** प्रत्येकमष्टशत**मष्टशतं** वक्तव्यम् ॥ १६२ ॥

---

१. JKEG । टीकाकारेण - मु. । टीकाकारः भा. २ । द्र. जीवाभि. प्र. पृ. २१४ पं. १४ ॥ २. "एषा गाथाऽपि जीवा. वि. प्र. पृ. २१५ पं. १" इति G पृ. १८० टि. ॥ ३. मुग्गा - G ॥ ४. वारे J (क, ख, ग, घ, च, छ) । ५. सुंग° J । झुंक° LK । "पण्डितबेचरदासजीसंपादितवृत्तौ (पृ० १८०) 'रुद्ध' इतिपदं मुद्रितमस्ति, किन्तु नास्यात्रसङ्गतिर्दृश्यते । प्रस्तुतसूत्रस्य हस्तलिखितवृत्तौ 'ऋच्छ' इति पदमस्ति । 'घ' संकेतितादर्शेपि 'ऋच्छ' इतिपदं लभ्यते । जीवाजीवाभिगमसूत्रस्य (३।३३५) हस्तलिखितवृत्तावपि 'ऋच्छ' इतिपदं निर्दिष्टमस्ति । शेषप्रयुक्तादर्शेषु एतत् पदं अस्य स्थाने वा अन्यत् पदमनुपलब्धमस्ति ।" इति V पृ. ११९ टि. ७ ।

सूत्र-१६३ : एवामेव सपुव्वावरेणं[१] सूरियाभे विमाणे एगमेगे दारे आसीयं आसीयं केउसहस्सं भवति इति मक्खायं[२] ॥ १६३ ॥

[१६३] **'एमेव सपुव्वावरेण'** एवमेव-अनेनैव प्रकारेण सपूर्वापरेण-सह पूर्वैः अपरैश्च वर्त्तते इति सपूर्वापरं-सङ्ख्यानं तेन **सूर्याभे विमाने एकैकस्मिन् द्वारे अशीतमशीतं**-अशीत्यधिकम् अशीत्यधिकं **केतुसहस्रं भवतीत्याख्यातं** मया अन्यैश्च तीर्थकृद्भिः ॥ १६३ ॥

सूत्र-१६४ : तेसि[३] णं दाराणं एगमेगे दारे पण्णट्ठिं-पण्णट्ठिं भोमा पण्णत्ता । तेसि णं भोमाणं भूमिभागा उल्लोया य भाणियव्वा[४] [तेसि[५] णं भोमाणं बहुमज्झदेसभाए जाणि तेत्तीसमाणि भोमाणि] । तेसि णं भोमाणं बहुमज्झदेसभागे पत्तेयं पत्तेयं सीहासणे [पण्णत्ते ?] सीहासण[६]-वण्णतो सपरिवारो । अवसेसेसु भोमेसु पत्तेयं-पत्तेयं सीहासणे[७] पण्णत्ते ॥ १६४ ॥

[१६४] **'तेसि ण'**मित्यादि, **तेषां द्वाराणां** सम्बन्धीनि प्रत्येकं **पञ्चषष्टिः पञ्चषष्टिः भौमानि**-विशिष्टानि स्थानानि **प्रज्ञप्तानि, तेषां च भौमानां भूमिभागा उल्लोकाश्च** यानविमानवद्वक्तव्याः, **तेषां च भौमानां बहुमध्यदेशभागे यानि त्रयस्त्रिंशत्तमानि भौमानि तेषां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं** सूर्याभदेवयोग्यं **सिंहासनं,** तेषां च **सिंहासनानां वर्णको**ऽपरोत्तरोत्तरपूर्वादिषु[८] सामानिकादिदेवयोग्यानि भद्रासनानि च क्रमेण यानविमानवद्वक्तव्यानि **शेषेषु च भौमेषु प्रत्येक**मेकैकं **सिंहासनं** परिवाररहितम् ॥ १६४ ॥

सूत्र-१६५ : तेसि णं दाराणं उत्तिमागारा[९] सोलसविहेहिं रयणेहिं उवसोभिता, तं जहा—रयणेहि जाव रिट्ठेहिं ॥ १६५ ॥

---

१. पुव्वा० JLK ॥ २. "मे + अक्खायं = मक्खायं'[८-१-१० हैम०]" इति G पृ.१८१ टि. ॥ ३. सुरियाभे विमाणे प० JLK मु. (क, ख, ग, घ, च, छ) । ४. द्र. सू० २४-३१, ३४ । ५. "कोष्ठकवर्तिपाठः आदर्शेषु नोपलभ्यते, वृत्तावस्ति व्याख्यातः-बहुमध्यदेशभागे यानि त्रयस्त्रिंशत्तमानि भौमानि। जीवाजीवाभिगमे (३।३३६) एतत् संवादी पाठो विद्यते ।" इति V पृ. ११९ टि. ११ । ६. द्र० सू० ३७-४४ । ७. भद्दासणा पण्णत्ता JLK मु. (क, ख, ग, घ, च, छ); ॥ ८. ्त्तरपूर्वा - G ॥ ९. K (क, ख, ग, घ, च, छ); उत्तमा० उत्तरागारा-V ॥

[१६५] '**तेसि ण**'मित्यादि, **तेषां द्वाराणाम् उत्तमा आकारा**-उपरितना आकारा उत्तरंगादिरूपाः[१], क्वचित् 'उवरिमागारा' इत्येव पाठः, **षोडशविधै रत्नैरुपशोभिता-स्तद्यथा-'रयणेहिं जाव रिट्ठेहिं'** इति रत्नैः सामान्यतः कर्केतनादिभिर्यावत्करणाद् वज्रैः २ वैडूर्यैः ३ लोहिताक्षैः ४ मसारगल्लैः ५ हंसगर्भैः ६ पुलकैः ७ सौगन्धिकैः ८ ज्योतीरसैः ९ अङ्कैः १० अञ्जनैः ११ रजतैः १२ अञ्जनपुलकैः १३ जातरूपैः १४ स्फटिकैरिति परिग्रहः, १५ षोडशै रिष्टैः १६ ॥ १६५ ॥

सूत्र-१६६ : तेसि णं दाराणं उप्पिं अट्ठट्ठ मंगलगा ॥ १६६ ॥

सूत्र-१६७ : सझया[२] जाव ॥ १६७ ॥

सूत्र-१६८ : छत्तातिछत्ता ॥ १६८ ॥

सूत्र-१६९ : एवामेव सपुव्वावरेणं सूरियाभे विमाणे चत्तारि दारसहस्सा भवंतीति मक्खायं ॥ १६९ ॥

[१६६-१६९] '**तेसि ण**'मित्यादि, **तेषां द्वाराणां** प्रत्येकमुपरि **अष्टौ अष्टौ** स्वस्तिकादीनि **मङ्गलकानि** इत्यादि यानविमानतोरणवत्तावद्वाच्यं यावद् बहवः सहस्रपत्र-हस्तका इति, अत ऊर्ध्वं केषुचित् पुस्तकान्तरेष्वेवं पाठः 'एवमेव सपुव्वावरेणं सूरियाभे विमाणे चत्तारि दारसहस्सा भवंतीति मक्खायं'इति सुगमम् ॥ १६६-१६९ ॥

सूत्र-१७० : सूरियाभस्स विमाणस्स चउद्दिसिं पंच जोयणसयाइं अबाहाते चत्तारि वणसंडा पण्णत्ता, तं जहा-['असोगवणे, सत्तवण्ण-वणे चंपगवणे, चूयवणे] पुरत्थिमेणं[३] असोगवणे, दाहिणेणं सत्तिवण्ण-वणे, पच्चत्थिमेणं चंपगवणे, उत्तरेणं चूयवणे । ते णं वणसंडा साइरेगाइं अद्धतेरस जोयणसयसहस्साइं आयामेणं, पंच जोयणसयाइं विक्खंभेणं, पत्तेयं पत्तेयं पागारपरिक्खित्ता किण्हा किण्होभासा वणसंडवण्णतो[४] ॥ १७० ॥

---

१. भाषायाम् 'ओतरंग' इति प्रसिद्धम् - G पृ. १८१ टि. ॥ २. द्र० सू० २१-२३ । इया- K ॥ ३. पुव्वेणं JLBK (क, ख, ग, घ, च, छ) । ४. द्र० उववाइसुत्तं ५-७ ।

[१७०] **'सूरियाभस्स ण'**मित्यादि, **सूर्याभस्य विमानस्य** चतुर्दिशं-चतस्रो दिशः समाहृताश्चतुर्दिक् तस्मिन् **चतुर्दिशि**-चतसृषु दिक्षु **पञ्च पञ्च योजनशतानि 'अबाहाए'** इति-बाधनं बाधा आक्रमणमित्यर्थः न बाधा अबाधा-अनाक्रमणं, तस्यामबाधायां कृत्वेति गम्यते, अपान्तरालं मुक्त्वेति भावः, **चत्वारो वनखण्डाः प्रज्ञप्ताः**, अनेकजातीयानामुत्तमानां महीरुहाणां समूहो वनखण्डः, उक्तञ्च जीवाभिगमचूर्णौ-''[१]**अणेगजाईहिं उत्तमेहिं रुक्खेहिं वणसंडे**'' [ ] इति, **'तद्यथे'**त्यादिना तानेव वनखण्डान् नामतो दिग्भेदतश्च दर्शयति, अशोक-वृक्षप्रधानं वन**मशोकवनमेवं सप्तपर्णवनं चम्पकवनं चूतवनमपि** भावनीयम्, **'पुरत्थि-मेण'**मित्यादिपाठसिद्धम्, अत्र **संग्रहणिगाथा-**

''पुव्वेण असोगवणं दाहिणतो होइ सत्तिवण्णवणं । अवरेणं चंपकवणं चूयवणं उत्तरे पासे ॥ १॥''

'[२]ते ण'मित्यादि, **ते च वनखण्डाः सातिरेकाणि अर्द्धत्रयोदशानि**-सार्द्धानि द्वादश **योजनशतसहस्राणि [३]आयामेन, पञ्चयोजनशतानि विष्कम्भतः प्रत्येकं प्रत्येकं प्राकार-परिक्षिप्ताः**, पुनः कथंभूतास्ते वनखण्डा ? इत्याह-'किण्हा किण्होभासा जाव पडिमोयणा सुरम्मा' इति यावत्करणादेवं परिपूर्णः पाठः सूचितो-'नीला नीलोभासा हरिया हरियोभासा सीया सीयोभासा निद्धा निद्धोभासा तिव्वा तिव्वोभासा किण्हा किण्हच्छाया नीला नीलच्छाया हरिया हरियच्छाया सीया सीयच्छाया निद्धा निद्धच्छाया [४]घणकडियकडिच्छया [५]रम्मा महामेहनिकुरुंबभूया । ते णं पायवा मूलमंतो कंदमंतो खंधमंतो तयमंतो पवालमंतो पत्तमंतो पुप्फमंतो बीयमंतो फलमंतो अणुपुव्वसुजायरुइलवट्ट[६]परिणया एगखंधा अणेग-साहप्पसाह-विडिमा अणेगनर[७]वामप्पसारियअगेज्झ-घण-विपुलवट्टखंधी अच्छिद्दपत्ता अविरल-पत्ता अवाइणपत्ता अणीइयपत्ता निद्धुयजरढपंडुपत्ता नवहरिय-भिसंत-पत्तभारंधयार-गंभीर-दरिसणिज्जा उवणिग्गयवरतरुणपत्तपल्लवकोमलउज्जलचलंतकिसलयकुसु[८]मपवाल-पल्लवं-कुरग्गसिहरा निच्चं कुसुमिया निच्चं मउलिया निच्चं लवइया निच्चं थवइया निच्चं गुलइया

---

१. 'एगजाईएहिं रुक्खेहिं वणं अणेगजाईएहिं उत्तमेहिं रुक्खेहिं वणसण्डे' जीवाजीवा. वृ. पृ. १८७ पं.७'' G पृ. १८२ टि. ॥ २. से ण - JKE ॥ ३. JKE । (आयामतः) - मु. ॥ ४. ''घनकडियकडच्छाए - तत्राऽयमर्थः - कटः संजातः अस्य इति कटितः कटान्तरेण उपरि आवृत इत्यर्थः, कटितश्चासौ कटश्च कटितकटः घना निबिडा कटितकटस्य इव अधोभूमौ छाया यस्य स घनकटितच्छायः - (जीवाजीवा. प्र. पृ. १८७ पं. ११) पृ. ९ पं. ४ ।'' इति G पृ. १८४ टि. । घनकडिततडियच्छाया-G ॥ ५. पस्स महा॰ JKE ॥ ६. वट्टभावप॰ JB ॥ ७. ॰वामसुप्प॰ JK ॥ ८. ॰मालप॰ JKE । सुकुमालपवाल॰ औप. सू. ५. ॥

निच्चं गोच्छिया निच्चं जमलिया निच्चं जुयलिया निच्चं विणमिया निच्चं पणमिया निच्चं कुसुमिय-मउलिय-लवइय-थवइय-गुलइय-गोच्छिय-जमलिय-जुवलिय-विणमिय-पणमिय-सुविभत्त-पडिमंजरिवडंसयधरा[१] सुय-बरहिण-मयणसलागा-कोइल-कोरक-भिंगारक-कोंडल-जीवंजीवक-नंदीमुख-कविंजल-पिंगलक्खग-कारंड-चक्कवाग-कलहंस-सारस-अणेगसउणगि[२]-हुणवियरिय-सद्दइय-महुरसरनाइयसंपिंडियदरियभमरमहुयरिपहकर-परिलेंतछप्पयकुसुमा-सवलोल-महुरगुमगुमंतगुंजंतदेसभागा अब्भिंतरपुप्फफला बाहिरपत्तोच्छन्ना पत्तेहि य पुप्फेहि य उवच्छन्नपलिच्छन्ना नीरोगका[३] मउफासा अकंटगा णाणाविहगुच्छगुम्ममंड-वगोवसहिया विचित्तसुहकेउभूया वाविपुक्खरणिदीहियासु[४] य सुनिवेसियरम्मजालघरगा पिंडिमनीहारिम-सुगंधिसुरभिमणहरं च गंधद्धणिं मुयंता सुहसेउकेउबहुला[५] अणेगसगडर-हजाणजुग्गगिल्लि-थिल्लिसीयसंदमाणीपडिमोयणा सुरम्मा' - [औपपातिकसूत्र-४-७] इति

अस्य व्याख्या-इह प्रायो वृक्षाणां मध्यमे वयसि वर्त्तमानानि पत्राणि कृष्णानि भवन्ति ततस्तद्योगाद् वनखण्डा अपि कृष्णाः, न चोपचारमात्रात्ते कृष्णा इति व्यपदिश्यन्ते किन्तु तथाप्रतिभासनात्, तथा चाह-'कृष्णावभासा' यावति भागे कृष्णावभासपत्राणि सन्ति तावति भागे ते वनखण्डाः कृष्णा अवभासन्ते, ततः कृष्णोऽवभासो येषां ते कृष्णावभासा इति, तथा हरितत्वमतिक्रान्तानि कृष्णत्वमसंप्राप्तानि पत्राणि नीलानि तद्योगाद्वनखण्डा अपि नीलाः, न चैतदुपचारमात्रेणोच्यते किन्तु तथाऽवभासात्, तथा चाह नीलाऽवभासाः, समासः प्राग्वद्, यौवने तान्येव पत्राणि किसलयत्वं रक्तत्वं चातिक्रान्तानि ईषद् हरितालाऽऽभानि पाण्डूनि सन्ति हरितानीति व्यपदिश्यन्ते, ततस्तद्योगाद् वनखण्डा अपि हरिताः, न चैतदुपचारमात्रादुच्यते, किन्तु तथाप्रतिभासात्, तथा चाह-हरितावभासाः, तथा बाल्यादतिक्रान्तानि वृक्षाणां पत्राणि शीतलानि[६] भवन्ति ततस्तद्योगाद्वनखण्डा अपि शीता इत्युक्ताः, न च न ते गुणतस्तथा किन्तु तथैव, तथा चाह-शीतावभासाः, अधोभागवर्त्तिनां वैमानिकदेवानां देवीनां च तद्योगशीतवातसंस्पर्शतः ते शीता वनखण्डा अवभासन्ते इति, तथा एते कृष्णनीलहरितवर्णा यथा स्वस्मिन् स्वस्मिन् स्वरूपे अत्युत्कटा[७] स्निग्धा भण्यन्ते तीव्राश्च ततः तद्योगाद् वनखण्डा अपि स्निग्धाः तीव्राश्च इत्युक्ताः, न चैतदुपचारमात्रं किन्तु तथावभासोऽप्यस्ति तत उक्तं-स्निग्धावभासास्तीव्रावभासा इति, इहावभासो भ्रान्तोऽपि भवति यथा मरुमरीचिकासु

---

१. °वडंसिय° JK ॥ २. सुयण JKE ॥ ३. का साउफला अ JKE ॥ ४. °रिणि° JKE ॥ ५. सुहकेऊकेउ° मु. ॥ ६. JKE । शीतानि - मु. ॥ ७. J । अत्यक्ते स्नि° मु. ।

जलावभासस्ततो नावभासमात्रोपदर्शनेन यथावस्थितं वस्तुस्वरूपं वर्णितं भवति किन्तु तथास्वरूपप्रतिपादनेन, ततः कृष्णत्वादीनां तथास्वरूपप्रतिपादनार्थमनुवादपुरस्सरं विशेषणान्तरमाह-'किण्हा किण्हच्छाया' इत्यादि, कृष्णा वनखण्डाः, कुत इत्याह-कृष्णच्छायाः **"निमित्त-कारण-हेतुषु सर्वासां विभक्तीनां प्रायो दर्शनम्"** [ ] इति वचनाद् हेतौ प्रथमा, ततोऽयमर्थः-यस्मात् कृष्णा छाया-आकारः सर्वाविसंवादितया तेषां तस्मात् कृष्णाः, एतदुक्तं भवति-सर्वाविसंवादितया तत्र कृष्ण आकार उपलभ्यते, न च भ्रान्तावभाससंपादितसत्ताकः सर्वाविसंवादी भवति, ततस्तत्त्ववृत्त्या ते कृष्णा न भ्रान्तावभासमात्रव्यवस्थापिता इति, एवं नीला नीलच्छाया इत्याद्यपि भावनीयं, नवरं शीताः शीतच्छाया इत्यत्र छायाशब्द आतपप्रतिपक्षवस्तुवाची द्रष्टव्यः, 'घनकडितडियच्छाया' इति इह शरीरस्य मध्यभागे कटिस्ततोऽन्यस्यापि मध्यभागः कटिरिव कटिरित्युच्यते, कटिस्तटमिव कटितटं घना-अन्योऽन्यशाखा-प्रशाखानुप्रवेशतो निविडा कटितटे-मध्यभागे छाया येषां ते तथा, मध्यभागे निबिडतरच्छाया इत्यर्थः, अत एव रम्यो-रमणीयः तथा महान् जलभारावनतप्रावृट्कालभावी यो मेघनिकुरुम्बो-मेघसमूहस्तं भूता-गुणैः प्राप्ता महामेघनिकुरुम्बभूताः, महामेघवृन्दोपमा इत्यर्थः । 'ते णं पायवा' इत्यादि, अशोकवरपादपपरिवारभूतप्रागुक्ततिलकादिवृक्षवर्णकवत्[1] परिभावनीयं, नवरं 'सुयबरहिणमयणसलागा' इत्यादि विशेषणमत्रोपमया भावनीयम्, 'अणेगसगडरहजाणे'त्यादि तदाकारभावतः ॥ १७० ॥

सूत्र-१७१ : तेसि णं वणसंडाणं अंतो बहुसमरमणिज्जा भूमिभागा पण्णत्ता—से जहानामए आलिंगपुक्खरे ति वा जाव[2] णाणाविह पंचवण्णेहिं तणेहि य मणीहि य उवसोभिया[3] ॥ १७१ ॥

सूत्र-१७२ : तेसि णं गंधो फासो णायव्वो[4] जहक्कमं ॥ १७२ ॥

[१७१-१७२] **'तेसि णं वणसंडाण'**मित्यादि, **तेषां वनखण्डानामन्तः**-मध्ये **बहुसमरमणीया भूमिभागाः प्रज्ञप्ताः**, तेषां च भूमिभागानां **'से जहानामए आलिंगपुक्खरे इ वा'** इत्यादि वर्णनं प्रागुक्तं तावद्वाच्यं यावन्मणीनां स्पर्शो, नवरमत्र तृणान्यपि वक्तव्यानि, तानि[5] चैवं-**'नाणाविहपंचवण्णेहि मणीहि य तणेहि य उवसोभिया,**

---

१. JK । वर्णनवत्-मु. ॥ २. द्र० सू० २४ । ३. द्र० सू० २४-२९ । ४. द्र० सू० ३०, ३१ । ५. J संशो. मु. । तानि - JKE नास्ति ॥

तंजहा-किण्हेहि य नीलेहि य जाव सुक्किलेहि, तत्थ णं जे ते कण्हा तणा य मणी य तेसि णं अयमेयारूवे वन्नावासे पन्नत्ते, से जहानामए जीमूते इ वा' इत्यादि ॥ १७१-१७२ ॥ सम्प्रति तेषां मणीनां तृणानां च वातेरितानां शब्दस्वरूपप्रतिपादनार्थमाह-

सूत्र-१७३ : तेसि[१] णं भंते ! तणाण य मणीण य पुव्वावरदाहिणुत्त-रागतेहिं वातेहिं मंदायं-मंदायं एइयाणं वेइयाणं [[२]कंपियाणं] चालियाणं [[३]फंदियाणं] घट्टियाणं खोभियाणं उदीरियाणं केरिसए सद्दे भवति ? गोतमा ! से जहानामए सीयाए वा संदमाणीए वा रहस्स वा सच्छत्तस्स सज्झयस्स सघंटस्स सपडागस्स सतोरणवरस्स सनंदिघोसस्स सखिं-खिणिहेमजालपरिखित्तस्स हेमवय-चित्त[४]-तिणिस-कणगणिज्जु[५]त्तदारुया-यस्स सुसंपिणद्ध[६]रकमंडलधुरागस्स कालायससुकयणेमिजंतकम्मस्स आइण्णवरतुरगसुसंपउत्तस्स कुसलणरच्छेयसारहि-सुसंपरि[७]ग्गहियस्स सर-सयबत्तीस-तोण-परिमंडियस्स सकंकडावयंसगस्स सचाव-सर-पहरण-आवरण-भरिय-जोहजुज्झसज्जस्स रायंगणंसि वा रायंतेउरंसि वा, रम्मंसि वा मणिकोट्टिमतलंसि अभिक्खणं-अभिक्खणं अभिघट्टिज्ज-माणस्स उराला मणुण्णा मणोहरा कण्णमणनिव्वुइकरा सद्दा सव्वतो समंता अभिणिस्सवंति, भवेयारूवे सिया ? णो इणट्ठे समट्ठे । [८]से जहाणा-मए वेयालियवीणाए उत्तरमंदा-मुच्छित्ताए अंके सुपइट्ठियाए कुसलनर-नारिसुसंपग्गहियाते चंदण-सार-निम्मिय-कोण-परिघट्टियाए पुव्वरत्ता-

---

१. "इमा अपि प्रश्नोत्तररूपाः सर्वाः कण्डिका जीवा. मूले अस्ति पृ.१८५, पं. १०, पृ. १८६ पं. ३ ।" २. कंपियाणं JLK । (क, ख, ग, घ, च) नास्ति । जीवाभिगमे ३/२८५ अस्ति ॥ ३. फंदियाणं - JLK क, ख, ग, घ, च नास्ति । जीवाभिगमे ३/२८५ अस्ति ॥ ४. वितंतिणि-K । वंतंतिणि-J । "छ प्रतौ 'विचित्त' इति पाठोऽस्ति, अन्यासु च प्रतिषु 'चित्त' इति पाठः; किन्तु वृत्तौ जीवाजीवाभिगमे (३।२८५) तद्वृत्तौ (पत्र. १९२) च-चित्रविचित्रं-मनोहारिचित्रोपेतम् इति व्याख्यातमस्ति ।" इति V पृ. १२१ टि. ३ । ५. ०णिज्जत्त० J (क, ख, ग, घ, च) । ६. सुसंपिणिद्धाचक्क० (क, ख, ग, च) । सुसंचिट्ठस्स चक्कमंडल० K । सविद्ध [स-L] चक्क-J L ॥ ७. सुट्ठसंपग्ग० K । ससंपग्ग० J (क, ख, ग, घ, च, छ) । ८. "अस्याः *समग्रायाः अपि कण्डिकायाः विवरणम् [जीवा.सू.वृ. पृ.१९३-१९४]" अस्ति इति G पृ. १८९ टि. ॥*

वरत्तकालसमयम्मि मंदायं-मंदायं एइयाए वेइयाए [कंपियाए] चालियाए [फंदियाएं] घट्टियाए खोभियाए उदीरियाए ओराला मणुण्णा मणहरा कण्णमणनिव्वुइकरा सद्दा सव्वओ समंता अभिनिस्सवंति, भवेयारूवे सिया ? णो इणट्ठे समट्ठे । से जहानामए किन्नराण वा किंपुरिसाण वा महोरगाण वा गंधव्वाण वा भद्दसालवणगयाणं वा नंदणवणगयाणं वा सोमणसवणगयाणं वा पंडगवणगयाणं वा हिमवंत-मलय-मंदरगिरि-गुहासमन्नागयाणं वा एगओ [1]सहियाणं सन्निसन्नाणं समुवविट्ठाणं पमुइय-पक्कीलियाणं गीयरइ-गंधव्वहरिसियमणाणं गज्जं पज्जं कत्थं गेयं पयबद्धं पायबद्धं [2]उक्खित्तायं पायत्तायं मंदायं रोइयावसाणं सत्तसर-समन्नागयं अट्ठरससुसंपउत्तं छद्दोसविप्पमुक्कं एक्कारसालंकारं अट्ठगुणोववेयं, [3]गुंजावंककुहरोवगूढं रत्तं तिट्ठाणकरणसुद्धं सकुहरगुंजंतवंस-तंती-तल-ताल-लय-गहसुसंपउत्तं महुरं समं सललियं मणोहरं मउयरिभिय-पय-संचारं सुरइं सुणतिं वरचारुरूवं दिव्वं णट्टसज्जं गेयं पगीयाणं भवेयारूवे सिया ? हंता सिया ॥ १७३ ॥

[१७३] **'तेसि णं भंते ! तणाण य मणीण य'** इत्यादि, तेषां णमिति पूर्ववद् भदन्त !- [4]परमकल्याणयोगिन् ! तृणानां **पूर्वापरदक्षिणोत्तरगतैर्वातैर्मन्दायन्ति**-मन्दं मन्दम् **एजितानां**-कम्पितानां [5]**व्येजितानां**-विशेषतः- कम्पितानाम्, एतदेव पर्यायशब्देन व्याचष्टे- **कम्पितानां तथा चालितानाम्**-इतस्ततो मनाग् विक्षिप्तानां, एतदेव पर्यायेण व्याचष्टे- **स्पन्दितानां**, तथा **घट्टितानां**-परस्परं संघर्षयुक्तानां, [6]कथं घट्टितानाम् इत्याह-**क्षोभितानां [-[7]स्वस्थानाच्चालितानां]**, स्वस्थानाच्चालनमपि कुत इत्याह-**उदीरितानाम्** उत्-प्राबल्येन [[8]इरितानां-] प्रेरितानां, **कीदृशः शब्दः** प्रज्ञप्तः ?, भगवानाह-**'गोयमे'**त्यादि, गौतम ! **स**

१. सहिताणं संमुहागयाणं समुपविट्ठाणं संनिविट्ठाणं- इति जीवाजीवाभिगमे ३/२८५ । संन्निहियाणं समागयाणं सन्निसंन्नाणं समुवविट्ठीणं-G ॥ २. ओक्खित्तायं पयत्तायं BL (च, छ); उक्खित्तायं पवत्तायं (जीवा० ३।२८५) । ३. गुंजावक्क० JBL मु. (क, ख, ग, घ, च, छ) । गुंजा + अवंक० = गुंजावंक० । इति V पृ. १२२ टि. ३ । ४. तुला-जीवाभिगमवृत्तौ प्र. पृ. १९२, १९५ ॥ ५. व्यजि० JK ॥ ६. तथा - JKE ॥ ७-८. कोष्ठकगतपाठौ जीवा.टी.अस्ति ॥

यथानामकः शिबिकाया वा स्यन्दमानिकाया वा रथस्य वा[१], तत्र[२] सिबिया जम्पान-विशेषरूपा उपरिच्छादिता कोष्ठाकारा, तथा दीर्घो जम्पानविशेषः पुरुषस्य स्वप्रमाणावकाश-दायी स्यन्दमानिका, अनयोश्च शब्दः पुरुषोत्पाटितयोः क्षुद्रहेमघण्टिकादिचलनवशतो वेदितव्यः, रथश्चेह संग्रामरथः प्रत्येयोऽग्रेतनविशेषणानामन्यथाऽसम्भवात्[३], तस्य च फलक-वेदिका यस्मिन् काले ये पुरुषास्तदपेक्षया ततिप्रमाणाऽवसेया[४], तस्य च रथस्य विशेषणा-न्यभिधत्ते-'**सछत्तस्स**' इत्यादि, सच्छत्रस्य, **सध्वजस्य सघण्टाकस्य**-उभयपार्श्वावलम्बि-महाप्रमाणघण्टोपेतस्य, **सपताकस्य,** सह तोरणवरं-प्रधानतोरणं यस्य स **सतोरणवरस्तस्य**, सह नन्दीघोषो-द्वादशतूर्यनिनादो यस्य स **सनन्दिघोषस्तस्य**, तथा सह किङ्किण्यः-क्षुद्रघण्टा येषामिति **सकिङ्किणीकानि,** यानि **हेमजालानि** हेममयदामसमूहास्तैः सर्वासु दिक्षु पर्यन्तेषु-बहिःप्रदेशेषु **परिक्षिप्तो**-व्याप्तस्तस्य, तथा हैमवतं-हिमवत्पर्वतभावि चित्रं-विचित्रमनोहारिचित्रोपेतं[५] तैनिशं[६]-तिनिशतरुसंबन्धि कनकनिर्युक्तं[७]-कनकविच्छुरितं दारु-काष्ठं यस्य स **हैमवतचित्रतैनिशकनकनिर्युक्तदारुक**[८]स्तस्य, सूत्रे च द्वितीयः 'क'कारः स्वार्थिकः, पूर्वस्य च दीर्घत्वं प्राकृतत्वात्, तथा सुष्ठु-अतिशयेन सम्यक् पिनद्धं-बद्धम् अरकमण्डलं धूश्च यस्य स **सुसंपिनद्धाऽरकमण्डलधूष्क**[९]स्तस्य, तथा कालायसेन-लोहेन सुष्ठु-अतिशयेन कृतं नेमेः-बाह्यपरिधेर्यन्त्रस्य च-अरकोपरिफलकचक्रवालस्य कर्म यस्मिन् स **कालायसकृतनेमियन्त्रकर्मा** तस्य, तथा आकीर्णा-गुणैर्व्याप्ता ये वराः-प्रधानास्तुरगास्ते सुष्ठु-अतिशयेन सम्यक् प्रयुक्ता-योत्रिता[९] यस्मिन् स **आकीर्णवरतुरगसुसंप्रयुक्तः** तस्य, प्राकृतत्वाद् बहुव्रीहावपि क्तान्तस्य परनिपातः, तथा सारथिकर्मणि ये **कुशला नरास्तेषां** मध्ये अति-शयेन **छेको**-दक्षः **सारथिस्तेन सुष्ठु**-सम्यक् **परिगृहीतस्य**, तथा '**सरसयबत्तीसतोणपरिमंडियस्स**' इति शराणां शतं प्रत्येकं येषु तानि शरशतानि तानि च तानि द्वात्रिंशत् तूणानि च बाणाशयाः, तैर्मण्डितः शरशतद्वात्रिंशत्तूणमण्डितः, किमुक्तं भवति ?-एवं नाम तानि द्वात्रिंशत् शरशतभृतानि तूणानि रथस्य सर्वतः पर्यन्तेष्ववलम्बितानि यथा तानि संग्रामा-योपकल्पितस्यातीव मण्डनाय भवन्तीति, तथा कङ्कटः-कवचं सह कङ्कटो यस्य स सकङ्कटः सकङ्कटोऽवतंसः-शेखरो यस्य स **सकङ्कटावतंस**स्तस्य, तथा सह चापं

१. स्पन्द G । एवमग्रेऽपि । २. शिबिका - G ॥ ३. G । विशेषानाॅ मु. ॥ ४. कटिप्रॅ G जीवा. वृत्तौ । कतिप्रॅ पा. ४-५ भा. १ । ५. JKEG । विशेषोपेतं - मु. ॥ ६. तिनश JKE । एवमग्रेऽपि । तिनिशं-मु. ॥ ७. JKEG जीवा. वृत्तौ । कनकनिर्युक्तं-मु. नास्ति ॥ ८. JKEG । लघूःकरस्तस्य-मु. ॥ ९. JKE जीवा वृत्तौ । योजिता-मु. ॥

येषां ते सचापाः, **सचापा** ये **शरा** यानि च कुन्त-भल्लि-मुसण्ढिप्रभृतीनि नानाप्रकाराणि **प्रहरणानि** यानि च कवच-खेटकप्रमुखाणि **आवरणानि** तैर्**भृतः**-परिपूर्णः, तथा योधानां युद्धं तन्निमित्तं सज्जः-प्रगुणीभूतो यः स **योधयुद्धसज्जस्ततः** पूर्वपदेन सह विशेषणसमासः तस्य, इत्थंभूतस्य **राजाङ्गणे वा अन्तःपुरे वा रम्ये वा मणिकुट्टिमतले**-मणिबद्धभूमितले **अभीक्ष्णमभीक्ष्णं** मणिकोट्टिमतलप्रदेशे राजाङ्गणादिप्रदेशे वा '**अभिघट्टिज्जमाणस्से**'ति अभिघट्यमानस्य वेगेन गच्छतो ये **उदारा मनोज्ञा कर्णमनोनिर्वृतिकराः सर्वतः समन्ताद्** **जीवाभिगममूलटीकायामपि** "[१]**उप्पित्थं श्वासयुक्तम्**" [ ] इति, तथा उत्-प्राबल्येन अतितालमस्थानतालं वा उत्तालं, श्लक्ष्णस्वरेण काकस्वरं, सानुनासिकं सानुनासम्-नासिका-विनिर्गतस्वरानुगतमिति भावः, तथा '**अट्ठगुणोववेय**'मिति अष्टभिर्गुणैरुपेतमष्ट-गुणोपेतं, ते चाष्टावमी गुणाः पूर्णं रक्तमलङ्कृतं व्यक्तमविघुष्टं मधुरं समं सललितं च, तथा चोक्तम्-

"**पुणं रत्तं च अलंकियं च वत्तं तहेव अविघुट्ठं । महुरं समं सललियं अट्ठ गुणा होंति गेयस्स ॥ १॥**"

[३]तत्र यत् स्वरकलाभिः परिपूर्णं गीयते तत्पूर्णं, गेयरागानुरक्तेन यद् गीयते तद् रक्तम्, अन्योऽन्यस्वरविशेषकरणेन यदलङ्कृतमिव गीयते तदलङ्कृतम्, अक्षरस्वरस्फुटकरणतो व्यक्तं, विस्वरं क्रोशतीव विघुष्टं [४]न तथा अविघुष्टं, मधुरस्वरेण गीयमानं मधुरं कोकिला-रुतवत्, तालवंशस्वरादिसमनुगतं समं, तथा यत् स्वरघोलनाप्रकारेण ललतीव तत् सह ललितेन-ललनेन वर्त्तत इति सललितं, यदि वा यत् श्रोत्रेन्द्रियस्य शब्दस्पर्शनमतीव सूक्ष्ममुत्पादयति सुकुमारमिव च प्रतिभासते तत् सलिलतम् । इदानीमेतेषामेवाष्टानां मध्ये कियतो गुणान् अन्यच्च प्रतिपिपादयिषुरिदमाह-'**रत्तं तिट्ठाणकरणं सुद्धं**' तत् '**कुहर-गुंजंतवंस-तंती-तल-ताल-लय-गहसुसंपउत्तं महुरं समं सललियं मणोहरं मउय-रिभियपयसंचारं सुरइं सुनर्तिं वरचारुरूवं दिव्वं नट्टसज्जं गेयं पगीयाण**'मिति यथा [५]प्राग् नाट्यविधौ व्याख्यातं तथा भावनीयम् '[६]जारिसए सद्दे हवइ' प्रगीतानां-गातुमारब्धवतां यादृशः शब्दोऽतिमनोहरो भवति-**स्यात्**-कथंचि**द्भवेदेतद्रूप**स्तेषां तृणानां मणीनां च शब्दः ?, एवमुक्ते भगवानाह-गौतम ! **स्यादेवंभूतः** शब्दः ॥ १७३ ॥

---

१. "उप्पित्थं तट्टकुविय-विहरेसु - उप्पित्थं त्रस्तम् कुपितं विधुरं चेति त्र्यर्थं देशीनाम व. १ गा. १२९ ।" इति G पृ. १८९ टि.॥ २. विनिर्गच्छत्स्व° G । ३. द्र. जीवाजीवाभिगमवृत्तिः पृ. १९४-१९५ ॥ ४. न तथा अविघुष्टं - JKE नास्ति । जीवा. वृत्तौ न विधुष्टमवि० इति ॥ ५. द्र. सू. ७६ ॥ ६. "मूलपाठे नैतद् वाक्यं प्रतिभाति" इति G पृ. १९० टि. ॥

सूत्र-१७४ : तेसि णं वणसंडाणं तत्थ तत्थ देसे तहिं तहिं बहूतो खुड्डा-खुड्डियातो वावीतो पुक्खरिणीओ दीहियाओ गुंजालियातो [सरसीओ[1]] सरपंतियाओ सरसरपंतियातो बिलपंतियातो अच्छातो सण्हातो रययामय-कूलाओ समतीरातो वयरामयपासाणातो तवणिज्जतलाओ सुवण्ण-[सुज्झ[2]]-रयय-वालुयाओ वेरुलियमणि-फालियपडल-पच्चोयडातो सुओयार-सुउत्तारातो णाणामणि-तित्थ-सुबद्धातो चाउक्कोणातो आणु[3]-पुव्वसुजायवप्प-गंभीरसीयलजलाओ संछन्नपत्त-भिसमुणालाओ बहु-उप्पल-कुमुय-नलिण-सुभग-सोगंधिय-पोंडरीय-सयवत्त-सहस्सपत्त-केसरफुल्लोवतियाओ छप्पयपरिभुज्जमाणकमलाओ अच्छविमलसलिल-पुण्णाओ →पडिहत्थभमंतमच्छकच्छभ[4]-अणेगसउणमिहुणगपविचरिताओ पत्तेयं-पत्तेयं पउमवरवेदियापरिक्खित्ताओ पत्तेयं-पत्तेयं वणसंड-परिखित्ताओ'← अप्पेगइयाओ आसवोयगाओ अप्पेगइयाओ वारुणो-यगाओ अप्पेगइयाओ खीरोयगाओ अप्पेगइयाओ घओयगाओ अप्पेग-इयाओ खोदोयगाओ[5] अप्पेगतियाओ पगईए उयगरसेणं पण्णत्ताओ पासादीयाओ दरिसणिज्जाओ अभिरूवाओ पडिरूवाओ ॥ १७४ ॥

[१७४] '**तेसि णं वणसंडाण**' मित्यादि, **तेषां** 'ण'मिति वाक्यालङ्कारे, **वनखण्डानां** मध्ये **तत्र तत्र देशे** 'तत्र तत्र' इति तस्यैव देशस्य तत्र तत्र एकदेशे '**बहूई [ओ]**' इति बह्व्यः '**खुड्डाखुड्डियाओ**' इति क्षुल्लिकाः[6] क्षुल्लिका लघवो लघव इत्यर्थः, **वाप्यश्चतुरस्राः**, **पुष्करिण्यो** वृत्ताकारा अथवा पुष्कराणि विद्यन्ते यासु ताः पुष्करिण्यः, **दीर्घिका**[7]-ऋज्व्यो

१. सरसीओ JBLK (क, ख, ग, घ, च, छ); नास्ति । "जीवाजीवाभिगमे (३।२८६) पि दृश्यते, तद्वृत्तावपि चास्ति व्याख्यातः ।" इति V पृ. १२२ टि. ७ ॥ २. सज्झ JB (क, ख, ग, घ, च) । सज्ज - K । सुब्भ-मु. ॥ ३. अणु° BLK (क, ख, ग, घ, च) । ४. X →← चिह्नद्वयमध्यवर्तीपाठः J मु. K (क, ख, ग, घ, च, छ); नास्ति K । जीवाजीवाभिगमे (३।२८६) प्यसावस्ति । ५. खोयगातो (घ) J । "अतः परं जीवाजीवाभिगमे (३।२९६) एतत् अतिरिक्तं विशेषणं लभ्यते अप्पेगतियाओ अमयरससमरसोदाओ" इति V पृ. १२२ टि. १५ । ६. क्षुल्लकाः - JKE ॥ ७. सारिण्यः जीवा.टी. ॥

नद्यः, वक्रा नद्यो **गुञ्जालिकाः**, बहूनि केवलकेवलानि पुष्पावकीर्णकानि सरांसि एकपङ्क्त्या व्यवस्थितानि सरःपङ्क्तिः, ता[१] बह्व्यः **सरःपङ्क्तयः** तथा येषु सरस्सु पङ्क्त्या व्यवस्थितेषु कूपोदकं प्रणालिकया संचरति सा सरःपङ्क्तिः, ता बहव्यः **सरः-सरःपङ्क्तयः**, तथा बिलानीव[२] बिलानी-कूपास्तेषां पङ्क्तयो **बिलपङ्क्तयः**, एताश्च सर्वा अपि कथंभूताः ? इत्याह-**अच्छाः**-स्फटिकवद्बहिर्निर्मलप्रदेशाः, **श्लक्ष्णाः**-श्लक्ष्ण-पुद्गलनिष्पादितबहिःप्रदेशाः श्लक्ष्णदलनिष्पन्नपटवत्, तथा रजतमयं-रूप्यमयं कूलं यासां ता **रजतमयकूलाः**, तथा समं न गर्ताभावाद् विषमं तीरं-तीरवर्तिजलापूरितं स्थानं यासां ताः **समतीराः**, तथा वज्रमयाः पाषाणा यासां ता **वज्रमयपाषाणाः**, तथा तपनीयं-हेमविशेषः; तपनीयं[३] तपनीयमयं तलं यासां तास्**तपनीयतलाः**, तथा '**सुवण्णसुज्झरययवालुयाओ**' इति सुवर्णं-पीतकान्ति हेम, सुज्झं[४]-रूप्यविशेषः, रजतं-प्रतीतं, तन्मय्यो[५] वालुका यासु ताः सुवर्णसुज्झरजतवालुकाः, '**वेरुलियमणि-फलिहपडलपच्चोयडाओ**' इति वैडूर्यमणिमयानि स्फटिकपटलमयानि च प्रत्यवतटानि-तटसमीपवर्त्तिनः अत्युन्नतप्रदेशा यासां ता वैडूर्यमणि-स्फटिकपटलप्रत्यवतटाः, '**सुओयार-सुउत्ताराओ**' इति सुखेनावतारो-जलमध्ये प्रवेशनं यासु ताः सुखावताराः, तथा सुखेन उत्तारो-जलमध्याद्बहिर्विनिर्गमनं यासु ताः सुखोत्तारास्ततः पूर्वपदेन विशेषणसमासः, '**नानामणितित्थसुबद्धाओ**' इति नानामणिभिः-नानाप्रकारैर्मणिभिस्तीर्थानि सुबद्धानि यासां ता नानामणितीर्थसुबद्धाः, अत्र बहुव्रीहावपि क्तान्तस्य परनिपातः सुखादिदर्शनात् प्राकृतशैलीवशाद्वा, '**चउक्कोणाओ**' इति चत्वारः कोणा यासां ताश्चतुष्कोणाः, एतच्च विशेषणं वापीः कूपांश्च प्रति द्रष्टव्यं, तेषामेव चतुष्कोणत्वसम्भवाद् न शेषाणां, तथा आनुपूर्व्येण-क्रमेण नीचैर्नीचैस्तराभावरूपेण सुष्ठु-अतिशयेन यो जातो वप्रः-केदारो जलस्थानं तत्र गम्भीरं-अलब्धस्ताघं शीतलं जलं यासु ता **आनुपूर्व्यसुजात-वप्रगम्भीरशीतलजलाः**, '**संछन्नपत्त-भिस-मुणालाओ** इति संछन्नानि-जलेनान्तरितानि पत्र-बिस-मृणालानि यासु ताः संछन्नपत्रबिसमृणालाः, इह बिस-मृणालसाहचर्यात् पत्राणि पद्मिनीपत्राणि द्रष्टव्यानि, बिसानि-कन्दाः, मृणालानि-पद्मनालाः, तथा बहुभिरुत्पल-कुमुद-नलीन-सुभगसौगन्धिकपुण्डरीक-शतपत्र-सहस्रपत्रैः केसरैः-केसरप्रधानैः फुल्लैः-विकसितैरुपचिता **बहूत्पल-कुमुद-नलिन-सुभगसौगन्धिकपुण्डरीक-शतपत्र-सहस्रपत्र-केसर-फुल्लोपचिताः**,

---

१. JKE । सललितास्ता मु. । २. "मारवाडी भाषायाम् 'कूप' पर्यायः 'बेरा' शब्दः श्रूयते ।" इति G पृ. १९१ टि. ॥ ३. K J जीवा.टी. । तपनीयं-मु. नास्ति ॥ ४. G सुब्भं-मु. ॥ ५. JKE जीवा.टी. । तन्मया-मु. ॥

तथा षट्पदैः भ्रमरैः →[१]परिभुज्यमानानि कमलानि-उपलक्षणमेतत्-कुमुदानि च यासु ताः **षट्पद← परिभुज्यमानकमलाः**, तथा अच्छेन-स्वरूपतः स्फटिकवत् शुद्धेन विमलेन-आगन्तुकमलरहितेन सलिलेन पूर्णा **अच्छविमलसलिलपूर्णाः**, तथा पडिहत्था-अतिरेकिता अतिप्रभूता इत्यर्थः, "**पडिहत्थमुद्धुमायं अतिरियं जाणमाउण्णं**" [ ] इति [२]वचनात्, उदाहरणं चात्र-

"[३]**घणपडिहत्थं गयणं सराइ नवसलिलउद्धुमायाइं । [४]अइरेइयं मह उण चिंताए मणं तुहं विरहे ॥ १ ॥**"

इति, भ्रमन्तो मत्स्यकच्छपा यत्र ताः **परिहत्थभ्रमन्मत्स्यकच्छपाः**, तथा अनेकैः शकुनि-मिथुनकैः प्रविचरिता-इतस्ततो गमनेन सर्वतो व्याप्ताः **अनेकशकुनिमिथुनकप्रविचरिता-स्ततः** पूर्वपदेन विशेषणसमासः, एता वाप्यादयः सरस्सरःपङ्क्तिपर्यन्ताः '**प्रत्येकं प्रत्येकं**' प्रति प्रत्येकमत्राभिमुख्ये प्रतिशब्दस्ततो वीप्साविवक्षायां पश्चात्प्रत्येकशब्दस्य द्विर्वचनमिति, **पद्मवरवेदिकया परिक्षिप्ताः, प्रत्येकं प्रत्येकं वनखण्डपरिक्षिप्ताः, 'अप्पेगइयाओ'** इत्यादि, अपिर्बाढार्थे बाढमेककाः-काश्चन वाप्यादय आसवमिव-चन्द्रहासादिपरमासवमिव उदकं यासां ता **आसवोदकाः, अप्येकका** वारुणस्य-वारुणसमुद्रस्येव उदकं यासां ता **वारुणोदकाः, अप्येककाः** क्षीरमिव उदकं यासां ताः **क्षीरोदकाः, अप्येकका** घृतमिव उदकं यासां ता **घृतोदकाः, अप्येककाः** क्षोद इव-इक्षुरस इव उदकं यासां ताः **क्षोदोदकाः, अप्येकका: स्वाभाविकेन उदकरसेन प्रज्ञप्ताः, 'पासादीया'** इत्यादि विशेषणचतुष्टयं प्राग्वत् ॥ १७४ ॥

सूत्र-१७५ : तासि णं खुड्डाखुड्डियाणं वावीणं जाव बिलपंतियाणं पत्तेयं-पत्तेयं चउद्दिसि चत्तारि तिसोमाणपडिरूवगा पण्णत्ता । तेसि णं तिसोमाणपडिरूवगाणं →[५]'अयमेयारूवे वण्णावासे पण्णत्ते, तं जहा-

---

१. JKEG जीवा.टी. । →← चिह्नद्वयमध्यवर्तिपाठः मु. नास्ति ॥ २. "एतद् वचनं नोपलभ्यते मुद्रितदेशीशब्दकोशेषु तत्समानं वचनं तु प्राप्यते '**पाइअलच्छीनाममालायाम्**' 'पडिहत्थं उद्धुमायं अहिरेमइयं च अप्फुण्णं' अंक-१४२ । देशी-नाममालायामपि पूर्णपर्यायः 'पडिहत्थ' शब्दो निबद्धः' व. ६, गा. २८ । द्र. पृ. ८५ टि. ९ । ३. "गाथाया भावार्थः - घनप्रतिपूर्णं गगनं सरांसि नवसलिलप्रतिपूर्णानि प्रतिपूर्णं मम पुनश्चिन्तया मनः तव विरहे । पूर्णपर्यायरूपाणां पडिहत्थ-उद्धुमाय-अइरेमइय-शब्दानां प्रयोगान् दर्शयितुं इयं गाथा दर्शिता ।" इति G । पृ. १९३ टि. ॥ ४. अस्मिन् मुद्रिते वचने 'पडिहत्थ उद्धुमाय अइरेइय अप्फुण्ण ["क्तेन अप्फुण्णादयः" ८-४-२५८] शब्दाः 'पूर्ण'पर्यायतया निर्दिष्टाः । परन्तु पूर्वोक्तकोशप्रामाण्याद् हैमव्याकरण-प्रामाण्यात् ["पूरेः अग्घाड-अग्घव-उद्धुमा-अंगुम-अहेरिमाः" ८-४-१६९'] श्री जीवाजीवाभिगमवृत्ति-प्रामाण्याच्च [पृ. १९८ प्र. पं. ९-११] 'अइरेइय' स्थाने 'अइ(हि)रेमइय' शब्दो युक्तः । संस्कृत-'अतिरेकित'शब्दप्रकृतिकत्वेन 'अइरेइय' शब्दस्य नैव देशीत्वम् ।" इति G पृ. १९२-१९३ टि. । अइरेयइणय महि-K ॥ ५. →← चिह्नद्वयमध्यवर्तिपाठस्थाने वण्णो - KJ (क, ख, ग, घ, च) । वण्णतो-छ ॥

वइरामया नेमा, रिट्ठामया पतिट्ठाणा, वेरुलियामया खंभा, सुवण्णरुप्पमया फलगा, लोहितक्खमइयाओ सूइओ, वयरामया संधी, णाणामणिमया अवलंबणा अवलंबणबाहाओ य पासादीया दरिसणिज्जा अभिरूवा पडिरूवा॥ ॥ १७५ ॥

[१७५] **'तासि ण'**मित्यादि, **तासां क्षुल्लिकानां वापीनां यावद् बिलपङ्क्तीनामिति** यावत्शब्दात् पुष्करिण्यादिपरिग्रहः, **प्रत्येकं चतुर्दिशि चत्वारि** एकैकस्यां दिशि एकैकस्य भावात् **त्रिसोपानप्रतिरूपकाणि**-प्रतिविशिष्टरूपाणि त्रिसोपानानि, त्रयाणां सोपानानां समाहारस्त्रिसोपानं, तानि **प्रज्ञप्तानि, तेषां च त्रिसोपानप्रतिरूपकाणामयं**-वक्ष्यमाणः **एतद्रूपः**-अनन्तरं वक्ष्यमाणस्वरूपो [१]**वर्णावासो** वर्णकनिवेशः **प्रज्ञप्तस्तद्यथा** [२]**वज्रमयाः** -वज्ररत्नमयाः[३] नेमा इत्यादि प्राग्वत् ॥ १७५ ॥

सूत्र-१७६-१७९ : तोरणाणं झया छत्ताइछत्ता णेयव्वा[४] ॥ १७६-१७९ ॥

[१७६-१७९] **'तेसि णं'** इत्यादि, तेषां त्रिसोपानप्रतिरूपकाणां प्रत्येकं तोरणानि प्रज्ञप्तानि, तोरणवर्णकस्तु निरवशेषो यानविमानवद्भावनीयो यावद् बहवः सहस्रपत्रहस्तका इति ॥ १७६-१७९ ॥

सूत्र-१८० : [५]तासि णं खुड्डाखुड्डियाणं वावीण जाव बिलपंतियाणं तत्थ तत्थ तहिं तहिं देसे बहवे उप्पायपव्वयगा नियइपव्वयगा जगईपव्वयगा दारुइज्जपव्वयगा दगमंडवा दगमंचगा दगमालगा दगपासायगा[६] उसड्डा[७] खुड्डखुड्डगा अंदोलगा पक्खंदोलगा सव्वरयणामया अच्छा जाव पडिरूवा ॥ १८० ॥

---

१. JKE । वर्णावासो-मु. नास्ति ॥ २. JKE । वज्रमया-मु. नास्ति । ३. G । °या वंगाइ° मु. । द्र.सू. १९ ॥ ४. द्र० सू० २०-२३ । ५. तासु (तासि) णं खुड्डु[सु K] वावीसु JBL (क, ख, ग, घ, च, छ)। ६. °पव्वयगा JBLK (क, ख, ग, घ, च) । ७. उसरदगा BJ (क, ख, ग, घ, च, छ) । उसडा-K ॥

[१८०] '**तासि ण**'मित्यादि, **तासां क्षुल्लिकाक्षुल्लिकानां यावद् बिलपङ्क्तीनाम्**, अत्रापि यावच्छब्दात् पुष्करिण्यादिपरिग्रहः, **तत्र तत्र देशे** तस्यैव देशस्य **तत्र तत्र** एकदेशे **बहव उत्पातपर्वता** यत्रागत्य बहवः सूर्याभविमानवासिनो वैमानिका देवा देव्यश्च विचित्रक्रीडानिमित्तं वैक्रियशरीरमारचयन्ति, '**नियइपव्वया**' इति नियत्या-नैयत्येन व्यवस्थिताः पर्वता नियतिपर्वताः, क्वचिद् 'निययपव्वया' इति पाठः, तत्र नियताः-सदा भोग्यत्वेनाऽवस्थिताः पर्वता नियतपर्वताः, यत्र सूर्याभविमानवासिनो वैमानिका देवा देव्यश्च भवधारणीयेनैव वैक्रियशरीरेण[१] प्रायः सदा रममाणा अवतिष्ठन्ते इति भावः, '**जगईपव्वया**' इति जगतीपर्वतकाः पर्वतविशेषाः, **दारुपर्वतका**-दारुनिर्मापिता इव पर्वतकाः, '**दगमंडवा**' इति दकमण्डपाः-स्फाटिकाः मण्डपाः, उक्तं च[२] जीवाभिगममूलटीकायां-"**दगमण्डपाः-स्फाटिका मण्डपा**" [ ] इति, एवं **दकमञ्चकाः, दकमालकाः, दकप्रासादाः**, एते च दकमण्डपादयः केचित् '**उसड्डा**'[३] इति उत्सृता उच्चा इत्यर्थः, केचित् '**खुड्डा खुड्ड**'त्ति क्षुल्लकाः क्षुल्लका इति, तथा **अन्दोलकाः पक्ष्यन्दोलकाश्च**, इह यत्रागत्य मनुष्या आत्मानमन्दोलयन्ति तेऽन्दोलका इति लोके प्रसिद्धाः, यत्र तु पक्षिण आगत्यात्मानमन्दोलयन्ति ते पक्ष्यन्दोलकाः, तत्र अन्दोलकाः पक्ष्यन्दोलकाश्च तेषु वनखण्डेषु तत्र तत्र प्रदेशे देवक्रीडायोग्या बहवः सन्ति, एते च उत्पातपर्वतादयः कथंभूता ? इत्याह-'**सर्वरत्नमयाः**' सर्वात्मना रत्नमयाः, **अच्छा सण्हा** इत्यादि विशेषणकदम्बकं प्राग्वत् ॥ १८० ॥

सूत्र-१८१ : [४]तेसु णं उप्पायपव्वएसु जाव पक्खंदोलएसु बहूइं हंसासणाइं कोंचासणाइं गरुलासणाइं उण्णयासणाइं पणयासणाइं दीहासणाइं[५] भद्दासणाइं[६] पक्खासणाइं मगरासणाइं सीहासणाइं पउमासणाइं दिसासोवत्थियासणाइं सव्वरयणामयाइं अच्छाइं जाव पडिरूवाइं ॥ १८१॥

[१८१] '[७]**तेसु ण**'मित्यादि, **तेषु उत्पातपर्वतेषु यावत्पक्ष्यन्दोलकेषु**, यावत्करणान्नियतिपर्वतकादिपरिग्रहः **बहूनि हंसासनादीनि**[८] आसनानि, तत्र येषामासनानामधो भागे

---

१. JKE । प्रायः-मु. नास्ति । २. द्र. जीवा. वृ. पृ. २०० पं. ४ ॥ ३. उसडा - JKE । ऊसडा-जीवा.टी.सू. २९२ ॥ ४. तेसि BLJK (क, ख, ग, घ, च, छ) । ५. °इंपिउप्पयपव्वएसुभाव पक्खंदोलगा सव्वरयणाव पव्वएसु° K ॥ ६. पक्खासणाइं मगरासणाइं भद्दासणाइं BLJK (क, ख, ग, घ, छ) । ७. तेसि ण - JKE ॥ ८. °नि सिंहास° - JKE ॥

हंसा[१] व्यवस्थिता यथा [२]सिंहासने सिंहाः तानि हंसासनानि, एवं **क्रौञ्चासनानि गरुडासनानि** च भावनीयानि, **उन्नतासनानि**-उच्चासनानि, **[३]प्रणतासनानि**-निम्नासनानि, **दीर्घासनानि**-शय्यारूपाणि, **भद्रासनानि** येषामधोभागे पीठिकाबन्धः, **पक्ष्यासनानि** येषामधो भागे नानास्वरूपाः पक्षिणः, एवं **मकरासनानि सिंहासनानि** च भावनीयानि, **पद्मासनानि**-पद्माकाराणि आसनानि, **'दिसासोवत्थियासणाणि'** येषामधो भागे दिक्सौवस्तिका आलिखिताः सन्ति, अत्र यथाक्रममासनानां संग्रहणिगाथा-"**[४]हंसे कोंचे गरुडे उण्णय पणए य दीह भद्दे य । पक्खे मयरे पउमे सीह दिसासोत्थि बारसमे ॥१॥**" इति, तानि सर्वाण्यपि कथंभूतानीत्यत आह-'**सव्वरयणामयाइं**' इत्यादि प्राग्वत् ॥ १८१ ॥

सूत्र-१८२ : तेसु णं वणसंडेसु तत्थ तत्थ देसे तहिं तहिं बहवे आलिघरगा मालिघरगा कयलिघरगा लयाघरगा अच्छणघरगा पिच्छणघरगा [५मज्जणघरगा] पसाधणघरगा गब्भघरगा मोहणघरगा सालघरगा जालघरगा कुसुमघरगा चित्तघरगा गंधव्वघरगा [६आयंसघरगा] सव्वरयणामया अच्छा जाव पडिरूवा ॥ १८२ ॥

[१८२] '**तेसु ण**'मित्यादि, **तेषु वनखण्डेषु** मध्ये **तत्र तत्र प्रदेशे** तस्यैव देशस्य **तत्र तत्र** एकदेशे **बहूनि आलिगृहकाणि** आलिः-वनस्पतिविशेषः, तन्मयानि गृहकाणि आलिगृहकाणि, मालिरपि वनस्पतिविशेषः तन्मयानि गृहकाणि **मालिगृहकाणि, कदलीगृहकाणि लतागृहकाणि** च प्रतीतानि, '**अच्छणघरगाणि**' इति अवस्थानगृहकाणि-येषु यदा तदा वा आगत्य सुखासिकया अवतिष्ठन्ति, **प्रेक्षणकगृहकाणि**-यत्रागत्य प्रेक्षणकानि विदधति निरीक्षन्ते च, **मज्जनकगृहकाणि** यत्रागत्य स्वेच्छया मज्जनकं कुर्वन्ति, **प्रसाधनगृहकाणि** यत्रागत्य स्वं परं च मण्डयन्ति, **गर्भगृहकाणि** गर्भगृहाकाराणि '**मोहणघरगाइ**'न्ति मोहनं-मैथुनसेवा, "**रमियं मोहणरयाइं**" [ ] इति **नाममाला**वचनात् तत्प्रधानानि गृहकाणि मोहनकगृहकाणि, वासभवनानीति भावः, **शालागृहकाणि**-पट्टशाला-

---

१. हंसा - JKE नास्ति ॥ २. सिंहासने सिंहाः तानि - JKE नास्ति ॥ ३. प्राण° - JKE ॥ ४. द्र. जीवा. वि. प्र. पृ. २०० पं. १४ ॥ ५. मज्जणघरगा नास्ति BJL (क, ख, ग, घ, च) ॥ ६. आयंसघरगा-नास्ति BJL (क, ख, ग, घ, च) ।

प्रधानानि, **जालगृहकाणि**-गवाक्षयुक्तानि गृहकाणि, **कुसुमगृहकाणि**-कुसुमप्रकरोपचितानि गृहकाणि, **चित्रगृहकाणि**-चित्रप्रधानानि गृहकाणि **गन्धर्वगृहकाणि**-गीतनृत्ययोग्यानि गृहकाणि, **आदर्शगृहकाणि**-आदर्शमयानीव गृहकाणि, एतानि च कथंभूतानि? इत्यत आह-'**सव्वरयणामया**' इत्यादि विशेषणकदम्बकं प्राग्वत् ॥ १८२ ॥

सूत्र-१८३ : तेसु णं आलिघरगेसु जाव आयंसघरएसु तहिं तहिं घरएसु बहूइं हंसासणाइं जाव दिसासोवत्थियासणाइं सव्वरयणामयाइं अच्छाइं जाव पडिरूवाइं ॥ १८३ ॥

[१८३] '**तेसि (सु)ण**' मित्यादि, **तेषु आलिगृहकेषु यावदादर्शगृहकेषु,** अत्र यावत्शब्दाद् मालिगृहकादिपरिग्रहः, **बहूनि हंसासनानि** इत्यादि प्राग्वत् ॥ १८३ ॥

सूत्र-१८४ : तेसु णं वणसंडेसु तत्थ तत्थ देसे देसे तहिं तहिं बहवे जाइमंडवगा जूहियामंडवगा मल्लियामंडवगा णोमालियामंडवगा वासंतिमंडवगा दहिवासुयमंडवगा सूरिल्लिमंडवगा तंबोलिमंडवगा मुद्दियामंडवगा णागलयामंडवगा अतिमुत्तलयामंडवगा अप्फोयामंडवगा मालुयामंडवगा सव्वरयणामया अच्छा जाव पडिरूवा ॥ १८४ ॥

[१८४] '**तेसु ण**'मित्यादि, **तेषु वनखण्डेषु तत्र तत्र देशे** तस्यैव देशस्य **तत्र तत्र** एकदेशे **बहवो जातिमण्डपकाः, यूथिकामण्डपकाः, मल्लिकामण्डपकाः, नवमालिकामण्डपकाः, वासन्तीमण्डपकाः, दधिवासुकामण्डपकाः**[1], दधिवासुका-वनस्पतिविशेषस्तन्मया मण्डपका दधिवासुकामण्डपकाः, सूरिल्लिरपि[2] वनस्पतिविशेषः, तन्मया मण्डपकाः **सूरिल्लिमण्डपकाः,** ताम्बूली-नागवल्ली, तन्मया मण्डपकास्**ताम्बूलीमण्डपकाः,** नागो-द्रुमविशेषः, स एव लता नागलता, इह यस्य तिर्यक् तथाविधा शाखा प्रशाखा वा न प्रसृता सा 'लता' इत्यभिधीयते, नागलतामया मण्डपका **नागलतामण्डपकाः, अतिमुक्त[लता]मण्डपकाः,** '[3]अप्फोया' इति वनस्पतिविशेषस्तन्मया मण्डपका **[4]अप्फोयामण्डपकाः,** मालुका-एकास्थिकफला वृक्षविशेषास्तद्युक्ता मण्डपका **मालुकामण्डपकाः,** एते च कथंभूता इत्याह-'**सव्वरयणामया**' इत्यादि प्राग्वत् ॥ १८४ ॥

१. मु. G । °सुकानाम (नामान-J) वचनस्य विशेषस्तन्मया - JK ॥ २. सुरुल्लि मु. । सूरल्लि - JE पा. ५ । सूरमल्लि - भा. १ ॥ ३-४. आप्फो° - K ॥

सूत्र-१८५ : तेसु णं जाइमंडवएसु जाव मालुयामंडवएसु बहवे पुढविसिलापट्टगा अप्पेगतिया हंसासणसंठिया जाव अप्पेगतिया दिसासोवत्थियासणसंठिया अण्णे य बहवे वरसयणासणविसिट्ठसंठाणसंठिया पुढविसिलापट्टगा पण्णत्ता समणाउसो ! आईणग-रूय-बूर-णवणीय-तूल-फासमउया सव्वरयणामया अच्छा जाव पडिरूवा । तत्थ णं बहवे वेमाणिया देवा य देवीओ य आसयंति सयंति चिट्ठंति निसीयंति तुयट्टंति हसंति रमंति ललंति कीलंति कित्तंति मोहेंति पुरा पोराणाणं सुचिण्णाणं सुपरक्कंताणं सुभाणं कडाणं कम्माणं कल्लाणाणं कल्लाणं फलविवागं पच्चणुब्भवमाणा विहरंति ॥ १८५ ॥

[१८५] **'तेसि ण'**मित्यादि, **तेषु जातिमण्डपकेषु यावन्मालुकामण्डपकेषु** जावशब्दाद् यूथिकामण्डपकादिपरिग्रहः, **बहवः शिलापट्टकाः प्रज्ञप्तास्तद्यथा-अप्येकका** हंसासनवत् संस्थिता **हंसासनसंस्थिता यावदप्येकका दिक्सौवस्तिकासनसंस्थिताः,** यावत्करणात् → अप्पेगइया हंसासणसंठिया अप्पेगइया गरुडासणसंठिया अप्पेगइया उण्णयासणसंठिया अप्पेगइया पणयासणसंठिया अप्पेगइया दीहासणसंठिया अप्पेगइया भद्दासणसंठिया ← अप्पेगइया पक्खासणसंठिया →अप्पेगइया आयंसासणसंठिया ← अप्पेगइया उसभासणसंठिया अप्पेगइया सिहासणसंठिया अप्पेगइया पउमासणसंठिया' इति परिग्रहः, **अन्ये च बहवः शिलापट्टका** यानि विशिष्टचिन्हानि विशिष्टनामानि च वराणि-प्रधानानि शयनानि आसनानि च तद्वत् संस्थिता **वरशयनासनविशिष्टसंस्थानसंस्थिताः,** क्वचिद् 'मांसलसुघट्टविसिट्ठसंठाणसंठिया' इति पाठः, तत्रान्ये च बहवः शिलापट्टकाः मांसलाः अकठिना इत्यर्थः, सुघृष्टा अतिशयेन मसृणा इति भावः, विशिष्टसंस्थान-संस्थिताश्चेति, **'आईणग-रूय-बूर-नवणीय-तूल-फासमउया सव्वरयणामया अच्छा जाव पडिरूवा'** इति प्राग्वत्, **तत्र** तेषु उत्पादपर्वतादिगतहंसासनादिषु यावन्नानारूप-संस्थानसंस्थितपृथ्वीशिलापट्टकेषु **ण**मिति पूर्ववद् । **बहवः** सूर्याभ**विमानवासिनो देवा**

---

१. मं(मां-K)सलसुघट्टविसिट्ठ° J मु. (क, ख, ग, घ, च, छ, वृपा) । २. अत्थि J (क, ख, ग, घ, च) । ३. मालुकामण्डपकेषु जाव. - JKE नास्ति ॥ ४. द्र. सू. १८१ ॥ ५. →← चिह्नद्वयमध्यवर्तिपाठ - JKE नास्ति ॥ ६. कोंचासण° G जीवा.टी.सू. २९७॥ ७. →← चिह्नद्वयमध्यवर्तिपाठ JKE नास्ति ॥ ८. मगरासण° G जीवा.टी.सू. २९७ ॥ ९. बूर - JKE नास्ति ॥

देव्यश्च [१]यथासुख**मासते शेरते**-दीर्घकायप्रसारणेन वर्त्तन्ते न तु निद्रां कुर्वन्ति, तेषां देवयोनिकत्वेन निद्राया अभावात्, **तिष्ठन्ति**-ऊर्ध्वस्थानेन वर्त्तन्ते, **निषीदन्ति**-उपविशन्ति **तुयट्टंति**-त्वग्वर्त्तनं कुर्वन्ति, वामपार्श्वतः परावृत्य दक्षिणपार्श्वेनावतिष्ठन्ति, दक्षिणपार्श्वतो वा परावृत्य वामपार्श्वेनेति भावः, **रमन्ते**-रतिमाबध्नन्ति, **ललन्ति**-मनईप्सितं यथा भवति तथा वर्त्तन्त इति भावः, **क्रीडन्ति**-यथासुखमितस्ततो गमनविनोदेन गीतनृत्यादिविनोदेन वा तिष्ठन्ति, **मोहन्ति**-मैथुनसेवां कुर्वन्ति इत्येवं '**पुरा पोराणाण**'मित्यादि, पुरा-पूर्व्वं प्राग्भवे इति भावः, **कृतानां कर्मणा**मिति योगः, अत एव पौराणानां **सुचीर्णानां**-सुचरितानाम्, इह सुचरितजनितं कर्माऽपि कार्ये कारणोपचारात् सुचरितं, ततोऽयं भावार्थः-विशिष्टतथाविध-धर्मानुष्ठानविषयाप्रमादकरणक्षान्त्यादिसुचरितजनितानामिति, तथा **सुपराक्रान्तानाम्**, अत्रापि कार्ये कारणोपचारात् सुपराक्रान्तिजनितानि [कर्माण्येव]सुपराक्रान्तानि इत्युक्तं, किमुक्तं भवति ?-सकलसत्त्वमैत्री-सत्यभाषण-परद्रव्यानपहार-सुशीलादिरूपसुपराक्रमजनितानामिति, अत एव **शुभानां** शुभफलानाम्, इह किञ्चिदशुभफलमपि इन्द्रिय-[२]मतिविपर्यासात् शुभफलं **प्रतिभासते** ततस्तात्त्विकशुभत्वप्रतिपत्त्यर्थमस्यैव पर्यायशब्दमाह-**कल्याणानां**, तत्त्ववृत्त्या तथाविधविशिष्टफलदायिनाम्, अथवा कल्याणानाम् अनर्थोपशमकारिणां **कल्याण**रूपं **फलविपाकं पच्चणुब्भ-वमाणा** प्रत्येकमनुभवन्तो **विहरन्ति**-आसते ॥ १८५ ॥

सूत्र-१८६ : तेसि णं वणसंडाणं बहुमज्झदेसभाए पत्तेयं-पत्तेयं पासाय-वडेंसगा पण्णत्ता । ते णं पासायवडेंसगा पंच जोयणसयाइं उड्ढं उच्चत्तेणं, अड्ढाइज्जाइं जोयणसयाइं विक्खंभेणं, अब्भुग्गयमूसियपहसिया [३]इव [४]तहेव बहुसमरमणिज्जभूमिभागो उल्लोओ सीहासणं [५]सपरिवारं । तत्थ णं चत्तारि देवा महिड्ढिया जाव पलिओवमट्ठितीया परिवसंति, तं जहा—असोए सत्तपण्णे चंपए चूए ॥ १८६ ॥

[१८६] '**तेसि ण**'मित्यादि, **तेषां वनखण्डानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं प्रासादावतंसका** इति, अवतंसक इव-शेखरक इवावतंसकः, प्रासादानामवतंसक इव प्रासादावतंसकः प्रासादविशेष इति भावः, **ते च प्रासादावतंसकाः पञ्च योजन-**

---

१. यथा॰ - JKE नास्ति, जीवा.टी. अस्ति ॥ २. °मिति - JKE ॥ ३. द्र० सू० १३७ ॥ ४ द्र० सू० २४-३४ ॥ ५. द्र० सू० ३७-४४ ॥

शतान्यूर्ध्वमुच्चैस्त्वेन, अर्द्धतृतीयानि योजनशतानि विष्कम्भतः, तेषां च '**अब्भुग्गय-मूसियपहसिया विव**' इत्यादिविशेषणजातं प्राग्वद्, भूमिवर्णनम् उल्लोकवर्णनं सिंहासनवर्णनं सपरिवारं च प्राग्वत् । '**तत्थ ण**'मित्यादि, तत्र-तेषु वनखण्डेषु प्रत्येकमेकैकदेवभावेन[1] **चत्वारो देवा महर्द्धिका** यावत्करणात् 'महज्जुइया महाबला महासुक्खा महाणुभावा' इति परिग्रहः, **पल्योपमस्थितिकाः परिवसन्ति, तद्यथा-'असोए'** इत्यादि, अशोकवने **अशोकः**, सप्तपर्णवने **सप्तपर्णः**, चम्पकवने **चम्पकः** चूतवने **चूतः** । [2]'**ते ण**'मित्यादि, ते अशोकादयो देवाः स्वकीयस्य वनखण्डस्य स्वकीयस्य प्रासादावतंसकस्य, सूत्रे बहुवचनं प्राकृतत्वात्, प्राकृते हि वचनव्यत्ययोऽपि भवतीति, स्वस्वकीयानां सामानिकदेवानां स्वासां स्वासामग्रमहिषीणां सपरिवाराणां स्वासां स्वासां परिषदां स्वेषां स्वेषामनीकानां स्वेषां स्वेषामनीकाधिपतीनां स्वेषां स्वेषामात्मरक्षाणाम् 'आहेवच्चं पोरेवच्चं' इत्यादि प्राग्वत्[3] ॥ १८६ ॥

सूत्र-१८७ : सूरियाभस्स णं देवविमाणस्स अंतो बहुसमरमणिज्जे भूमिभागे [4]पण्णत्ते [5]जाव तत्थ णं बहवे वेमाणिया देवा य देवीओ य आसयंति [सयंति चिट्ठंति निसीयंति तुयट्टंति हसंति रमंति ललंति कीलंति किंत्तंति मोहेंति पुरा पोराणाण सुचिण्णाणं सुपरक्कंताणं सुभाणं कडाणं कम्माणं कल्लाणाणं कल्लाणं फलविवागं पच्चणुब्भवमाणा०] जाव विहरंति ॥ १८७ ॥

---

१. JEBG । °कदिग्भावे च° मु.भा.२ ॥ २. सूत्रादर्शे नायं पाठः ३. "आहेवच्चं पोरेवच्चं" इत्यादि प्राग्वत्, अनेन अतिदेशवाक्येन विवरणकारः सूचयति यत् 'आहेवच्चं' इत्यादिपदावलिः पूर्वपाठे समागता परंतु एतावत्पर्यन्तं मुद्रितासु सर्वासु कण्डिकासु विवरणकारेण अतिदिष्टा पदावलिर्न क्वापि समायाता अतः प्रस्तुतमुद्रितमूलपाठाद् विवरणकारलब्धमूलपाठे भेदः स्पष्ट एव । अतिदिष्टा पदावलिः [औप० सू. ६८ गतपाठेन] इत्थं पूरणीया-"पोरेवच्चं सामित्तं भट्टित्तं महत्तरगत्तं आणा-ईसर-सेणावच्चं कारेमाणे पालेमाणे महया" अहयनट्ट... [पृ ४६ पं. १] विहरति । आहेवच्चं-आधिपत्यम् । पोरेवच्चं-पुरोवर्तित्वम्-अग्रेसरत्वम् । भट्टित्तं-भर्तृत्वम् । सामित्तं-स्वामित्वम् । महत्तरगत्तं-महत्तरत्वम् । आणाईसरसेणावच्चं-आज्ञेश्वरसेनापत्यम् । कारेमाणे-कारयन् । पालेमाणे-पालयन्" । इति G पृ. २०२ टिप्पणे ॥ ४. "पण्णत्ते, तं जहा वणसंडविहूणे- J (क, ख, ग, घ, च, छ) । यद्यप्यसौ पाठः सर्वासु प्रतिषु लभ्यते तथापि नावश्यकः प्रतिभाति । वृत्तावपि नास्ति गृहीतोऽसौ ।" इति V पृ. १२५ टि. ७ ॥ ५. द्र. सू. २४-३१ ॥

[१८७] **'सूरियाभस्स ण'**मित्यादि, **सूर्याभस्य विमानस्यान्तः**-मध्यभागे **बहुसमरमणीयो भूमिभागः प्रज्ञप्तः**, तस्य **'से जहानामए आलिंगपुक्खरेइ वा'** इत्यादि यानविमान इव वर्णनं तावद्वाच्यं यावन्मणीनां स्पर्शः ॥ १८७ ॥

सूत्र-१८८ : तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसे, एत्थ णं महेगे उवगारियालयणे पण्णत्ते–एगं जोयणसयसहस्सं आयामविक्खंभेणं, तिण्णि जोयणसयसहस्साइं सोलस सहस्साइं दोण्णि य सत्तावीसे जोयणसए तिन्नि य कोसे अट्ठावीसं च धणुसयं तेरस य अंगुलाइं अद्धंगुलं च किंचिविसेसूणं परिक्खेवेणं, जोयणं बाहल्लेणं, सव्वजंबूणयामए अच्छे जाव पडिरूवे ॥ १८८ ॥

[१८८] **तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्र सुमहद् एकम् उपकारिकालयनं प्रज्ञप्तं,** विमानाधिपतिसत्कप्रासादावतंसकादीन् उपकरोति-उपष्टम्नात्युपकारिका, विमानाधिपतिसत्कप्रासादावतंसकादीनां पीठिका, अन्यत्र त्वियमुपकार्योपकारिकेति प्रसिद्धा, उक्तं च- "गृहस्थानं स्मृतं राज्ञामुपकार्योपकारिके"ति, उपकारिकालयनमिव उपकारिकालयनं, तद् **एकं योजनशतसहस्रमायाम-विष्कम्भाभ्यां त्रीणि योजनशतसहस्राणि षोडश सहस्राणि द्वे योजनशते सप्तविंशत्यधिके अष्टाविंशं धनुःशतं त्रयोदश अङ्गुलान्यर्द्धाङ्गुलं परिक्षेपतः, एकयोजनं बाहल्येन**-पिण्डेन, **सर्वात्मना जाम्बूनदमयम् अच्छे** इत्यादि विशेषणजातं प्राग्वत् । इदं च परिक्षेपप्रमाणं जम्बूद्वीपपरिक्षेपप्रमाणवत् "क्षेत्रसमासटीकातः" परिभावनीयम् ॥ १८८ ॥

सूत्र-१८९ : से णं एगाए पउमवरवेइयाए एगेण य वणसंडेण सव्वओ समंता संपरिखित्ते । सा णं पउमवरवेइया अद्धजोयणं उड्ढं उच्चत्तेणं, पंच धणुसयाइं विक्खंभेणं, उवकारियलेणसमा परिक्खेवेणं ॥ १८९ ॥

[१८९] [१]**तच्च एकया पद्मवरवेदिकया एकेन च वनखण्डेन सर्वतः**-सर्वासु दिक्षु **समन्ततः**-सामस्त्येन **सम्यक् परिक्षिप्तं, 'सा णं पउमवरवेइया'** इत्यादि, सा पद्मवरवेदिका **अर्द्धं योजनमूर्ध्वमुच्चैस्त्वेन, पञ्च धनुःशतानि विष्कम्भतः, परिक्षेपेण 'उपकारिकालयनसमाना'** उपकारिकालयनपरिक्षेपपरिमाणा प्रज्ञप्ता ॥ १८९ ॥

१. तुला-जीवाभिगमटीका पृ. १८३ ॥

सूत्र-१९० : तीसे णं पउमवरवेइयाए इमेयारूवे वण्णावासे पण्णत्ते, तं जहा—वइरामया नेमा, रिट्ठामया पतिट्ठाणा, वेरुलियामया खंभा, सुवण्ण-रुप्पामया फलगा, लोहितक्खमईयो सुईओ, वइरामया संधी, नाणामणिमया कलेवरा, णाणामणिमया कलेवरसंघाडगा, णाणामणिमया रूवा, णाणा-मणिमया रूवसंघाडगा, अंकामया [पक्खा पक्खबाहाओ, जोईरसमया वंसा वंसकवेल्लुयाओ रययामईओ] पट्टियाओ, जायरूवमईओ ओहाडणीओ, वइरामईओ० उवरिपुंछणीओ 'सव्वसेयरययामए[1] छायणे' ॥ १९० ॥

[१९०] **'तीसे ण'**मित्यादि, **तस्याः पद्मवरवेदिकाया अयमेतद्रूपो वर्णावासो** वर्णः-श्लाघा यथावस्थितस्वरूपकीर्त्तनं, तस्यावासो-निवासो ग्रन्थपद्धतिरूपो वर्णावासो वर्णकनिवेश इत्यर्थः, **प्रज्ञप्तो** मया शेषतीर्थकरैश्च, **तद्यथे**त्यादिना तमेव दर्शयति, इह सूत्रपुस्तकेष्वन्यथा-ऽतिदेशबहुलः पाठो दृश्यते, ततो मा भून्मतिसंमोह इति विनेयजनानुग्रहाय पाठ उपदर्श्यते- **'वयरामया णिम्मा, रिट्ठामया पइट्ठाणा, वेरुलियामया खंभा, सुवन्नरुप्पमया फलया, लोहियक्खमईओ सूईओ, वइरामया संधी, नानामणिमया कडेवरा, णाणामणिमया कलेवरसंघाडा, नानामणिमया रूवा, नानामणिमया रूवसंघाडा, अंकामया पक्खा, अंकामया पक्खबाहाओ, जोईरसामया वंसा वंसकवेल्लुया, रईयामइओ पट्टियाओ, जायरूवमई ओहाडणी, वयरामइ उवरिपुंछणी सव्वरययामए[2] अच्छायणे'** एतत् सर्वं द्वारवद् भावनीयं, नवरं कलेवराणि-मनुष्यशरीराणि, कलेवरसंघाटा-मनुष्यशरीरयुग्मानि, रूपाणि-रूपकाणि, रूपसंघाटा-रूपकयुग्मानि ॥ १९० ॥

सूत्र-१९१ : सा णं पउमवरवेइया एगमेगेणं हेमजालेणं एगमेगेणं गव-क्खजालेणं एगमेगेणं खिंखिणीजालेणं एगमेगेणं घंटाजालेणं एगमेगेणं मुत्ताजालेणं एगमेगेणं मणिजालेणं एगमेगेणं कणगजालेणं एगमेगेणं रयणजालेणं [एगमेगेणं] सव्वरयणजालेणं एगमेगेणं पउमजालेणं

१-२. सव्वरययामए-JK । "सव्वरयणामये (ई.मु.) अच्छायणे मु.(ख,ग,घ,च,छ); जीवाजीवाभिगमवृत्तौ (३/२६४ वृत्ति पत्र १८०) 'सव्वसेयरययामए छायणे' इति पाठो व्याख्यातोऽस्ति । रायपसेणीयवृत्तौ सव्वरयणामए इति पाठो लिपिदोषाज्जातः । वृत्तिकृता 'एतत् सर्वं द्वारवत् भावनीयम्' इत्युल्लिखितम् । तत्रापि च 'सव्वसेयरययामए' इति पाठोऽस्ति (राय. सू. १३०) वृत्तावपि (पृ. ११९) रजतमयं इति व्याख्यातमस्ति ॥" इति V पृ. १२६ टि. २ ॥

सव्वतो समंता संपरिक्खित्ता । ते णं जाला[1] तवणिज्जलंबूसगा जाव उवसोभेमाणा-उवसो-भेमाणा चिट्ठंति ॥ १९१ ॥

[१९१] **'सा णं पउमवरवेइया[2] एगमेगेणं हेमजालेणं एगमेगेणं गवक्खजालेणं एगमेगेणं खिंखिणीजालेणं एगमेगेणं घंटाजालेणं एगमेगेणं मुत्ताजालेणं एगमेगेणं कणगजालेणं एगमेगेणं मणिजालेणं एगमेगेणं रयणजालेणं एगमेगेणं सव्वरयण-जालेणं एगमेगेणं पउमजालेणं सव्वतो समंता संपरिक्खित्ता[3], ते णं जाला तवणिज्ज-लंबूसगा** सुवन्नपयरमंडिया नानामणिरयणविविहहारद्धहारउवसोभियसमुद्धयरूवा (समुदया) इसिमन्नमन्नमसंपत्ता पुव्वावरदाहिणुत्तरागएहिं वाएहिं मंदायं मंदायमेइज्जमाणा एइज्जमाणा पलंबमाणा पलंबमाणा पझंझमाणा[4] पझंझमाणा ओरालेणं मणुन्नेणं मणहरेणं कण्णमणणिव्वु-इकरेणं सद्देणं ते पदेसे सव्वतो समंता आपूरेमाणा सिरीए उवसोभेमाणा उवसोभेमाणा चिट्ठंति ॥ १९१ ॥

सूत्र-१९२ : तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं बहवे हय-संघाडा जाव उसभसंघाडा सव्वरयणामया अच्छा जाव पडिरूवा ॥ १९२ ॥

[१९२] **तीसे पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं हयसंघाडा नरसंघाडा किंनर-संघाडा किंपुरिससंघाडा महोरगसंघाडा गंधव्वसंघाडा उसभसंघाडा सव्वरयणामया अच्छा जाव पडिरूवा ।**

सूत्र-१९३-१९६ : जाव वीहितो पंतीतो मिहुणाणि लयाओ ॥१९३-१९६॥

[१९३-१९६] **एवं पंतीओवि** वीहीओवि **मिहुणाइं** ॥ तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं बहुयाओ पउमलयाओ णागलयाओ असोगलयाओ चंपगलयाओ वणलयाओ वासंतियलयाओ अइमुत्तगलयाओ कुंदलयाओ सामलयाओ निच्चं कुसुमियाओ निच्चं मउलियाओ निच्चं लवइयाओ निच्चं थवइयाओ णिच्चं गुलइयाओ निच्चं गोच्छियाओ णिच्चं[6] जमलियाओ निच्चं जुयलियाओ निच्चं विणमियाओ निच्चं पणमियाओ निच्चं सुविभत्तपडिमंजरिवडंसगधरीओ निच्चं कुसुमिय-मउलिय-लवइय-थवइय-गुलइय-गोच्छिय-जमलिय-जुयलिय-विणमिय-पणमिय-सुविभत्तपडिमंजरिवडिंसगधरीओ सव्वरयणामईओ अच्छा जाव पडिरूवाओ' इति ।

---

१. VG । दामा-मु. (क, ख, ग, घ, च) द्र० सू० ४० जीवाभि. ३।२६५ । २. JKE । °या तत्थ तत्थ देसे ए° मु. ॥ ३. सं° JKE नास्ति ॥ ४. पडंडमाणा पडंडमाणा JK ॥ ५. द्र० सू० १९२ । ६. णिच्चं जमलिआयो - JKE नास्ति ॥ ७. °जमलियजुयलिय JKE नास्ति ॥

अस्य व्याख्या-'**सा**' एवंस्वरूपा '**ण**' मिति वाक्यालङ्कारे, **पद्मवरवेदिका** तत्र तत्र प्रदेशे **एकैकेन हेमजालेन**[१]-सर्वात्मना हेममयेन लम्बमानेन दामसमूहेन, **एकैकेन गवाक्षजालेन**-गवाक्षाकृतिरत्नविशेषदामसमूहेन **एकैकेन किङ्किणीजालेन,** किङ्किण्यः-क्षुद्रघण्टिकाः, **एकैकेन घण्टाजालेन**-किङ्किण्यपेक्षया किंचिन्महत्यो घण्टा घण्टाः, तथा **एकैकेन मुक्ताजालेन**-मुक्ताफलमयेन दामसमूहेन **एकैकेन मणिजालेन**-मणिमयेन दामसमूहेन **एकैकेन कनकजालेन**-कनकः-पीतरूपः सुवर्णविशेषः तन्मयेन दामसमूहेन, **एवमेकैकेन रत्नजालेन एकैकेन पद्मजालेन** सर्वरत्नमयपद्मात्मकेन दामसमूहेन, **सर्वतः**-सर्वासु दिक्षु **समन्ततः**-सर्वासु विदिक्षु **परिक्षिप्ता**-व्याप्ता, एतानि च दामसमूहरूपाणि हेमजालादीनि जालानि लम्बमानानि वेदितव्यानि । तथा चाह- '**ते णं जाला**' इत्यादि, तानि सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, प्राकृते हि लिङ्गमनियतं, णमिति वाक्यालङ्कारे, हेमजालादीनि जालानि, **क्वचिद्** 'दामा' इति पाठः, तत्र तावत् हेमजालादिरूपा दामानि[२] इति, '**तवणिज्जलंबूसगा**' इत्यादि हयसंघाटादिसूत्रं लतासूत्रं च प्राग्वत् ॥ १९१-१९६ ॥

सूत्र-१९७ : से केणट्ठेणं भंते ! एवं वुच्चइ-पउमवरवेइया पउमवरवेइया ? गोयमा ! पउमवरवेइयाए णं तत्थ तत्थ देसे[३] तहिं तहिं वेइयासु वेइयाबाहासु य वेइयफलएसु य वेइयपुडंतरेसु य, खंभेएसु खंभबाहासु खंभसीसेसु[४] खंभपुडंतरेसु, सूईसु सूईमुखेसु सूईफलएसु सूईपुडंतरेसु, पक्खेसु पक्खबाहासु पक्खपेरंतेसु पक्खपुडंतरेसु बहुयाइं उप्पलाइं पउमाइं कुमुयाइं णलिणाइं सुभगाइं सोगंधियाइं पोंडरीयाइं महापोंडरीयाइं सयवत्ताइं सहस्सवत्ताइं सव्वरयणामयाइं अच्छाइं[५] पडिरूवाइं महया वासिक्कछत्तसमाणाइं[६] पण्णत्ताइं समणाउसो ! से एएणं अट्ठेणं गोयमा ! एवं वुच्चइ- पउमवरवेइया पउमवरवेइया ॥ १९७ ॥

[१९७] सम्प्रति पद्मवरवेदिकाशब्दप्रवृत्तिनिमित्तं जिज्ञासुः पृच्छति-'**से केणट्ठेणं भंते !**' इत्यादि, सेशब्दोऽथशब्दार्थे, केनार्थेन-केन कारणेन भदन्त ! **एवमुच्यते-पद्मवरवेदिका**

१. कनकजालेन - JKE ॥ २. °न - JKE नास्ति ॥ ३. देसे देसे तहिं - JLK ॥ ४. खंभफलते(एK)सु KJL (क, ख, ग, घ, च, छ) । ५. द्र० सू० १५७ । ६. वासिक्कय० JLK (क, ख, ग, घ, छ) ।

पद्मवरवेदिकेति, किमुक्तं भवति ?-पद्मवरवेदिकेत्येवंरूपस्य शब्दस्य तत्र प्रवृत्तौ किं निमित्तमिति एवमुक्ते भगवानाह-**गौतम** ! **पद्मवरवेदिकायां तत्र तत्र→** [१]एकदेशे तस्यैव देशस्य **तत्र तत्र**←एकदेशे **वेदिकासु**-उपवेशनयोग्यमत्तवारणरूपासु, **वेदिकाबाहासु**-वेदिकापार्श्वेषु, **'वेइयपुडंतरेसु'** इति द्वे वेदिके वेदिकापुटं, तेषामन्तराणि-अपान्तरालानि तानि वेदिकापुटान्तराणि तेषु, तथा **स्तम्भेषु** सामान्यतः **स्तम्भबाहासु**-स्तम्भपार्श्वेषु, **'खंभसीसेसु'** इति स्तम्भशीर्षेषु, **'स्तम्भपुटंतरेसु'** इति द्वौ स्तम्भौ स्तम्भपुटं, तेषामन्तराणि स्तम्भपुटान्तराणि तेषु, **सूचीषु**-फलकसंबन्धविघटनाभावहेतुपादुकास्थानीयासु, तासामुपरीतितात्पर्यार्थः, **'सूई-मुहेसु'** इति यत्र प्रदेशे सूची फलकं भित्त्वा मध्ये प्रविशति, तत्प्रत्यासन्नो देशः सूचीमुखं तेषु, तथा **सूचीफलकेषु** [२]सूचीभिःसम्बन्धिनो ये फलकप्रदेशास्तेऽप्युपचारात् सूचिफलकानि तेषु सूचीनामध उपरि वर्त्तमानेषु, तथा **'सुईपुटंतरेसु'** इति [३]द्वे सूच्यौ सूचीपुटं, [४]तदन्तरेषु, **पक्षाः पक्षबाहा** वेदिकैकदेशविशेषास्तेषु, **बहूनि उत्पलानि**-गर्दभकानि, **पद्मानि**-सूर्यविकासीनि, **कुमुदानि**-चन्द्रविकासीनि, **नलिनानि**-ईषद्रक्तानि पद्मानि, **सुभगानि**-पद्मविशेषरूपाणि, **सौगन्धिकानि**-कल्हाराणि, **पुण्डरीकाणि**-सिताम्बुजानि, तान्येव महान्ति **महापुण्डरीकाणि शतपत्राणि**-पत्रशतकलितानि, **सहस्रपत्राणि**-पत्रसहस्रोपेतानि, शतपत्रसहस्रपत्रे च पद्मविशेषौ पत्रसंख्याविशेषाच्च पृथगुपात्ते, एतानि **सर्वरत्नमयानि, अच्छाइं** इत्यादि विशेषणजातं प्राग्वद्, **'महया वासिक्कछत्तसमाणाइं'** इति महान्ति-महाप्रमाणानि वार्षिकाणि-वर्षाकाले पानीयरक्षार्थं यानि कृतानि वार्षिकाणि, तानि च तानि छत्राणि च तत्समानानि **प्रज्ञप्तानि** हे **श्रमण** ! हे **आयुष्मन्** !, **'से एएणमट्ठेण'**मित्यादि, तदेतेन अर्थेन-अन्वर्थेन **गौतम** ! **एवमुच्यते-पद्मवरवेदिके**ति, तेषु तेषु यथोक्तरूपेषु प्रदेशेषु यथोक्तरूपाणि पद्मानि पद्मवरवेदिकाशब्दस्य प्रवृत्तिनिमित्तमिति भावः, व्युत्पत्तिश्चैवं-पद्मवरा-पद्मप्रधाना वेदिका पद्मवरवेदिकेति ॥१९७॥

सूत्र-१९८ : पउमवरवेइया णं भंते ! किं सासया असासया ? गोयमा ! सिय सासया सिय असासया ॥ १९८ ॥

[१९८] **'पउमवरवेइया णं भंते ! किं सासया'** इत्यादि, **पद्मवरवेदिका** 'ण'मिति पूर्ववत्, **किं शाश्वती** उताऽशाश्वती ?, [५]आदन्ततया सूत्रे निर्देशः प्राकृतत्वात्, किं नित्या

---

१. → चिह्नद्वयमध्यवर्तिपाठः - JKE नास्ति । मु. जीवाभि टी. सू. २६९ अस्ति ॥ २. सूचीनिसं° JKE ॥ ३. द्वौ - JKE ॥ ४. JKEGI° पुटै - मु. ॥ ५. JKE GI आबन्त° मु. जीवा टी. ॥

उताऽनित्या? इति भावः, भगवानाह-**गौतम ! स्यात् शाश्वती स्यादशाश्वती,** कथंचिन्नित्या कथञ्चिदनित्या इत्यर्थः, स्याच्छब्दो निपातः कथंचिदित्येतदर्थवाची ॥ १९८ ॥

सूत्र-१९९ : से केणट्ठेणं भंते ! एवं वुच्चइ-सिय सासया सिय असासया ? गोयमा ! दव्वट्ठयाए सासया, वण्णपज्जवेहि गंधपज्जवेहि रसपज्जवेहिं फासपज्जवेहिं असासया । से एएणट्ठेणं गोयमा ! एवं वुच्चइ- सिय सासया सिय असासया ॥ १९९ ॥

[१९९] **'से केणट्ठेण'**मित्यादिप्रश्नसूत्रं सुगमं, भगवानाह-**गौतम ! द्रव्यार्थतया**-द्रव्यास्तिकनयमतेन **शाश्वती,** द्रव्यास्तिकनयो हि द्रव्यमेव तात्त्विकमभिमन्यते न पर्यायान्, द्रव्यं चान्वयि परिणामित्वाद् अन्वयित्वाच्च सकलकालभावीति भवति द्रव्यार्थतया शाश्वती, **वर्णपर्यायै**स्तत्तदन्यसमुत्पद्यमानवर्णविशेषरूपैः, एवं **गन्धपर्यायैः, रसपर्यायैः, स्पर्शपर्यायैः,** उपलक्षणमेतत् तत्तदन्यपुद्गलविचटनोच्चटनैश्च **अशाश्वती,** किमुक्तं भवति ?-पर्यायास्तिकनयमतेन पर्यायप्राधान्यविवक्षायाम् अशाश्वती, पर्यायाणां प्रतिक्षणभावितया कियत्कालभावितया विनाशित्वात्, **'से एएणट्ठेण'**मित्याद्युपसंहारवाक्यं सुगमम् ॥ १९९ ॥

सूत्र-२०० : पउमवरवेइया णं भंते ! कालओ केवचिरं होइ ? गोयमा ! ण कयाति णासि, ण कयाति णत्थि, ण कयाति न भविस्सइ, भुविं च भवइ य भविस्सइ य, धुवा णियया सासया अक्खया अव्वया अवट्ठिया णिच्चा पउमवरवेइया ॥ २०० ॥

[२००] इह द्रव्यास्तिकनयवादी स्वमतप्रतिष्ठापनार्थमेवमाह-नात्यन्तासत उत्पादो नापि सतो नाशः **'नासतो विद्यते भावो, नाभावो विद्यते सतः' [भगवद्गीता अ. २, श्लो. १६]** इति वचनाद्, यौ [१]तु दृश्येते प्रतिवस्तु उत्पाद-विनाशौ तद् आविर्भाव-तिरोभावमात्रं, यथा सर्पस्य उत्फणत्वविफणत्वे, तस्मात्सर्वं वस्तु नित्यमिति, एवं च तन्मतचिन्तायां संशयः-किं घटादिवद् द्रव्यार्थतया शाश्वती उत सकलकालमेकरूपा ? इति, ततः संशयापनोदार्थं भगवन्तं भूयः पृच्छति-**'पउमवरवेइया ण'**मित्यादि, पद्मवरवेदिका प्राग्वद् भदन्त ! **कालतः कियच्चिरं**-कियन्तं कालं यावद् **भवति** ?, एवंरूपा हि कियन्तं कालमवतिष्ठति

---

१. च - JE ॥

इति ?, भगवानाह-**गौतम ! न कदाचिन्नासीत्** सर्वदैवासीदिति भावः, अनादित्वात्, तथा **न कदाचिन्न भवति,** सर्वदैव वर्त्तमानकालचिन्तायां भवतीति भावः, सदैव भावात्, तथा **न कदाचिन्न भविष्यति**, किंतु भविष्यच्चिन्तायां सर्वदैव भविष्यतीति प्रतिपत्तव्यम्, अपर्यवसितत्वात्, तदेवं कालत्रयचिन्तायां नास्तित्वप्रतिषेधं विधाय सम्प्रत्यस्तित्वं प्रतिपादयति- '**भुविं च**' इत्यादि, **अभूच्च भवति च भविष्यति चे**ति, एवं त्रिकालावस्थायित्वाद् **ध्रुवा** मेर्वादिवद् ध्रुवत्वादेव सदैव स्वस्वरूप**नियता,** नियतत्वादेव च **शाश्वती**-शश्वद्भवनस्वभावा, शाश्वतत्वादेव च सततं गङ्गा-सिन्धुप्रवाहप्रवृत्तावपि पौण्डरीकह्रद इवाऽनेकपुद्गलविचटनेऽपि तावन्मात्रान्यपुद्गलोच्चटनसम्भवादक्षया, न विद्यते क्षयो-यथोक्तस्वरूपाकारपरिभ्रंशो यस्याः सा **अक्षया,** अक्षयत्वादेव **अव्यया**-अव्ययशब्दवाच्या, मनागपि स्वरूपचलनस्य जातुचिदप्यभावाद्, अव्ययत्वादेव सदैव स्वस्वप्रमाणेऽ**वस्थिता**, मानुषोत्तराद्बहिः समुद्रवद्, एवं स्वप्रमाणे सदावस्थानेन चिन्त्यमाना **नित्या** धर्मास्तिकायादिवद् ॥ २०० ॥

सूत्र-२०१ : सा णं पउमवरवेइया एगेणं वणसंडेणं सव्वओ समंता संपरिक्खित्ता । से णं वणसंडे देसूणाइं दो जोयणाइं चक्कवालविक्खंभेणं, उवयारिया-लेणसमे परिक्खेवेणं । वणसंडवण्णओ भाणियव्वो जाव[1] विहरंति ॥ २०१ ॥

[२०१] '**सा ण**'मित्यादि, सा 'ण'मिति वाक्यालङ्कारे, **पद्मवरवेदिका एकेन वनखण्डेन सर्वतः समन्तात् परिक्षिप्ता, स च वनखण्डो देशोने द्वे योजने चक्रवाल[2]विष्कम्भतः परिक्षेप[3]तः उपकारिकालयन**परिक्षेपपरिमाणो, **वनखण्डवर्णकः** 'किण्हे किण्होभासे' इत्यादिरूपः समस्तोऽपि प्राग्वद् **यावद्विहरन्ति** ॥ २०१ ॥

सूत्र-२०२ : तस्स णं उवयारिया-लेणस्स चउद्दिसिं चत्तारि तिसोवाणपडिरूवगा पण्णत्ता वण्णओ तोरण[4] झया छत्ताइच्छत्ता[5] ॥ २०२ ॥

[२०२] '**तस्स ण**'मित्यादि, **तस्य उपकारिकालयनस्य** '**चउद्दिसं**'ति **चतुर्दिशि**-चतसृषु दिक्षु एकैकस्यां दिशि एकैकभावेन **चत्वारि त्रिसोपानप्रतिरूपकाणि**-प्रतिविशिष्ट-रूपकाणि

---

१. द्र० सू० १७०-१८५ । जीवाभिगमसूत्र ३५८ तः, टीका पृ. १८३-१९७ ॥ २. चक्रवाल॰ - JKE नास्ति ॥ ३. JKEG । परिक्षेपतः मु. नास्ति ॥ ४. "अतः परं 'अट्ठट्ठमंगलगा इति पदं गम्यमस्ति ।" इति V पृ. १२७ टि. १० ॥ ५. द्र० सू० १९-२३ ॥

त्रिसोपानानि **प्रज्ञप्तानि**, त्रिसोपान**वर्णको** यानविमानवद् वक्तव्यः, तेषां च त्रिसोपानप्रतिरूपकाणां पुरतः प्रत्येकमेकैकं **तोरणं**, तोरणवर्णकोऽपि तथैव ॥ २०२ ॥

सूत्र-२०३ : तस्स णं उवयारियालयणस्स उवरिं बहुसमरमणिज्जे भूमिभागे पण्णत्ते जाव[1] मणीणं फासो ॥ २०३ ॥

[२०३] '**तस्स ण**'मित्यादि, **तस्य उपकारिकालयनस्य 'बहुसमरमणिज्जे भूमिभागे'** इत्यादिना भूमिभागवर्णनकं यानविमानवर्णकवत् तावद्वाच्यं **यावन्मणीनां स्पर्शः**[2] ॥ २०३ ॥

सूत्र-२०४ : तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए, एत्थ णं महेगे मूलपासायवडेंसए पण्णत्ते । से णं मूलपासायवडेंसते[3] पंच जोयणसयाइं उड्ढं उच्चत्तेणं, अड्ढाइज्जाइं जोयणसयाइं विक्खंभेणं, अब्भुग्गयमूसिय० वण्णओ[4] भूमिभागो उल्लोओ[5] सीहासणं सपरिवारं भाणियव्वं[6] अट्ठट्ठ मंगलगा झया छत्ताइच्छत्ता ॥ २०४ ॥

[२०४] **तस्य च बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्र महानेको मूलप्रासादावतंसकः प्रज्ञप्तः, स च पञ्च योजनशतान्यूर्ध्वमुच्चैस्त्वेन, अर्द्धतृतीयानि योजनशतानि विष्कम्भतः, अब्भुग्गयमूसिय**पहसियाविवेत्यादि तस्य वर्णनं मध्येभूमिभागवर्णनमुल्लोकवर्णनं द्वारबहिःस्थितप्रासादवद्भावनीयं, तस्य[7] च मूलप्रासादावतंसकस्य बहुमध्यदेशभागेऽत्र महती एका मणिपीठिका प्रज्ञप्ता, अष्टौ योजनान्यायाम-विष्कम्भाभ्यां, चत्वारि योजनानि बाहल्यतः, सर्वात्मना मणिमयी, अच्छा इत्यादि विशेषणकदम्बकं प्राग्वत् । '**तीसे**[8] **ण**'मित्यादि, तस्याश्च मणिपीठिकाया उपरि महदेकं सिंहासनं प्रज्ञप्तं, तस्य सिंहासनस्य वर्णनं, परिवारभूतानि शेषाणि भद्रासनानि प्राग्वद्वक्तव्यानि ॥ २०४ ॥

सूत्र-२०५ : से णं मूलपासायवडेंसगे अण्णेहिं चउहिं पासायवडेंसएहिं तयद्धुच्चत्तप्पमाणमेत्तेहिं सव्वओ समंता संपरिखित्ते । ते णं पासाय-

---

१. द्र० सू० २४-३१ । २. संस्पर्शः - JKE ॥ ३. मूल० JLK नास्ति ॥ एवमग्रेऽपि । ४. द्र. सू० १३७ । ५. द्र. सू० २४-३४ । ६. द्र. सू० ३७-४४ । ७. 'तस्य' इत्यादिकस्य मणिपीठिकासम्बन्धिनः विवरणस्य मूलं न प्रतिभाति' इति G पृ. २११ टिप्पणे ॥ ८. " 'तीसे णं' इत्यादि प्रतीकदर्शनाद् अत्र प्रस्तुतमूलपाठ-विवरणकारलब्धमूलपाठयोर्भेदः प्रतीयते"-इति G पृ. २११ टिप्पणे ॥

वडेंसगा अट्ठाइज्जाइं जोयणसयाइं उड्ढं उच्चत्तेणं पणवीसं जोयणसयं विक्खंभेणं अब्भुग्गयमूसिय जाव वण्णओ[1] भूमिभागो उल्लोओ[2] सीहासणं सपरिवारं भाणियव्वं[3] अट्ठट्ठ मंगलगा झया छत्ताइच्छत्ता[4] ॥ २०५ ॥

[२०५] '**से ण**'मित्यादि, **स मूलप्रासादावतंसकोऽन्यैश्चतुर्भिः प्रासादावतंसकैस्तदर्द्धोच्चत्वप्रमाणैः सर्वतः समन्ततः परिक्षिप्तः**, तदर्द्धोच्चत्वप्रमाणमेव दर्शयति-**अर्द्धतृतीयानि योजनशतान्यूर्ध्वमुच्चैस्त्वेन, पञ्चविंशं योजनशतं विष्कम्भेन**, तेषामपि '**अब्भुग्गयमूसिय**पहसियाविवे'त्यादिस्वरूपवर्णनं मध्य**भूमिभाग**वर्णन**मुल्लोक**वर्णनं च प्राग्वत्, तेषां च प्रासादावतंसकानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं **सिंहासनं** प्रज्ञप्तं, तेषां च सिंहासनानां वर्णनं प्राग्वद्, नवरमत्र शेषाणि परिवारभूतानि[5] वक्तव्यानि ॥ २०५ ॥

सूत्र-२०६ : ते णं पासायवडेंसया अण्णेहिं चउहिं पासायवडेंसएहिं तयद्धुच्चत्तप्पमाणमेत्तेहिं सव्वओ समंता संपरिखित्ता । ते णं पासायवडेंसया पणवीसं जोयणसयं उड्ढं उच्चत्तेणं, बावट्ठिं जोयणाइं अद्धजोयणं च विक्खंभेणं, अब्भुग्गयमूसिय० वण्णओ भूमिभागो उल्लोओ सीहासणं सपरिवारं भाणियव्वं अट्ठट्ठ मंगलगा झया छत्तातिच्छत्ता ॥ २०६ ॥

[२०६] '**ते णं पासायवडेंसया**' इत्यादि, **ते प्रासादावतंसका अन्यैश्चतुर्भिः प्रासादावतंसकैः** '**तयद्धुच्चत्तपमाणमेत्तेहिं**'[6] तेषां प्रासादावतंसकानां यदर्द्धं तदुच्चत्व[7]प्रमाणमात्रैः-मूलप्रासादावतंसकापेक्षया चतुर्भागमात्रप्रमाणैः **सर्वतः समन्तात्संपरिक्षिप्ताः**, तदर्द्धोच्चत्व[8]प्रमाणमेव दर्शयति-'**ते ण**'मित्यादि, **ते प्रासादावतंसकाः पंचविंशं योजनशतमूर्ध्वमुच्चैस्त्वेन द्वाषष्टियोजनानि अर्द्धयोजनं च विष्कम्भतः**, एतेषामपि '**अब्भुग्गयमूसिय**पहसियाविवे'त्यादिस्वरूपवर्णनं मध्यभागभूमिवर्णन**मुल्लोक**वर्णनं सिंहासनवर्णनं[9] च सर्वं प्राग्वत्, केवलमत्रापि सिंहासनं सपरिवारं वक्तव्यम् ॥ २०६ ॥

---

१. द्र. सू० १३७ । २. द्र. सू० २४-३४ । ३. द्र. सू० ३४-४४ । ४. द्र. सू० २१-२३ । ५. JBE G। °नि भद्रासनानि व° मु. भा. २ ॥ ६. JBE । तेषां मूलप्रासादा० G । तेषां मूलप्रासादावतंसकपरिवारभूतानां प्रासादा° मु. ॥ ७-८. °त्व° JBE नास्ति ॥ ९. °नं परिवाररहितं प्राग्वत् (२०६) JKE भा. १ ॥

सूत्र-२०७ : ते णं पासायवडेंसगा अण्णेहिं चउहिं पासायवडेंसएहिं तद्दुच्चत्तप्पमाणमेत्तेहिं सव्वओ समंता संपरिक्खित्ता । ते णं पासायवडेंसगा बावट्ठिं जोयणाइं अद्धजोयणं च उड्ढं उच्चत्तेणं, एक्कतीसं जोयणाइं कोसं च विक्खंभेणं, वण्णओ[1] उल्लोओ[2] सीहासणं अपरिवारं[3] अट्ठट्ठ मंगलगा झया छत्तातिछत्ता ॥ २०७ ॥

[२०७] 'ते ण'मित्यादि, **ते च प्रासादावतंसका अन्यैश्चतुर्भिः प्रासादावतंसकैस्तदर्द्धोच्चत्व[4]प्रमाणैः** अनन्तरोक्तप्रासादावतंसकार्द्धोच्चत्व[5]प्रमाणैर्मूलप्रासादावतंसकापेक्षया अष्ट[6]भागप्रमाणैः **सर्वतः समन्तात् संपरिक्षिप्ताः**, तदर्द्धोच्चत्वप्रमाणमेव दर्शयति-→'ते[7] ण' मित्यादि, **ते च प्रासादावतंसका द्वाषष्टिर्योजनानि अर्धं योजनं च ऊर्ध्वमुच्चैस्त्वेन←एकत्रिंशतं योजनानि क्रोशं च विष्कम्भतः**, एषामपि 'अब्भुग्गय[8]मूसिए'त्यादिस्वरूपवर्णनं मध्यभागभूमिवर्णनम् उल्लोकवर्णनं सिंहासनवर्णनं च परिवाररहितं प्राग्वत् ॥ २०७ ॥

सूत्र-२०८ : [9]ते णं पासायवडेंसया अण्णेहिं चउहिं पासायवडेंसगेहिं तद्दुच्चत्तप्पमाणमेत्तेहिं सव्वतो समंता संपरिक्खित्ता । ते णं पासायवडेंसगा एक्कतीसं जोयणाइं कोसं च उड्ढं उच्चत्तेणं, पन्नरसजोयणाइं अड्ढाइज्जे कोसे विक्खंभेणं, अब्भुग्गयमूसिय० वण्णओ भूमिभागो जाव[10] झया छत्तातिछत्ता ॥ २०८ ॥

[२०८] 'ते ण'मित्यादि, **तेऽपि प्रासादावतंसका अन्यैश्चतुर्भिः प्रासादावतंसकैस्तदर्द्धोच्चत्वप्रमाणैः** अनन्तरोक्तप्रासादावतंसकार्द्धोच्चत्वप्रमाणैर्मूलप्रासादावतंसकापेक्षया षोडशभागप्रमाणैः **सर्वतः समन्तात् संपरिक्षिप्ताः**, तदर्द्धोच्चत्वप्रमाणमेव दर्शयति-**एकत्रिंशद्[11]योजनानि क्रोशं च ऊर्ध्वमुच्चैस्त्वेन पञ्चदश योजनानि अर्द्धतृतीयांश्च क्रोशान्**

---

१. द्र. सू० १३७ । २. द्र. सू० २४-३४ । ३. सपरिवारं K (क, ख, ग, घ, च, छ) मु. । ४-५. °त्व° JBE नास्ति एवमग्रेपि ॥ ६. GI (अष्ट) मु. । षोडश - JBE ॥ ७. →←चिह्नद्वयमध्यवर्तिपाठः JBE नास्ति ॥ ८. ०रवर्जितं - JBE ॥ ९. K । 'च, छ' GJ प्रतिष्वेतत्सूत्रं (२०८) नैव दृश्यते । १०. द्र. सू० २०५ । ११. ०शतं योजनानि - G । जीवा. टी. सू. ३६८ ।

विष्कम्भतः। एतेषामपि स्वरूपादिवर्णनमनन्तरोक्तम्, →'**ते**[१] **ण**'मित्यादि, तेऽपि च प्रासादावतंसका अन्यैश्चतुर्भिः प्रासादावतंसकैस्तदर्द्धोच्चत्वप्रमाणैः-अनन्तरोक्तप्रासादावतंसकार्द्धोच्चत्वप्रमाणैः सर्वतः समन्तात् संपरिक्षिप्ताः, तदर्द्धोच्चत्वप्रमाणमेव दर्शयति-पञ्चदश योजनानि अर्द्धतृतीयांश्च क्रोशान् ऊर्ध्वमुच्चैस्त्वेन, देशोनान्यष्टौ योजनानि विष्कम्भेन,← एषामेव स्वरूपव्यावर्णनं भूमिभागवर्णनम् उल्लोकवर्णनं सिंहासनवर्णनं च परिवारवर्जितं प्राग्वत् ॥ २०८ ॥

सूत्र-२०९ : तस्स णं मूलपासायवडेंसयस्स उत्तरपुरत्थिमेणं एत्थ णं सभा सुहम्मा पण्णत्ता–एगं जोयणसयं आयामेणं, पण्णासं जोयणाइं विक्खंभेणं, बाबत्तरिं जोयणाइं उड्ढं उच्चत्तेणं, अणेगखंभसयसन्निविट्ठा अब्भुग्गय-सुकय-वइरवेइया तोरणवररइयसालभंजियागा जाव[२] अच्छरगण-संघसंविकिण्णा दिव्वतुडियसद्दसंपणाइया अच्छा जाव पडिरूवा ॥ २०९ ॥

[२०९] '**तस्स ण**' मित्यादि, **तस्य मूलप्रासादावतंसकस्य** '**उत्तरपुरत्थिमेणं**'ति उत्तरपूर्वस्यामीशानकोणे इत्यर्थः, **अत्र सभा सुधर्मा प्रज्ञप्ता**, सुधर्मा नाम विशिष्टच्छन्दकोपेता, सा **एकं योजनशतमायामतः, पञ्चाशद् योजनानि विष्कम्भतः, द्वासप्ततिर्योजनानि ऊर्ध्वमुच्चैस्त्वेन**, कथंभूता सा ? इत्याह-'**अणेगे**'त्यादि, **अनेकस्तम्भशतसन्निविष्टा** '**अब्भुग्गयसुकयवइरवेइया तोरणवररइयसालभंजिया सुसिलिट्ठविसिट्ठलट्ठसंठियपसत्थवेरुलियविमलखंभा**' इति, अभ्युद्गता-अतिरमणीयतया द्रष्टृणां प्रत्यभिमुखम् उत्प्राबल्येन स्थिता सुकृतेव सुकृता निपुणशिल्पिरचितेतिभावः, अभ्युद्गता चासौ सुकृता च

---

१. "प्रस्तुतसंपादनोपयुक्तेषु एकस्मिन्नपि लिखितादर्शे अतः आरभ्य कण्डिकासमाप्तिपर्यन्तस्य विवरणस्य मूलपाठो न लभ्यते एवमेव च मु॰ पुस्तकेऽपि, अत एवात्र विवरणकारलब्धमूलपाठ-प्राप्तादर्शमूलपाठयोर्भेदः। स च अलभ्यमानो मूलपाठः श्रीजीवाजीवाभिगमसूत्रे प्रस्तुतान्यप्रसङ्गेऽपि एवमुपलभ्यते-"ते णं पासायवडिंसगा अद्धसोलस जोयणाइं अद्धकोसं च उड्ढं उच्चत्तेणं देसूणाइं अट्ठ जोयणाइं आयामविक्खंभेणं....पृ० २२१ पं० २-८ । तद्विवरणं चैवम्-.....तदर्धोच्चत्वप्रमाणमेव दर्शयति-पञ्चदश योजनानि अर्धतृतीयांश्च क्रोशान् ऊर्ध्वमुच्चैस्त्वेन देशोनानि अष्टौ योजनानि आयामविष्कम्भाभ्याम्"-जीवा० वृ० पृ० २२३ प्र० पं० ११-पृ० २२३ पं० ४ ।" इति G संस्करणे पत्र २१३ टिप्पणे ॥ →← चिह्नद्वयमध्यवर्तिपाठः JBE नास्ति ॥

२. द्र. सू० ३२ ।

अभ्युद्गतसुकृता वज्रवेदिका-द्वारमुण्डिकोपरि वज्ररत्नमया वेदिका तोरणं च अभ्युद्गतसुकृतं यत्र सा तथा, तथा वराभिः-प्रधानाभिः रचिताभिः रतिदाभिर्वा शालभञ्जिकाभिः सुश्लिष्टाः-संबद्धा विशिष्टं-प्रधानं लष्टं-मनोज्ञं संस्थितं-संस्थानं येषां ते विशिष्टलष्टसंस्थिताः प्रशस्ताः-प्रशंसास्पदीभूता वैडूर्यस्तम्भा-वैडूर्यरत्नमयाः स्तम्भा यस्यां सा तथा, वररचित-शालभञ्जिकासुश्लिष्टविशिष्टलष्टसंस्थितप्रशस्तवैडूर्यस्तम्भाः ततः पूर्वपदेन कर्मधारयः समासः । तथा नानामणिकनकरत्नानि खचितानि यत्र स नानामणिकनकरत्नखचितः, क्तान्तस्य परनिपातः सुखादिदर्शनाद्, नानामणिकनकरत्नखचित उज्ज्वलो-निर्मलो बहुसमः-अत्यन्तसमः सुविभक्तो निचितो-निबिडो रमणीयश्च भूमिभागो यस्यां सा नानामणिकनक-रत्नखचितोज्ज्वलबहुसमसुविभक्त[निचित]भूमिभागा, 'इहामिग-उसभ-तुरग-नर-मगर-विहग-वालग-किन्नर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलयभत्तिचित्ता खंभुग्गयवरवेइयाभिरामा विज्जाहरजमलजुगलजंतजुत्ताविव अच्चीसहस्समालिणीया रूवगसहस्सकलिया भिसिमाणा भिब्भिसमाणा चक्खुल्लोयणलेसा सुहफासा सस्सिरीयरूवा कंचणमणिरयणथूभियागा नाना-विहपंचवण्णघंटापडागपरिमंडियग्गसिहरा चवला[१] मरीइकवचं विणिम्मुयंती लाउल्लोइयमहिया[२] गोसीससरससुरभिरत्तचंदणदद्दरदिन्नपंचंगुलियतला उवचियवंदणकलसा वंदणघडसुकयतोरण-पडिदुवारदेसभागा आसत्तोसत्तविउलवट्टवग्घारियमल्लदामकलावा पंचवण्णसरससुरभिमुक्क-पुप्फपुंजोवयारकलिया कालागुरुपवरकुंदुरुक्कतुरुक्कधूवडज्झंतमघमघेंतगंधुद्धुयाभिरामा सुगंध-वरगंधिया गंधवट्टिभूया अच्छरगणसंघसंविकिण्णा[३] दिव्वतुडियसद्दसंपणादिया सव्वरयणामया अच्छा जाव पडिरूवा' इति प्राग्वत्[४] ॥ २०९ ॥

सूत्र-२१० : सभाए णं सुहम्माए तिदिसिं तओ दारा पण्णत्ता, तं जहा-पुरत्थिमेणं दाहिणेणं उत्तरेणं । ते णं दारा सोलस जोयणाइं उड्ढं उच्चत्तेणं, अट्ठ जोयणाइं विक्खंभेणं, तावतियं चेव पवेसेणं, सेया वरकणगथूभियागा जाव[५] वणमालातो[६] ॥ २१० ॥

[२१०] **'सभाए ण'**मित्यादि, **सभायाश्च सुधर्मायास्त्रिदिशि** तिसृषु दिक्षु एकैकस्यां दिशि एकैकद्वारभावेन **त्रीणि द्वाराणि प्रज्ञप्तानि, तद्यथा**-एकं **पूर्वस्या**मेकं **दक्षिणस्या**मेक-

१. K । धवला-मु. । धवला-श्वेता इति जीवा.टी.सू. ३७२ । २. लाइयउल्लो° G। ३. °सं° JBE नास्ति ॥ ४. सूत्र ३२ वत् इति ज्ञेयम् ॥ ५. सू० १२९-१३६ । ६. वणमालाओ तेसि णं दाराणं उवरिं (अट्ठट्ठ-KL)मंगलरूवा छत्ताइछत्ता (छ) KL ।

मुत्तरस्यां, तानि च द्वाराणि प्रत्येकं **षोडश षोडश योजनान्यूर्ध्वमुच्चैस्त्वेन अष्टौ योजनानि विष्कम्भतः 'तावइयं चेवे**'ति, तावन्त्येवाष्टौ योजनानीतिभावः **प्रवेशेन, 'सेया वरकणगथूभिया'** इत्यादिप्रागुक्तद्वारवर्णनं तदेव तावद्वक्तव्यं **यावद्वनमाला** इति ॥ २१० ॥

सूत्र-२११ : तेसि णं दाराणं पुरओ पत्तेयं-पत्तेयं मुहमंडवे पण्णत्ते । ते णं मुहमंडवा एगं जोयणसयं आयामेणं, पण्णासं जोयणाइं विक्खंभेणं, साइरेगाइं सोलस जोयणाइं उड्ढं उच्चत्तेणं, वण्णओ[1] सभाए सरिसो ॥ २११ ॥

[२११] **तेषां च द्वाराणां पुरतः प्रत्येकं प्रत्येकं मुखमण्डपः प्रज्ञप्तः, ते च मुखमण्डपा एकं योजनशतमायामतः पञ्चाशद् योजनानि विष्कम्भतः सातिरेकाणि षोडश योजनानि ऊर्ध्वमुच्चैस्त्वेन,** एतेषामपि 'अणेगखंभसयसंनिविट्ठा' इत्यादि **वर्णनं** सुधर्म**सभाया इव** निरवशेषं द्रष्टव्यम्[2] ॥ २११ ॥

सूत्र-२१२ : तेसि णं मुहमंडवाणं तिदिसिं तओ दारा पण्णत्ता, तं जहा– पुरत्थिमेणं दाहिणेणं उत्तरेणं । ते णं दारा सोलस जोयणाइं उड्ढं उच्चत्तेणं, अट्ठ जोयणाइं विक्खंभेणं, तावतियं चेव पवेसेणं, सेया वरकणगथूभियागा जाव[3] वणमालाओ ॥ २१२ ॥

सूत्र-२१३ : तेसि णं मुहमंडवाणं भूमिभागा उल्लोया[4] ॥ २१३ ॥

सूत्र-२१४ : तेसि णं मुहमंडवाणं उवरिं अट्ठट्ठ मंगलगा झया छत्ताइच्छत्ता[5] ॥ २१४ ॥

सूत्र-२१५ : तेसि णं मुहमंडवाणं पुरतो पत्तेयं-पत्तेयं पेच्छाघरमंडवे पण्णत्ते । मुहमंडववत्तव्वया जाव[6] दारा ॥ २१५ ॥

[२१२-२१३-२१४-२१५] **तेषां च मुखमण्डपानां पुरतः प्रत्येकं प्रत्येकं प्रेक्षागृहमण्डपः प्रज्ञप्तः,** ते च प्रेक्षागृहमण्डपा आयाम-विष्कम्भोच्चैस्त्वैः प्राग्वद् प्रेक्षागृहमण्डपानां[7] च भूमिभागवर्णनं प्राग्वत् तावद्वाच्यं यावन्मणीनां स्पर्शः ॥ २१५ ॥

---

१. द्र० सू० ३२ । २. द्र. सू. २०९ ॥ ३. द्र० सू० १२९-१३६ । ४. द्र० सू० २४-३४ । ५. द्र० सू० २१-२३ । ६. द्र० सू० २११, २१२ । ७. JBEGI प्रेक्षागृहमण्डपानां च भूमिभागवर्णनं प्राग्वत् - मु. नास्ति ।

सूत्र-२१६ : तेसि णं पेच्छाघरमंडवाणं भूमिभागा उल्लोया[१] ॥ २१६ ॥

सूत्र-२१७ : तेसि णं बहुसमरमणिज्जाणं भूमिभागाणं बहुमज्झदेसभाए पत्तेयं-पत्तेयं वइरामए अक्खाडए पण्णते ॥ २१७ ॥

[२१६-२१७] तेषां च बहुसमरमणीयानां[२] भूमिभागानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं वज्रमयोऽक्षपाटकः प्रज्ञप्तः ॥ २१७ ॥

सूत्र-२१८ : तेसि णं वइरामयाणं अक्खाडगाणं बहुमज्झदेसभागे पत्तेय-पत्तेयं मणिपेढिया पण्णत्ता । तातो णं मणिपेढियातो अट्ठ जोयणाइं आयामविक्खंभेणं, चत्तारि जोयणाइं बाहल्लेणं, सव्वमणिमईओ अच्छाओ जाव पडिरूवाओ ॥ २१८ ॥

[२१८] तेषां च वज्रमयानामक्षपाटकानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं मणिपीठिका[३] प्रज्ञप्ताः, ताश्च मणिपीठिका अष्ट योजनान्यायाम-विष्कम्भाभ्यां चत्वारि योजनानि बाहल्येन-पिण्डभावेन, सर्वात्मना मणिमय्यः[४], 'अच्छाओ' इत्यादि विशेषणजातं प्रागिव ॥ २१८ ॥

सूत्र-२१९ : तासि णं मणिपेढियाणं उवरिं पत्तेयं-पत्तेयं सीहासणे पण्णत्ते । सीहासणवण्णओ[५] सपरिवारो ॥ २१९ ॥

[२१९] तासां च मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं सिंहासनं प्रज्ञप्तं, तेषां च सिंहासनानां वर्णनं परिवारश्च प्राग्वद्वक्तव्यः ॥ २१९ ॥

सूत्र-२२० : तेसि णं पेच्छाघरमंडवाणं उवरिं अट्ठट्ठ मंगलगा झया छत्तातिछत्ता[६] ॥ २२० ॥

[२२०] तेषां च प्रेक्षागृहमण्डपानामुपरि अष्टावष्टौ मङ्गलकानि बहवः कृष्णचामरध्वजा इत्यादि प्राग्वत् ॥ २२० ॥

---

१. द्र० सू० २४-३४ । २. GI °सम° मु. नास्ति ॥ ३. JBEG जीवा. टी. ३७७ । प्रज्ञप्ताः ताश्चमणिपीठिका- मु. नास्ति ॥ ४. JBEG जीवा. टी. ३७७ । °य्याः मु. । एवमग्रेऽपि ॥ ५. द्र० सू० ३७-४४ । ६. द्र० सू० २९-२३ ।

सूत्र-२२१ : तेसि णं पेच्छाघरमंडवाणं पुरओ पत्तेयं पत्तेयं मणिपेढियाओ पण्णत्ताओ । ताओ णं मणिपेढियातो सोलस जोयणाइं आयामविक्खंभेणं, अट्ठ जोयणाइं बाहल्लेणं, सव्वमणिमतीओ अच्छाओ जाव पडिरूवातो ॥ २२१ ॥

[२२१] **तेषां प्रेक्षागृहमण्डपानां पुरतः प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिकाः** प्रत्येकं **षोडश योजनान्यायाम-विष्कम्भाभ्यामष्टौ योजनानि बाहल्येन, सर्वात्मना मणिमय्यः, 'अच्छा'** इत्यादि विशेषणकदम्बकं प्राग्वत् ॥ २२१ ॥

सूत्र-२२२ : तासि णं मणिपेढियाणं उवरिं पत्तेयं-पत्तेयं चेइयथूभे पण्णत्ते । ते णं चेइयथूभा सोलस जोयणाइं आयामविक्खंभेणं, साइरेगाइं सोलस जोयणाइं उड्ढं उच्चत्तेणं, सेया संखंक-कुंद-दगरय-अमय-महिय-फेणपुंजसन्निगासा सव्वरयणामया अच्छा जाव पडिरूवा ॥ २२२ ॥

[२२२] **तासां च मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं चैत्यस्तूपः प्रज्ञप्तः, ते च चैत्यस्तूपाः षोडश योजनान्यायामविष्कम्भाभ्यां, सातिरेकाणि षोडश योजनान्यूर्ध्वमुच्चैस्त्वेन 'संखंके'**त्यादि, तद्वर्णनं सुगमम् ॥ २२२ ॥

सूत्र-२२३ : तेसि णं चेइयथूभाणं उवरिं अट्ठअट्ठ मंगलगा झया छत्तातिछत्ता जाव सहस्सपत्तहत्थया ॥ २२३ ॥

[२२३] **तेषां च चैत्यस्तूपानामुपर्यष्टावष्टौ** स्वस्तिकादीनि **मङ्गलकानि 'जाव सहस्सपत्तहत्थया'**[२] इति यावत्करणात् 'तेसिं चेइयथूभाणं उप्पिं बहवे किण्हचामरज्झया जाव[३] सुक्किल्लचामरज्झया अच्छा सण्हा रुप्पपट्टवइरदंडा जमलजामलगंधी सुरूवा पासाइया जाव पडिरूवा, तेसिं चेइयथूभाणं उप्पिं बहवे छत्ताइच्छत्ता पडागा घंटाजुगला उप्पलहत्थगा जाव सयसहस्सपत्तहत्थगा सव्वरयणामया जाव पडिरूवा' इति, एतच्च समस्तं प्राग्वद् ॥ २२३ ॥

सूत्र-२२४ : तेसि णं चेइयथूभाणं पत्तेयं-पत्तेयं चउद्दिसिं मणिपेढियाओ पण्णत्ताओ । ताओ णं मणिपेढियाओ अट्ठ जोयणाइं आयाम-

---

१. चेइय - JL (क, ख, ग, घ, च, छ) नास्ति; एवमग्रेऽपि । वृत्तेस्तथा जीवाजीवाभिगमस्य (३।३८१) अनुसारेण 'चेइय' इति पदं युज्यते । २. द्र.सू. २२ वृत्तौ ॥ ३. द्र. सू. २३ ॥

विक्खंभेणं, चत्तारि जोयणाइं बाहल्लेणं, सव्वमणिमईओ अच्छाओ जाव पडिरूवाओ ॥ २२४ ॥

[२२४] **'तेसि ण'**मित्यादि, **तेषां चैत्यस्तूपानां प्रत्येकं प्रत्येकं 'चउद्दिसिं'**ति चतुर्दिशि-चतसृषु दिक्षु एकैकस्यां दिशि एकैकमणिपीठिकाभावेन चतस्रो **मणिपीठिकाः प्रज्ञप्ताः, अष्टौ योजनान्यायाम-विष्कम्भाभ्यां, चत्वारि योजनानि बाहल्येन सर्वात्मना मणिमय्यः,** अच्छा इत्यादि प्राग्वत् ॥ २२४ ॥

सूत्र-२२५ : तासि णं मणिपेढियाणं उवरिं चत्तारि जिणपडिमातो जिणुस्सेहपमाणमेत्तातो [१]पलियंकनिसन्नाओ थूभाभिमुहीतो सन्निखित्तातो चिट्ठंति, तं जहा-उसभा वद्धमाणा चंदाणणा वारिसेणा ॥ २२५ ॥

[२२५] **तासां च मणिपीठिकानामुपरि** →[२]एकैकस्या अपि मणिपीठिकाया उपरि← एकैकप्रतिमाभावेन **चतस्रो जिनप्रतिमा जिनोत्सेधप्रमाणमात्राः,** जिनोत्सेध उत्कर्षतः पञ्च धनुःशतानि, जघन्यतः सप्त हस्ताः, इह तु पञ्च धनुःशतानि सम्भाव्यन्ते, **'पलियंक-[३]संनिसन्नाओ'**इति पर्यङ्कासनसन्निषण्णाः, **स्तूपाभिमुख्यः संनिक्षिप्ताः,** तथा जगत्स्थिति-स्वाभाव्येन सम्यग्निवेशितास्**तिष्ठन्ति, तद्यथा-ऋषभा वर्द्धमानाः चन्द्रानना वारिषेणा** इति ॥ २२५ ॥

सूत्र-२२६ : तेसि णं चेइयथूभाणं पुरओ पत्तेयं-पत्तेयं मणिपेढियाओ पण्णत्ताओ । ताओ णं मणिपेढिताओ सोलस जोयणाइं आयामविक्खंभेणं, अट्ठ जोयणाइं बाहल्लेणं, सव्वमणिमईतो अच्छाओ जाव पडिरूवातो ॥ २२६ ॥

[२२६] **'तेसि ण'**मित्यादि, **तेषां चैत्यस्तूपानां पुरतः प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिकाः षोडश योजनान्यायाम-विष्कम्भाभ्यामष्टौ योजनानि बाहल्यतः 'सव्वमणिमईओ'** इत्यादि प्राग्वत् ॥ २२६ ॥

सूत्र-२२७ : तासि णं मणिपेढियाणं उवरिं पत्तेयं-पत्तेयं चेइयरुक्खे पण्णत्ते । ते णं चेइयरुक्खा अट्ठ जोयणाइं उड्ढं उच्चत्तेणं, अद्धजोयणं

१. सपलि° L॥ २. →← चिह्नद्वयमध्यवर्तिपाठः JBE पा. ४-५ अस्ति । मु. G नास्ति ॥ ३. °सं° JBE नास्ति ॥

उव्वेहेणं, दो जोयणाइं खंधो, अद्धजोयणं विक्खंभेणं, छ जोयणाइं विडिमा बहुमज्झदेसभाए० अट्ठ जोयणाइं आयामविक्खंभेणं, सातिरेगाइं अट्ठ जोयणाइं सव्वग्गेणं पण्णत्ता ॥ २२७ ॥

[२२७] **तासां च मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं चैत्यवृक्षा अष्टौ योजनान्यूर्ध्वमुच्चैस्त्वेनाऽर्द्धयोजनमुद्वेधेन**-उण्डत्वेन, **द्वे योजने** उच्चैस्त्वेन **स्कन्धः**, स एवाऽर्धं **योजनं विष्कम्भतया बहुमध्यदेशभागे विडिमा**-ऊर्ध्वं विनिर्गता शाखा सा ऊर्ध्वमुच्चैस्त्वेन **षड् योजनानि, अष्टौ योजनानि विष्कम्भेन सर्वाग्रेण सातिरेकेणाष्टौ योजनानि प्रज्ञप्ताः**[१] ॥ २२७ ॥

सूत्र-२२८ : तेसि णं चेइयरुक्खाणं इमेयारूवे वण्णावासे पण्णत्ते, तं जहा—वइरामयमूलरययसुपइट्ठियविडिमा रिट्ठामय-विउलकंद[२]-वेरुलिय-रुइलखंधा सुजायवरजायरूवपढमगविसालसाला नाणामणिमयरयण-विविहसाहप्पसाह-वेरुलियपत्त-तवणिज्जपत्तबिंटा जंबूणय-रत्त-मउय-सुकुमाल-पवाल-पल्लव[३]-वरंकुरधरा विचित्तमणिरयणसुरभि-कुसुम-फल-भर-नमियसाला [‘सच्छाया सप्पभा सस्सिरीया सउज्जोया] अहियं नयणमणणिव्वुइकरा अमयरससमरसफला पासादीया दरिसणिज्जा अभिरूवा पडिरूवा ॥ २२८ ॥

[२२८] **तेषां च चैत्यवृक्षाणामयमेतद्रूपो वर्णावासः प्रज्ञप्तस्तद्यथा-‘वइरामयमूला रययसूपइट्ठियविडिमा’** वज्राणि-वज्रमयानि मूलानि येषां ते वज्रमयमूलाः, रजते सुप्रतिष्ठिता विडिमा-बहुमध्यदेशभागे ऊर्ध्वं विनिर्गता शाखा येषां ते रजतसुप्रतिष्ठितविडिमास्ततः पूर्वपदेन कर्मधारयः समासः, **‘रिट्ठामयविउलकंदवेरुलिय-रुइलखंधा’** रिष्टमयो-रिष्टरत्नमयः कन्दो येषां ते रिष्टमयकन्दाः, तथा वैडूर्यरत्नमयो रुचिरः स्कन्धो येषां ते तथा, ततः पूर्वपदेन कर्मधारयः, **‘सुजायवरजायरूवपढमगविसालसाला’** सुजातं-मूलद्रव्यशुद्धं वरं-प्रधानं यद् जातरूपं तदात्मकाः प्रथमका-मूलभूता विशालाः शालाः[४]-शाखा येषां ते

---

१. °प्तानि -K ॥ २. विउलाकंदा वेरुलिया मु. (क, ख, ग, घ, च), वृत्तौ ‘विउल’ शब्दो न व्याख्यातः। इति V पृ. १३१ टि. ४ ॥ ३. सोभियावरंकुरग्गसिहरा JL (क, ख, ग, घ, च, छ)। ४. JBEG जीवा. टी. ३८७ । शालाः - मु. नास्ति ॥

सुजातवरजातरूपप्रथमकविशालशालाः **'नानामणिरयणविविहसाहप्पसाह-वेरुलियपत्त-तवणिज्जपत्तबिंटा'** इति [१]नानामणिरत्नानि-नानामणिरत्नात्मिका विविधाः शाखाः प्रशाखा येषां ते तथा वैडूर्याणि-वैडूर्यमयानि पत्राणि येषां ते तथा, तपनीयमयानि पत्रवृन्तानि येषां ते तथा, ततः पूर्ववत् पदद्वयमीलनेन कर्मधारयः, **'जंबूणय-रत्त-मउय-सुकुमाल-पवाल-पल्लव-वरंकुरधरा'** जाम्बूनदा-जाम्बूनदसुवर्णविशेषमया रक्ता-रक्तवर्णा मृदवः-मनोज्ञाः सुकुमाराः- सुकुमारस्पर्शाः प्रवाला-ईषदुन्मीलितपत्रभावाः पल्लवाः-संजातपरिपूर्णप्रथमपत्रभावरूपा वराङ्कुराः-प्रथममुद्भिद्यमाना अङ्कुरास्तान् धरन्तीति जाम्बूनदरक्तमृदुसुकुमारप्रवाल-पल्लवाङ्कुरधराः **'विचित्तमणिरयणसुरभि-कुसुम-फल-भरनमियसाला'** इति [२]विचित्र-मणिरत्नानि-विचित्रमणिरत्नमयानि यानि सुरभीनि कुसुमानि फलानि च तेषां भरेण नमिताः शालाः-शाखा येषां ते तथा, तथा सती-शोभना छाया येषां ते **सच्छायाः**, सती-शोभना प्रभा-कान्तिर्येषां ते **सत्प्रभाः**, अत एव **सश्रीकाः**, तथा सह उद्द्योतेन वर्त्तन्ते मणिरत्ना-नामुद्द्योतभावात् **सोद्द्योताः**, **अधिकं नयन-मनोनिर्वृत्तिकरा अमृतरससमरसानि फलानि** येषां ते तथा, **'पासाईया'** इत्यादिविशेषणचतुष्टयं प्राग्वद् । [३]एते च चैत्यवृक्षा अन्यैर्बहुभिस्तिलक-लवक-च्छत्रौपग-शिरीष-सप्तपर्ण-दधिपर्ण-लुब्धक-[४]धव-चन्दन-नीप-कुटज-[५]कदम्ब-पनस-ताल-तमाल-प्रियाल-प्रियङ्गु-पारापत-राजवृक्ष-नन्दिवृक्षैः सर्वतः समन्तात् संपरिक्षिप्ताः, ते च तिलका यावन्नन्दिवृक्षा मूलमन्तः कन्दमन्त इत्यादि सर्वमशोकपादप-वर्णनायामिव तावद्वक्तव्यं [६]यावत् परिपूर्णं लतावर्णनम् ॥ २२८ ॥

सूत्र-२२९ : तेसि णं चेइयरुक्खाणं उवरिं अट्ठट्ठ मंगलगा झया छत्ताइछत्ता ॥ २२९ ॥

[२२९] **'तेसि ण'**मित्यादि, **तेषां चैत्यवृक्षाणामुपरि अष्टावष्टौ मङ्गलकानि** बहवः कृष्णचामरध्वजा इत्यादि चैत्यस्तूप इव तावद्वक्तव्यं यावद्बहवः सहस्रपत्रहस्तकाः सर्वरत्नमया यावत् प्रतिरूपका इति ॥ २२९ ॥

---

१. JKI नानामणिरत्नानि - मु. G नास्ति ॥ २. JKI विचित्रमणिरत्नानि - मु. G नास्ति ॥ ३. "अत आरभ्य यावत् प्रतिरूपकाः इत्यन्तस्य सू. २२९ विवरणस्य मूलपाठो मूले न दृश्यते" इति G पृ. २२० टि.। एतद् संवादिसूत्रं जीवाभिगमे ३।३८८-३९० दृश्यते ॥ ४. JKE °धवलच° मु. GII ५. JEI कदम्बक - KI कदम्ब - मु.G नास्ति ॥ ६. द्रष्टव्या सू. ३-४ वृत्तिः ॥

सूत्र-२३० : तेसि णं चेइयरुक्खाणं पुरओ पत्तेयं-पत्तेयं मणिपेढिया पण्णत्ता । ताओ णं मणिपेढियाओ अट्ठ जोयणाइं आयाम-विक्खंभेणं, चत्तारि जोयणाइं बाहल्लेणं, सव्वमणिमईओ अच्छाओ जाव पडिरूवाओ ॥ २३० ॥

[२३०] 'तेसि ण'मित्यादि, **तेषां च चैत्यवृक्षाणां पुरतः प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिका अष्टौ योजनान्यायाम-विष्कम्भाभ्यां, चत्वारि योजनानि बाहल्यतः 'सव्वरयणामईओ'** इत्यादि प्राग्वद् ॥ २३० ॥

सूत्र-२३१ : तासि णं मणिपेढियाणं उवरिं पत्तेयं-पत्तेयं महिंदज्झए पण्णत्ते । ते णं महिंदज्झया सट्ठिं जोयणाइं उड्ढं उच्चत्तेणं, अद्धकोसं उव्वेहेणं, अद्धकोसं[1] विक्खंभेणं वइरामय-वट्ट-लट्ठ-संठिय-सुसिलिट्ठ-परिघट्ठ-मट्ठ-सुपतिट्ठिया विसिट्ठा अणेगवरपंचवण्णकुडभीसहस्स-परिमंडियाभिरामा वाउद्धुयविजय-वेजयंती-पडाग-च्छत्तातिच्छत्तकलिया तुंगा गगणतल[2]-मणुलिहंतसिहरा पासादीया दरिसणिज्जा अभिरूवा पडिरूवा ॥ २३१ ॥

[२३१] **तासां च मणिपीठिकानामुपरि प्रत्येकं महेन्द्रध्वज[3]ः प्रज्ञप्तः, ते च महेन्द्रध्वजाः षष्टिर्योजनान्यूर्ध्वमुच्चैस्त्वेन अर्द्धक्रोशम्**-अर्द्धगव्यूत**मुद्वेधेन**-उण्डत्वेन **अर्द्धक्रोशं विष्कम्भतः, 'वइरामय-वट्ट-लट्ठ-संठिय-सुसिलिट्ठ-परिघट्ठ-मट्ठ-सुपइट्ठिया'** इति वज्रमया-वज्ररत्नमया तथा वृत्तं-वर्तुलं लष्टं-मनोज्ञं संस्थितं-संस्थानं येषां ते वृत्तलष्टसंस्थितास्तथा सुश्लिष्टा यथा भवन्ति एवं परिघृष्टा इव खरशा[4]णया पाषाणप्रतिमेव सुश्लिष्टपरिघृष्टाः मृष्टाः

---

१. G भा.२ संशो. । जोयणं (क, ख, ग, घ JL मु.); जोइणं (च, छ) । "अत्र सर्वप्रतिषु (भा.२ संशो. विना) मु० पुस्तके च 'जोयणं उव्वेहेणं जोयणं विक्खंभेणं' इति-एव पाठ उपलभ्यते, केवलम् भा० २ प्रतौ 'सट्ठिं जोयणाइं उड्ढं उच्चत्तेणं अद्धकोसं उव्वेहेणं, अद्धकोसं विक्खंभेणं' इति लभ्यते परंतु भा० २ प्रतावपि मूलतस्तु 'जोयणं' इत्यादिक एव पाठो दृश्यते, अनन्तरं केनचित् शोधकेन मूल-विवरणयोर्वैषम्यं परिहर्तुकामेन 'जोयणं' स्थाने 'अद्धकोसं' इति परिवर्तितं प्रतिभाति, अस्माभिस्तु मूल-विवरणयोः संवादाय विवरणानुसारी स शोधित एव पाठोऽत्र मूले न्यस्तः ॥" इति G पत्र २२१ टि. ॥ २. गगणतलमभिकंखमाण० (क, ख, ग, घ, च, छ) । ३. °JKE G जीवा.टी. ३९३ ।° जाः प्रज्ञप्ताः - मु. ॥ ४. °नया - JKE॥

सुकुमारशाणया पाषाणप्रतिमावत् सुप्रतिष्ठिता मनागपि चलनासम्भवात्, ततो विशेषणसमासः, विशिष्टा **'अणेगवरपंचवन्नकुडभीसहस्सपरिमंडियाभिरामा वाऊद्धुयविजयवेजयंती-पडागा छत्ताइच्छत्तकलिया तुंगा गगनतलमभिलंघमाणसिहरा पासाईया जाव पडिरूवा'** इति प्राग्वद् ॥ २३१ ॥

सूत्र-२३२ : तेसि णं महिंदज्झयाणं उवरिं अट्ठट्ठ मंगलगा झया छत्तातिछत्ता ॥ २३२ ॥

[२३२] **'तेसि ण'**मित्यादि, **तेषां महेन्द्रध्वजानामुपरि अष्टावष्टौ मङ्गलकानि,** बहवः कृष्णचामरध्वजा इत्यादि तोरणवत् सर्वं वक्तव्यम् ॥ २३२ ॥

सूत्र-२३३ : तेसि णं महिंदज्झयाणं पुरतो पत्तेयं-पत्तेयं नंदा पुक्खरिणी पण्णत्ता । ताओ णं पुक्खरिणीओ एगं जोयणसयं आयामेणं, पण्णासं जोयणाइं विक्खंभेणं, दस जोयणाइं उव्वेहेणं, अच्छाओ जाव पगईए उदगरसेणं पण्णत्ताओ । पत्तेयं-पत्तेयं पउमवरवेइयापरिक्खित्ताओ, पत्तेयं-पत्तेयं वणसंड-परिक्खित्ताओ ॥ २३३ ॥

[२३३] **तेषां च महेन्द्रध्वजानां पुरतः प्रत्येकं नन्दा**-नन्दाभिधाना **पुष्करिणी प्रज्ञप्ता, एकं योजनशतमायामतः, पञ्चाशद् योजनानि विष्कम्भतः, दशयोजनान्युद्वेधेन**-उण्डत्वेन, तासां च नन्दापुष्करिणीनां **'अच्छाओ** सण्हाओ रययामयकूलाओ' इत्यादि **वर्णनं** प्राग्वत्, ताश्च नन्दापुष्करिण्यः **प्रत्येकं प्रत्येकं पद्मवरवेदिकया प्रत्येकं प्रत्येकं वनखण्डेन परिक्षिप्ताः** ॥ २३३ ॥

सूत्र-२३४ : तासि णं णंदाणं पुक्खरिणीणं तिदिसिं तिसोवाणपडिरूवगा पण्णत्ता । तिसोवाणपडिरूवगाणं वण्णओ तोरणा झया छत्तातिछत्ता ॥ २३४ ॥

---

१. द्र. सू० १७४ । २. द्र. सू० १८९-२०१ । ३. "मु.पु. विवरणे तथा पा. ४-५, भा. १ प्रतौ च विवरणे 'द्वासप्तति योजनानि' इत्येव पाठो लभ्यते किन्तु केवलं भा. २ प्रतावेव 'दश योजनानि' पाठः प्राप्तः स एव च पाठः मूलपाठानुसारी अत एव अत्र स्वीकृतः । विवरणे निर्दिष्टः 'द्वासप्ततियोजनानि' पाठोऽपि विशेषेण विचारणीयोऽस्ति नहि अविमृश्यैव विवरणकारेण एवं निर्देशो कृतो भवेत्" इति Gपृ. २२१-२२२-टि. ॥ ४. द्र. सू० १९-२३ ।

[२३४] **तासां च नन्दापुष्करिणीनां** प्रत्येकं **त्रिदिशि त्रिसोपानप्रतिरूपकतोरण**वर्णनं प्रागिव ॥ २३४ ॥

सूत्र-२३५ : सभाए णं सुहम्माए अडयालीसं मणोगुलियासाहस्सीओ पण्णत्ताओ, तं जहा–पुरत्थिमेणं सोलससाहस्सीओ, पच्चत्थिमेणं सोलससाहस्सीओ, दाहिणेणं अट्ठसाहस्सीओ, उत्तरेणं अट्ठसाहस्सीओ । तासु णं मणोगुलियासु बहवे सुवण्णरुप्पामया फलगा पण्णत्ता । तेसु णं सुवण्णरुप्पामएसु फलगेसु बहवे वइरामया णागदंतया पण्णत्ता । तेसु णं वइरामएसु णागदंतएसु किण्हसुत्तबद्धा वग्घारियमल्लदामकलावा [जाव][1] चिट्ठंति ॥ २३५ ॥

[२३५] **'सभाए णं सुहम्माए'** इत्यादि, **सभायां सुधर्म्मायामष्टचत्वारिंशन्मनोगुलिकासहस्राणि**-पीठिकासहस्राणि **प्रज्ञप्तानि, तद्यथा-पूर्वस्यां** दिशि **षोडश** मनोगुलिका**सहस्राणि** षोडश सहस्राणि पूर्वत: **षोडश सहस्राणि पश्चिमायामष्टौ सहस्राणि दक्षिणतोऽष्टौ सहस्राणि उत्तरत:**, एतासु च फलक-नागदन्तक-माल्यदामवर्णनं प्राग्वत्, → सिक्कग[2]वर्णनं धूपघटिकावर्णनं द्वारवत् ← ॥ २३५ ॥

सूत्र-२३६ : सभाए णं सुहम्माए अडयालीसं गोमाणसियासाहस्सीओ पण्णत्ताओ, तं जहा–पुरत्थिमेणं सोलससाहस्सीओ, पच्चत्थिमेणं सोलससाहस्सीओ, दाहिणेणं अट्ठसाहस्सीओ, उत्तरेणं अट्ठसाहस्सीओ । तासु णं गोमाणसियासु बहवे सुवण्णरुप्पामया फलगा पण्णत्ता । तेसु णं सुवण्णरुप्पामएसु फलगेसु बहवे वइरामया नागदंतया पण्णत्ता । तेसु णं वइरामएसु णागदंतएसु बहवे रययामया सिक्कगा पण्णत्ता । तेसु णं रययामएसु सिक्कगेसु बहवे वेरुलियामइओ धूवघडियाओ पण्णत्ताओ । ताओ णं धूवघडियाओ कालागरु-पवर जाव[3] चिट्ठंति ॥ २३६ ॥

---

१. "अत्र समर्पणसूचक: संकेत: केनापि कारणेन त्रुटितोऽस्ति । १३२ सूत्रमिह प्राप्तमस्ति । द्रष्टव्यं जीवाजीवाभिगमस्य ३।३९७ सूत्रम्" । इति V पृ. १३३ टि. १ ॥ २. →←चिह्नद्वयमध्यवर्तिपाठ: JKE नास्ति । मु. G अस्ति ॥ ३. द्र. सू. १३२ ॥

[२३६] **'सभाए णं सुहम्माए'** इत्यादि, **सभायां सुधर्मायाम् अष्टाचत्वारिंशद् गोमानसिकाः**-शय्यारूपाः स्थानविशेषास्तेषां **सहस्राणि** प्रज्ञप्तानि, **तद्यथा-षोडश सहस्राणि पूर्वतः षोडश सहस्राणि पश्चिमायामष्टौ सहस्राणि दक्षिणतोऽष्टौ सहस्राणि उत्तरतः**, तास्वपि फलकवर्णनं नागदन्तवर्णनं सिक्कगवर्णनं धूपघटिकावर्णनं च द्वारवत् ॥२३६॥

सूत्र-२३७ : सभाए णं सुहम्माए अंतो बहुसमरमणिज्जे भूमिभागे पण्णत्ते जाव[1] मणीहिं उवसोभिए मणिफासो य उल्लोओ य ॥ २३७ ॥

[२३७] **'सभाए णं सुहम्माए'** इत्यादिना भूमिभागवर्णनं **'सभाए णं सुहम्माए'** इत्यादिना उल्लोकवर्णनं च प्राग्वत् ॥ २३७ ॥

सूत्र-२३८ : तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए, एत्थ णं महेगा मणिपेढिया पण्णत्ता-सोलस जोयणाइं आयामविक्खंभेणं, अट्ठ जोयणाइं बाहल्लेणं, सव्वमणिमई अच्छा जाव पडिरूवा ॥ २३८ ॥

[२३८] **'तस्स ण'**मित्यादि, **तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागेऽत्र महती एका मणिपीठिका प्रज्ञप्ता, षोडश योजनान्यायाम-विष्कम्भाभ्याम् अष्टौ योजनानि बाहल्यतः सर्वरत्नमयी** इत्यादि प्राग्वद् ॥ २३८ ॥

सूत्र-२३९ : तीसे णं मणिपेढियाए उवरिं, एत्थ णं माणवए चेइयखंभे पण्णत्ते-सट्ठिं जोयणाइं उड्ढं उच्चत्तेणं, जोयणं उव्वेहेणं, जोयणं विक्खंभेणं, अडयालीसअंसिए[2] अडयालीसइकोडीए अडयालीसइविग्गहिए सेसं जहा[3] महिंदज्झयस्स ॥ २३९ ॥

[२३९] **तस्याश्च मणिपीठिकाया उपरि** महानेको **माणवक**नामा **चैत्यस्तम्भः** प्रज्ञप्तः, **षष्टिर्योजनान्यूर्ध्वमुच्चैस्त्वेन, योजनमुद्वेधेन, योजनं विष्कम्भेन अष्टाचत्वारिंशदस्रिकः 'अडयालीसइकोडीए अडयालीसइविग्गहिए'** इत्यादि सम्प्रदायगम्यम् **'वइरामयवट्टलट्ठसंठिए'** इत्यादि महेन्द्रध्वजवद् वर्णनं निरवशेषं तावद्वक्तव्यं यावत् 'सहस्सपत्तहत्थगा सव्वरयणामया जाव पडिरूवा' इति ॥ २३९ ॥

१. द्र० सू० २४-३४ । २. V । अडयालीसं असीइए अडयालीसं सइकोडिए अडयालीसं सइविग्गहे J (क, ख, ग, घ, च, छ) । ३. द्र० सू० २३१, २३२ ।

सूत्र-२४० : माणवगस्स णं चेइयखंभस्स उवरिं बारस जोयणाइं ओगाहेत्ता, हेट्ठावि बारस जोयणाइं वज्जेत्ता, मज्झे छत्तीसाए जोयणेसु, एत्थ णं बहवे सुवण्णरुप्पामया फलगा पण्णत्ता । तेसु णं सुवण्णरुप्पामएसु फलएसु बहवे वइरामया णागदंता पण्णत्ता । तेसु णं वइरामएसु नागदंतेसु बहवे रययामया सिक्कगा पण्णत्ता । तेसु णं रययामएसु सिक्कएसु बहवे वइरामया गोलवट्टसमुग्गया पण्णत्ता । तेसु णं वयरामएसु गोलवट्टसमुग्गएसु बहुयाओ[1] जिण-सकहाओ संनिखित्ताओ चिट्ठंति । ताओ णं सूरियाभस्स देवस्स अन्नेसिं च बहूणं देवाण य देवीण य अच्चणिज्जाओ जाव पज्जुवासणिज्जाओ ॥ २४० ॥

[२४०] **तस्य च माणवकस्य चैत्यस्तम्भस्य उपरि द्वादश योजनानि अवगाह्य[2],** उपरितनभागाद् द्वादश योजनानि वर्जयित्वेति भावः, **अधस्तादपि द्वादश योजनानि वर्जयित्वा मध्ये षट्त्रिंशति योजनेषु** 'बहवे **सुवण्णरुप्पामया फलका**' इत्यादि, फलकवर्णनं नागदन्तवर्णनं सिक्कवर्णनं च प्राग्वत्, **तेषु च रजतमयेषु सिक्ककेषु बहवो वज्रमया गोलवृत्ताः**-गोलवद्[3] वृत्ताः **समुद्गकाः प्रज्ञप्ताः, तेषु च वज्रमयेषु समुद्गकेषु बहूनि जिनसक्थीनि सन्निक्षिप्तानि तिष्ठन्ति, यानि सूर्याभस्य देवस्य अन्येषां च बहूनां** वैमानिकानां **देवानां देवीनां च अर्चनीयानि** चन्दनैः, वन्दनीयानि स्तुत्यादिना, पूजनीयानि पुष्पादिना, माननीयानि बहुमानतः, सत्करणीयानि वस्त्रादिना, कल्याणं मङ्गलं दैवतं चैत्यमितिबुद्ध्या **पर्युपासनीयानि** ॥ २४० ॥

सूत्र-२४१ : माणवगस्स चेइयखंभस्स उवरिं अट्ठ मंगलगा झया छत्ताइच्छत्ता ॥ २४१ ॥

[२४१] 'तस्स णं **चेइयखंभस्स उवरि बहवे अट्ठट्ठमंगलगा**' इत्यादि प्राग्वत् ॥ २४१ ॥

---

१. बहवे LJ (क, ख, ग, घ, च, छ) । २. ग्त्य - EI ग्गात्य JI ग्गम्य - भा. १ ॥ ३. JKE GI गोलवद् वृत्ताः-मु. जीवा. टी. ४०२ नास्ति ॥

सूत्र-२४२ : तस्स माणवगस्स चेइयखंभस्स पुरत्थिमेणं, एत्थ णं महेगा मणिपेढिया पण्णत्ता—अट्ठ जोयणाइं आयामविक्खंभेणं, चत्तारि जोयणाइं बाहल्लेणं, सव्वमणिमई अच्छा जाव[1] पडिरूवा ॥ २४२ ॥

[२४२] '**तस्स ण**'मित्यादि, तस्य **माणवकस्य चैत्यस्तम्भस्य पूर्वस्यां** दिशि **अत्र महत्येका मणिपीठिका प्रज्ञप्ता,** सा च **अष्टौ योजनान्यायाम-विष्कम्भाभ्यां, चत्वारि योजनानि बाहल्येन, 'सव्वमणिमई'** इत्यादि प्राग्वत् ॥ २४२ ॥

सूत्र-२४३ : तीसे णं मणिपेढियाए उवरिं, एत्थ णं महेगे सीहासणे पण्णत्ते—सीहासणवण्णतो[2] सपरिवारो ॥ २४३ ॥

[२४३] →[3]सिंहासनं प्रज्ञप्तं, सिंहासनवर्णनम् शेषाणि च भद्रासनानि तत्परिवारभूतानि प्राग्वत् ॥ २४३ ॥

सूत्र-२४४ : तस्स णं माणवगस्स चेइयखंभस्स पच्चत्थिमेणं, एत्थ णं महेगा मणिपेढिया पण्णत्ता—अट्ठ जोयणाइं आयाम-विक्खंभेणं, चत्तारि जोयणाइं बाहल्लेणं, सव्वमणिमई अच्छा जाव पडिरूवा ॥ २४४ ॥

[२४४] **तस्य माणवक**नाम्नः **चैत्यस्तम्भस्य पश्चिमायां** दिशि **अत्र महती एका मणिपीठिका प्रज्ञप्ता,** साऽपि **अष्टौ योजनानि आयाम-विष्कम्भाभ्यां, चत्वारि योजनानि बाहल्येन, 'सव्वमणिमयी'** इत्यादि प्राग्वत्[4]←॥ २४४ ॥

सूत्र-२४५ : तीसे णं मणिपेढियाए उवरिं, एत्थ णं महेगे देवसयणिज्जे पण्णत्ते । तस्स णं देवसयणिज्जस्स इमेयारूवे वण्णावासे पण्णत्ते, तं जहा—णाणामणिमया पडिपाया, सोवण्णिया पाया, णाणामणिमयाइं पायसीसगाइं, जंबूणयामयाइं गत्तगाइं, [वइरामया संधी,] णाणामणिमए वेच्चे, रययामई तूली, लोहियक्खमया बिब्बोयणा, तवणिज्जमया गंडोवहाणया । से णं देवसयणिज्जे सालिंगणवट्टिए, [उभओ बिब्बोयणे] दुहओ उण्णते, मज्झे णयगंभीरे, गंगापुलिणवालुयाउद्दालसालिसए

१. द्र. सू. ३-४ वृत्तौ पृ. ७ ॥ २. द्र. सू० ३७-४४ ॥ ३. भा. १-२ । →← चिह्नद्वयमध्यवर्तिपाठः मु. JKE नास्ति ॥ ४. द्र. सू. ३६ ॥

सुविरइयरयत्ताणे ओयवियखोमदुगुल्लपट्टपडिच्छयणे आईणग-रूय-बूर-णवणीय-तूलफासे रत्तंसुयसंवुए सुरम्मे पासादीए दरिसणिज्जे अभिरूवे पडिरूवे ॥ २४५ ॥

[२४५] **तस्याश्च मणिपीठिकाया उपरि अत्र महदेकं देवशयनीयं प्रज्ञप्तं, तस्य च देवशयनीयस्य अयमेतद्रूपो वर्णावासो**-वर्णकनिवेशः **प्रज्ञप्तः, तद्यथा-नानामणिमयाः प्रतिपादा**[२]-मूलपादानां प्रतिविशिष्टोपष्टम्भकरणाय पादाः प्रतिपादाः, **सौवर्णिकाः**-सुवर्णमयाः **पादाः**-मूलपादाः, **नानामणिमयानि पादशीर्षकाणि, जाम्बूनदमयानि गात्राणि**-ईषाऽऽदीनि[३], **वज्रमया**-वज्ररत्नापूरिताः **सन्धयः, 'नानामणिमये विच्चे'** इति नानामणिमयं व्यूतं[४]-विशिष्टवानं, **रजतमयी तूली, लोहिताक्षमयाणि 'बिब्बोयणा'** इति उपधानकानि, आह च[५] जीवाभिगममूलटीकाकारः-"बिब्बोयणा-उपधानकान्युच्यन्ते" इति, **तपनीयमय्यो गण्डोपधानिकाः, 'से णं देवसयणिज्जे'** इत्यादि, तद् देवशयनीयं **सालिङ्गनवर्त्तिकं**-सह आलिङ्गनवर्त्त्या-शरीरप्रमाणेनोपधानेन यत् तत्तथा, **'उभओबिब्बोयणे'** इति उभयतः-उभौ-शिरोऽन्त-पादान्तावाश्रित्य बिब्बोयणम्-उपधानं यत्र तत् उभयतोबिब्बोयणं, **'दुहतो उन्नते'** इति उभयत उन्नतं, **'मज्झे णयगंभीरे'** मध्ये नतं च तत् निम्नत्वात् गम्भीरं च-महत्त्वान्नत-गम्भीरं गङ्गापुलिनवालुकाया अवदालो-विदलनं पादादिन्यासे अधोगमनमिति भावः, तेन **'सालिसए'** इति सदृशकं **गङ्गापुलिनवालुकावदालसदृशकं,** दृश्यते चायं प्रकारो हंसतूल्यादिष्विति, तथा **'ओयविय'** इति विशिष्टं परिकर्मितं क्षौमं-कार्पासिकं, दुकूलं-वस्त्रं, तदेव पट्टः **उपचियक्षौमदुकूलपट्टः,** स **प्रतिच्छदनम्**-आच्छादनं यस्य तत्तथा, **'आईणग-रूय-बूर-नवणीय-तूलफासे'** इति प्राग्वत्, **'रत्तंसुयसंवुए'** इति रक्तांशुकेन संवृतं रक्तांशुकसंवृतम् अत एव **सुरम्यं 'पासादीये'** इत्यादिपदचतुष्टयं प्राग्वद्[६] ॥ २४५ ॥

सूत्र-२४६ : तस्स णं देवसयणिज्जस्स उत्तरपुरत्थिमेणं महेगा मणिपेढिया पण्णत्ता–अट्ठ जोयणाइं आयामविक्खंभेणं, चत्तारि जोयणाइं बाहल्लेणं, सव्वमणिमई अच्छा जाव पडिरूवा ॥ २४६ ॥

१. पडिच्छा० मु. G। अत्र वृत्तौ 'प्रतिच्छदनं' विद्यते, किन्तु ३७ सूत्रे 'प्रतिच्छादनम्' अस्ति। २. "भाषायां पडवाया"- इति G पृ. २२६ टिप्पने ॥ ३. "भाषायाम् ईषा-ईंस-खाटलानि ईंस इति प्रसिद्धम्"-इति G पृ. २२६ टिप्पणे ॥ ४. "वेच्चं व्यूतं वानम् इत्यर्थः" जीवा. वृ. प्र. पृ. २१० पं. ६ ॥ 'वान' शब्दस्य पर्यायः भाषायाम् 'वाण' खाटलानुं वाण" इति G पृ. २२६ टि. ॥ ५. तुला - जीवा. वृ. पृ. २३१ पं. १४ ॥ ६. द्र. सू. ३१ ॥

[२४६] **'तस्स ण'**मित्यादि, **तस्य देवशयनीयस्य उत्तरपूर्वस्यां** दिशि अत्र **महत्येका मणिपीठिका** प्रज्ञप्ता, सा च **अष्टौ योजनान्यायाम-विष्कम्भाभ्यां, चत्वारि योजनानि बाहल्यतः, 'सव्वमणिमयी'** इत्यादि प्राग्वत् ॥ २४६ ॥

सूत्र-२४७ : तीसे णं मणिपेढियाए उवरिं, एत्थ [1]णं खुड्डए महिंदज्झए पण्णत्ते–सट्ठिं जोयणाइं उड्ढं उच्चत्तेणं, जोयणं ([2]अद्धकोसं) उव्वेहेणं, [3]अद्धकोसं विक्खंभेणं, वइरामयवट्टलट्ठसंठियसुसिलिट्ठ० [4]जाव पडिरूवे ॥ २४७ ॥

सूत्र-२४८ : तस्स णं खुड्डामहिंदज्झयस्स उवरिं अट्ठ मंगलगा झया छत्तातिच्छत्ता ॥ २४८ ॥

[२४७-२४८] **तस्याश्च मणिपीठिकाया उपरि क्षुल्लको महेन्द्रध्वजः प्रज्ञप्तः,** तस्य प्रमाणं वर्णकश्च महेन्द्रध्वजवद्वक्तव्यम् ॥ २४७-२४८ ॥

सूत्र-२४९ : तस्स णं खुड्डामहिंदज्झयस्स पच्चत्थिमेणं एत्थ णं सूरियाभस्स देवस्स महं एगे चोप्पाले नाम पहरणकोसे पण्णत्ते–सव्ववइरामए अच्छे जाव पडिरूवे । तत्थ णं सूरियाभस्स देवस्स फलिहरयण-खग्ग-गया-धणुप्पमुहा बहवे पहरणरयणा संनिखित्ता चिट्ठंति–उज्जला निसिया सुतिक्खधारा पासादीया दरिसणिज्जा अभिरूवा पडिरूवा ॥ २४९ ॥

[२४९] **'तस्स ण'**मित्यादि, तस्य **क्षुल्लकमहेन्द्रध्वजस्य पश्चिमायामत्र सूर्याभस्य देवस्य महानेकः चोप्पालो नाम प्रहरणकोशः**-प्रहरणस्थानं प्रज्ञप्तं, किंविशिष्ट ? इत्याह-**'सव्ववइरामए अच्छे जाव पडिरूवे'** इति प्राग्वद्, **'तत्थ ण'**मित्यादि, तत्र चोप्पालकाभिधाने प्रहरणकोशे **बहूनि परिघरत्न-खड्ग-गदा-धनुःप्रमुखादीनि प्रहरणरत्नानि सन्निक्षिप्तानि तिष्ठन्ति,** कथंभूतानि ? इत्यत आह-**उज्ज्वलानि**-निर्मलानि, **निशितानि**-अतितेजितानि, अत एव **तीक्ष्णधाराणि, प्रासादीयानी**त्यादि प्राग्वत् ॥ २४९ ॥

---

१. णं महेगे खुड्डए - G । णं महेगे खुड्डे - K ॥ २. "२३१ सूत्रे 'अद्धकोसं' पाठो विद्यते, अत्र तु सर्वासु प्रतिषु 'जोयणं' पाठो लभ्यते । वृत्त्यनुसारेणापि 'अद्धकोसं' पाठो युज्यते, यथा–'तस्य प्रमाणं वर्णकश्च महेन्द्रध्वजवद् वक्तव्यम्" । इति V पृ. १३५ टि. २ ॥ ३. जोयणं - G। ४. द्र. सू. ५२ ॥

सूत्र-२५० : सभाए णं सुहम्माए उवरिं अट्ठट्ठ मंगलगा झया छत्तातिच्छत्ता ॥ २५० ॥

[२५०] तस्याश्च **सभायाः सुधर्माया उपरि** बहूनि **अष्टावष्टौ मङ्गलकानी**त्यादि सर्वं प्राग्वद्वक्तव्यम् ॥ २५० ॥

सूत्र-२५१ : सभाए णं सुहम्माए उत्तरपुरत्थिमेणं, एत्थ णं महेगे सिद्धायतणे पण्णत्ते–एगं जोयणसयं आयामेणं, पन्नासं जोयणाइं विक्खंभेणं, बावत्तरिं जोयणाइं उड्ढं उच्चत्तेणं, सभागमएणं जाव[1] गोमाणसियाओ, भूमिभागा उल्लोया तहेव[2] ॥ २५१ ॥

[२५१] '**सभाए ण**'मित्यादि, **सभायाः सुधर्मायाः** '**उत्तरपुरत्थिमेण**'मिति उत्तरपूर्वस्यां दिशि **महदेकं सिद्धायतनं प्रज्ञप्तम्, एकं योजनशतमायामतः, पञ्चाशत् विष्कम्भतो द्वासप्ततियोजनान्यूर्ध्वमुच्चैस्त्वेने**त्यादि सर्वं सुधर्मावत् वक्तव्यं यावद् गोमानसीवक्तव्यता, तथा चाह-'**सभागमएणं जाव गोमाणसियाओ**' इति, किमुक्तं भवति ? - यथा सुधर्मायाः सभायाः पूर्वदक्षिणोत्तरवर्त्तीनि त्रीणि द्वाराणि, तेषां च द्वाराणां पुरतो मुखमण्डपाः, तेषां च मुखमण्डपानां पुरतः प्रेक्षागृहमण्डपाः, तेषां च प्रेक्षागृहमण्डपानां पुरतश्चैत्यस्तूपाः सप्रतिमाः, तेषां च चैत्यस्तूपानां पुरतः चैत्यवृक्षाः, तेषां च चैत्यवृक्षाणां पुरतो महेन्द्रध्वजाः, तेषामपि पुरतो नन्दापुष्करिण्यस्तदनन्तरं गुलिका गोमानस्यश्चोक्ताः, तथाऽत्रापि सर्वमनेनैव क्रमेण निरवशेषं वक्तव्यम्, उल्लोकवर्णनं भूमिभागवर्णनं च प्राग्वत् ॥ २५१ ॥

सूत्र-२५२ : तस्स णं सिद्धायतणस्स बहुमज्झदेसभाए एत्थ णं महेगा मणिपेढिया पण्णत्ता–सोलस जोयणाइं आयाम-विक्खंभेणं, अट्ठ जोयणाइं बाहल्लेणं[3] ॥ २५२ ॥

[२५२] '**तस्स ण**'मित्यादि, **तस्य सिद्धायतनस्याऽन्तर्बहुमध्यदेशभागेऽत्र महत्येका मणिपीठिका प्रज्ञप्ता,** सा **षोडश योजनान्यायाम-विष्कम्भाभ्यामष्टौ योजनानि बाहल्यतः,** '[4]सव्वमणिमयी' इत्यादि प्राग्वत् ॥ २५२ ॥

---

१. द्र. सू० २०९-२३६ । २. द्र. सू० २४-३४ । ३. द्र. सू० २३८ । ४. "नैतद् पदं मूलपाठे" G पृ. २२९ टि. ॥

सूत्र-२५३ : तीसे णं मणिपेढियाए उवरिं एत्थ णं महेगे देवच्छंदए पण्णत्ते–सोलस जोयणाइं आयाम-विक्खंभेणं, साइरेगाइं सोलस जोयणाइं उड्ढं उच्चत्तेणं, सव्वरयणामए अच्छे जाव पडिरूवे ॥ २५३ ॥

[२५३] 'तीसे ण'मित्यादि, तस्याश्च मणिपीठिकाया उपरि अत्र महानेको देवच्छन्दकः प्रज्ञप्तः, स च षोडश योजनान्यायाम-विष्कम्भाभ्यां, सातिरेकाणि षोडश योजनान्यूर्ध्वमुच्चैस्त्वेन, 'सव्वरयणामए' इत्यादि प्राग्वत् ॥ २५३ ॥

सूत्र-२५४ : तत्थ णं अट्ठसयं जिणपडिमाणं जिणुस्सेहप्पमाणमित्ताणं संनिखित्तं संचिट्ठति । तासि णं जिणपडिमाणं इमेयारूवे वण्णावासे पण्णत्ते, तं जहा–तवणिज्जमया हत्थतलपायतला, अंकामयाइं नक्खाइं अंतोलोहियक्खपडिसेगाइं[1], कणगामईओ जंघाओ, कणगामया जाणू, कणगामया ऊरू, कणगामईओ गायलट्ठीओ, तवणिज्जमईओ नाभीओ, रिट्ठामईओ रोमराईओ, तवणिज्जमया चूचुया, तवणिज्जमया सिरिवच्छ[2], सिलप्पवालमया ओट्ठा, फालियामया दंता, तवणिज्जमईओ जीहायो, तवणिज्जमया तालुया, कणगामईओ नासिगाओ अंतोलोहियक्खपडिसेगाओ, अंकामयाणि अच्छीणि अंतोलोहियक्खपडिसेगाणि, रिट्ठामईओ ताराओ, रिट्ठामयाणि अच्छिपत्ताणि, रिट्ठामईओ भमुहाओ, [कणगामया कवोला,] कणगामया सवणा, कणगामईओ णिडालपट्टियाओ, वइरामईओ सीसघडीओ, तवणिज्जमईओ केसंतकेसभूमीओ, रिट्ठामया उवरि मुद्धया ॥ २५४ ॥

[२५४] तत्र च देवच्छन्दके अष्टशतम्-अष्टाधिकं शतं जिनप्रतिमानां जिनोत्सेध-प्रमाणमात्राणां, पञ्चधनुःशतप्रमाणानामिति भावः, सन्निक्षिप्तं तिष्ठति । 'तासि णं

१. "अतः परं जीवाजीवाभिगमे (३।४१५) पृ. २२२ पं. ९ अत्र एष पाठो विद्यते–'कणगामया पादा, कणगामया गोप्फा' । आनखशिखवर्णने एष उपयुक्तोऽस्ति ।" इति V पृ. १३५ टि. ७ ॥ २. "अतः परं जीवाजीवाभिगमे (३।४१५) अत्र एष पाठो विद्यते–'कणगमईओ बाहाओ, कणगमईओ पासाओ, कणगमईओ गीवाओ, रिट्ठामए मंसू ।"इति V पृ.१३६ टि. २ ॥

जिणपडिमाण'मित्यादि, तासां जिनप्रतिमानां**मयमेतद्रूपो 'वर्णावासो'** वर्णकनिवेशः **प्रज्ञप्तः, तपनीयमयानि हस्ततल-पादतलानि, अङ्करत्नमया अन्तः**-मध्ये **लोहिताक्षरत्न-प्रतिसेका नखाः, कनकमय्यो जङ्घाः, कनकमयानि जानूनि, कनकमया ऊरवः, कनकमय्यो गात्रयष्टयः, तपनीयमय्यो नाभयः, रिष्टमय्यो रोमराजयः, तपनीयमयाः चुचुकाः**-स्तनाग्रभागाः, **तपनीयमयाः श्रीवृक्षाः (श्रीवत्साः), शिलाप्रवालमया**-विद्रुममया **ओष्ठाः, स्फटिकमया दन्ताः, तपनीयमय्यो जिह्वाः, तपनीयमयानि तालुकानि, कनकमय्यो नासिकाः अन्तर्लोहिताक्षप्रतिसेकाः, अङ्कमयान्यक्षीणि अन्तर्लोहिताक्ष[१]प्रति-सेकानि, रिष्ठरत्नमयानि अक्षिपत्राणि, रिष्ट[२]रत्नमय्यो भ्रुवः, कनकमयाः कपोलाः, कनकमयाः श्रवणाः, कनकमय्यो ललाटपट्टिकाः, वज्रमय्यः शीर्षघटिकाः, तपनीयमय्यः केशान्तकेशभूमयः**, केशान्तभूमयः केशभूमयश्चेति भावः, **रिष्ठमया उपरि मूर्द्धजाः**-केशाः ॥ २५४ ॥

सूत्र-२५५ : तासि णं जिणपडिमाणं पिट्ठतो पत्तेयं-पत्तेयं छत्तधारग-पडिमाओ पण्णत्ताओ । ताओ णं छत्तधारगपडिमाओ हिमरययकुंदेंदुप्पगा-साइं सकोरंटमल्लदामधवलाइं आयवत्ताइं सलीलं [३]धारेमाणीओ-धारेमाणीओ चिट्ठंति ॥ २५५ ॥

[२५५] **तासां जिनप्रतिमानां पृष्ठतः** एकैका [४]**छत्रधारप्रतिमा हिमरजतकुन्देन्दुप्रकाशं सकोरण्टमाल्यदामधवलमातपत्रं** गृहीत्वा **सलीलं धरन्ती तिष्ठति** ॥ २५५ ॥

सूत्र-२५६ : तासि णं जिणपडिमाणं उभओ पासे [५]पत्तेयं पत्तेयं (दो दो) चामरधारपडिमाओ पण्णत्ताओ । ताओ णं चामरधारपडिमाओ चंदप्पह-वइर-वेरुलिय-[६]नानामणिरयणखचियचित्तदंडाओ सुहुमरययदीहवालाओ संखंककुंददगरयअमयमहियफेणपुंजसन्निगासाओ [धवलाओ चामराओ]

---

१. प्रसे० JKE । २. °रत्न° JKE नास्ति ॥ ३. उधारेमाणीओ-उधारेमाणीओ K (क, ख, ग, घ, च) । ४. छत्रधराणां प्रतिमा - G ॥ ५. "पत्तेयं पत्तेयं GK (क, ख, ग, घ, च, छ); 'दो दो' वृत्त्याधारेण स्वीकृतः । पूर्ववर्ती 'पत्तेयं पत्तेयं' इति पाठस्य 'एकैका' इति व्याख्यातमस्ति । अत्र प्रत्येकम् उभयोः पार्श्वयोः 'द्वे द्वे' इति व्याख्यातमस्ति, अनेन 'दो दो' इति पाठः सङ्गच्छते । द्रष्टव्यम्-जीवाजीवाभिगमस्य ३।४१७ सूत्रस्य पादटिप्पणम् ।" इति V पृ. १३६ टि. ९ ॥ ६. णाणामणिकणगरयणविमलमहरिह(जाव सलीलं -K) तवणिज्जुज्जलविचित्तदंडाओ चिल्लियाओ (क, ख, ग, घ, च, छ) ।

गहाय [१]सलीलं धारेमाणीओ (वीजेमाणीओ) [सव्वरयणामईओ अच्छाओ जाव पडिरूवाओ] चिट्ठंति ॥ २५६ ॥

[२५६] तथा **तासां जिनप्रतिमानां** प्रत्येक**मुभयोः पार्श्वयोर्द्वे द्वे चामरधरे प्रतिमे प्रज्ञप्ते,** ते च **'चंदप्पभ-वयर-वेरुलिय-नानामणिरयणखचियचित्तदंडाओ'** इति चन्द्रप्रभः-चन्द्रकान्तो वज्रं वैडूर्यं च प्रतीतं, चन्द्रप्रभ-वज्र-वैडूर्याणि शेषाणि च नानामणिरत्नानि खचितानि येषु दण्डेषु ते तथा, एवंरूपाश्चित्रा-नाना[२]प्रकारा दण्डा येषां तानि तथा, सूत्रे स्त्रीत्वं प्राकृतत्वात्, **'सुहुमरययदीहवालाओ'** इति सूक्ष्मा रजतमया दीर्घा वाला येषां तानि तथा, **'संखंककुंददगरयअमयमहियफेणपुंजसन्निकासाओ धवलाओ'** इति प्रतीतं, **चामराणि गृहीत्वा सलीलं वीजयन्त्यस्तिष्ठन्ति,** ताश्च **'सव्वरयणामईओ अच्छाओ'** इत्यादि प्राग्वत् ॥ २५६ ॥

सूत्र-२५७ : तासि णं जिणपडिमाणं पुरतो दो दो नागपडिमाओ जक्खपडिमाओ भूयपडिमाओ कुंडधारपडिमाओ संनिखित्ताओ चिट्ठंति– सव्वरयणामईओ अच्छाओ जाव पडिरूवाओ ॥ २५७ ॥

[२५७]'**तासि ण**'मित्यादि, **तासां जिनप्रतिमानां पुरतो द्वे द्वे नागप्रतिमे द्वे द्वे यक्षप्रतिमे द्वे द्वे भूतप्रतिमे द्वे द्वे कुण्डधारप्रतिमे सन्निक्षिप्ते तिष्ठतः** ॥ २५७ ॥

सूत्र-२५८ : [३]तत्थ णं देवच्छंदए जिणपडिमाणं पुरतो अट्ठसयं घंटाणं, अट्ठसयं वंदणकलसाणं, अट्ठसयं भिंगाराणं एवं–आयंसाणं, थालाणं, पाईणं, सुपइट्ठाणं, मणोगुलियाणं, वायकरगाणं, चित्ताणं रयणकरंडगाणं, हयकंठाणं [४]जाव उसभकंठाणं, पुप्फचंगेरीणं जाव लोमहत्थचंगेरीणं, पुप्फपडलगाणं जाव लोमहत्थपडलगाणं, सीहासणाणं, छत्ताणं, चामराणं, तेल्लसमुग्गाणं जाव अंजणसमुग्गाणं, अट्ठसयं झयाणं, अट्ठसयं धूवकडुच्छुयाणं संनिखित्तं चिट्ठति ॥ २५८ ॥

---

१. "सलीलं उधारेमाणीतो २ K (क, ख, ग, घ); सलीलं धारेमाणीओ २ G(च, छ) । स्वीकृतपाठः वृत्त्यनुसारी वर्तते । जीवाजीवाभिगम (३।४१७) सूत्रेपि एष एव पाठः स्वीकृतोऽस्ति ।" इति V पृ. १३६ टि. १४ ॥ २. °प्र° JKE नास्ति ॥ ३. तासि णं जिण० GK मु. (क, ख, ग, घ, च, छ) । ४. द्र. सू. १५५-१५६ ॥

[२५८] **तस्मिँश्च देवच्छन्दके** तासां **जिनप्रतिमानां पुरतः अष्टशतं घण्टानामष्टशतं वन्दनकलशानां**मष्टशतं मङ्गलकलशानां[१]**मष्टशतं भृङ्गाराणां**मष्टशत**मादर्शानां**मष्टशतं **स्थाला-नां**मष्टशतं **पात्रीणां**मष्टशतं **सुप्रतिष्ठा**नामष्टशतं **मनोगुलिकानां**-पीठिकाविशेषाणामष्टशतं **वातकरकाणां**मष्टशतं **चित्राणां रत्नकरण्डकाना**मष्टशतं **हयकण्ठाना**मष्टशतं गजकण्ठानाम्, अष्टशतं नरकण्ठानामष्टशतं किन्नरकण्ठानामष्टशतं किंपुरुषकण्ठानामष्टशतं महोरगकण्ठानामष्टशतं **वृषभकण्ठानामष्टशतं पुष्पचङ्गेरीणा**मष्टशतं माल्यचङ्गेरीणां, मुकुलानि[२]-पुष्पाणि, ग्रथितानि माल्यानि, अष्टशतं चूर्णचङ्गेरीणामष्टशतं गन्धचङ्गेरीणामष्टशतं वस्त्रचङ्गेरीणामष्टशतमाभरण-चङ्गेरीणामष्टशतं सिद्धार्थकचङ्गेरीणामष्टशतं **लोमहस्तकचङ्गेरीणाम्**, लोमहस्तकं च मयूरपुच्छपुञ्जनिका, अष्टशतं **पुष्पपटलकाना**मेवं माल्य-चूर्ण-गन्ध-वस्त्रा-ऽऽभरण-सिद्धार्थक-**लोमहस्तक**पटलकानामपि प्रत्येकं प्रत्येकमष्टशतं वक्तव्यम्, अष्टशतं **सिंहासनाना**मष्टशतं **छत्राणा**मष्टशतं **चामराणा**मष्टशतं **तैलसमुद्गकाना**मष्टशतं कोष्ठसमुद्गकानामष्टशतं पत्रसमुद्गका-नामष्टशतं चोयकसमुद्गकानामष्टशतं तगरसमुद्गकानामष्टशतमेलासमुद्गकानामष्टशतं हरिताल-समुद्गकानामष्टशतं हिङ्गुलकसमुद्गकानामष्टशतं मनःशिलासमुद्गकानामष्टशत**मञ्जन-समुद्गकानां**, सर्वाण्यपि अमूनि तैलादीनि परमसुरभिगन्धोपेतानि, **अष्टशतं ध्वजानाम्**, अत्र **सङ्ग्रहणिगाथा**-

"वंदणकलसा भिंगारगा य आयंसया य थाला य । पातीई सुपइट्ठा मणगुलिका वायकरगा य ॥ १ ॥
चित्ता रयणकरंडा हय-गय-नरकंठगा य चंगेरी । पडलग-सीहासण-छत्त-चामरा समुग्गक-झया य ॥ २ ॥"

अष्टशतं धूपकडुच्छुकानां[३] **संनिक्षिप्तं तिष्ठति** ॥ २५८ ॥

सूत्र-२५९ : तस्स णं सिद्धायतणस्स उवरिं अट्ठट्ठमंगलगा झया छत्तातिच्छत्ता ॥ २५९ ॥

[२५९] **तस्य च सिद्धायतनस्य उपरि अष्टावष्टौ मङ्गलकानि ध्वज-च्छत्रातिच्छत्रादीनि** तु प्राग्वत् ॥ २५९ ॥

सूत्र-२६० : तस्स णं सिद्धायतणस्स उत्तरपुरत्थिमेणं, एत्थ णं महेगा उववायसभा पण्णत्ता । जहा सभाए सुहम्माए तहेव जाव [उल्लोओ य ।] मणिपेढिया ॥ २६० ॥[४]

---

१. मङ्गलकलशानामष्टशतं - JKE G जीवा.टी. ४१९ नास्ति । मु. भा. २ अस्ति ॥ २. मुत्कलानि-जीवा. ४१९ वृत्तौ ॥ ३. °कडुच्छ° JKE पा.४ ।० कडुछा० भा.१ । "भाषायाम् 'कडछो 'कडछी' - इति G पृ. २३४ टि. ॥ ४. द्र. सू० २०९-२३७

[२६०] **तस्य च सिद्धायतनस्य उत्तरपूर्वस्यामत्र महत्येका उपपातसभा प्रज्ञप्ता,** तस्याश्च सुधर्मागमेन स्वरूपवर्णन-पूर्वादिद्वारत्रयवर्णन-मुखमण्डप-प्रेक्षागृहमण्डपादिवर्णनादि-प्रकाररूपेण तावद्वक्तव्यं यावदुल्लोकवर्णनम् ॥ २६० ॥

सूत्र-२६१ : ['तीसे णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभागे, एत्थ णं महेगा मणिपेढिया पण्णत्ता']–अट्ठजोयणाइं, देवसयणिज्जं तहेव [1]सयणिज्जवण्णओ । [2]अट्ठट्ठ मंगलगा झया छत्तातिछत्ता ॥ २६१ ॥

[२६१] **तस्याश्च बहुसमरमणीयभूमिभागस्य बहुमध्यदेशभागेऽत्र महत्येका मणिपीठिका प्रज्ञप्ता,** सा **चाष्टौ योजनान्यायाम-विष्कम्भाभ्यां,** चत्वारि योजनानि बाहल्येन 'सव्वमणिमयी' इत्यादि प्राग्वत्, तस्याश्च मणिपीठिकाया उपरि अत्र महदेकं **देवशयनीयं** प्रज्ञप्तं, तस्य स्वरूपं यथा सुधर्मायां सभायां देवशयनीयस्य । तस्या अप्युपपातसभाया उपरि **अष्टाष्टमङ्गलकादीनि** प्राग्वत् ॥ २६१ ॥

सूत्र-२६२ : तीसे णं उववायसभाए उत्तरपुरत्थिमेणं एत्थ णं महेगे हरए पण्णत्ते–एगं जोयणसयं आयामेणं, पण्णासं जोयणाइं विक्खंभेणं, दस जोयणाइं उव्वेहेणं [3]तहेव ॥ २६२ ॥

[२६२] **'तीसे ण'**मित्यादि, **तस्या उपपातसभाया उत्तरपूर्वस्यां** दिशि **महानेको ह्रदः प्रज्ञप्तः,** स **चैकं योजनशतमायामतः, पञ्चाशत् योजनानि विष्कम्भतः, दश योजनान्युद्वेधेन,** [4]'अच्छे रययामयकूले' इत्यादि [5]नन्दापुष्करिण्या इव वर्णनं निरवशेषं वक्तव्यम् ॥ २६२ ॥

सूत्र-२६३ : से णं हरए एगाए पउमवरवेइयाए एगेण वणसंडेण सव्वओ समंता संपरिक्खित्ते । [पउमवरवेइया [6]वणसंडवण्णओ] ॥ २६३ ॥

[२६३] **'से ण'**मित्यादि, **स ह्रद एकया पद्मवरवेदिकया एकेन च वनखण्डेन सर्वतः समन्तात् संपरिक्षिप्तः, पद्मवरवेदिका**वर्णनं **वनखण्डवर्णनं** च प्राग्वत् ॥ २६३ ॥

---

१. द्र. सू० २४५ । २. अत्र प्रारम्भे 'उववायसभाए णं उवरिं' इति वाक्यशेषः इति V पृ. १३७ टि. १२ । ३. द्र. सू० २३३ । ४. अच्छे सण्हे र°-JKE जीवा. टी. ४२४ ॥ ५. द्र. सू. १७४ । ६. द्र. सू० १७०-२०१ ।

सूत्र-२६४ : तस्स णं हरयस्स तिदिसं तिसोवाणपडिरूवगा पण्णत्ता[१] ॥ २६४ ॥

[२६४] **तस्य ह्रदस्य त्रिदिशि**-तिसृषु दिक्षु **त्रिसोपानप्रतिरूपकाणि प्रज्ञप्तानि,** तेषां च त्रिसोपानप्रतिरूपकाणां तोरणानां च वर्णनं प्राग्वत् ॥ २६४ ॥

सूत्र-२६५ : तस्स णं हरयस्स उत्तरपुरत्थिमेणं, एत्थ णं महेगा अभिसेगसभा पण्णत्ता । सुहम्मागमएणं[२] जाव गोमाणसियाओ । मणिपेढिया[३] सीहासणं स[४](अ)परिवारं[५] जाव दामा चिट्ठंति ॥ २६५ ॥

[२६५] **तस्य च ह्रदस्य उत्तरपूर्वस्यां** दिशि **अत्र महत्येका अभिषेकसभा प्रज्ञप्ता,** सा च **सुधर्मासभावत्** प्रमाण-स्वरूप-द्वारत्रय-मुखमण्डपादिप्रकारेण तावद्वक्तव्या **यावत् गोमानसी**वक्तव्यता, तदनन्तरं तथैव उल्लोकवर्णनं भूमिभागवर्णनं च तावद् यावन्मणीनां स्पर्शः, तस्या अभिषेकसभाया बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे महत्येका मणिपीठिका प्रज्ञप्ता,साऽप्यष्टौ योजनान्यायाम-विष्कम्भाभ्यां, चत्वारि योजनानि बाहल्यतः **'सव्वरयणामयी'** इत्यादि प्राग्वत्, तस्या मणिपीठिकाया उपरि अत्र महदेकं सिंहासनं, सिंहासनवर्णकः प्राग्वत्, नवरमत्र परिवारभूतानि भद्रासनानि च(न) वक्तव्यानि ॥ २६५ ॥

सूत्र-२६६ : तत्थ णं सूरियाभस्स देवस्स सुबहु अभिसेयभंडे संनिखित्ते चिट्ठइ । अट्ठट्ठ[६] मंगलगा तहेव[७] ॥ २६६ ॥

---

१. द्र. सू० २३४ । २. द्र. सू० २०९-२३७ । ३. द्र. सू. २६१ । ४. सपरिवारं (क, ख, ग, घ, च, छ)G । परिवारं - K। २६५, २६७, २६९ एषु त्रिष्वपि सूत्रेषु 'सीहासणं अपरिवारं' इति पाठो युज्यते, यद्यपि आदर्शेषु तथा पंडितबेचरदास-संपादितवृत्तौ 'सीहासणं सपरिवारं' पाठो लभ्यते, किन्तु २६५ सूत्रे 'जाव दामा' इति समर्पणवाक्येन 'सीहासणं अपरिवारं' अस्यैव पाठस्य पुष्टिर्जायते । वृत्तिकृता अपरिवारं सिहासनं व्याख्यातम्, किन्तु लिपिदोषेण मुद्रणदोषेण वा अपरिवारस्य स्थाने सपरिवारं जातम् । जीवाजीवाभिगमवृत्त्यवलोकनेन एतत् स्पष्टं भवति ।

जीवाजीवाभिगमवृत्ति (पत्र २३६) "सिंहासनवर्णकः प्राग्वत्, नवरमत्र परिवारभूतानि भद्रासनानि न वक्तव्यानि ।

तस्याश्चाभिषेकसभाया उत्तरपूर्वस्यां दिशि अत्र महत्येकालंकारसभा प्रज्ञप्ता, सा च प्रमाणस्वरूपद्वार-त्रयमुखमण्डपप्रेक्षागृहमण्डपादिवर्णनप्रकारेणाभिषेकसभावत्तावद्वक्तव्या यावदपरिवारं सिंहासनम् ।"

वृत्त्यनुसारेण अलंकारसभायाः व्यवसायसभायाश्च अभिषेकसभावत् वर्णनमस्ति, तेनानयोरपि सूत्रयोरपरिवारं सिंहासनं युज्यते ।

जीवाजीवाभिगमवृत्तेः सन्दर्भे तथा प्रस्तुतसूत्रस्य वृत्तेर्हार्दैन मुद्रितपाठोऽशुद्धः प्रतीयते । तेनास्माभिः 'अपरिवारं' इति पाठः स्वीकृतः ।" इति V पृ. १३८ टि. ५ ॥ ५. द्र० सू० ३७-४० । ६. "अत्र प्रारम्भे 'अभिसेयसभाए णं उवरिं' इति वाक्यशेषः ।" इति V पृ. १३९ टि. २ ॥ ७. द्र. सू० २१-२३ ।

[२६६] **तस्मिँश्च** सिंहासने **सूर्याभस्य देवस्य सुबहु अभिषेकभाण्डम्**-अभिषेकयोग्य उपस्करः **सन्निक्षिप्तः तिष्ठति, 'तीसे णं अभिसेयसभाए अट्ठट्ठमंगलका'** इत्यादि प्राग्वत् ॥ २६६ ॥

सूत्र-२६७ : तीसे णं अभिसेगसभाए उत्तरपुरत्थिमेणं एत्थ णं महेगा अलंकारियसभा पण्णत्ता । जहा[1] सभा सुधम्मा मणिपेढिया अट्ठ जोयणाइं[2] सीहासणं अपरिवारं[3] ॥ २६७ ॥

[२६७] **तस्याश्च अभिषेकसभाया उत्तरपूर्वस्यां** दिशि **अत्र महत्येका अलङ्कारसभा प्रज्ञप्ता,** सा चाभिषेकसभावत् प्रमाण-स्वरूप-द्वारत्रय-मुखमण्डप-प्रेक्षागृहमण्डपादिवर्णन-प्रकारेण तावद्वक्तव्या यावद् परिवारसिंहासनम् ॥ २६७ ॥

सूत्र-२६८ : तत्थ णं सूरियाभस्स देवस्स सुबहु अलंकारियभंडे संनिखित्ते चिट्ठति । सेसं तहेव ॥ २६८ ॥

[२६८] **तत्र सूर्याभस्य देवस्य** आलङ्कारिकं-**अलङ्कारयोग्यं भाण्डं संनिक्षिप्त**मस्ति, **शेषं** प्राग्वत् ॥ २६८ ॥

सूत्र-२६९ : तीसे णं अलंकारियसभाए उत्तरपुरत्थिमेणं, एत्थ णं महेगा ववसायसभा पण्णत्ता । जहा उववायसभा जाव मणिपेढिया सीहासणं स(अ)परिवारं[4] अट्ठट्ठ[5] मंगलगा ॥ २६९ ॥

[२६९] **तस्याश्च अलङ्कारसभाया उत्तरपूर्वस्यां** दिशि **अत्र महत्येका व्यवसायसभा प्रज्ञप्ता,** सा च अभिषेकसभावत्[6] प्रमाण-स्वरूप-द्वारत्रय-मुखमण्डपादिवर्णनप्रकारेण तावद्वक्तव्या यावत् सिंहासनं सपरिवारम् ॥ २६९ ॥

सूत्र-२७० : तत्थ णं सूरियाभस्स देवस्स एत्थ णं महेगे पोत्थयरयणे सन्निखित्ते चिट्ठइ । तस्स णं पोत्थयरयणस्स इमेयारूवे वण्णावासे पण्णत्ते,

---

१. द्र. सू० २०९-२३७ । २. द्र. सू० २६१ । ३. सपरिवारं (क, ख, ग, घ, च, छ) GK; द्रष्टव्यं २६५ सूत्रस्य पादटिप्पणम् । द्र. सू० ३७-४० । ४. भा. १ । सपरिवारं (क, ख, ग, घ, च, छ) K; द्रष्टव्यं २६५ सूत्रस्य पादटिप्पणम् । द्र० सू० ३७-४० । ५. "अत्र प्रारम्भे 'ववसायसभाए णं उवरिं' इति वाक्यशेषः । राय० सू० २१-२३ ।" इति V पृ. १३९ टि. १२ ॥ ६. 'मूले तु जहा उववायसभा' इत्युक्तम् । जीवा. पृ. २३५ पं. ८ ववसातसभा पण्णत्ता अभिसेयसभावत्तव्वया जाव सीहासणं अपरिवारं इत्यादि.' इति G पृ. २३६-७ टिप्पणे ॥

तं जहा–रिट्ठामईओ[१] कंबिआओ, तवणिज्जमए[२] दोरे, नाणामणिमए गंठी, [अंकमयाइं पत्ताइं,] वेरुलियमए[३] लिप्पासणे, तवणिज्जमई[४] संकला, रिट्ठामए छादणे, रिट्ठामई मसी, वइरामई लेहणी, रिट्ठामयाइं अक्खराइं, धम्मिए लेक्खे ॥ २७० ॥

सूत्र-२७१ : ववसायसभाए णं उवरिं अट्ठट्ठमंगलगा[५] ॥ २७१ ॥

[२७०-२७१] **तत्र महदेकं पुस्तकरत्नं[६] सन्निक्षिप्तमस्ति, तस्य च पुस्तकरत्नस्य अयमेतद्रूपो 'वर्णावासो'** वर्णकनिवेशः **प्रज्ञप्तः, रिष्टमय्यौ**-रिष्टरत्नमय्यौ कम्बिके[७], पृष्ठके[८] इति भावः, रत्नमयो **दवरको** यत्र पत्राणि प्रोतानि सन्ति, **नानामणिमयो ग्रन्थिः** दवरकस्यादौ येन पत्राणि न निर्गच्छन्ति, **अङ्कमयानि**-अङ्करत्नमयानि पत्राणि, नानामणिमयं **लिप्यासनं**, मषीभाजनमित्यर्थः, **तपनीयमयी शृङ्खला** मषीभाजनसत्का, **रिष्टरत्नमयम्** उपरितनं तस्य **छादनं, रिष्टमयी**-रिष्टरत्नमयी **मषी, वज्रमयी लेखनी, रिष्टमयान्यक्षराणि, धार्मिकं लेख्यं**, क्वचित्-'**धम्मिए**[९] **सत्थे**' इति पाठः, तत्र धार्मिकं शास्त्रमिति व्याख्येयम् ॥ २७०-२७१ ॥

सूत्र-२७२ : तीसे[१०] णं ववसायसभाए उत्तरपुरत्थिमेणं, महेगे बलिपीढे पण्णत्ते–अट्ठ जोयणाइं आयाम-विक्खंभेणं, चत्तारि जोयणाइं बाहल्लेणं, सव्वरयणामए अच्छे जाव पडिरूवे ॥ २७२ ॥

[२७२] **तस्याश्च** उपपातसभाया[११] **उत्तरपूर्वस्यां** दिशि **महदेकं बलिपीठं प्रज्ञप्तं, तच्चाष्टौ योजनानि आयाम-विष्कम्भतः, चत्वारि योजनानि बाहल्यतः, सर्वरत्नमयं 'अच्छे'**[१२] इत्यादि प्राग्वत् ॥ २७२ ॥

---

१. इतः पूर्वं K मध्ये - रयणामयाइं पत्ताइं - इत्यधिकः पाठः । २. "जीवाजीवाभिगमवृत्तौ (पत्र २३७) रजतमयो दवरगः ।" इति V पृ. १३९ टि. १५ ॥ ३. "नाणामणिमए (वृ); जीवाजीवाभिगमवृत्तौ (पत्र २३७) नाणामणिमयं लिप्यासनम् ।" इति V पृ. १३९ टि. १७ ॥ ४. रिट्ठामए छंदणे तवणिज्जामई संकला K (क, ख, ग, घ, च, छ) । ५. द्र. सू० २१-२३ । ६. तुला - जीवाजीवाभिगमे पृ. २३५ पं. ९ ॥ ७. कण्ठिके-पा. ५ भा.१ ॥ ८. प्रष्ठके - भा. २ । "पुष्ठके - जीवाभिगम वृ. पृ. २३७" इति G पृ. २३७ टिप्पणे ॥ ९. धंमि इति पाठः - भा. २ ॥ १०. प्रयुक्तादर्शेषु २७२, २७३ सूत्रयोः क्रमभेदो विद्यते । ११. अत्र मूल-वृत्त्योर्भेदः दृश्यते ॥ १२. GI अच्छमित्यादि - JKE मु. ॥

सूत्र-२७३ : तस्स णं बलिपीठस्स उत्तरपुरत्थिमेणं, एत्थ णं महेगा नंदा पुक्खरिणी पण्णत्ता । हरयसरिसा[1] ॥ २७३ ॥

[२७३] **तस्य च बलिपीठस्य उत्तरपूर्वस्यां** दिशि **अत्र महत्येका नन्दापुष्करिणी प्रज्ञप्ता,** सा च **ह्रदप्रमाणा,** ह्रदस्येव च तस्या अपि त्रिसोपानवर्णनं तोरणवर्णनं च प्राग्वत् ॥ २७३ ॥ 5

तदेवं यत्र यादृग्रूपं च सूर्याभस्य देवस्य विमानं तत्र तादृग्रूपं चोपवर्णितं, सम्प्रति सूर्याभो देव उत्पन्नः सन् यदकरोद्, यथा च तस्याऽभिषेकोऽभवत् तदुपदर्शयति-

[[2]तेणं कालेणं तेणं समएणं सूरियाभे देवे सूरियाभे विमाणे उववातसभाए देवसयणिज्जंसि देवदूसंतरिते अंगुलस्स असंखेज्जतिभागमेत्तीए ओगाहणाए उववण्णे] 10

सूत्र-२७४ : तए णं से सूरियाभे देवे अहुणोववण्णमित्तए चेव समाणे पंचविहाए पज्जत्तीए पज्जत्तिभावं गच्छइ, तं जहा—आहारपज्जत्तीए, सरीरपज्जत्तीए, इंदियपज्जत्तीए, आणपाणपज्जत्तीए, भासमणपज्जत्तीए ॥ २७४ ॥

[२७४] **'तेणं कालेणं तेणं समएण'** मित्यादि, **तस्मिन् काले तस्मिन् समये सूर्याभो** 15 **देवः सूर्याभे विमाने उपपातसभा[3]यां देवशयनीये देवदूष्यान्तरि[4]ते** प्रथमतोऽङ्गुला-**ऽसंख्येयभागमात्र[5]याऽवगाहनया समुत्पन्नः, 'तए ण'**मित्यादि सुगमं, नवरम् इह भाषा-मनःपर्याप्त्योः समाप्तिकालान्तरस्य प्रायः शेषपर्याप्तिसमाप्तिकालान्तरापेक्षया स्तोकत्वादेकत्वेन विवक्षणमिति **'पंचविहाए पज्जत्तीए पज्जत्तीभावं गच्छइ'** इत्युक्तम् ॥ २७४ ॥

सूत्र-२७५ : तए णं तस्स सूरियाभस्स देवस्स पंचविहाए पज्जत्तीए 20 **पज्जत्तिभावं गयस्स समाणस्स इमेयारूवे अज्झत्थिए चिंतिए पत्थिए**

---

१. द्र सू० २६२-२६४ । सू. १९-२० । २. "एतत् कोष्ठकवर्तिसूत्रं आदर्शेषु नोपलभ्यते, वृत्तौ व्याख्यातमस्ति । जीवाजीवाभिगमस्य ३।४३९ सूत्रेणापि अस्य समर्थनं जायते" इति V पृ. १४० टि. ५ ॥ ३. उपपातशय्यायां भा. २ ॥ ४. G । °न्तरे - मु. JK ॥ ५. °भागद्वया अव° - भा. २ ॥

मणोगए संकप्पे समुपज्जित्था–किं मे पुव्विं करणिज्जं ?, किं मे पच्छा करणिज्जं ?, किं मे पुव्विं सेयं ?, किं मे पच्छा सेयं ?, किं मे पुव्विं पि पच्छा वि हियाए सुहाए खमाए णिस्सेयसाए आणुगामियत्ताए भविस्सइ ? ॥ २७५ ॥

[२७५] **'तए ण'**मित्यादि, **ततस्तस्य सूर्याभस्य देवस्य पञ्चविधया पर्याप्त्या पर्याप्तभावमुपगतस्य सतोऽयमेतद्रूपः संकल्पः समुदपद्यत-'अज्झत्थिए'** इत्यादि पदव्याख्यानं पूर्ववत्, **किं 'मे'** मम **पूर्वं करणीयं ?, किं मे पश्चात्करणीयं ?, किं मे पूर्वं** कर्तुं **श्रेयः ?, किं मे पश्चात्** कर्तुं **श्रेयः ?**, तथा **किं मे पूर्वमपि च पश्चादपि च हिताय** भावप्रधानोऽयं निर्देशो हितत्वाय-परिणामसुन्दरतायै, **सुखाय**-शर्मणे, **क्षमाय**-अयमपि भावप्रधानो निर्देशः संगतत्वाय, **निःश्रेयसाय**-निश्चितकल्याणाय, **अनुगामिकतायै**-परम्परशुभानुबन्धसुखाय **भविष्यतीति** ॥ २७५ ॥

सूत्र-२७६ : तए णं तस्स सूरियाभस्स देवस्स सामाणियपरिसोववण्णगा देवा सूरियाभस्स देवस्स इमेयारूवं अज्झत्थियं जाव समुप्पण्णं समभिजाणित्ता जेणेव सूरियाभे देवे तेणेव उवागच्छंति, सूरियाभं देवं करयलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति, वद्धावेत्ता एवं वयासी–एवं खलु देवाणुप्पियाणं सूरियाभे विमाणे सिद्धायतणंसि जिणपडिमाणं जिणुस्सेहपमाणमेत्ताणं अट्ठसयं संनिखित्तं चिट्ठति । सभाए णं सुहम्माए माणवए चेइए खंभे, वइरामएसु गोलवट्टसमुग्गएसु बहूओ जिण-सकहाओ संनिखित्ताओ चिट्ठंति । ताओ णं देवाणुप्पियाणं अण्णेसिं च बहूणं वेमाणियाणं देवाण य देवीण य अच्चणिज्जाओ जाव[1] पज्जुवासणिज्जाओ । तं एयं णं देवाणुप्पियाणं पुव्विं करणिज्जं, तं एयं णं देवाणुप्पियाणं पच्छा करणिज्जं, तं एयं णं देवाणुप्पियाणं पुव्विं सेयं, तं एयं णं देवाणुप्पियाणं पच्छा सेयं, तं एयं णं देवाणुप्पियाणं पुव्विं पि पच्छा वि हियाए सुहाए खमाए निस्सेयसाए आणुगामियत्ताए भविस्सति ॥ २७६ ॥

१. द्र० सू० २४१ वृत्तौ ॥

इह प्राक्तनो ग्रन्थः प्रायोऽपूर्वो भूयानपि च पुस्तकेषु वाचनाभेदस्ततो माऽभूत् शिष्याणां सम्मोह इति क्वापि सुगमोऽपि यथावस्थितवाचनाक्रमप्रदर्शनार्थं लिखितः, इत ऊर्ध्वं तु प्रायः सुगमः प्राग्व्याख्यातस्वरूपश्च न च वाचनाभेदोऽप्यतिबादर इति स्वयं परिभावनीयो, विषमपदव्याख्या तु विधास्यते इति ॥ [२७६] **'तए णं तस्स सूरियाभस्स देवस्स सामाणियपरिसोववन्नगा देवा इमेयारूव'**मित्यादि ॥ २७६ ॥

सूत्र-२७७ : तते णं से सूरियाभे देवे तेसिं सामाणियपरिसोववण्णगाणं देवाणं अंतिए एयमट्ठं सोच्चा निसम्म हट्ठतुट्ठ जाव हियए सयणिज्जाओ अब्भुट्ठेति, अब्भुट्ठेत्ता उववायसभाओ पुरत्थिमिल्लेणं दारेणं निग्गच्छइ, जेणेव हरए तेणेव उवागच्छति, उवागच्छित्ता हरयं अणुपयाहिणीकरेमाणे अणुपयाहिणीकरेमाणे पुरत्थिमिल्लेणं तोरणेणं अणुपविसइ, अणुपविसित्ता पुरत्थिमिल्लेणं तिसोवाणपडिरूवएणं पच्चोरुहइ, पच्चोरुहित्ता जलावगाहं करेइ, करेत्ता जलमज्जणं करेइ, करेत्ता जलकिड्डं करेइ, करेत्ता जलाभिसेयं करेइ, करेत्ता आयंते चोक्खे[1] परमसूईभूए हरयाओ पच्चोत्तरइ, पच्चोत्तरित्ता जेणेव अभिसेयसभा तेणेव उवागच्छति, उवागच्छित्ता अभिसेयसभं अणुपयाहिणीकरेमाणे अणुपयाहिणीकरेमाणे पुरत्थिमिल्लेणं दारेणं अणुपविसइ, अणुपविसित्ता जेणेव सीहासणे तेणेव उवागच्छइ, उवागच्छित्ता सीहासणवरगए पुरत्थाभिमुहे सण्णिसण्णे ॥ २७७ ॥

[२७७] **'आयंते'** इति नवानामपि श्रोतसां शुद्धोदकप्रक्षालनेन आचान्तो-गृहीताचमनः **चोक्षः** स्वल्पस्यापि शङ्कितमलस्यापनयनाद् अत एव **परमशुचिभूतः** ॥ २७७ ॥

सूत्र-२७८ : तए[2] णं सूरियाभस्स देवस्स सामाणियपरिसोववण्णगा देवा आभिओगिए देवे सद्दावेंति, सद्दावेत्ता एवं वयासी–खिप्पामेव भो ! देवाणुप्पिया ! सूरियाभस्स देवस्स महत्थं महग्घं महरिहं विउलं इंदाभिसेयं उवट्ठवेह ॥ २७८ ॥

---

१. भाषायां 'चोक्खुं' - इति G पृ. २४० टि. ॥ २. तुला - जीवाजीवाभिगमे सूत्र ४४४ तः ॥

[२७८] '**महत्थं महग्घं महरिहं विउलं इंदाभिसेय**'मिति, महान् अर्थो-मणि-कनक-रत्नादिक उपयुज्यमानो यस्मिन् स महार्थः तं, तथा महान् अर्घः-पूजा यत्र स महार्घः तं, महम्-उत्सवमर्हतीति महार्हस्तं, विपुलं-विस्तीर्णं शक्राभिषेकवत् **इन्द्राभिषेकमुपस्थापयत** ॥ २७८ ॥

सूत्र-२७९ : तते णं ते आभिओगिआ देवा सामाणियपरिसोववण्णेहिं देवेहिं एवं वुत्ता समाणा हट्ठ जाव हियया करयलपरिग्गहियं [दसणहं] सिरसावत्तं मत्थए अंजलिं कट्टु 'एवं देवा ! तहत्ति' आणाए विणएणं वयणं पडिसुणंति, पडिसुणित्ता उत्तरपुरत्थिमं दिसीभागं अवक्कमंति, अवक्कमित्ता वेउव्वियसमुग्घाएणं समोहण्णंति, समोहणित्ता संखेज्जाइं जोयणाइं[1] जाव दोच्चं पि वेउव्वियसमुग्घाएणं समोहण्णंति, समोहणित्ता अट्ठसहस्सं[2] सोवण्णियाणं कलसाणं, अट्ठसहस्सं रुप्पमयाणं कलसाणं, अट्ठसहस्सं मणिमयाणं कलसाणं, अट्ठसहस्सं सुवण्णरुप्पमयाणं कलसाणं, अट्ठसहस्सं सुवण्णमणिमयाणं कलसाणं, अट्ठसहस्सं रुप्पमणिमयाणं कलसाणं, अट्ठसहस्सं सुवण्णरुप्पमणिमयाणं कलसाणं, अट्ठसहस्सं भोमेज्जाणं कलसाणं, एवं–भिंगाराणं, आयंसाणं, थालाणं, पाईणं, सुपतिट्ठाणं, मणोगुलियाणं, वायकरगाणं, चित्ताणं रयणकरंडगाणं, पुप्फचंगेरीणं जाव लोमहत्थचंगेरीणं, पुप्फपडलगाणं जाव लोमहत्थपडलगाणं, सीहासणाणं, छत्ताणं, चामराणं, तेल्लसमुग्गाणं जाव अंजणसमुग्गाणं, अट्ठसहस्सं झयाणं, अट्ठसहस्सं[3] धूवकडुच्छुयाणं विउव्वंति, विउव्वित्ता ते साभाविए य वेउव्विए य कलसे य जाव धूवकडुच्छुए य गिण्हंति, गिण्हित्ता सूरियाभाओ विमाणाओ पडिनिक्खिमंति, पडिनिक्खिमित्ता ताए उक्किट्ठाए तुरियाए चवलाए जाव तिरियमसंखेज्जाणं जाव वीतिवयमाणा-वीतिवयमाणा जेणेव खीरोदयसमुद्दे तेणेव उवागच्छंति, उवागच्छित्ता खीरोयगं गिण्हंति, गिण्हित्ता जाइं तत्थुप्पलाइं जाव सहस्सपत्ताइं ताइं गिण्हंति, गिण्हित्ता

१. द्र० सू० १० । २. अट्ठसयं K(क, ख, ग, घ, च, छ) । K मध्येऽग्रेऽपि अट्ठसयं ॥ ३. अट्ठसयं (क, ख, ग, घ, च, छ) K।

जेणेव पुक्खरोदए समुद्दे तेणेव उवागच्छंति, उवागच्छित्ता पुक्खरोदयं गेण्हंति, गेण्हित्ता जाइं तत्थुप्पलाइं जाव सयसहस्सपत्ताइं ताइं जाव गिण्हंति, गिण्हित्ता जेणेव समयखेत्ते जेणेव भरहेरवयाइं वासाइं जेणेव मागह-वरदाम-पभासाइं तित्थाइं तेणेव उवागच्छंति, उवागच्छित्ता तित्थोदगं गेण्हंति, गेण्हित्ता तित्थमट्टियं गेण्हंति, गेण्हित्ता जेणेव गंगा-सिंधू-रत्ता- 5
रत्तवईओ महानईओ तेणेव उवागच्छंति, उवागच्छित्ता सलिलोदगं[1] गेण्हंति, गेण्हित्ता उभओकूलमट्टियं गेण्हंति, गेण्हित्ता जेणेव चुल्लहिमवंत-सिहरि-वासहरपव्वया तेणेव उवागच्छंति, उवागच्छित्ता सव्वतूयरे, सव्वपुप्फे, सव्वगंधे, सव्वमल्ले, सव्वोसहि-सिद्धत्थए गिण्हंति, गिण्हित्ता जेणेव पउमपुंडरीयदहा तेणेव उवागच्छंति, उवागच्छित्ता दहोदगं गेण्हंति, गेण्हित्ता 10
जाइं तत्थ उप्पलाइं जाव सयसहस्सपत्ताइं ताइं गेण्हंति, गेण्हित्ता जेणेव हेमवय-एरन्नवयाइं वासाइं जेणेव रोहिय-रोहियंसा-सुवण्णकूल-रुप्पकूलाओ महाणईओ तेणेव उवागच्छंति, उवागच्छित्ता सलिलोदगं गेण्हंति, गेण्हित्ता उभओकूलमट्टियं गिण्हंति, गिण्हित्ता जेणेव सद्दावाति[2]-वियडावाति-वट्टवेयड्ढपव्वया तेणेव उवागच्छंति, उवागच्छित्ता सव्वतूयरे 15
तहेव जेणेव महाहिमवंत-रुप्पिवासहरपव्वया तेणेव उवागच्छंति, तहेव जेणेव महापउम-महापुंडरीयद्दहा तेणेव उवागच्छंति, उवागच्छित्ता दहोदगं गिण्हंति, गिण्हित्ता तहेव जेणेव हरिवास-रम्मगवासाइं जेणेव हरि-हरिकंत-नर-नारिकंताओ महाणईओ तेणेव उवागच्छंति, तहेव जेणेव गंधावाति-मालवंतपरियागा वट्टवेयड्ढपव्वया तेणेव तहेव जेणेव णिसढ-णीलवंत- 20
वासधरपव्वया तहेव जेणेव तिगिच्छि-केसरिद्दहाओ तेणेव उवागच्छंति, तहेव जेणेव[3] [पुव्व]विदेहावरविदेहवासाइं जेणेव सीता-सीतोदाओ महाणदीओ तेणेव उवागच्छंति, तहेव जेणेव सव्वचक्कवट्टिविजया जेणेव

१. सरितोदगं (जी० ३।४४५) । २. सद्दावतिवियडाव(वें-K)तिपरियागा (क, ख, ग, घ, च, छ) KG "स्वीकृतपाठः वृत्त्यनुसारी वर्त्तते । द्रष्टव्यं 'ठाणं' ४।३०७ सूत्रस्य पादटिप्पणम् ।" इति V पृ. १४३ टि. १ । ३. ०व महाविदेहे वासे-G मु. कखगघचछ ॥

सव्वमागहवरदामपभासाइं तित्थाइं तेणेव उवागच्छंति, उवागच्छित्ता तित्थोदगं गेण्हंति, गेण्हित्ता तित्थमट्टियं गेण्हंति, गेण्हित्ता जेणेव[1] सव्वंतरणईओ तहेव जेणेव सव्ववक्खारपव्वया तेणेव उवागच्छंति, उवागच्छित्ता सव्वतूयरे तहेव जेणेव मंदरे पव्वते जेणेव भद्दसालवणे तेणेव उवागच्छंति, उवागच्छित्ता सव्वतूयरे, सव्वपुप्फे, सव्वगंधे, सव्वमल्ले, सव्वोसहिसिद्धत्थए य गेण्हंति, गेण्हित्ता जेणेव णंदणवणे तेणेव उवागच्छंति, उवागच्छित्ता सव्वतूयरे जाव सव्वोसहिसिद्धत्थए य सरसं च गोसीसचंदणं गिण्हंति, गिण्हित्ता जेणेव सोमणसवणे तेणेव उवागच्छंति, उवागच्छित्ता सव्वतूयरे जाव सव्वोसहिसिद्धत्थए य सरसं च गोसीसचंदणं च दिव्वं च [सुमणदामं गिण्हंति, गिण्हित्ता जेणेव पंडगवणे तेणेव उवागच्छंति, उवागच्छित्ता सव्वतूयरे जाव सव्वोसहिसिद्धत्थए च सरसं च गोसीसचंदणं च दिव्वं च] सुमणदामं दद्दरमलयसुगंधियगंधे गिण्हंति, गिण्हित्ता एगतो मिलायंति, मिलाइत्ता ताए उक्किट्ठाए जाव जेणेव सोहम्मे कप्पे जेणेव सूरियाभे विमाणे जेणेव अभिसेयसभा जेणेव सूरियाभे देवे तेणेव उवागच्छंति, उवागच्छित्ता सूरियाभं देवं करयलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति, वद्धावेत्ता तं महत्थं महग्घं महरिहं विउलं इंदाभिसेयं उवट्ठवेंति ॥ २७९ ॥

सूत्र-२८० : तते णं तं सूरियाभं देवं चत्तारि सामाणियसाहस्सीओ, चत्तारि अग्गमहिसीओ सपरिवारातो, तिण्णि परिसाओ, सत्त अणियाओ, सत्त अणियाहिवइणो जाव अण्णे वि बहवे सूरियाभविमाणवासिणो देवा य देवीओ य तेहिं साभाविएहि य वेउव्विएहि य वरकमलपइट्ठाणेहिं सुरभिवरवारिपडिपुण्णेहिं चंदणकयचच्चाएहिं आविद्धकंठेगुणेहिं पउमुप्पलपिहाणेहिं सुकुमालकरयलपरिग्गहिएहिं अट्ठसहस्सेणं[2] सोवण्णियाणं

१. "जीवाजीवाभिगमे (३।४४५) 'वक्खारपव्वया' पाठः अतः पूर्वं विद्यते ।" इति V पृ. १४३ टि. १५ ।
२. ०सएणं K (क, ख, ग, घ, च, छ) ।

कलसाणं, जाव[१] अट्ठ सहस्सेणं भोमेज्जाणं कलसाणं सव्वोदएहिं सव्वमट्टियाहिं सव्वतूयरेहिं जाव सव्वोसहिसिद्धत्थएहिं य सव्विड्ढीए जाव नाइयरवेणं[२] महया-महया इंदाभिसेएणं अभिसिंचंति ॥ २८० ॥

[२७९-२८०] '**अट्ठसहस्सं सोवण्णियाणं कलसाणं विउव्वंती**'त्यादि, अत्र भूयान् वाचनाभेद इति यथावस्थितवाचनाप्रदर्शनाय लिख्यते, **अष्टसहस्रम्**-अष्टाधिकं सहस्रं **सौवर्णिकानां कलशानाम्** १, **अष्टसहस्रं रूप्यमयानाम्** २, **अष्टसहस्रं मणिमयानाम्** ३, **अष्टसहस्रं सुवर्णमणिमयानाम्** ४, **अष्टसहस्रं सुवर्णरूप्यमयानाम्** ५, **अष्टसहस्रं रूप्यमणिमयानाम्** ६, **अष्टसहस्रं सुवर्णरूप्यमणिमयानाम्** ७, **अष्टसहस्रं भौमेयानां कलशानाम्**, ८ अष्टसहस्रं **भृङ्गाराणामेवमादर्श-स्थाल-पात्री-सुप्रतिष्ठित[३]-वातकरक-चित्ररत्न-करण्डक-पुष्पचङ्गेरी यावल्लोमहस्तक-पटलक-सिंहासन-च्छत्र-चामर-समुद्गक-ध्वज-धूपकडुच्छुकानां** प्रत्येकं प्रत्येकमष्टसहस्रम् अष्टसहस्रं **विकुर्वन्ति, विकुर्व्वित्वा[४] 'ताए उक्किट्ठाए'** इत्यादि व्याख्यातार्थं, '**सव्वतुवरे[५]**' इत्यादि, **सर्वान् तूवरान्**-कषायान् **सर्वाणि पुष्पाणि सर्वान् गन्धान्**-गन्धवासादीन् **सर्वाणि माल्यानि** ग्रथितादिभेदभिन्नानि **सर्वौषधीन् सिद्धार्थकान्**-सर्षपकान् **गृह्णन्ति**, इहैवं क्रमः-पूर्वं **क्षीरसमुद्रे उपागच्छन्ति** तत्रोदकमुत्पलादीनि च **गृह्णन्ति**, ततः **पुष्करोदे समुद्रे** तत्रापि तथैव, ततो **मनुष्यक्षेत्रे भरतैरावतवर्षेषु मागधादिषु तीर्थेषु तीर्थोदकं तीर्थमृत्तिकां च गृह्णन्ति**, ततो **गङ्गा-सिन्धु-रक्ता-रक्तवतीषु नदीषु सलिलोदकं**-नद्युदकमुभयतटमृत्तिकां च **गृह्णन्ति**, ततः **क्षुल्लहिमवत्[६]शिखरिषु सर्वतूवर-सर्वपुष्प-सर्वमाल्य-सर्वौषधि-सिद्धार्थकान्**, ततस्तत्रैव **पद्मद्रह-पौण्डरीकद्रहेषु द्रहोदक-मुत्पलादीनि[७] च** तद्गतानि, ततो **हैमवतैरण्यवतवर्षेषु रोहिता-रोहितांशा-सुवर्णकूला-रूप्यकूलासु महानदीषु सलिलोदकमुभयतटमृत्तिकां**, तदनन्तरं **शब्दापाति-विकटापाति-वृत्तवैताढ्येषु सर्वतूवरादीन्**, ततो **महाहिमवद्रूप्पिवर्षधरपर्वतेषु सर्वतूवरादीन्**, ततो **महापद्म-पुण्डरीकद्रहेषु[८] द्रहोदकादीनि**, तदनन्तरं **हरिवर्ष-रम्यकवर्षेषु[९] हरकान्ता-हरिकान्ता-नरकान्ता[१०]-नारीकान्तासु महानदीषु सलिलोदकमुभयतटमृत्तिकां** च, ततो **गन्धापाति-माल्यवत्पर्याय-वृत्तवैताढ्येषु तूवरादीन्**, ततो **निषध-नीलवद्वर्षधरपर्वतेषु**

---

१. द्र. सू० १३ । २. नाइएणं K (क, ख, ग, घ, च, छ) । वाइएणं - G ३. सुप्रतिष्ठ वात° G । सुप्रतिष्ठ मनोगुलिक-इति जीवा. वृत्तौ ॥ ४. विकुर्व्य - इति शुद्धम् - इति G पृ. २४२ टि. ॥ ५. तूवरे - JK ॥ ६. चुल्ल० G ॥ ७. च तद्गतानि - G नास्ति ॥ ८. °महापोंड° JK जीवा. टी. ॥ ९. हरिहरिकान्तासु म० भा. २ । हरिहरिकन्ता० JK । हरकान्ताहरिकान्ता० जीवा.वृत्तौ । हरिसलिलाह० मु. ॥ १०. ०कान्ता० JK G नास्ति ॥

सर्वतूवरादीन्, तदनन्तरं तद्गतेषु **तिगिच्छि-केसरिमहाह्रदेषु ह्रदोदकादीनि**, ततः **पूर्वविदेहा-ऽपरविदेहेषु सीता-सीतोदानदीषु** सलिलोदकमुभयतटमृत्तिकां च, ततः **सर्वेषु चक्रवर्त्ति-विजेतव्येषु मागधादिषु तीर्थेषु तीर्थोदकं तीर्थमृत्तिकां** च, तदनन्तरं सर्वेषु[१] **वक्षस्कार-पर्वतेषु सर्वतूवरादीन्**, ततः **सर्वासु अन्तरनदीषु** सलिलोदकमुभयतटमृत्तिकां च, तदनन्तरं **मन्दरपर्वते भद्रशालवने तूवरादीन्**, ततो **नन्दनवने तूवरादीन् सरसं च गोशीर्षचन्दनं**, तदनन्तरं **सौमनसवने सर्वतूवरादीन् सरसं च गोशीर्षचन्दनं दिव्यं च सुमनोदाम गृह्णन्ति**, ततः **पण्डकवने** तूवर-पुष्प-गन्ध-माल्य-सरसगोशीर्षचन्दन-दिव्य-सुमनोदामानि, **'दद्दरमलए सुगंधिए य गंधे गिण्हंति'** इति दर्दरः-चीवरावनद्धं कुण्डिकादिभाजनमुखं, तेन गालितं तत्र पक्वं वा यन्मलयोद्भवतया प्रसिद्धत्वात् मलयजं-श्रीखण्डं येषु तान् सुगन्धिकान्-परमगन्धोपेतान् गन्धान् गृह्णन्ति ॥ २८० ॥

सूत्र-२८१ : तते णं तस्स सूरियाभस्स देवस्स महया-महया इंदाभिसेए वट्टमाणे—अप्पेगतिया देवा सूरियाभं विमाणं नच्चोयगं नातिमट्टियं पविरलफुसियरेणुविणासणं दिव्वं सुरभिगंधोदगं वासं वासंति, अप्पेगतिया देवा सूरियाभं विमाणं हयरयं नट्ठरयं भट्ठरयं उवसंतरयं पसंतरयं करेंति, अप्पेगतिया देवा सूरियाभं विमाणं आसियसंमज्जिओवलित्तं सुइसंमट्ठरत्थंत-रावणवीहियं करेंति, अप्पेगतिया देवा सूरियाभं विमाणं मंचाइमंचकलियं करेंति, अप्पेगइया देवा सूरियाभं विमाणं णाणाविहरागोसियं झयपडागाइ-पडागमंडियं करेंति, अप्पेगतिया देवा सूरियाभं विमाणं लाउल्लोइयमहियं गोसीससरसरत्तचंदणदद्दर दिण्णपंचंगुलितलं करेंति, अप्पेगतिया देवा सूरियाभं विमाणं उवचियवंदणकलसं वंदणघडसुकयतोरणपडिदुवारदेसभागं करेंति, अप्पेगतिया देवा सूरियाभं विमाणं आसत्तोसत्तविउलवट्टवग्घारियमल्ल-दामकलावं करेंति, अप्पेगतिया देवा सूरियाभं विमाणं पंचवण्णसुरभि[२]-मुक्कपुप्फपुंजोवयारकलियं करेंति, अप्पेगतिया देवा सूरियाभं विमाणं कालागरुपवरकुंदुरुक्क-तुरुक्क-धूव-मघमघेंतगंधुद्धुयाभिरामं करेंति,

---

१. JK GI सर्वेषु - मु. नास्ति ॥ २. °वण्णसरससुरभि °इति उववाइ सू०२ ।

अप्पेगइया देवा सूरियाभं विमाणं सुगंधगंधियं गंधवट्टिभूतं करेंति, अप्पेगतिया देवा हिरण्णवासं वासंति, सुवण्णवासं वासंति, रयणवासं वासंति, वइरवासं वासंति, पुप्फवासं वासंति, [फलवासं वासंति,] मल्लवासं वासंति, गंधवासं वासंति, चुण्णवासं वासंति, आभरणवासं वासंति, अप्पेगतिया देवा हिरण्णविहिं भाएंति, एवं–सुवण्णविहिं रयणविहिं[1] पुप्फविहिं फलविहिं मल्लविहिं गंधविहिं चुण्णविहिं वत्थविहिं आभरणविहिं भाएंति, अप्पेगतिया देवा चउव्विहं वाइत्तं वाएंति– तं जहा ततं विततं घणं झुसिरं, अप्पेगइया देवा चउव्विहं गेयं गायंति, तं जहा–उक्खित्तायं पायंतायं मंदायं रोइयावसाणं[2], अप्पेगतिया देवा दुयं नट्टविहिं उवदंसेंति, अप्पेगतिया देवा विलंबियं णट्टविहिं उवदंसेंति, अप्पेगतिया देवा दुयविलंबियं णट्टविहिं उवदंसेंति, अप्पेगतिया देवा अंचियं नट्टविहिं उवदंसेंति, अप्पेगतिया देवा रिभियं नट्टविहिं उवदंसेंति, अप्पेगइया देवा अंचिय-रिभियं नट्टविहिं उवदंसेंति, अप्पेगइया देवा आरभडं नट्टविहिं उवदंसेंति, अप्पेगइया देवा भसोलं नट्टविहिं उवदंसेंति, अप्पेगइया देवा आरभड-भसोलं नट्टविहिं उवदंसेंति, अप्पेगइया देवा उप्पाय-निवायपसत्तं संकुचिय-पसारियं रियारियं[3] भंत-संभंतणामं दिव्वं णट्टविहिं उवदंसेंति, अप्पेगतिया देवा चउव्विहं अभिणयं अभिणयंति, तं जहा–दिट्ठंतियं पाडंतियं सामन्नओविणिवाइयं लोगमज्झावसाणियं[4], अप्पेगतिया देवा बुक्कारेंति, अप्पेगतिया देवा पीणेंति, अप्पेगतिया लासेंति, अप्पेगतिया तंडवेंति, अप्पेगतिया बुक्कारेंति, पीणेंति, लासेंति, तंडवेंति, अप्पेगतिया अप्फोडेंति, अप्पेगतिया वग्गंति, अप्पेगतिया तिवइं छिंदंति, अप्पेगतिया अप्फोडेंति, वग्गंति, तिवइं छिंदंति,

१. V । रययविहिं-मु.G । "अतः परं 'वइरविहिं' इति पाठः प्राप्तोस्ति, किन्तु आदर्शेषु नोपलभ्यते जीवाजीवाभिगमवृत्तौ 'वइरवासं वइरविहिं' एतौ द्वावपि न स्तो व्याख्यातौ ।" इति V पृ. १४५ टि. ४ ॥ २. रोइंदा° (क, ख, ग, घ, च, छ) K द्रष्टव्यं ११५ सूत्रस्य पादटिप्पणम् । ३. रेयाइयं (क, ख, ग, घ, च, छ) । रेवातियं - KI ४. लोगअंतोमज्झा° GI

अप्पेगतिया हयहेसियं करेंति, अप्पेगतिया हत्थिगुलगुलाइयं करेंति, अप्पेगतिया रहघणघणाइयं करेंति, अप्पेगतिया[१] हयहेसियं करेंति, हत्थिगुलगुलाइयं करेंति, रहघणघणाइयं करेंति, अप्पेगतिया उच्छ्लेंति, अप्पेगतिया पोच्छ्लेंति, अप्पेगतिया उक्किट्ठियं करेंति, अप्पेगतिया उच्छ्लेंति[२] पोच्छ्लेंति, उक्किट्ठियं करेंति, अप्पेगतिया ओवयंति, अप्पेगतिया उप्पयंति, अप्पेगतिया परिवयंति, अप्पेगइया तिण्णि वि, अप्पेगइया सीहनायं नयंति, अप्पेगतिया पाददद्दरयं करेंति, अप्पेगतिया भूमिचवेडं दलयंति, अप्पेगतिया तिण्णि वि, अप्पेगतिया गज्जंति, अप्पेगतिया विज्जुयायंति, अप्पेगइया वासं वासंति, अप्पेगतिया तिण्णि वि करेंति, अप्पेगतिया जलंति, अप्पेगतिया तवंति, अप्पेगतिया पतवेंति, अप्पेगतिया तिण्णि वि, अप्पेगतिया हक्कारेंति, अप्पेगतिया थुक्कारेंति, अप्पेगतिया थक्कारेंति[३], अप्पेगतिया साइं साइं नामाइं साहेंति, अप्पेगतिया चत्तारि वि, अप्पेगतिया देवसण्णिवायं करेंति, अप्पेगतिया देवुज्जोयं करेंति, अप्पेगइया देवुक्कलियं करेंति, अप्पेगइया देवकहकहगं करेंति, अप्पेगतिया देवदुहदुहगं करेंति, अप्पेगतिया चेलुक्खेवं करेंति, अप्पेगइया देवसण्णिवायं देवुज्जोयं देवुक्कलियं देवकहकहगं देवदुहदुहगं चेलुक्खेवं करेंति, अप्पेगतिया उप्पलहत्थगया जाव सयसहस्सपत्तहत्थगया, अप्पेगतिया वंदणकलसहत्थगया जाव धूवकडुच्छुयहत्थगया हट्ठतुट्ठ जाव हियया[४] सव्वओ समंता आहावंति परिधावंति ॥ २८१ ॥

[२८१] **'आसिय-संमज्जिओवलित्तं सुइ-सम्मट्ठ-रत्थंतरावणवीहियं करेंति'** इति आसिक्तम्-उदकच्छटकेन सम्मार्जितं-सम्भाव्यमानकचवरशोधनेन उपलिप्तमिव गोमयादिना उपलिप्तं तथा सिक्तानि जलेनाऽत एव शुचीनि-पवित्राणि संमृष्टानि-कचवरापनयनेन रथ्यान्तराणि आपणवीथय इव-हट्टमार्गा इवाऽऽपणवीथयो-रथ्याविशेषा यस्मिन् तत्तथा

१. 'अप्पेगइया हयहेसिय - हत्थिगुलगुलाइय - रहघणघणाइयं करेंति'-G ॥ २. उच्छ्लेंति पोच्छ्लेंति उक्किट्ठियं-एतत्पाठस्थाने G संस्करणे 'तिन्नि वि' । "जीवाजीवाभिगमे (३।४४७) केषाञ्चित् पदानां व्यत्ययो दृश्यते ।" इति V पृ. १४६ टि. १ । ३. धक्का० मु. G ॥ । ४. "अतः परं सूरियाभे विमाणे' इति पाठोपेक्ष्यते, द्रष्टव्यं जीवाजीवाभिगमस्य ३।४४७ सूत्रम् ।" इति V पृ. १४६ टि. ९ ।

कुर्वन्ति, '**अप्पेगइया देवा हिरण्णविहिं भाएंति**' अप्येकका:-केचन देवा हिरण्यविधिं-हिरण्यरूपं मङ्गलभूतं प्रकारं भाजयन्ति-विश्राणयन्ति, शेषदेवेभ्यो ददतीति भावः, एवं सुवर्ण-रत्न-पुष्प-फल-माल्य-गन्ध-चूर्णा-ऽऽभरणविधिभाजनमपि भावनीयम् । '**उप्पायनिवयेत्यादि**, उत्पातपूर्वो निपातो यस्मिन् स उत्पातनिपातस्तम्, एवं निपातोत्पातं संकुचितप्रसारितं '**रियारिय**'मिति गमनागमनं **भ्रान्तसम्भ्रान्तं नाम** आरभटभसोलं दिव्यं नाट्यविधिमुप- 5
दर्शयन्ति, **अप्येकका** देवा '**बुक्कारेंति**' बुक्काशब्दं कुर्वन्ति, '**पीणेंति**' पीनयन्ति-पीनमात्मानं कुर्वन्ति स्थूला भवन्तीत्यर्थः, '**लासेंति**'[1] लासयन्ति, लास्यरूपं नृत्यं कुर्वन्ति, '**तंडवेंति**'त्ति ताण्डवयन्ति-ताण्डवरूपं नृत्यं कुर्वन्ति, '**अप्फोडेंति**' आस्फोटयन्ति, भूम्यादिकमिति गम्यते, '**उच्छलंति**' त्ति उच्छलयन्ति, '**पोच्छलंति**' प्रोच्छलयन्ति, '**ओवयंति**'त्ति अवपतन्ति, '**उप्पयंति**'त्ति उत्पतन्ति, '**परिवयंति**'त्ति परिपतन्ति, तिर्यक् निपतन्तीत्यर्थः, 10
'**जलंति**'त्ति ज्वालामालाकुला भवन्ति, '**तवंति**'त्ति तप्ता भवन्ति, '**पतवंति**' प्रतप्ता भवन्ति, '**थुक्कारेंति**'[2]त्ति महता शब्देन थूत्कुर्वन्ति, '**देवोक्कलियं करेंति**'त्ति देवानां वातस्येवोत्कलिका देवोत्कलिका तां कुर्वन्ति, '**देवकहकहं करेंति**'[3]त्ति प्रभूतानां[4] देवानां प्रमोदभरवशतः स्वेच्छावचनैर्बोल-कोलाहलो देवकहकहस्तं कुर्वन्ति '**दुहदुहकं करेंति**' दुहदुहकमित्यनुकरण-मेतत् ॥२८१॥ 15

सूत्र-२८२ : तए णं तं सूरियाभं देवं चत्तारि सामाणियसाहस्सीओ जाव सोलस आयरक्खदेवसाहस्सीओ अण्णे य बहवे सूरियाभरायहाणिवत्थव्वा देवा य देवीओ य महया-महया इंदाभिसेगेणं अभिसिंचंति, अभिसिंचित्ता पत्तेयं-पत्तेयं करयलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु एवं वदासी—जय-जय नंदा ! जय-जय भद्दा ! जय-जय नंदा ! भद्दं ते, अजियं 20
जिणाहि, जियं च पालेहि, जियमज्झे वसाहि—इंदो इव देवाणं, चंदो इव ताराणं, चमरो इव असुराणं, धरणो इव नागाणं, भरहो इव मणुयाणं—बहूइं पलिओवमाइं बहूइं सागरोवमाइं बहूइं पलिओवम-सागरोवमाइं चउण्हं सामाणियसाहस्सीणं जाव आयरक्खदेवसाहस्सीणं सूरियाभस्स विमाणस्स

१. लास्ययन्ति-जीवा.वृत्तौ ॥ २. थक्कारेंति थक्क इति महता शब्देन कुर्वन्ति - JK ॥ ३. कूहकूहं - J । ४. जीवा.टी. । प्राकृतानां-मु. । प्रकृतानां JB ॥ ५. ०कूहकूह० JK ॥

अण्णेसिं च बहूणं सूरियाभविमाणवासीणं देवाण य देवीण य 'आहेवच्चं[1] जाव महया-महया कारेमाणे पालेमाणे विहराहि त्ति कट्टु जय-जय सद्दं पउंजंति ॥ २८२ ॥

सूत्र-२८३ : तए[2] णं से सूरियाभे देवे महया-महया इंदाभिसेगेणं अभिसित्ते समाणे अभिसेयसभाओ पुरत्थिमिल्लेणं दारेणं निग्गच्छति, निग्गच्छित्ता जेणेव अलंकारियसभा तेणेव उवागच्छति, उवागच्छित्ता अलंकारियसभं अणुपयाहिणीकरेमाणे-अणुपयाहिणीकरेमाणे अलंकारिय-सभं पुरत्थिमिल्लेणं दारेणं अणुपविसति, अणुपविसित्ता जेणेव सीहासणे तेणेव उवागच्छति, उवागच्छित्ता सीहासणवरगते पुरत्थाभिमुहे सण्णिसण्णे ॥ २८३ ॥

सूत्र-२८४ : तए णं तस्स सूरियाभस्स देवस्स सामाणियपरिसोववण्णगा देवा अलंकारियभंडं उवट्ठवेंति ॥ २८४ ॥

सूत्र-२८५ : तते णं से सूरियाभे देवे तप्पढमयाए पम्हलसूमालाए सुरभीए गंधकासाईए गायाइं लूहेति, लूहेत्ता सरसेणं गोसीसचंदणेणं गायाइं अणुलिंपति, अणुलिंपित्ता नासा-नीसास-वाय-वोज्झं चक्खुहरं वण्णफरिसजुत्तं हयलालापेलवातिरेगं धवलं कणग-खचियंतकम्मं आगासफालिय-समप्पभं दिव्वं देवदूसजुयलं नियंसेति, नियंसेत्ता हारं पिणिद्धेति, पिणिद्धेत्ता अद्धहारं पिणिद्धेइ, पिणिद्धेत्ता एगावलिं पिणिद्धेति, पिणिद्धेत्ता मुत्तावलिं पिणिद्धेति, पिणिद्धेत्ता रयणावलिं पिणिद्धेइ, पिणिद्धेत्ता एवं–अंगयाइं केयूराइं कडगाइं तुडियाइं कडिसुत्तगं दसमुद्दाणंतगं विकच्छसुत्तगं मुरविं कंठमुरविं पालंबं कुंडलाइं चूडामणिं

१. "यद्यपि प्रतिषु 'आहेवच्चं जाव महया-महया कारेमाणे पालेमाणे विहराहि' एवं पाठो लभ्यते, किन्तु लिपिदोषादसौ पाठः अशुद्धो जात इति प्रतीयते । जीवाजीवाभिगमे (३।४४८) एष पाठः समीचीनो वर्तते– आहेवच्चं जाव आणा-ईसर-सेणावच्चं कारेमाणे पालेमाणे विहराहित्ति कट्टु महता-महता सद्देणं जय-जय सद्दं पउंजंति ।" इति V पृ. १४६ टि. १२ सूत्र १८६ सत्कं टिप्पणमपि द्रष्टव्यम्। २. तुला - जीवाजीवाभिगमे सूत्र ४४९ तः ।

[चित्तरयणसंकडं[1]] मउडं–पिणिद्धेइ, पिणिद्धेत्ता गंथिम-वेढिम-पूरिम-संघाइमेणं चउव्विहेणं मल्लेणं कप्परुक्खगं पिव अप्पाणं अलंकिय-विभूसियं करेइ, करेत्ता दद्दरमलय-सुगंधगंधिएहिं गायाइं भुकुंडेति[2] दिव्वं च सुमणदामं पिणिद्धेइ ॥ २८५ ॥

[२८५] **'तप्पढमयाए पम्हलाए[3] सुकुमालाए सुरभीए गंधकासाइयाए गायाइं लूहइ'** इति तत्प्रथमतया-तस्यामलङ्कारसभायां प्रथमतया पक्ष्मला च सा सुकुमारा च पक्ष्मलसुकुमारा तया, सुरभ्या गन्धकाषायिक्या-सुरभिगन्धकषायद्रव्यपरिकर्मितया लघुशाटिकया गात्राणि रूक्षयति, **'नासानीसासवायवोज्झ'**मिति नासिकानिःश्वासवातवाह्यम्, अनेन तच्छ्लक्ष्णतामाह, **'चक्खुहर'**मिति चक्षुर्हरति-आत्मवशं नयति विशिष्टरूपातिशयकलितत्वाद् इति चक्षुर्हरं, **'वण्णफरिसजुत्त'**मिति वर्णेन स्पर्शेन चातिशायिनेति[4] गम्यते युक्तं वर्णस्पर्शयुक्तं, **'हयलालापेलवाइरेग'**मिति हयलाला-अश्वलाला तस्या अपि पेलवमतिरेकेण हयलालापेलवातिरेकं **"नाम नाम्नैकार्थे समासो बहुलम्"** [सि.हे. ३।१।१८] इति समासः, अतिविशिष्टमृदुत्व-लघुत्वगुणोपेतमिति भावः, **धवलं**-श्वेतं, तथा कनकेन[5] खचितानि-विच्छुरितानि अन्तकर्माणि-अञ्चलयोर्वानलक्षणानि यस्य तत् **कनकखचितान्तकर्म, आकाशस्फटिकं** नामातिस्वच्छः स्फटिकविशेषस्तत्**समप्रभं दिव्यं देवदूष्ययुगलं 'नियंसेइ'** परिधत्ते, **परिधाय** हारादीन्याभरणानि **पिनह्यति**, तत्र **हारः**-अष्टादशसरिकः, **अर्द्धहारो**-नवसरिकः, **एकावली**-विचित्रमणिका, **मुक्तावली**-मुक्ताफलमयी, **रत्नावली**[6]-रत्नमयमणिकात्मिका, **प्रालम्बः**-तपनीयमयो विचित्रमणिरत्नभक्तिचित्र आत्मनः प्रमाणेन सुप्रमाण आभरणविशेषः, **कटकानि**-कलाचिकाभरणानि, **त्रुटितानि**-बाहुरक्षिकाः, **अङ्गदानि**-बाह्वाभरणविशेषाः, **दशमुद्रिकाऽनन्तकं** हस्ताङ्गुलिसम्बन्धि मुद्रिकादशकं, **कुण्डले**-कर्णाभरणे, **'चुडामणि'**मिति

---

१. "प्रयुक्तादर्शेषु एष पाठो नोपलभ्यते, वृत्तौ एष व्याख्यातोऽस्ति। भगवत्यां (९।१९०) 'एवं जहा सूरियाभस्स अलंकारो तहेव जाव चित्तं' इति समर्पणपाठोस्ति, तद्वृत्तौ 'रयणसंकडुक्कडं' इति पाठो व्याख्यातोऽस्ति।" इति V पृ. १४७ टि. ४। २. भखंडेइ G (क, ख, ग, घ, च, छ); एतत्पाठः "जम्बूद्वीपप्रज्ञप्तेः (३।२१०) सूत्रस्याधारेण स्वीकृतः, हीरविजयसूरिणा अस्य व्याख्या एवं कृताऽस्ति 'भुकुंडंति - उद्धूलयन्ति' (हस्तलिखितवृत्तिपत्र ३०२)। भगवतीवृत्तौ (पत्र ४७७) वाचनान्तरपाठस्य विवरणे भुकुंडेंति त्ति उद्धूलयन्ति इति लभ्यते" इति जीवाजीवाभिगमस्य ३।४५१ सूत्रस्य पादटिप्पणम् V पृ. ३५१ टि. ८। ३. पम्हसुकु० JK॥ ४. JK GI ०शयेनेति - मु.। ५. कनकावली-कनकमय० जीवा. वृत्तौ॥ ६. अयं 'मणिक' शब्दः भाषाप्रसिद्धं 'मणका' शब्दं सूचयति-इति G प्र. २५१-२ टि.॥

चूडामणिर्नाम सकलपार्थिवरत्नसर्वसारो देवेन्द्रमनुष्येन्द्रमूर्द्धकृतनिवासो निःशेषापमङ्गला-शान्तिरोगप्रमुखदोषापहारकारी प्रवरलक्षणोपेतः परममङ्गलभूत आभरणविशेषः, **'चित्तरयण संकडं मउड'**मिति चित्राणि-नानाप्रकाराणि यानि रत्नानि, तैः सङ्कटश्चित्ररत्नसङ्कटः प्रभूतरत्ननिचयोपेत इति भावः [१]तं, **'दिव्वं सुमणदामं'** ति पुष्पमालां, **'गंथिमे'**त्यादि, ग्रन्थिमं-ग्रन्थनं ग्रन्थस्तेन निर्वृत्तं ग्रन्थिमं, "**भावादिमः [सि.हे. ६-४-२१]प्रत्ययः**" यत्सूत्रादिना ग्रथ्यते तद् ग्रन्थिममिति भावः, [२]पूरिमं **(वेष्टिमं)** यत् ग्रथितं [३]सत् वेष्ट्यते, तथा पुष्पलम्बूसको गेन्दुकः [४]इत्यर्थः, **पूरिमं** येन वंशशलाकामयं पञ्जरादि पूर्यते, **संघातिमं** यत् परस्परतो नालसङ्घातेन सङ्घात्यते ॥ २८५ ॥

सूत्र-२८६ : तए णं से सुरियाभे देवे केसालंकारेणं मल्लालंकारेणं आभरणालंकारेणं वत्थालंकारेणं चउव्विहेणं अलंकारेणं अलंकियविभूसिए समाणे पडिपुण्णालंकारे सीहासणाओ अब्भुट्ठेति, अब्भुट्ठेत्ता अलंकारिय-सभाओ पुरत्थिमिल्लेणं दारेणं पडिणिक्खमइ, पडिणिक्खमित्ता जेणेव ववसायसभा तेणेव उवागच्छति, ववसायसभं अणुपयाहिणीकरेमाणे-अणुपयाहिणीकरेमाणे पुरत्थिमिल्लेणं दारेणं अणुपविसति, अणुपविसित्ता जेणेव सीहासणे जाव सण्णिसण्णे ॥ २८६ ॥

सूत्र-२८७ : तए णं तस्स सूरियाभस्स देवस्स सामाणियपरिसोववण्णगा देवा पोत्थयरयणं [५]उवणेंति ॥ २८७ ॥

[२८६-२८७] **'जेणेव ववसायसभा'** इति व्यवसायसभा नाम व्यवसायनिबन्धनभूता सभा, क्षेत्रादेरपि कर्मोदयादिनिमित्तत्वात्, उक्तं च-"[६]**उदय-क्खय-क्खओवसमोवसमा जं च कम्मुणो भणिया । दव्वं खेत्तं कालं [७]भावं च भवं च संपप्प ॥ १ ॥**" [धर्मसंग्रहणी ९४९]इति,

सूत्र-२८८ : तते णं से सूरियाभे देवे पोत्थयरयणं गिण्हति, गिण्हित्ता [पोत्थयरयणं मुयइ, मुइत्ता] पोत्थयरयणं विहाडेइ, विहाडित्ता पोत्थयरयणं

---

१. तां - JK ॥ २. सर्वप्रतिषु अयमेव पाठः, परन्तु अत्र 'पूरिम' शब्दस्थाने 'वेष्टिम' शब्दः उचितो भाति ? इति G २५२ टि. ॥ ३. तत् - G । सत् - JK नास्ति ॥ ४. G । गण्डकः - मु. । गण्डुकः JK । गडुक - भा. १। गण्डूकः-जीवा. वृत्तौ । ५. उवणमंति (क, ख, ग, घ, च, छ) भा. १ । ६. उदय-क्षय-क्षयोपशम-उपशमा यच्च कर्मणो भणिताः । द्रव्यं क्षेत्रं कालं भावं च भवं च सम्प्राप्य ॥ ७. भवं च भावं च - JK ॥

वाएति, वाएत्ता धम्मियं ववसायं ववसइ, ववसइत्ता पोत्थयरयणं पडिणिक्खिवइ, पडिणिक्खिवित्ता सीहासणातो अब्भुट्ठेति, अब्भुट्ठेत्ता ववसायसभातो पुरत्थिमिल्लेणं दारेणं पडिणिक्खमइ, पडिणिक्खमित्ता जेणेव नंदा पुक्खरिणी तेणेव उवागच्छति, उवागच्छित्ता णंदं पुक्खरिणिं पुरत्थिमिल्लेणं तोरणेणं तिसोवाणपडिरूवएणं पच्चोरुहइ, पच्चोरुहित्ता हत्थपादं पक्खालेति, पक्खालेत्ता आयंते चोक्खे परमसुईभूए एगं महं सेयं रययामयं विमलं सलिलपुण्णं मत्तगयमहामुहागितिसमाणं[1] भिंगारं पगेण्हति, पगेण्हित्ता जाइं तत्थ उप्पलाइं जाव सयसहस्सपत्ताइं ताइं गेण्हति, गेण्हित्ता णंदातो पुक्खरिणीतो पच्चोत्तरति, पच्चोत्तरित्ता जेणेव सिद्धायतणे तेणेव पहारेत्थ गमणाए ॥ २८८ ॥

सूत्र-२८९ : तते णं तस्स सूरियाभस्स देवस्स चत्तारि सामाणिय-साहस्सीतो जाव सोलस आयरक्खदेवसाहस्सीओ अण्णे य बहवे सूरियाभविमाणवासिणो जाव देवीओ य अप्पेगतिया उप्पलहत्थगया जाव सयसहस्सपत्तहत्थगया सूरियाभं देवं पिट्ठतो-पिट्ठतो समणुगच्छंति ॥ २८९ ॥

सूत्र-२९० : तए णं तस्स सूरियाभस्स देवस्स आभिओगिया देवा य देवीओ य अप्पेगतिया वंदणकलसहत्थगया जाव[2] अप्पेगतिया धूवकडुच्छुयहत्थगया हट्ठतुट्ठ - जाव सूरियाभं देवं पिट्ठतो-पिट्ठतो समणुगच्छंति ॥ २९० ॥

[२८८-२९०] **'पोत्थयरयणं मुयइ'** इति उत्सङ्गे स्थानविशेषे वा उत्तमे इति द्रष्टव्यं, **'विहाडेइ'** इति उद्घाटयति, **'धम्मियं ववसायं ववसइ'** इति धार्मिकं-धर्मानुगतं व्यवसायं व्यवस्यति, कर्त्तुमभिलषतीति भावः ॥ २८८ ॥

सूत्र-२९१ : तए णं से सूरियाभे देवे चउहिं सामाणियसाहस्सीहिं जाव आयरक्खदेवसाहस्सीहिं अण्णेहिं बहूहि य जाव देवेहि य देवीहि य सद्धिं संपरिवुडे सव्विड्ढीए जाव[3] णातियरवेणं जेणेव सिद्धायतणे तेणेव

१. मत्तगयमुहागितिकुंभसमाणं-G । २. द्र. सू० २७९ । ३. द्र. सू० १३ ।

उवागच्छति, उवागच्छित्ता सिद्धायतणं[1] पुरत्थिमिल्लेणं दारेणं अणुपविसति, अणुपविसित्ता जेणेव देवच्छंदए जेणेव जिणपडिमाओ तेणेव उवागच्छति, उवागच्छित्ता जिणपडिमाणं आलोए पणामं करेति, करेत्ता लोमहत्थगं गिण्हति, गिण्हित्ता जिणपडिमाणं लोमहत्थएणं पमज्जइ, पमज्जित्ता जिणपडिमाओ सुरभिगंधोदएणं ण्हाएइ, ण्हाइत्ता सरसेणं गोसीसचंदणेणं गायाइं अणुलिंपइ, अणुलिंपइत्ता जिणपडिमाणं अहयाइं देवदूसजुयलाइं नियंसेइ, नियंसेत्ता [अग्गेहिं[2] वरेहिं गंधेहि मल्लेहि य अच्चेइ, अच्चेत्ता] पुप्फारुहणं मल्लारुहणं वण्णारुहणं चुण्णारुहणं गंधारुहणं आभरणारुहणं करेइ, करेत्ता आसत्तोसत्तविउलवट्टवग्घारियमल्लदामकलावं करेइ, करेत्ता कयग्गहगहियकरयलपब्भट्ठविप्पमुक्केणं दसद्धवण्णेणं कुसुमेणं मुक्कपुप्फपुंजोवयारकलियं करेइ, करेत्ता जिणपडिमाणं पुरतो अच्छेहिं सण्हेहिं रययामएहिं अच्छरसा[3]-तंदुलेहिं अट्ठट्ठ मंगले आलिहइ, तं जहा—सोत्थियं जाव दप्पणं ॥ २९१ ॥

[२९१] '**अच्छरसातंदुलेहिं**' अच्छो रसो येषु ते अच्छरसाः, प्रत्यासन्नवस्तुप्रतिबिम्बाधारभूता इवातिनिर्मला इत्यर्थः, अच्छरसाश्च ते तन्दुलाश्च तैः, दिव्यतन्दुलैरिति भावः, '**पुप्फपुंजोवयारकलियं करित्ता**' ॥ २९१ ॥

---

१. "जीवाजीवाभिगमे (३।४५७) अतोऽग्रे यः पाठोऽस्ति स प्रकरणदृष्ट्या सङ्गतोऽस्ति । प्रस्तुतसूत्रादर्शे स नोपलभ्यते । वृत्तिश्च संक्षिप्ताऽस्ति, किन्तु तं पाठं विना प्रकरणसम्बन्धो नैव जायते, स च एवमस्ति—अणुप्पयाहिणीकरेमाणे - अणुप्पयाहिणीकरेमाणे पुरत्थिमिल्लेणं दारेणं अणुपविसति, अणुपविसित्ता आलोए जिणपडिमाणं पणामं करेति, करेत्ता जेणेव मणिपेढिया जेणेव देवच्छंदए जेणेव जिणपडिमाओ तेणेव उवागच्छइ, उवागच्छित्ता लोमहत्थगं परामुसति, परामुसित्ता जिणपडिमाओ पमज्जति, पमज्जित्ता दिव्वाए दगधाराए ण्हावेति, ण्हावित्ता सरसेणं गोसीसचंदणेणं गाताइं अणुलिंपइ, अणुलिंपित्ता जिणपडिमाणं अहयाइं देवदूसजुयलाइं णियंसेइ, णियंसेत्ता अग्गेहिं वरेहिं गंधेहिं मल्लेहि य अच्चेति, अच्चेत्ता पुप्फारुहणं मल्लारुहणं वण्णारुहणं चुण्णारुहणं गंधारुहणं आभरणारुहणं करेति, करेत्ता जिणपडिमाणं पुरतो अच्छेहिं सण्हेहिं रययामएहिं अच्छरसा-तंदुलेहिं अट्ठट्ठमंगलए आलिहति, आलिहित्ता कयगाहग्गहितकरतलपब्भट्ठविमुक्केणं दसद्धवण्णेणं कुसुमेणं पुप्फपुंजोवयारकलितं करेति, करेत्ता चंदप्पभ०" इति V पृ. १४८-१४९ टि. १४ । २. "कोष्ठकगतः पाठो जीवा-जीवाभिगमवृत्तावपि (पत्र २५४) व्याख्यातोऽस्ति ।" इति V पृ. १४९ टि. ३ । ३. अच्छरसाहिं (क,ख,ग,घ,च,छ); "जीवाजीवाभिगमवृत्तौ (पत्र २५४) अच्छरसतन्दुलाः, पूर्वपदस्य दीर्घान्तता प्राकृतत्वात् । इति V पृ. १४९ टि. ५ ।

सूत्र-२९२ : तयाणंतरं च णं चंदप्पभ-वइर[1]-वेरुलिय-विमलदंडं कंचण-मणिरयणभत्तिचित्तं कालागरु-पवरकुंदुरुक्क-तुरुक्क-धूव-मघमघेंत-गंधुत्तमाणुविद्धं च धूववट्टिं विणिम्मुयंतं वेरुलियमयं कडुच्छुयं पग्गहिय पयत्तेणं धूवं दाऊण जिणवराणं [सत्तट्ठ पदाणि ओसरति, ओसरित्ता दसंगुलिं अंजलिं करिय-मत्थयम्मि य पयत्तेणं,] अट्ठसयविसुद्धगंथजुत्तेहिं [अत्थजुत्तेहिं] अपुणरुत्तेहिं महावित्तेहिं संथुणइ, संथुणित्ता सत्तट्ठपयाइं पच्चोसक्कइ पच्चोसक्कित्ता वामं जाणुं अंचेइ, अंचित्ता दाहिणं जाणुं धरणितलंसि निहट्टु तिक्खुत्तो मुद्धाणं धरणितलंसि निवाडेइ, निवाडित्ता ईसिं पच्चुण्णमइ, पच्चुण्णमित्ता करयलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु एवं वयासी–'नमोत्थुणं अरहंताणं [भगवंताणं आदिगराणं तित्थगराणं सयंसंबुद्धाणं पुरिसुत्तमाणं पुरिससीहाणं पुरिसवरपुंडरीयाणं पुरिसवरगंधहत्थीणं लोगुत्तमाणं लोगणाहाणं लोगहिआणं लोगपईवाणं लोगपज्जोयगराणं अभयदयाणं चक्खुदयाणं मग्गदयाणं सरणदयाणं बोहिदयाणं धम्मदयाणं धम्मदेसयाणं धम्मणायगाणं धम्मसारहीणं धम्म-वरचाउरंतचक्कवट्टीणं अप्पडिहयवरणाणदंसणधराणं विअट्टच्छउमाणं जिणाणं जावयाणं तिण्णाणं तारयाणं बुद्धाणं बोहयाणं मुत्ताणं मोयगाणं सव्वण्णूणं सव्वदरिसीणं सिवं अयलं अरुअं अणंतं अक्खयं अव्वाबाहं अपुणरावित्तिसिद्धिगइणामधेयं ठाणं] जाव संपत्ताणं वंदइ नमंसइ, वंदित्ता नमंसित्ता– ॥ २९२ ॥

[२९२] '**चंदप्पभवइरवेरुलियविमलदंड**'मिति चन्द्रप्रभ-वज्र-वैडूर्यमयो विमलो दण्डो यस्य स तथा तं, **काञ्चनमणिरत्नभक्तिचित्रं** कालागुरुप्रवरकुन्दुरुक्कतुरुक्कसत्केन धूपेन उत्तम-गन्धिनाऽनुविद्धा **कालागुरुप्रवरकुन्दुरुक्कतुरुक्कधूपगन्धोत्तमानुविद्धा,** प्राकृतत्वात् पदव्यत्ययः, तां, **धूपवर्त्तिं विनिर्मुञ्चन्तं वैडूर्यमयं** धूप**कडुच्छुयं**[2] **प्रगृह्य प्रयत्नतो धूपं दत्त्वा जिनवरेभ्यः,** सूत्रे षष्ठी प्राकृतत्वात्, **सप्ताष्टानि पदानि** पश्चादपसृत्य **दशाङ्गुलिमञ्जलिं मस्तके**

१. रयणवइरवेरुइय (क, ख, ग, घ, च, छ) । K २. ०च्छकं JKE ।

रचयित्वा प्रयत्नतो 'अट्ठसयविसुद्धगंथजुत्तेहिं'ति विशुद्धो-निर्मलः, लक्षणदोषरहित इति भावः यो ग्रन्थः-शब्दसन्दर्भस्तेन युक्तानि, अष्टशतं च तानि विशुद्धग्रन्थयुक्तानि च तैः, **अर्थयुक्तैः**-अर्थसारैर**पुनरुक्तैर्महावृत्तैः**, तथाविधदेवलब्धिप्रभाव एषः, **संस्तौति, संस्तुत्य वामं जानुं अञ्चति** इत्यादिना विधिना प्रणामं कुर्वन् प्रणिपातदण्डकं पठति ।

तद्यथा-'**नमोऽत्थु णं अरिहंताण**'मित्यादि, नमोऽस्तु 'ण'मिति वाक्यालङ्कारे देवादिभ्योऽतिशयपूजामर्हन्तीत्यर्हन्तस्तेभ्यः, सूत्रे षष्ठी "**छट्ठीविभत्तीए भन्नइ चउत्थी**" [ ] इति प्राकृतलक्षणवशात्, ते चार्हन्तो नामादिरूपा अपि सन्ति, ततो भावार्हत्प्रतिपत्त्यर्थमाह-**भगवद्भ्यः** भगः-समग्रैश्वर्यादिलक्षणः, स एषामस्तीति भगवन्तस्तेभ्यः, आदिः-धर्मस्य प्रथमा प्रवृत्तिस्तत्करणशीलाः आदिकरास्तेभ्यः, तीर्यते संसारसमुद्रोऽनेनेति तीर्थं-प्रवचनं, तत्करणशीलास्तीर्थकराः तेभ्यः, स्वयम्-अपरोपदेशेन सम्यग् वरबोधिप्राप्त्या बुद्धा-मिथ्यात्वनिद्रापगमसम्बोधेन स्वयंसम्बुद्धास्तेभ्यः, तथा पुरुषाणामुत्तमाः पुरुषोत्तमाः, भगवन्तो हि संसारमप्यावसन्तः सदा परार्थव्यसनिन उपसर्जनीकृतस्वार्था उचितक्रियावन्तोऽदीनभावाः कृतज्ञतापतयोऽनुपहतचित्ता देवगुरुबहुमानिन इति भवन्ति पुरुषोत्तमास्तेभ्यः, तथा पुरुषाः सिंहा इव कर्मगजान् प्रति पुरुषसिंहास्तेभ्यः, तथा पुरुषा वरपुण्डरीकाणीव संसारजलासङ्गादि[१]ना च कर्ममलव्यपेताः पुरुषवरपुण्डरीकाणि तेभ्यः, तथा पुरुषवरगन्धहस्तिन इव परचक्रदुर्भिक्ष-मारिप्रभृतिक्षुद्रगजनिराकरणेनेति पुरुषवरगन्धहस्तिनस्तेभ्यः, तथा लोको-भव्यसत्त्वलोकः, तस्य सकलकल्याणैकनिबन्धनतया भव्यत्वभावेनोत्तमा लोकोत्तमास्तेभ्यः, तथा लोकस्य नाथा-योगक्षेमकृतो लोकनाथास्तेभ्यः, तत्र योगो-बीजाधानोद्भेदपोषणकरणं क्षेमं तत्तदुपद्रवाद्यभावापादनं, तथा लोकस्य-प्राणिलोकस्य पञ्चास्तिकायात्मकस्य वा हिता-हितोपदेशेन सम्यक्प्ररूपणया वा लोकहितास्तेभ्यः, तथा लोकस्य-देशनायोग्यस्य प्रदीपा देशनांशुभिर्यथावस्थितवस्तुप्रकाशका लोकप्रदीपास्तेभ्यः, तथा लोकस्य-उत्कृष्टमतेर्भव्यसत्त्वलोकस्य प्रद्योतनं प्रद्योतकत्वं-विशिष्टा ज्ञानशक्तिस्तत्करणशीला लोकप्रद्योतकराः, तथा च भवन्ति भगवत्प्रसादात्तत्क्षणमेव भगवन्तो गणभृतो विशिष्टज्ञानसंपत्समन्विता यद्वशाद् द्वादशाङ्गमारचयन्तीति, तेभ्यः, तथा अभयं-विशिष्टमात्मनः स्वास्थ्यं, निःश्रेयसधर्मभूमिकानिबन्धनभूता परमा धृतिरिति भावः, ततः अभयं ददतीत्यभयदास्तेभ्यः, सूत्रे च 'क'प्रत्ययः स्वार्थिकः प्राकृतलक्षणवशात्, एवमन्यत्रापि, तथा चक्षुरिव चक्षुः-विशिष्ट आत्मधर्मः तत्त्वावबोधनिबन्धनः श्रद्धास्वभावः,

१. JKGE । °ना कर्ममला भावतो वा पु० मु. ॥

श्रद्धाविहीनस्याऽचक्षुष्मत इव रूप-तत्त्वदर्शनायोगात्, तद् ददतीति चक्षुर्दास्तेभ्यः, तथा मार्गो-विशिष्टगुणस्थानावाप्तिप्रगुणः स्वरसवाही क्षयोपशमविशेषस्तं ददतीति मार्गदाः, तथा शरणं-संसारकान्तारगतानामतिप्रबलरागादिपीडितानां समाश्वासनस्थानकल्पं तत्त्वचिन्तारूप-मध्यवसानं, तद्ददतीति शरणदास्तेभ्यः, तथा बोधिः-जिनप्रणीतधर्मप्राप्तिस्तत्त्वार्थश्रद्धान-लक्षणसम्यग्दर्शनरूपा तां ददतीति बोधिदास्तेभ्यः, तथा धर्मं-चारित्ररूपं ददतीति धर्मदा- 5
स्तेभ्यः, कथं धर्मदा इत्याह-धर्मं दिशन्तीति धर्मदेशकास्तेभ्यः, तथा धर्मस्य नायकाः-स्वामिनस्तद्वशीकरणभावात् तत्फलपरिभोगाच्च धर्मनायकाः, तेभ्यः, धर्मस्य सारथय इव सम्यक् प्रवर्त्तनयोगेन धमसारथयस्तेभ्यः, तथा धर्म एव वरं-प्रधानं चतुरन्तहेतुत्वात् चतुरन्तं चक्रमिव चतुरन्तचक्रं, तेन वर्त्तितुं शीलं येषां ते तथा तेभ्यः, तथा अप्रतिहते-अप्रतिस्खलिते क्षायिकत्वात् वरे-प्रधाने ज्ञानदर्शने धरन्तीति अप्रतिहतवरज्ञानदर्शनधरास्तेभ्यः, तथा 10
छादयन्तीति छद्म-घातिकर्मचतुष्टयं व्यावृत्तम्-अपगतं छद्म येभ्यस्ते व्यावृत्तच्छद्मानस्तेभ्यः,तथा राग-द्वेष-कषायेन्द्रिय-परीषहोपसर्ग-घातिकर्मशत्रून् स्वयं जितवन्तोऽन्यांश्च जापयन्तीति जिनाः जापकास्तेभ्यो जिनेभ्यो जापकेभ्यः, तथा भवार्णवं स्वयं तीर्णवन्तोऽन्याँश्च तारयन्तीति तीर्णास्तारकास्तेभ्यः, तथा केवलवेदसा अवगततत्त्वा बुद्धा अन्याँश्च बोधयन्तीति बोधकास्तेभ्यः, मुक्ताः कृतकृत्या, निष्ठितार्था इति भावस्तेभ्योऽन्याँश्च मोचयन्तीति मोचकास्तेभ्यः, सर्वज्ञेभ्यः 15
सर्वदर्शिभ्यः, 'शिवं' सर्वोपद्रवरहितत्वाद्, 'अचलं' स्वाभाविकप्रायोगिकचलनक्रियाऽपोहाद्, अरुजं शरीर-मनसोरभावेन आधि-व्याध्यसम्भवाद्, अनन्तं केवलात्मनाऽनन्तत्वाद्, अक्षयं विनाशकारणाभावाद्, 'अव्याबाधं' केनापि बाधयितुमशक्यममूर्त्तत्वाद्, न पुनरावृत्तिर्यस्मात् तदपुनरावृत्ति, सिध्यन्ति-निष्ठितार्था भवन्त्यस्यामिति सिद्धिः-लोकान्तक्षेत्रलक्षणा सैव गम्य-मानत्वाद् गतिः सिद्धिगतिरेव नामधेयं यस्य तत् सिद्धिगतिनामधेयं, तिष्ठत्यस्मिन् इति स्थानं- 20
व्यवहारतः सिद्धिक्षेत्रं निश्चयतो यथावस्थितं स्वं स्वरूपं स्थान-स्थानिनोरभेदोपचारात् तत् सिद्धिगतिनामधेयं स्थानं तत्सम्प्राप्तेभ्यः, एवं प्रणिपातदण्डकं पठित्वा ततो **'वंदइ नमंसइ'** इति वन्दते ताः प्रतिमाश्चैत्यवन्दनविधिना प्रसिद्धेन, नमस्करोति पश्चात्प्रणिधानादियोगेनेत्येके, *अन्ये त्वभिदधति-विरतिमतामेव प्रसिद्धश्चैत्यवन्दनविधिरन्येषां तथाऽभ्युपगमपुरस्सरकाय-व्युत्सर्गासिद्धेरिति* वन्दते सामान्येन नमस्करोति आशयवृद्धेरभ्युत्थाननमस्कारेणेति, तत्त्वमत्र 25
भगवन्तः परमर्षयः केवलिनो विदन्ति ॥ २९२ ॥

१. ०नस्य चक्षुष्मत इव रूपं तत्त्वदर्शनयोगात् - KJ ॥ २. °द्धा चै° JKE ॥

अत ऊर्ध्वं सूत्रं सुगमं केवलं भूयान् विधिविषयो वाचनाभेद इति यथावस्थितवाचना-प्रदर्शनार्थं विधिमात्रमुपदर्श्यते-तदनन्तरं लोमहस्तकेन देवच्छन्दकं प्रमार्जयति, पानीयधारया अभ्युक्षति, अभिमुखं सिञ्चतीत्यर्थः, तदनन्तरं गोशीर्षचन्दनेन[1] पञ्चाङ्गुलितलं ददाति, ततः पुष्पारोहणादि धूपदहनं च करोति ॥

सूत्र-२९३ : जेणेव सिद्धायतणस्स बहुमज्झदेसभाए तेणेव उवागच्छइ, उवागच्छित्ता[2] → लोमहत्थगं परामुसइ, परामुसित्ता सिद्धायतणस्स बहुमज्झदेसभागं लोमहत्थेणं पमज्जति, पमज्जित्ता ← दिव्वाए दगधाराए अब्भुक्खेइ, अब्भुक्खेत्ता सरसेणं गोसीसचंदणेणं पंचंगुलितलं[3] दलयइ, दलइत्ता कयग्गहगहियं जाव पुंजोवयारकलियं करेइ, करेत्ता धूवं दलयइ, दलयित्ता— ॥ २९३ ॥

[२९३] तदनन्तरं **सिद्धायतनबहुमध्यदेशभागे उदकधाराऽभ्युक्षण-चन्दनपञ्चाङ्गुलितलप्रदान-पुष्पपुञ्जोपचारधूपदानादि करोति** ॥ २९३ ॥

सूत्र-२९४ : जेणेव[4] सिद्धायतणस्स दाहिणिल्ले दारे तेणेव उवागच्छति, उवागच्छित्ता लोमहत्थगं परामुसइ, परामुसित्ता दारचेडाओ य सालभंजियाओ य वालरूवए य लोमहत्थएणं पमज्जइ, पमज्जित्ता दिव्वाए दगधाराए अब्भुक्खेइ, अब्भुक्खेत्ता सरसेणं गोसीसचंदणेणं चच्चए दलयइ, दलइत्ता पुप्फारुहणं जाव आभरणारुहणं करेइ, करेत्ता आसत्तोसत्त जाव धूवं दलयइ, दलयित्ता— ॥ २९४ ॥

[२९४] ततः **सिद्धायतनदक्षिणद्वारे** समागत्य **लोमहस्तकं** गृहीत्वा तेन **द्वारशाखे शालिभञ्जिका[5] व्यालरूपाणि च प्रमार्जयति**, तत **उदकधारयाऽभ्युक्षणं गोशीर्षचन्दनचर्चा पुष्पाद्यारोहणं धूपदानं करोति** ॥ २९४ ॥

सूत्र-२९५ : जेणेव दाहिणिल्ले दारे मुहमंडवे जेणेव दाहिणिल्लस्स मुहमंडवस्स बहुमज्झदेसभाए तेणेव उवागच्छइ, उवागच्छित्ता लोमहत्थगं परामुसइ, परामुसित्ता बहुमज्झदेसभागं लोमहत्थेणं पमज्जइ, पमज्जित्ता

१. गोशीर्ष० - JKE नास्ति ॥ २. →← चिह्नद्वयमध्यवर्तिपाठः जीवाभिगमे नास्ति । ३. पंचांगुलितलं मंडलगं आलिहइ, आलिहित्ता KG (क, ख, ग, घ, च, छ) । पंचंगुलितलेणं मंडलं आलिहति २ त्ता वच्चए दलयति-जीवा. ४५८ ॥ ४. जेणेव देवच्छंदए जेणेव सिद्धा० GI ५. शालभ० JKE ॥

दिव्वाए दगधाराए अब्भुक्खेइ, अब्भुक्खेत्ता सरसेणं गोसीसचंदणेणं पंचंगुलितलं मंडलगं आलिहइ, आलिहित्ता कयग्गहगहिय जाव धूवं दलयइ, दलयित्ता– ॥ २९५ ॥

[२९५] ततो **दक्षिणद्वारेण** निर्गत्य **दाक्षिणात्यस्य मुखमण्डपस्य बहुमध्यदेशभागे लोमहस्तकेन प्रमार्ज्योदकधाराभ्युक्षणं चन्दनपञ्चाङ्गुलितलप्रदान-पुष्पपुञ्जोपचार-धूपदानादि करोति, कृत्वा** ॥ २९५ ॥

सूत्र-२९६ : जेणेव दाहिणिल्लस्स मुहमंडवस्स पच्चत्थिमिल्ले दारे तेणेव उवागच्छइ, उवागच्छित्ता लोमहत्थगं परामुसइ, परामुसित्ता दारचेडीओ य सालभंजियाओ य वालरूवए य लोमहत्थेणं पमज्जइ, पमज्जित्ता दिव्वाए दगधाराए अब्भुक्खेइ, अब्भुक्खेत्ता सरसेणं गोसीसचंदणेण चच्चए दलयइ, दलयित्ता पुप्फारुहणं जाव आभरणारुहणं करेइ, करेत्ता आसत्तोसत्त कयग्गहगहिय० धूवं दलयइ, दलयित्ता– ॥ २९६ ॥

[२९६] **पश्चिमद्वारे** समागत्य → पूर्ववत् द्वारार्चनिकां करोति, कृत्वा च ॥ २९६ ॥

सूत्र-२९७ : जेणेव दाहिणिल्लस्स मुहमंडवस्स उत्तरिल्ला खंभपंती तेणेव उवागच्छइ, उवागच्छित्ता लोमहत्थं परामुसइ, परामुसित्ता खंभे य सालभंजियाओ य वालरूवए य लोमहत्थएणं पमज्जइ, पमज्जित्ता तं चेव जहा पच्चत्थिमिल्लस्स दारस्स जाव धूवं दलयइ, दलयित्ता ॥ २९७ ॥

[२९७] तस्यैव **दाक्षिणात्यस्य मुखमण्डपस्योत्तरस्यां स्तम्भपङ्क्तौ** समागत्य पूर्ववत्तदर्चनिकां विधत्ते ॥ २९७ ॥

सूत्र-२९८ : जेणेव दाहिणिल्लस्स मुहमंडवस्स पुरत्थिमिल्ले दारे तेणेव उवागच्छइ, उवागच्छित्ता लोमहत्थगं परामुसति, परामुसित्ता दारचेडाओ य

---

१. ०धारासिञ्चन पुष्प० JK भा.२ ॥ २. →← चिह्नद्वयमध्यवर्तिपाठः JKE पा. ४-५ नास्ति ॥ ३. द्र. सू० २९६ ।

सालभंजियाओ य वालरूवए य लोमहत्थेणं पमज्जइ, पमज्जित्ता तं[1] चेव सव्वं ॥ २९८ ॥

[२९८] इह यस्यां दिशि सिद्धायतनादिद्वारं, तत्रेतरस्य मुखमण्डपस्य स्तम्भपङ्क्तिः, ततस्तस्यैव **दाक्षिणात्यस्य मुखमण्डपस्य पूर्वद्वारे समागत्य** तत्पूजां करोति, कृत्वा ॥ २९८ ॥

सूत्र-२९९ : जेणेव दाहिणिल्लस्स मुहमंडवस्स दाहिणिल्ले दारे तेणेव उवागच्छइ, उवागच्छित्ता दारचेडीओ य सालभंजियाओ य वालरूवए य लोमहत्थेणं पमज्जइ, पमज्जित्ता तं[2] चेव सव्वं ॥ २९९ ॥

[२९९] तस्य **दाक्षिणात्यस्य मुखमण्डपस्य दक्षिणद्वारे समागत्य** ← पूर्ववत्पूजां विधाय ॥ २९९ ॥

सूत्र-३०० : जेणेव दाहिणिल्ले पेच्छाघरमंडवे जेणेव दाहिणिल्लस्स पेच्छाघरमंडवस्स बहुमज्झदेसभागे जेणेव वइरामए अक्खाडए जेणेव मणिपेढिया जेणेव सीहासणे तेणेव उवागच्छइ, उवागच्छित्ता लोमहत्थगं परामुसइ, परामुसित्ता अक्खाडगं च मणिपेढियं च सीहासणं च लोमहत्थएणं पमज्जइ, पमज्जित्ता दिव्वाए दगधाराए अब्भुक्खेइ, अब्भुक्खेत्ता सरसेणं गोसीसचंदणेणं चच्चए दलयइ, दलयित्ता पुप्फारुहणं जाव धूवं दलयइ, दलइत्ता– ॥ ३०० ॥

[३००] तेन द्वारेण विनिर्गत्य **प्रेक्षागृहमण्डपस्य बहुमध्यदेशभागे समागत्याऽक्षपाटकं मणिपीठिकां सिंहासनं च लोमहस्तकेन प्रमार्ज्योदकधारयाऽभ्युक्ष्य चन्दनचर्चा-पुष्पपूजा-धूपदानानि कृत्वा** ॥ ३०० ॥

सूत्र-३०१ : जेणेव दाहिणिल्लस्स पेच्छाघरमंडवस्स पच्चत्थिमिल्ले दारे तं[3] चेव ॥ ३०१ ॥

---

१. द्र. सू० २९६ । २. द्र. सू० २९६ । ३. द्र. सू० २९६ ।

सूत्र-३०२ : उत्तरिल्ले दारे [१](उत्तरिल्ला खंभपंती ?) [तेणेव उवागच्छइ, उवागच्छित्ता] तं चेव ॥ ३०२ ॥

सूत्र-३०३ : [जेणेव दाहिणिल्लस्स पेच्छाघरमंडवस्स] पुरत्थिमिल्ले दारे [तेणेव उवागच्छइ, उवागच्छित्ता] तं चेव ॥ ३०३ ॥

सूत्र-३०४ : [जेणेव दाहिणिल्लस्स पेच्छाघरमंडवस्स] दाहिणिल्ले दारे [तेणेव उवागच्छइ, उवागच्छित्ता] तं चेव ॥ ३०४ ॥

[३०१-३०४] तस्यैव **प्रेक्षागृहमण्डपस्य** क्रमेण **पश्चिमोत्तर-पूर्व-दक्षिणद्वाराणा**मर्चनिकां कृत्वा ॥ ३०१-३०४ ॥

सूत्र-३०५ : जेणेव दाहिणिल्ले चेइयथूभे तेणेव उवागच्छइ, उवागच्छित्ता थूभं च मणिपेढियं च दिव्वाए दगधाराए अब्भुक्खेइ, अब्भुक्खेत्ता सरसेणं गोसीसचंदणेणं चच्चए दलयइ, दलयित्ता पुप्फारुहणं आसत्तोसत्त जाव धूवं दलयइ, दलयित्ता– ॥ ३०५ ॥

[३०५] **दक्षिणद्वारेण** विनिर्गत्य **चैत्यस्तूपं मणिपीठिकां च लोमहस्तकेन प्रमार्ज्योदकधारयाऽभ्युक्ष्य सरसेन गोशीर्षचन्दनकेन पञ्चाङ्गुलितलं दत्त्वा पुष्पाद्यारोहणं** च विधाय **धूपं ददाति** ॥ ३०५ ॥

सूत्र-३०६ : जेणेव पच्चत्थिमिल्ला मणिपेढिया जेणेव पच्चत्थिमिल्ला जिणपडिमा तेणेव उवागच्छइ, उवागच्छित्ता जिणपडिमाए आलोए पणामं करेइ, करेत्ता [२]तं चेव ॥ ३०६ ॥

[३०६] ततो यत्र **पाश्चात्या मणिपीठिका** तत्रागच्छति, तत्रागत्याऽऽलोके **प्रणामं करोति, कृत्वा** लोमहस्तकेन प्रमार्जनं, सुरभिगन्धोदकेन स्नानं, सरसेन गोशीर्षचन्दनेन

१. "यथा–२९७ सूत्रे 'उत्तरिल्ला खंभपंती', ३२५, ३३० सूत्रयोः 'दाहिणिल्ला खंभपंती' ३३५, ३४० सूत्रयोः 'पच्चत्थिमिल्ला खंभपंती'–इति पाठो विद्यते, अतः अस्मिन् सूत्रे 'उत्तरिल्ले दारे' इत्यस्य स्थाने 'उत्तरिल्ला खंभपंती' इति पाठो युज्यते। किन्तु एष पाठो वृत्तौ प्रतिषु च क्वापि नोपलब्धः तेन मूलपाठे 'उत्तरिल्ले दारे' इत्येव सुरक्षितः।" इति V पृ. १५१ टि. ७। २. द्र. सू० २९१, २९२।

गात्रानुलेपनं, देवदूष्ययुगलपरिधानं, पुष्पाद्यारोहणं, पुरतः पुष्पपुञ्जोपचारं, धूपदानं, पुरतो दिव्यतन्दुलैरष्टमङ्गलकालेखनमष्टोत्तरशतवृत्तैः स्तुतिं, प्रणिपातदण्डकपाठं च कृत्वा वन्दते, नमस्यति ॥ ३०६ ॥

सूत्र-३०७ : जेणेव उत्तरिल्ला मणिपेढिया जेणेव उत्तरिल्ला जिणपडिमा तेणेव उवागच्छइ, उवागच्छित्ता [१]तं चेव सव्वं ॥ ३०७ ॥

सूत्र-३०८ : जेणेव पुरत्थिमिल्ला मणिपेढिया जेणेव पुरत्थिमिल्ला जिणपडिमा तेणेव उवागच्छइ, उवागच्छित्ता [२]तं चेव ॥ ३०८ ॥

सूत्र-३०९ : जेणेव दाहिणिल्ला मणिपेढिया जेणेव दाहिणिल्ला जिणपडिमा तेणेव उवागच्छइ, उवागच्छित्ता [३]तं चेव सव्वं ॥ ३०९ ॥

[३०७-३०९] तत एवमेव क्रमेण उत्तर-पूर्व-दक्षिणप्रतिमानामप्यर्चनिकां कृत्वा ॥३०७-९॥

सूत्र-३१० : जेणेव दाहिणिल्ले चेइयरुक्खे तेणेव उवागच्छइ, [४]तं चेव ॥ ३१० ॥

[३१०] दक्षिणद्वारेण विनिर्गत्य **दक्षिणस्यां** दिशि यत्र **चैत्यवृक्षः** तत्र समागत्य चैत्यवृक्षस्य द्वारवदर्चनिकां करोति ॥ ३१० ॥

सूत्र-३११ : जेणेव दाहिणिल्ले महिंदज्झए [५]तं चेव सव्वं ॥ ३११ ॥

[३११] ततो **महेन्द्रध्वजस्य** ततः ॥ ३११ ॥

सूत्र-३१२ : जेणेव दाहिणिल्ला नंदापुक्खरिणी तेणेव उवागच्छइ, उवागच्छित्ता लोमहत्थगं परामुसति, परामुसित्ता तोरणे य तिसोवाणपडिरूवए य सालभंजियाओ य वालरूवए य लोमहत्थएणं पमज्जइ, पमज्जित्ता दिव्वाए दगधाराए अब्भुक्खेइ, अब्भुक्खेत्ता सरसेणं गोसीसचंदणेणं पुप्फारुहणं जाव आभरणारुहणं करेइ, करेत्ता आसत्तोसत्त० धूवं दलयति, दलइत्ता– ॥ ३१२ ॥

१-२-३. द्र. सू० २९१, २९२ । ४. द्र. सू० २९४ । ५. द्र. सू० २९४ ।

[३१२] यत्र दाक्षिणात्या नन्दा पुष्करिणी तत्र समागच्छति, समागत्य तोरणत्रिसोपानप्रतिरूपकगतशालभञ्जिका-व्यालकरूपाणां लोमहस्तकेन प्रमार्जनं जलधारयाऽभ्युक्षणं चन्दनचर्चां पुष्पाद्यारोहणं धूपदानं च कृत्वा ॥ ३१२ ॥

सूत्र-३१३ : सिद्धायतणं अणुपयाहिणीकरेमाणे जेणेव उत्तरिल्ला णंदापुक्खरिणी तेणेव उवागच्छति, उवागच्छित्ता तं[1] चेव ॥ ३१३ ॥

[३१३] सिद्धायतनमनुप्रदक्षिणीकृत्योत्तरस्यां नन्दापुष्करिण्यां समागत्य पूर्ववत्तस्या अर्चनिकां करोति ॥ ३१३ ॥

सूत्र-३१४ : जेणेव उत्तरिल्ले महिंदज्झए तेणेव उवागच्छइ, उवागच्छित्ता[2] ॥ ३१४ ॥

[३१४] तत उत्तराहे महेन्द्रध्वजे[3] ॥ ३१४ ॥

सूत्र-३१५ : जेणेव उत्तरिल्ले चेइयरुक्खे तेणेव उवागच्छइ, उवागच्छित्ता ॥ ३१५ ॥

[३१५] तदनन्तरमुत्तराहे चैत्यवृक्षे ॥ ३१५ ॥

सूत्र-३१६ : जेणेव उत्तरिल्ले चेइयथूभे तेणेव उवागच्छइ, उवागच्छित्ता[4] ॥ ३१६ ॥

[३१६] तत उत्तराहे चैत्यस्तूपे ततः ॥ ३१६ ॥

सूत्र-३१७ : जेणेव पच्चत्थिमिल्ला मणिपेढिया जेणेव पच्चत्थिमिल्ला जिणपडिमा तं[5] चेव ॥ ३१७ ॥

सूत्र-३१८ : जेणेव उत्तरिल्ला मणिपेढिया जेणेव उत्तरिल्ला जिणपडिमा तेणेव उवागच्छइ, उवागच्छित्ता तं[6] चेव ॥ ३१८ ॥

सूत्र-३१९ : जेणेव पुरत्थिमिल्ला मणिपेढिया जेणेव पुरत्थिमिल्ला जिणपडिमा तेणेव उवागच्छइ, उवागच्छित्ता तं[7] चेव ॥ ३१९ ॥

---

१. द्र. सू० ३१२ । २. द्र. सू० ३११ । ३. मा० JKE ॥ ४. द्र. सू० ३१० । ५-६-७. द्र. सू० ३०६ ।

सूत्र-३२० : जेणेव दाहिणिल्ला मणिपेढिया जेणेव दाहिणिल्ला जिणपडिमा तेणेव उवागच्छइ, उवागच्छित्ता तं[१] चेव ॥ ३२० ॥

[३१७-३२०] पश्चिमोत्तर-पूर्व-दक्षिणजिनप्रतिमानां पूर्ववत् पूजां विधाय ॥३१७-३२०॥

सूत्र-३२१ : जेणेव उत्तरिल्ले पेच्छाघरमंडवे जेणेव उत्तरिल्लस्स पेच्छाघरमंडवस्स बहुमज्झदेसभागे जेणेव वइरामए अक्खाडए जेणेव मणिपेढिया जेणेव सीहासणे तेणेव उवागच्छइ, उवागच्छित्ता जा चेव दाहिणिल्ले वत्तव्वया सा[२] चेव सव्वा ॥ ३२१ ॥

[३२१] उत्तराहे प्रेक्षागृहमण्डपे समागच्छति, तत्र दाक्षिणात्यप्रेक्षागृहमण्डपवत् सर्वा वक्तव्यता वक्तव्या ॥ ३२१ ॥

सूत्र-३२२ : जेणेव उत्तरिल्लस्स पेच्छाघरमंडवस्स पच्चत्थिमिल्ले दारे तेणेव उवागच्छइ, उवागच्छित्ता[३] ॥ ३२२ ॥

सूत्र-३२३ : जेणेव उत्तरिल्लस्स पेच्छाघरमंडवस्स उत्तरिल्ले दारे तेणेव उवागच्छइ, उवागच्छित्ता[४] ॥ ३२३ ॥

सूत्र-३२४ : जेणेव उत्तरिल्लस्स पेच्छाघरमंडवस्स पुरत्थिमिल्ले दारे तेणेव उवागच्छइ, उवागच्छित्ता[५] ॥ ३२४ ॥

सूत्र-३२५ : जेणेव उत्तरिल्लस्स पेच्छाघरमंडवस्स दाहिणिल्ला खंभपंती तेणेव उवागच्छइ, उवागच्छित्ता[६] ॥ ३२५ ॥

सूत्र-३२६ : जेणेव उत्तरिल्ले दारे मुहमंडवे जेणेव उत्तरिल्लस्स मुहमंडवस्स बहुमज्झदेसभाए तेणेव उवागच्छइ, उवागच्छित्ता[७] ॥ ३२६ ॥

सूत्र-३२७ : जेणेव उत्तरिल्लस्स मुहमंडवस्स पच्चत्थिमिल्ले दारे तेणेव उवागच्छइ, उवागच्छित्ता[८] ॥ ३२७ ॥

---

१. द्र. सू० ३०६ । २. द्र. सू० ३०० । ३-४-५. द्र. सू० २९६ । ६. द्र. सू० २९७ । ७. द्र सू० २९५ । ८. द्र० सू० २९६ ।

सूत्र-३२८ : जेणेव उत्तरिल्लस्स मुहमंडवस्स उत्तरिल्ले दारे तेणेव उवागच्छइ, उवागच्छित्ता[१] ॥ ३२८ ॥

सूत्र-३२९ : जेणेव उत्तरिल्लस्स मुहमंडवस्स पुरत्थिमिल्ले दारे तेणेव उवागच्छइ, उवागच्छित्ता[२] ॥ ३२९ ॥

[३२२-३२९] ततो दक्षिणस्तम्भपङ्क्त्या विनिर्गत्योत्तराहे मुखमण्डपे समागच्छति, तत्रापि दाक्षिणात्यमुखमण्डपवत् सर्वं पश्चिमोत्तर-पूर्वद्वारक्रमेण कृत्वा ॥ ३२२-३२९ ॥

सूत्र-३३० : जेणेव उत्तरिल्लस्स मुहमंडवस्स दाहिणिल्ला खंभपंती तेणेव उवागच्छइ, उवागच्छित्ता[३] ॥ ३३० ॥

सूत्र-३३१ : जेणेव सिद्धायतणस्स उत्तरिल्ले दारे तेणेव उवागच्छइ, उवागच्छित्ता[४] तं चेव ॥ ३३१ ॥

सूत्र-३३२ : जेणेव सिद्धायतणस्स पुरित्थिमिल्ले दारे तेणेव उवागच्छइ, उवागच्छित्ता[५] ॥ ३३२ ॥

सूत्र-३३३ : जेणेव पुरत्थिमिल्ले दारे मुहमंडवे जेणेव पुरित्थिमिल्लस्स मुहमंडवस्स बहुमज्झदेसभागे तेणेव उवागच्छइ, उवागच्छित्ता[६] तं चेव ॥३३३॥

सूत्र-३३४ : जेणेव पुरत्थिमिल्लस्स मुहमंडवस्स दाहिणिल्ले दारे[७] [उवागच्छइ उवागच्छित्ता ॥ ३३४ ॥

सूत्र-३३५ : जेणेव पुरत्थिमिल्लस्स मुहमंडवस्स] पच्चत्थिमिल्ला खंभपंती [तेणेव उवागच्छइ, उवागच्छित्ता ॥ ३३५ ॥

सूत्र-३३६ : जेणेव पुरत्थिमिल्लस्स मुहमंडवस्स] उत्तरिल्ले दारे तं चेव ॥ ३३६ ॥

---

१. द्र. सू० २९६ । २. द्र. सू० २९६ । ३. द्र. सू० २९७ । ४. द्र. सू० २९४ । ५. द्र० सु० २९४ । ६. द्र. सू० २९५ । ७. द्र. सू० २९६-२९७ ।

सूत्र-३३७ : पुरत्थिमिल्ले दारे तं चेव ॥ ३३७ ॥

सूत्र-३३८-३५० : जेणेव पुरत्थिमिल्ले - पेच्छाघरमंडवे[१] एवं थूभे जिणपडिमाओ चेइयरुक्खा महिंदज्झया नंदापुक्खरिणी तं चेव जाव धूवं दलइ, दलइत्ता ॥ ३३८-३५० ॥

[३३०-३५०] दक्षिणस्तम्भपङ्क्त्या विनिर्गत्य **सिद्धायतनस्योत्तरद्वारे समागत्य** पूर्ववदर्चनिकां कृत्वा **पूर्वद्वारेण[२] समागच्छति**, तत्रार्चनिकां पूर्ववत्कृत्वा **पूर्वस्य मुखमण्डपस्य** दक्षिणद्वारे पश्चिमस्तम्भपङ्क्त्या[३] उत्तरपूर्वद्वारेषु क्रमेणोक्तरूपां पूजां विधाय पूर्वद्वारेण विनिर्गत्य **पूर्वप्रेक्षागृहमण्डपे** समागत्य पूर्ववत् द्वारमध्यभागदक्षिणद्वारपश्चिमस्तम्भपङ्क्त्या[४] उत्तरपूर्वद्वारेषु पूर्ववदर्चनिकां करोति, ततः पूर्वप्रकारेणैव क्रमेण **चैत्यस्तूप-जिनप्रतिमा-चैत्यवृक्ष-महेन्द्रध्वज-नन्दापुष्करिणीनाम्** ॥ ३३०-३५० ॥

सूत्र-३५१ : जेणेव सभा सुहम्मा तेणेव उवागच्छति, उवागच्छित्ता सभं सुहम्मं पुरत्थिमिल्लेणं दारेणं अणुपविसइ, अणुपविसित्ता[५] जेणेव माणवए चेइयखंभे जेणेव वइरामया गोलवट्टसमुग्गा तेणेव उवागच्छइ, उवागच्छित्ता लोमहत्थगं परामुसइ, परामुसित्ता वइरामए गोलवट्टसमुग्गए लोमहत्थेणं पमज्जइ, पमज्जित्ता वइरामए गोलवट्टसमुग्गए विहाडेइ, विहाडेत्ता जिणसकहाओ लोमहत्थेणं पमज्जइ, पमज्जित्ता सुरभिणा गंधोदएणं पक्खालेइ, पक्खालेत्ता अग्गेहिं वरेहिं गंधेहिं य मल्लेहि य अच्चेइ, अच्चेत्ता धूवं दलयइ, दलयित्ता जिणसकहाओ[६] वइरामएसु गोलवट्टसमुग्गएसु पडिणिक्खिवइ, पडिणिक्खिवित्ता माणवगं चेइयखंभं लोमहत्थएणं पमज्जइ, पमज्जित्ता दिव्वाए दगधाराए अब्भुक्खेइ, अब्भुक्खेत्ता सरसेणं गोसीसचंदणेणं चच्चए दलयइ, दलयित्ता पुप्फारुहणं[७] जाव धूवं दलयइ, दलयित्ता—॥३५१॥

---

१. द्र. सू० २९६-३१२ । २. ०ण - JKE नास्ति ॥ ३. ०क्त्युत्त० JKE ॥ ४. ०क्त्युत्त० JKE ॥ ५. "अतः 'पडिणिक्खिवइ' पर्यन्तं वृत्तौ (पृष्ठ २६४) भिन्नः पाठो व्याख्यातोऽस्ति द्रष्टव्यं जीवाजीवाभिगमस्य-३।५१६ सूत्रम् ।" इति V पृ. १५५ टि. १० । ६. 'विवरणे नैतत्पदं विवृतं प्रतिभाति' इति G पृ. २६४ टिप्पणे' । ७. द्र. सू० २९४ ।

[३५१] ततः **सभायां सुधर्मायां पूर्वद्वारेण प्रविशति, प्रविश्य** यत्रैव मणिपीठिका तत्राऽऽगच्छति, आलोके च जिनप्रतिमानां प्रणामं करोति, कृत्वा **यत्र माणवकचैत्यस्तम्भो यत्र वज्रमया गोलवृत्ताः समुद्गकाः तत्रागत्य समुद्गकान्** गृह्णाति, गृहीत्वा **विघाटयति, विघाट्य च लोमहस्तकं परामृश्य तेन प्रमार्ज्योदकधारया अभ्युक्ष्य गोशीर्षचन्दनेनाऽनुलिम्पति,** ततः **प्रधानैर्गन्धमाल्यैरर्चयति, धूपं दहति,** तदनन्तरं भूयोऽपि **वज्रमयेषु गोलवृत्तसमुद्गेषु प्रतिनिक्षिपति, प्रतिनिक्षिप्य**→तान् वज्रमयान् गोलवृत्तसमुद्गकान् स्वस्थाने प्रतिनिक्षिपति,← तेषु पुष्पगन्धमाल्यवस्त्राभरणानि चारोपयति, ततो लोमहस्तकेन **माणवकचैत्यस्तम्भं प्रमार्ज्योदकधारयाऽभ्युक्षण-चन्दनचर्चापुष्पाद्यारोपणं धूपदानं च करोति, कृत्वा च** ॥ ३५१ ॥

सूत्र-३५२ : जेणेव मणिपेढिया जेणेव सीहासणे तं चेव ॥ ३५२ ॥

[३५२] सिंहासनप्रदेशे समागत्य **मणिपीठिकायाः सिंहासनस्य च** लोमहस्तकेन प्रमार्जनादिरूपां पूर्ववदर्चनिकां करोति, कृत्वा ॥ ३५२ ॥

सूत्र-३५३ : जेणेव मणिपेढिया जेणेव देवसयणिज्जे तं चेव ॥ ३५३ ॥

[३५३] यत्र **मणिपीठिका यत्र च देवशयनीयं** तत्रोपागत्य मणिपीठिकाया देवशयनीयस्य च द्वारवदर्चनिकां करोति ॥ ३५३ ॥

सूत्र-३५४ : जेणेव मणिपेढिया जेणेव खुड्डागमहिंदज्झए तं चेव ॥ ३५४ ॥

[३५४] तत उक्तप्रकारेणैव **क्षुल्लकेन्द्रध्वजे** पूजां करोति ॥ ३५४ ॥

सूत्र-३५५ : जेणेव पहरणकोसे चोप्पालए तेणेव उवागच्छइ, उवागच्छित्ता लोमहत्थगं परामुसइ, परामुसित्ता पहरणकोसं चोप्पालं (फलिहरयणपामोक्खाइं पहरणरयणाइं) लोमहत्थएणं पमज्जइ, पमज्जित्ता दिव्वाए दगधाराए अब्भुक्खेइ, अब्भुक्खेत्ता सरसेणं गोसीसचंदणेणं चच्चए दलयइ, दलयित्ता पुप्फारुहणं आसत्तोसत्त जाव धूवं दलयइ, दलयित्ता— ॥ ३५५ ॥

---

१. जिनसक्थां - K । जिनसक्कां - J । जिनसत्कां - E ॥ २. मुद्गकेषु - JK ॥ ३. →← चिह्नद्वयमध्यवर्तिपाठः JKE नास्ति ॥ ४. ०क्ष्य च० JK ॥ ५. द्र. सू० २९४ । ६. ०प्रदेशमागत्य - JK ॥ ७. द्र. सू० २९४ । ८. पहरणकोसं चोप्पालं K (क, ख, ग, घ, च, छ); २४९ सूत्रस्य सन्दर्भे आदर्शगतः पाठः सम्यग् न प्रतिभाति ।

[३५५] ततो यत्र **चोप्पालको** नाम **प्रहरणकोशस्तत्र** समागत्य **लोमहस्तकेन परिघरत्नप्रमुखाणि प्रहरणरत्नानि प्रमार्जयति, प्रमार्ज्योदकधारयाऽभ्युक्षणं चंदनचर्चां पुष्पाद्यारोपणं धूपदानं च करोति ॥**

सूत्र-३५६ : [१]जेणेव सभाए सुहम्माए बहुमज्झदेसभाए जेणेव मणिपेढिया जेणेव देवसयणिज्जे तेणेव उवागच्छइ, उवागच्छित्ता जाव धूवं दलयइ, दलयित्ता–

[३५६] तत **सभायाः सुधर्माया बहुमध्यदेशभागे**ऽर्चनिकां पूर्ववत् करोति ॥ ३५६ ॥

सूत्र-३५७-६५३ : [२]जेणेव सभाए सुहम्माए दाहिणिल्ले दारे तहेव अभिसेयसभासरिसं जाव पुरत्थिमिल्ला नंदा पुक्खरिणी जेणेव हरए तेणेव उवागच्छइ, उवागच्छित्ता तोरणे य तिसोवाणे य सालिभंजियाओ वालरूवए य तहेव, जेणेव अभिसेयसभा तेणेव उवागच्छइ, उवागच्छित्ता तहेव सीहासणं च मणिपेढियं च सेसं तहेव आययणसरिसं जाव पुरत्थिमिल्ला नंदा पुक्खरिणी, जेणेव अलंकारियसभा तेणेव उवागच्छइ, उवागच्छित्ता जहा अभिसेयसभा तहेव सव्वं जेणेव ववसायसभा तेणेव उवागच्छइ, उवागच्छित्ता तहेव लोमहत्थयं परामुसइ, पोत्थयरयणे लोमहत्थएणं पमज्जइ, पमज्जित्ता दिव्वाए दगधाराए अग्गेहिं वरेहिं य गंधेहिं मल्लेहिं य अच्चेइ, अच्चेत्ता मणिपेढियं सीहासणं च सेसं तं चेव, पुरत्थिमिल्ला नंदा पुक्खरिणी । →[३]जेणेव हरए तेणेव उवागच्छइ उवागच्छित्ता तोरणे य तिसोवाणं य सालिभंजियाओ य बालरूवए य तहेव← ॥ ३५७-६५३ ॥

---

१. प्रस्तुतसूत्रस्य तथा जीवाजीवाभिगमस्य (पत्र २५७) सभायाः सुधर्माया बहुमध्यदेशभागेऽर्चनिकां पूर्ववत् करोति–इति विवरणानुसारी पाठोऽत्र स्वीकृतः । यद्यपि प्रतिषु 'जेणेव सभाए सुहम्माए बहुमज्झदेसभाए जेणेव मणिपेढिया जेणेव देवसयणिज्जे तेणेव'–इति पाठोऽस्ति, किन्तु 'जेणेव मणिपेढिया जेणेव देवसयणिज्जे' अयं पाठः पूर्वपंक्तावेवागतस्तेन पुनर्न युज्यते ।" इति V पृ. १५६ टि. ९ ॥ २. V । जेणेव उववायसभाए दाहि० मु. GK । द्र. सू. २९४-३५० ॥ ३. →← चिह्नद्वयमध्यवर्तिपाठः सर्वासु प्रतिषु वर्तते, किन्तु अस्य सूत्रस्य वृत्तौ तथा जीवाजीवाभिगमस्य वृत्तौ (पत्र २५८) चापि नासौ व्याख्यातोऽस्ति । उपपातसभाया अनन्तरमसौ पाठोऽविकलरूपेण समायातः सम्भवतः लिपिदोषेण सोऽत्रापि पुनर्लिखितः इति V पृ. १५६-१५७ टि. ११ ॥

[३५७] कृत्वा **सुधर्मायाः सभाया दक्षिणद्वारे समागत्य** तस्य अर्चनिकां पूर्ववत् कुरुते ॥

[३५८-३७५] ततो दक्षिणद्वारेण विनिर्गच्छति, इत उर्ध्वं यथैव सिद्धायतनान्निष्क्रामतो दक्षिणद्वारादिका दक्षिणनन्दापुष्करिणीपर्यवसाना पुनरपि प्रविशतः उत्तरनन्दापुष्करिण्यादिका उत्तरद्वारान्ता ततो द्वितीयद्वारान्निष्क्रामतः पूर्वद्वारादिका पूर्वनन्दापुष्करिणीपर्यवसाना अर्चनिका-वक्तव्यता, सैव सुधर्मायां सभायामप्यन्यूनाऽतिरिक्ता वक्तव्या, ततः पूर्वनन्दापुष्करिण्या अर्चनिकां कृत्वा ॥ ३५७-३७५ ॥

[३७६-४१४] **उपपातसभां पूर्वद्वारेण प्रविशति**, प्रविश्य च **मणिपीठिकाया देवशयनीयस्य** ॥

[४१५] तदनन्तरं **बहुमध्यदेशभागे** प्राग्वदर्चनिकां विदधाति ॥

[४१६] ततो **दक्षिणद्वारे समागत्य** तस्यार्चनिकां कुरुते ॥

[४१७-६५३] अत ऊर्ध्वमत्रापि सिद्धायतनवत् दक्षिणद्वारादिका पूर्वनन्दापुष्करिणी-पर्यवसानाऽर्चनिका वक्तव्या, ततः पूर्वनन्दापुष्करिणीतोऽपक्रम्य ह्रदे समागत्य पूर्ववत् तोरणार्चनिकां करोति, कृत्वा पूर्वद्वारेणाऽभिषेकसभां प्रविशति, प्रविश्य मणिपीठिकायाः सिंहासनस्याऽभिषेकभाण्डस्य बहुमध्यदेशभागस्य च क्रमेण पूर्ववदर्चनिकां करोति, ततोऽत्रापि सिद्धायतनवद् दक्षिणद्वारादिका पूर्वनन्दापुष्करिणीपर्यवसानाऽर्चनिका वक्तव्या, ततः पूर्वनन्दापुष्करिणीतः पूर्वद्वारेणालङ्कारिकसभां प्रविशति, प्रविश्य मणिपीठिकायाः सिंहासनस्य [१]अभिषेकभाण्डस्य बहुमध्यदेशभागस्य च क्रमेण पूर्ववदर्चनिकां करोति, [२]ततोऽत्रापि सिद्धायतनवत् दक्षिणद्वारादिका पूर्वनन्दापुष्करिणीपर्यवसानाऽर्चनिका वक्तव्या, ततः पूर्वनन्दापुष्करिणीतः पूर्वद्वारेणाऽलङ्कारिकसभां प्रविशति, प्रविश्य मणिपीठिकायाः सिंहासनस्य [३]अलङ्कारभाण्डस्य बहुमध्यदेशभागस्य च क्रमेण पूर्ववदर्चनिकां करोति तत्रापि क्रमेण सिद्धायतनवत् दक्षिणद्वाराऽऽदिका पूर्वनन्दापुष्करिणीपर्यवसानाऽर्चनिका वक्तव्या, ततः पूर्वनन्दापुष्करिणीतः पूर्वद्वारेण व्यवसायसभां प्रविशति, प्रविश्य पुस्तकरत्नं लोमहस्तकेन प्रमृज्योदकधारया अभ्युक्ष्य चन्दनेन चर्चयित्वा वरगन्धमाल्यैरर्चयित्वा पुष्पाद्यारोपणं धूपदानं च करोति, तदनन्तरं मणिपीठिकायाः सिंहासनस्य बहुमध्यदेशभागस्य च क्रमेण पूर्ववदर्चनिकां

१. अलंकार भाण्डस्य - G । २. तत्राऽपि-G । ३. JK । अलङ्कारभाण्डस्य - मु. नास्ति ॥

करोति, तदनन्तरमत्रापि सिद्धायतनवद् दक्षिणद्वारादिका पूर्वनन्दापुष्करिणीपर्यवसाना अर्चनिका वक्तव्या ॥ ४१७-६५३ ॥

सूत्र-६५४ : जेणेव[1] बलिपीढे तेणेव उवागच्छइ, उवागच्छित्ता बलिविसज्जणं करेइ, करेत्ता आभिओगिए देवे सद्दावेइ, सद्दावेत्ता एवं वयासी–खिप्पामेव भो देवाणुप्पिया ! सूरियाभे विमाणे सिंघाडएसु तिएसु चउक्केसु चच्चरेसु चउम्मुहेसु महापह[2]-पहेसु पागारेसु अट्टालएसु चरियासु दारेसु गोपुरेसु तोरणेसु आरामेसु उज्जाणेसु काणणेसु वणेसु वणसंडेसु वणराईसु अच्चणियं करेह, करेत्ता एयमाणत्तियं खिप्पामेव पच्चप्पिणह ॥ ६५४ ॥

सूत्र-६५५ : तए णं ते आभिओगिया देवा सूरियाभेणं देवेणं एवं वुत्ता समाणा जाव पडिसुणेत्ता सूरियाभे विमाणे सिंघाडएसु तिएसु चउक्कएसु चच्चरेसु चउम्मुहेसु महापह[3]-पहेसु पागारेसु अट्टालएसु चरियासु दारेसु गोपुरेसु तोरणेसु आरामेसु उज्जाणेसु काणणेसु वणेसु वणसंडेसु वणराईसु अच्चणियं करेंति, करेत्ता जेणेव सूरियाभे देवे जाव पच्चप्पिणंति ॥ ६५५ ॥

सूत्र-६५६ : तते[4] णं से सूरियाभे देवे जेणेव णंदा पुक्खरिणी तेणेव उवागच्छइ, उवागच्छित्ता नंदं पुक्खरिणिं पुरत्थिमिल्लेणं तिसोमाणपडिरूवएणं पच्चोरुहति, पच्चोरुहित्ता हत्थपाए पक्खालेइ, पक्खालेत्ता णंदाओ पुक्खरिणीओ पच्चुत्तरेइ, पच्चुत्तरेत्ता जेणेव सभा सुधम्मा तेणेव पहारेत्थ गमणाए ॥ ६५६ ॥

[६५४-६५६] ततः पूर्वनन्दापुष्करिणीतो बलिपीठे समागत्य तस्य बहुमध्यदेशभागवद् अर्चनिकां करोति, कृत्वा चाऽऽभियोगिकदेवान् शब्दापयति, शब्दापयित्वा एवमवादीत्-

---

१. वृत्तौ (पृष्ठ २६७) अस्य पाठस्य स्थाने भिन्नः पाठो व्याख्यातोऽस्ति ६५६ सूत्रे 'तए णं से सूरियाभे देवे' इति पाठान्तरं व्याख्यातमस्ति ।' इति V पृ. १५९ टि. ५ । २-३. V । महापहेसु - मु. G ॥ ४. "वृत्तौ (पृष्ठ २६८) भिन्नः पाठो व्याख्यातोऽस्ति– द्रष्टव्यं जीवाजीवाभिगमस्य ३।५५६ सूत्रम् ।" इति V पृ. १६० टि. २ ।

'**खिप्पामेवे**'त्यादि सुगमं यावत् '**तमाणत्तियं पच्चप्पिणंति**'[१] नवरं शृङ्गाटकः-शृङ्गाटकाऽऽकृतिपथयुक्तं त्रिकोणं स्थानं, त्रिकं-यत्र रथ्यात्रयं मिलति, चतुष्कं-चतुष्पथयुक्तं, चत्वरं-बहुरथ्यापातस्थानं, चतुर्मुखं-यस्माच्चतसृष्वपि दिक्षु पन्थानो निस्सरन्ति, महापथो-राजपथः, शेषः सामान्यः पन्थाः, प्राकारः प्रतीतः, अट्टालकाः-प्राकारस्योपरि भृत्याश्रयविशेषाः, चरिका-अष्टहस्तप्रमाणो नगरप्राकारान्तरालमार्गः, द्वाराणि-प्रासादादीनां, गोपुराणि-प्राकारद्वाराणि, तोरणानि-द्वारादिसम्बन्धीनि, आरमन्ते यत्र माधवीलतागृहादिषु दम्पत्यादीनि[२] इत्यसावारामः, पुष्पादिमयवृक्षसंकुलमुत्सवादौ[३] बहुजनोपभोग्यमुद्यानं, सामान्यवृक्षवृन्दनगरासन्नं काननं, नगरविप्रकृष्टं वनम्, एकाऽनेकजातीयोत्तमवृक्षसमूहो वनखण्डः, एकजातीयोत्तमवृक्षसमूहो[४] वनराजी '**तए ण**'मित्यादि, ततः सूर्याभदेवो **बलिपीठे बलिविसर्जनं करोति, कृत्वा** चोत्तरपूर्वां नन्दापुष्करिणीमनुप्रदक्षिणीकुर्वन् पूर्वतोरणेनानुप्रविशति, अनुप्रविश्य च **हस्तौ पादौ प्रक्षालयति, प्रक्षाल्य नन्दापुष्करिण्याः प्रत्यवतीर्य** ॥ ६५६ ॥

सूत्र-६५७ : तते णं से सूरियाभे देवे चउहिं सामाणियसाहस्सीहिं जाव सोलसहिं आयरक्खदेवसाहस्सीहिं अण्णेहि य बहूहिं सूरियाभविमाणवासीहिं वेमाणिएहिं देवेहि य देवीहि य सद्धिं संपरिवुडे सव्विड्ढीए जाव[५] नाइयरवेणं जेणेव सभा सुहम्मा तेणेव उवागच्छइ, उवागच्छित्ता सभं सुहम्मं पुरत्थिमिल्लेणं दारेणं अणुपविसति, अणुपविसित्ता जेणेव सीहासणे तेणेव उवागच्छइ, उवागच्छित्ता सीहासणवरगए पुरत्थाभिमुहे सण्णिसण्णे ॥ ६५७ ॥

[६५७] सामानिकादिपरिवारसहितः **सर्वर्द्ध्या** यावद् दुन्दुभिनिर्घोषनादितरवेण सूर्याभविमाने मध्यंमध्येन समागच्छन् **यत्र सुधर्मा[६] सभा तत्राऽऽगत्य तां पूर्वद्वारेण प्रविशति, प्रविश्य** मणिपीठिकाया उपरि **सिंहासने पूर्वाभिमुखो निषीदति** ॥ ६५७ ॥

सूत्र-६५८ : तए णं तस्स सूरियाभस्स देवस्स अवरुत्तरेणं उत्तरेणं[७] उत्तरपुरत्थिमिल्लेणं चत्तारि सामाणियसाहस्सीओ चउसु भद्दासणसाहस्सीसु निसीयंति ॥ ६५८ ॥

---

१. ०ति तत्र शृ० G ॥ २. G । दम्पत्यावित्यसावारामः - मु ॥ ३. मद्वृ० JK ॥ ४. एक० JK नास्ति ॥ ५. द्र. औप. ६७ ॥ ६. ०र्म - JK ॥ ७. उत्तरेणं-K अस्ति मु. G नास्ति । । ४१ सूत्रे उत्तरेणं पाठोऽस्ति तदनुसारेणात्राऽप्यसौ युज्यते । जीवाजीवाभिगमे (३।५५८) प्यस्मिन्नेव प्रकरणे चासौ विद्यते । इति V पृ. १६० टि. ६ ।

सूत्र-६५९ : तए णं तस्स सूरियाभस्स देवस्स पुरत्थिमेणं चत्तारि अग्गमहिसीओ चउसु[1] भद्दासणेसु निसीयंति ॥ ६५९ ॥

सूत्र-६६० : तए णं तस्स सूरियाभस्स देवस्स दाहिणपुरत्थिमेणं अब्भितरियाए परिसाए अट्ठ देवसाहस्सीओ अट्ठसु भद्दासणसाहस्सीसु निसीयंति ॥ ६६० ॥

सूत्र-६६१ : तए णं तस्स सूरियाभस्स देवस्स दाहिणेणं मज्झिमाए परिसाए दस देवसाहस्सीओ दसहि[2] भद्दासणसाहस्सीहि निसीयंति ॥ ६६१ ॥

सूत्र-६६२ : तते णं तस्स सूरियाभस्स देवस्स दाहिणपच्चत्थिमेणं बाहिरियाए परिसाए बारस देवसाहस्सीतो बारसहिं भद्दासणसाहस्सीहिं निसीयंति ॥ ६६२ ॥

सूत्र-६६३ : तते णं तस्स सूरियाभस्स देवस्स पच्चत्थिमेणं सत्त अणियाहिवइणो सत्तहिं भद्दासणेहिं णिसीयंति ॥ ६६३ ॥

[६५८-६६३] ततः प्रागुपदर्शितसिंहासनक्रमेण सामानिकादय उपविशन्ति ॥

सूत्र-६६४ : तते णं तस्स सूरियाभस्स देवस्स चउद्दिसिं सोलस आयरक्खदेवसाहस्सीओ सोलसहिं भद्दासणसाहस्सीहिं णिसीयंति, तं जहा—पुरत्थिमिल्लेणं चत्तारि साहस्सीओ, दाहिणेणं चत्तारि साहस्सीओ, पच्चत्थिमेणं चत्तारि साहस्सीओ, उत्तरेणं चत्तारि साहस्सीओ ते णं आयरक्खा सण्णद्ध-बद्ध-वम्मियकवया उप्पीलियसरासणपट्टिया पिणद्धगेविज्जा आविद्ध-विमल-वरचिंधपट्टा गहियाउहपहरणा ति-णयाणि ति-संधीणि वयरामय-कोडीणि धणूइं पगिज्झ परियाइय-कंडकलावा णीलपाणिणो पीतपाणिणो रत्तपाणिणो चावपाणिणो चारुपाणिणो चम्मपाणिणो दंडपाणिणो खग्गपाणिणो पासपाणिणो नील-पीय-रत्तचाव-चारु-चम्म-

१. "४२ सूत्रे चत्तारि भद्दासणसाहस्सीओ इति पाठोऽस्ति । अत्र 'चउसु भद्दासणेसु निसीयंति' तत्र संभवतः सपरिवारवर्णने साहस्सीओ इति पाठः कृतः ।" इति V पृ. १६० टि. ७ । २. दससु भद्दासणसाहस्सीसु- G ।

दंड-खग्ग-पासधरा[१] आयरक्खा रक्खोवगा गुत्ता गुत्तपालिया जुत्ता जुत्त-पालिया पत्तेयं-पत्तेयं समयओ विणयओ किंकरभूया[२] इव चिट्ठंति[३] ॥ ६६४ ॥

[६६४] '**ते णं आयरक्खा**' इत्यादि, ते आत्मरक्षाः **सन्नद्धबद्धवर्मितकवचा उत्पीडितशरासनपट्टिकाः पिनद्धग्रैवेयाः**- पिनद्धग्रैवेयकाभरणाः[४], **आविद्धविमलवर-चिह्नपट्टा गृहीताऽऽयुधप्रहरणाः, त्रिनतानि** आदि-मध्या-ऽवसानेषु नमनभावात्, **त्रिसन्धीनि** आदि-मध्या-ऽवसानेषु[५] सन्धिभावाद् **वज्रमयकोटीनि धनूंषि अभिगृह्य 'परियाइय-कंडकलावा'**[६] इति पर्याप्तकाण्डकलापा[७] विचित्रकाण्डकलापयोगात्, केऽपि[८] '**नीलपाणिणो**' इति नीलः काण्डकलाप इति गम्यते पाणौ येषां ते नीलपाणयः, एवं **पीतपाणयो रक्तपाणयः** चापं पाणौ येषां ते **चापपाणयः**, चारुः-प्रहरणविशेषः पाणौ येषां ते **चारुपाणयः**, चर्म अङ्गुष्ठाङ्गुल्योराच्छादनरूपं येषां ते **चर्मपाणयः**, एवं **दण्डपाणयः, खड्गपाणयः, पाशपाणयः**, एतदेव व्याचष्टे-यथायोगं **नील-पीत-रक्त-चाप-चारु-चर्म-दंड-खड्ग-पाशधरा आत्मरक्षाः**, रक्षामुपगच्छन्ति तदेकचित्ततया तत्परायणा वर्त्तन्ते इति **रक्षोपगाः, गुप्ता** न स्वामिभेदकारिणः, तथा गुप्ता-परा[९]ऽप्रवेश्या पालिः-सेतुर्येषां ते **गुप्तपालिकाः**, तथा **युक्ताः**-सेवकगुणोपेततया उचितास्तथा युक्ताः-परस्परसम्बद्धा न तु बृहदन्तरा[१०] पालिर्येषां ते **युक्तपालिकाः, समयतः**-आचारतः आचारेणेत्यर्थः, **विनयतश्च किंकरभूता इव तिष्ठन्ति**, न खलु ते किंकराः, किन्तु तेऽपि मान्याः, तेषामपि पृथगासननिपातनात्[११][१२]', केवलं ते तदानीं निजाचारपरिपालनतो विनीतत्वेन च तथाभूता इव तिष्ठन्ति, तत उक्तं किंकरभूता इवेति, '[१३]तेहिं चउहिं सामाणियसाहस्सीहिं' इत्यादि सुगमं, यावत् 'दिव्वाइं भोगभोगाइं भुंजमाणे विहरति' इति ॥ ६६४ ॥

सूत्र-६६५ : सूरियाभस्स णं भंते ! देवस्स केवइयं कालं ठिती पण्णत्ता ? गोयमा ! चत्तारि पलिओवमाइं ठिती पण्णत्ता ॥ ६६५ ॥

सूत्र-६६६ : सूरियाभस्स णं भंते ! देवस्स सामाणियपरिसोववण्णगाणं देवाणं केवइयं कालं ठिती पण्णत्ता ? गोयमा ! चत्तारि पलिओवमाइं ठिती

---

१. पासवरधरा (क, ख, ग, घ, च) K। २. ०भूयाइं वा - K। ०भुयाइ - च। ०भूयाइं-छ॥ ३. "अतोऽग्रे 'छ' प्रतौ 'एएहिं चउहिं सामाणियसाहस्सीहिं जाव दिव्वाइं; द्रष्टव्यं जीवाजीवाभिगमस्य ३।५६३ सूत्रम्।" इति V पृ. १६१ टि. ४। ४. JG। पिनद्ध० मु. नास्ति ॥ ५. पडियाइय G। परिमाइय - J। परियाहिय - K। ६. पर्याप्तका० K। ०पर्याप्तिका० J॥ ७. केचित् - JK॥ ८. काण्ड० JK नास्ति ॥ ९. परा० JK नास्ति ॥ १०. ०रालपा० JK। ११. पृथुगासन्ननि० JK॥ १२. ०त् तदानीं केवला निजाचार० JK॥ १३. तए हिं - JK॥ अस्य विवरणस्य मूलपाठो न दृश्यते - G पृ. २७१ टि. ॥

पण्णत्ता । एमहिड्ढीए एमहज्जुईए एमहब्बले एमहायसे एमहासोक्खे एमहाणुभागे सूरियाभे देवे । अहो णं भंते ! सूरियाभे देवे महिड्ढीए जाव महाणुभागे ॥ ६६६ ॥

[६६५-६६६] '**सूरियाभस्स णं भंते ! देवस्स केवइयं काल**'मित्यादि सुगमम् ॥६६६॥

सूत्र-६६७ : सूरियाभेणं भंते ! देवेणं सा दिव्वा देविड्ढी सा दिव्वा देवज्जुई से दिव्वे देवाणुभागे–किण्णा लद्धे ? किण्णा पत्ते ? किण्णा अभिसमण्णागए ? पुव्वभवे के आसी ? किंणामए वा ? को वा गोत्तेणं ? कयरंसि वा गामंसि वा नगरंसि वा निगमंसि वा रायहाणीए वा खेडंसि वा कब्बडंसि वा मडंबंसि वा पट्टणंसि वा दोणमुहंसि वा आगरंसि वा आसमंसि वा संबाहंसि वा सण्णिवेसंसि वा ? किं वा दच्चा ? किं वा भोच्चा ? किं वा किच्चा ? किं वा समायरित्ता ? कस्स वा तहारूवस्स समणस्स वा माहणस्स वा अंतिए एगमवि आरियं धम्मियं सुवयणं सोच्चा निसम्म जण्णं सूरियाभेणं देवेणं सा दिव्वा देवड्ढी जाव देवाणुभागे लद्धे पत्ते अभिसमण्णागए ? ॥ ६६७ ॥

[६६७] '**गामंसि वे**'ति ग्रसते बुद्ध्यादीन् गुणान् यदि वा गम्यः शास्त्रप्रसिद्धानामष्टादशानां कराणामिति ग्रामस्तस्मिन्, '**नगरंसि वे**'ति न विद्यते करो यस्मिन् तन्नगरं तस्मिन्, **निगमः**-प्रभूततरवणिग्वर्गावासः, राजाधिष्ठानं नगरं **राजधानी**, पांशुप्राकारनिबद्धं **खेटं**, क्षुल्लकप्राकारवेष्टितं **कर्बटम्**, अर्धगव्यूततृतीयान्तर्ग्रामान्तररहितं **मडम्बम्**, '**पट्टणंसि वे**' ति पट्टनं-जलस्थलनिर्गमप्रवेशः, उक्तं च-

"**पट्टनं शकटैर्गम्यं, घोटकैर्नौभिरेव च । नौभिरेव तु यद् गम्यं, पत्तनं तत्प्रचक्षते ॥ १ ॥**"

द्रोणमुखं-जलनिर्गमप्रवेशं, पत्तनमित्यर्थः, **आकरो**-हिरण्याऽऽकरादिः, **आश्रमः**-तापसावसथोपलक्षित आश्रयविशेषः, **सम्बाधो**-यात्रासमागतप्रभूतजननिवेशः, **सन्निवेशः**-तथाविधप्राकृतलोकनिवासः, '**किं वा दच्चे**'त्यादि, दत्त्वा अशनादि, **भुक्त्वा** अन्तप्रान्तादि, **कृत्वा** तपःशुभध्यानादि, **समाचर्य** प्रत्युपेक्षा-प्रमार्जनादि ॥ ६६७ ॥

१. एं मु. G नास्ति । V जीवाभिगमे ३/६६५ अस्ति । एवमग्रेऽपि ॥

[प्रदेशीकथानकम्]

सूत्र-६६८ : गोयमाति ! समणे भगवं महावीरे भगवं गोयमं आमंतेत्ता एवं वयासी–"एवं खलु गोयमा ! तेणं कालेणं तेणं समएणं इहेव जंबुद्दीवे दीवे भारहे वासे केयइ[1]-अद्धे नामं जणवए होत्था–रिद्धत्थिमियसमिद्धे पासादीए जाव पडिरूवे ॥ ६६८ ॥

सूत्र-६६९ : तत्थ णं केइय-अद्धे जणवए सेयविया[2] णामं नगरी होत्था–रिद्धत्थिमियसमिद्धा जाव[3] पडिरूवा ॥ ६६९ ॥

[६६८-६६९] **'केइयअद्धे जणवए होत्था'** केकयी[4]नाम अर्द्ध-अर्धमात्रमार्यत्वेनेति गम्यते, स हि परिपूर्णो जनपदः, केवलमर्द्धमार्यमर्द्धं चाऽनार्यम्, आर्येण चेह प्रयोजनमिति अर्द्धमित्युक्तं, जनपद आसीत् ॥ ६६९ ॥

सूत्र-६७० : तीसे णं सेयवियाए नगरीए बहिया उत्तरपुरत्थिमे दिसीभागे एत्थ णं मिगवणे णामं उज्जाणे होत्था–रम्मे नंदणवणप्पगासे सव्वोउय [पुप्फ] फलसमिद्धे सुभसुरभिसीयलाए छायाए सव्वओ चेव समणुबद्धे पासादीए जाव पडिरूवे ॥ ६७० ॥

[६७०] **'सव्वोउय-पुप्फफलसमिद्धे रम्मे नंदणवनप्पकासे'** इत्यादि, सर्वर्त्तुकैः- सर्वर्तुभाविभिः पुष्पैः फलैश्च समृद्धिमद्, एवं रम्यं-रमणीयं **नन्दनवनप्रकाशं[5]** नन्दनवन-प्रतिमं **शुभसुरभिशीतलया छायया सर्वतः समनुबद्धं, 'पासाईए'** इत्यादि पदचतुष्टयं पूर्ववत् ॥ ६७० ॥

---

१. "केकय जनपद श्रावस्ति से पूर्व की ओर नेपाल की तराई में स्थित था । उत्तर के केकय देश से यह भिन्न है ।" 'जैन आगम साहित्य में भारतीय समाज' (पृ. ४८६) ले. डो. जगदीशचन्द्र जैन । २. "सेयविया (श्वेतिका) केकयों की राजधानी थी । बौद्ध सूत्रो में (दीघनिकाय २, पायासीसुत्त पृ. २३६) इसे सेतव्या कहा है और इसे कोशलदेश की नगरी बताया है । श्वेतिका से गंगा नदी पार कर के सुरभिपुर पहुँचने का उल्लेख मिलता है ।" जैन आगम साहित्य में भारतीय समाज पृ. ४८६ ॥ ३. द्रष्टव्यम् औपपातिक सूत्रे १ । ४. केकया - J। किकया - भा. १ ५. JKG । नन्दनवनप्रकाशं - मु. नास्ति ॥

सूत्र-६७१ : तत्थ णं सेयवियाए णगरीए पएसी णामं राया होत्था–महयाहिमवंत जाव विहरइ । अधम्मिए अधम्मिट्ठे अधम्मक्खाती अधम्माणुए अधम्मपलोई अधम्मपलज्जणे[1] अधम्मसीलसमुयाचारे अधम्मेण चेव वित्तिं कप्पेमाणे हण-छिंद-भिंद-पवत्तए पावे चंडे रुद्दे खुद्दे लोहियपाणी साहस्सीए उक्कंचण-वंचण-माया-नियडि-कूड-कवड-साइसंपओगबहुले निस्सीले निव्वए निग्गुणे निम्मेरे निप्पच्चक्खाणपोसहोववासे, बहूणं दुप्पय-चउप्पय-मिय-पसु-पक्खि-सरिसिवाणं घायाए वहाए उच्छायणयाए अधम्मकेऊ समुट्ठिए, गुरूणं णो अब्भुट्ठेइ, णो विणयं पउंजई, [‘समण-माहणाणं नो अब्भुट्ठेइ, नो विणयं पउंजइ,] सयस्स वि य णं जणवयस्स णो सम्मं करभरवित्तिं पवत्तेइ ॥ ६७१ ॥

[६७१] **‘महया हिमवंते’** त्यादि राजवर्णनं प्राग्वत्, **‘अधम्मिए’** इति धर्मेण चरति धार्मिको न धार्मिकः अधार्मिकः, तत्र सामान्यतोऽप्यधार्मिकः स्यादत आह-**अधर्मिष्ठाः**-अतिशयेनाऽधर्मवान्, अत एवाऽधर्मेण ख्यातिर्यस्यासौ **अधर्मख्यातिः**, **‘अधम्माणुए’** इति अधर्ममनुगच्छति अधर्मानुगः, तथा अधर्ममेव प्रलोकते-परिभावयतीत्येवंशीलोऽ**धर्मप्रलोकी**, **‘अधम्मप्पजणणे’** इति अधर्मं प्रकर्षेण जनयति-उत्पादयति लोकानामपीत्यधर्मप्रजननः **अधर्मशीलसमुदाचारो**-न धर्मात् किमपि भवति तस्यैवाभावादित्येवमधर्मेणैव वृत्तिः-सर्वजन्तूनां यापनां कल्पयन्, **‘हण-छिंद-भिंद-पवत्तए’** जहि छिन्द्धि भिन्द्धि’ इत्येवं प्रवर्त्तकोऽत एव **लोहितपाणिः**-मारयित्वा हस्तयोरप्यप्रक्षालनाद्, अत एव **पापः** पापकर्म-कारित्वाद् **चण्डः** तीव्रकोपावेशाद् **रौद्रो** निस्तृंशकर्मकारित्वाद्[2], **साहसिकः** परलोकभया-भावाद्, **‘उक्कंचण-वंचण-माया-नियडि-कूड-कवड-साइसंपओगबहुले’** इति ऊर्ध्वं

१. ०पलज्जणे-K °पज्जणे J (क, ख, ग); °पज्जवमाणे (घ); °पजणणे G मु. (च, छ); “वृत्तौ ‘अधम्म-पजणणे’ इति पाठो व्याख्यातोऽस्ति–‘अधर्मं प्रकर्षेण जनयति–उत्पादयति लोकानामपीत्यधर्मप्रजननः’ । वृत्तिकारेण यादृशः पाठो लब्धस्तादृशो व्याख्यातः । किन्तु अन्यागमानां संदर्भेऽसौ पाठो विचार्यते तदा ‘अधम्मपलज्जणे’ इति पाठः संगतिमर्हति । सूत्रकृतांगे (२।२।५७) ‘अधम्मपलज्जणा’ इति पाठोऽस्ति । औपपातिके (सू० १६१) ‘धम्मपलज्जणा’ इति पाठोऽस्ति । अत्रापि ‘अधम्मपलज्जणे’ पाठ आसीत् । पाठसंशोधने प्रयुक्तादर्शत्रयेभ्योऽस्य पुष्टिर्जायते । तत्र ‘पज्जणे’ इति पाठो लभ्यते । अत्र लकारो लिपिदोषेण त्यक्तोऽस्ति । केषुचिदादर्शेषु लिपिदोषेण वर्णविपर्ययो जातस्तेन ‘अधम्मपजणणे’ इति पाठः संवृत्तः ।” इति V पृ. १६४ टि. १ । २. “क्रूरे नृशंस-निस्त्रिंश-पापाः [हैम. अभि. का.३ श्लो. ४०] इति वचनात् ‘निस्त्रिंश’ इति उचितम्-”इति G २७४ टि. ॥

कंचनमुत्कञ्चनं-हीनगुणस्य गुणोत्कर्षप्रतिपादनं, वञ्चनं-प्रतारणं, माया-परवञ्चनबुद्धिः, निकृतिः-बकवृत्त्या गलकर्त्तकानामिवाऽवस्थानं, कूटम्-अनेकेषां मृगादीनां ग्रहणाय नानाविध-प्रयोगकरणं, कपटं-नेपथ्य-भाषाविपर्ययकरणम्, एभिरुत्कञ्चनादिभिः सहाऽतिशयेन यः संप्रयोगो-योगस्तेन बहुलः, अथवा सातिसंप्रयोगो नाम यः सातिशयेन द्रव्येण कस्तूरिकादिना अपरस्य संप्रयोगः, उक्तं च **सूत्रकृताङ्गचूर्णिकृता-** 5

"सो होइ साइजोगो दव्वं जं छुहिय अन्नदव्वेसुं । दोसगुणा वयणेसु य अत्थ-विसंवायणं कुणइ ॥ १ ॥" [२।२।३५ टीका]इति, तत्संप्रयोगे बहुलः, अपरे व्याख्यानयन्ति-"उत्कञ्चनं नाम उत्कोचा, निकृतिः-वंचनप्रच्छादनकर्म, सातिः-विश्रम्भः, एतत्संप्रयोगबहुलः", शेषं तथैव, **निःशीलो-**ब्रह्मचर्यपरिणामाभावाद् **निर्व्रतो**-हिंसादिविरत्यभावाद् **निर्गुणः**-क्षान्त्यादिगुणाभावाद्, **निर्मर्यादः**-परस्त्रीपरिहारादिमर्यादाविलोपित्वाद्, **निष्प्रत्याख्यान-पौषधोपवासः**-प्रत्याख्यानपरिणाम-पर्व- 10 दिवसोपवासपरिणामाभावात्, **बहूनां द्विपद-चतुष्पद-मृग-पशु-पक्षि-सरिसृपाणां घाताय-**विनाशनाय, **वधाय**-ताडनाय, **उच्छादनाय**-निर्मूलाभावीकरणाय, **अधर्म्मरूपः केतुरिव-**ग्रहविशेष इव **समुत्थितः, न च गुरूणां**-पित्रादीनामागच्छताम**भ्युत्तिष्ठति**-अभिमुखमूर्ध्वं तिष्ठति, **न च विनयं प्रयुङ्क्ते, नापि श्रमण-ब्राह्मण**-भिक्षुकाणाम**भ्युत्तिष्ठति, न च विनयं प्रयुङ्क्ते, नापि स्वकस्यापि**-आत्मीयस्यापि **जनपदस्यापि सम्यक्करभरवृत्तिं प्रवर्त्तयति** ॥ ६७१ ॥ 15

सूत्र-६७२ : तस्स णं पएसिस्स रण्णो सूरियकंता नामं देवी होत्था-सुकुमालपाणिपाया धारिणीवण्णओ पएसिणा रण्णा सद्धिं अणुरत्ता अविरत्ता इट्ठे सद्द-रूव जाव विहरइ ॥ ६७२ ॥

[६७२] **'तस्स णं पएसिस्स रन्नो सूरीकंता नाम देवी होत्था, सुकुमालपाणिपाया'** इत्यादि देवीवर्णनं प्राग्वत् । **प्रदेशिना राज्ञा सार्द्धमनुरक्ता अविरक्ता**-कथञ्चिद्विप्रिय- 20 करणेऽपि विरागाभावात् ।

सूत्र-६७३ : तस्स णं पएसिस्स रण्णो जेट्ठे पुत्ते सूरियकंताए देवीए अत्तए सूरियकंते नामं कुमारे होत्था-सुकुमालपाणिपाए जाव पडिरूवे ॥ ६७३ ॥

---

१. भागा० JK ॥ २. वञ्चन० भा.१ पा.४ मु. ॥ ३. GI विनाशाय - मु. ॥ ४. नो सम्य० JK ॥ ५. द्रष्टव्यम् औपपातिकसूत्रे १५ । ६. रन्नो - JK नास्ति ॥

[६७३] कुमारवर्णनं **'सुकुमालपाणिपाए'** इत्यादि जाव **'सुन्दरे'** इति, अत्र यावत्करणात् 'अहीणपंचिंदियसरीरे[1] लक्खणवंजणगुणोववेए माणुम्माणपमाणपडिपुण्णसुजायसव्वंगसुन्दरंगे ससिसोमाकारे कंते पियदरिसणे सुरूवे' इति द्रष्टव्यं, एतच्च देवीवर्णकवत् स्वयं परिभावनीयम् ॥

सूत्र-६७४ : से णं सूरियकंते कुमारे जुवराया वि होत्था । पएसिस्स रण्णो रज्जं च रट्ठं च बलं च वाहणं च कोसं च कोट्ठागारं च पुरं च अंतेउरं च[2] सयमेव पच्चुवेक्खमाणे पच्चुवेक्खमाणे विहरइ ॥ ६७४ ॥

[६७४] **स च सूर्यकान्तो** नाम **कुमारो युवराजा अभूत्, प्रदेशिनो राज्ञो राज्यं**-राष्ट्रादिसमुदायात्मकं **राष्ट्रं च**-जनपदं च, **बलं च**-हस्त्यादिसैन्यं, **वाहनं च**-वेगसरादि[3]कं **कोशं च**-भाण्डागारं, **कोष्ठागारं च**-धान्यगृहं, **पुरं च**-नगरम्, **अन्तःपुरं च**-अवरोधं चात्मनैव-**स्वयमेव समुत्प्रेक्षमाणो**-निरूपयन् **समुत्पेक्षमाणो** वा व्यापारयन् ॥ ६७४ ॥

सूत्र-६७५ : तस्स णं पएसिस्स रण्णो जेट्ठे भाउय-वयंसए चित्ते णामं सारही होत्था, अड्ढे जाव बहुजणस्स अपरिभूए साम-दंड-भेद-उवप्पयाण-अत्थसत्थ-ईहामइविसारए, उप्पत्तियाए वेणतियाए कम्मयाए पारिणामियाए-चउव्विहाए बुद्धीए उववेए, पएसिस्स रण्णो बहुसु कज्जेसु य कारणेसु य कुडुंबेसु य मंतेसु य रहस्सेसु य गुज्झेसु य सावत्थीरहस्सेसु य निच्छएसु य ववहारेसु य आपुच्छणिज्जे [पडिपुच्छणिज्जे] मेढी पमाणं आहारे आलंबणं चक्खू, मेढिभूए पमाणभूए आहारभूए आलंबणभूए चक्खुभूए, सव्वट्ठाण-सव्वभूमियासु लद्धपच्चए विदिण्णविचारे रज्जधुरांचिंतए आवि होत्था ॥ ६७५ ॥

सूत्र-६७६ : तेणं कालेणं तेणं समएणं कुणाला नामं जणवए होत्था-रिद्ध-त्थिमियसमिद्धे० ॥ ६७६ ॥

---

१. द्र० सु० ८०१ ॥ २. च जणवयं च - JB कखगघचछ । ३. ०सारा० JK ॥

सूत्र-६७७ : तत्थ णं कुणालाए जणवए सावत्थी नामं नगरी होत्था-रिद्ध-त्थिमियसमिद्धा [१]जाव पडिरूवा ॥ ६७७ ॥

सूत्र-६७८ : तीसे णं सावत्थीए नगरीए बहिया उत्तरपुरत्थिमे दिसीभाए कोट्ठए नामं चेइए होत्था, पोराणे [२]जाव परिभोयणे सुरम्मे पासादीए ॥ ६७८ ॥

[६७५-६७८] **'चित्ते नाम सारही होत्था अड्ढे दित्त'** इत्यादि, आढ्यः-समृद्धो दीप्तः-कान्तिमान्, वित्तः-प्रतीतो यावत्करणात् 'विउलभवण-सयणा-ऽऽसण-जाण-वाहणाइण्णे बहुदासी-दास-गो-महिस-गवेलगप्पभूते बहुधणबहुजायरूवरयए विच्छड्डियपउरभत्तपाणे' इति परिग्रहः, अस्य व्याख्या [३]राजवर्णकवत् परिभावनीया।

'बहुजणस्स अपरिभूए' राजमान्यत्वात् स्वयं च जात्यक्षत्रियत्वात्, **'साम-भेय-दंड-उवप्पयाण-अत्थसत्थ-ईहामइविसारए'** इति, साम-भेद-दण्डोपप्रदानलक्षणानां नीतीनामर्थशास्त्रस्य-अर्थोपायव्युत्पादनग्रन्थस्य ईहा-विमर्शस्तत्प्रधाना मतिरीहामतिस्तया विशारदो-विचक्षणः सामभेददण्डोपप्रदानार्थशास्त्रेहामतिविशारदः, **औत्पात्तिक्या**-अदृष्ट-ऽश्रुताऽननुभूत-विषयाऽकस्माद्भवनशीलया, **वैनयिक्या**-विनयलभ्यशास्त्रार्थसंस्कारजन्यया, **कर्मजया**-कृषिवाणिज्यादिकर्मभ्यः सप्रभावया, **पारिणामिक्या**-प्रायो वयोविपाकजन्यया, एवंरूपया **चतुर्विधया बुद्ध्या उपपेतः प्रदेशिनो राज्ञो बहुषु कार्येषु**-कर्त्तव्येषु, **कारणेषु**-कर्त्तव्योपायेषु, **कुटुम्बेषु** स्वकीय-परकीयेषु विषयभूतेषु, **मन्त्रेषु**-राज्यादिचिन्तारूपेषु, **गुह्येषु**-बहिर्जना-ऽप्रकाशनीयेषु, **रहस्येषु**-तेष्वेवाऽ[४]षडक्षीणेषु, **निश्चयेषु** निश्चीयन्ते इति निश्चयाः-अवश्यकरणीयाः कर्त्तव्यविशेषास्तेषु, **व्यवहारेषु**-आवाहन-विसर्जनादिरूपेषु, **आप्रच्छनीयः**-सकृत् प्रच्छनीयः, **प्रतिप्रच्छनीयः**-असकृत् प्रच्छनीयः, किमिति?, यतोऽसौ **'मेढी'** इति मेढी-खलकमध्यवर्तिनी[५]स्थूणा यस्यां नियमिता गोपङ्क्तिर्धान्यं ग्राहयति तद्वद् यमालम्ब्य सकलं मन्त्रिमण्डलं मन्त्रणीयान् अर्थान् धान्यमिव विवेचयति स मेढिः, तथा **प्रमाणं**-प्रत्यक्षादि तद्वद् यस्तद्दृष्टानामर्थानामव्यभिचारित्वेन तत्रैव मन्त्रिणां प्रवृत्तिनिवृत्तिभावात् स प्रमाणम्, **आधार** आधेयस्येव सर्वकार्येषु लोकानामुपकारित्वात्, तथा **आलम्बनं** रज्ज्वादि,

---

१. द्र. औप. सू. १ । २. JB । जाव पासादीए-VG मु. ॥ द्र. औप. सू. २-७ । ३. द्र. औप. सू. ५ वृत्तौ ॥ ४. ०षड० - JK नास्ति ॥ ५. JKG । ०नी - मु. नास्ति ॥

तद्वत् आपद्गर्त्तादिनिस्तारकत्वाद् आलम्बनं, तथा **चक्षुः**-लोचनं, तद्वल्लोकस्य यो विविधकार्येषु प्रवृत्तिनिवृत्तिविषयदर्शकः स चक्षुः, एतदेव प्रपञ्चयति-'**मेढिभूए**' इत्यादि, अत्र[1] भूतशब्द औपम्यार्थः, मेढिसदृश इत्यर्थः, '**सव्वट्ठाणसव्वभूमियासु लद्धपच्चए**' इति, सर्वेषु स्थानेषु-कार्येषु सन्धि-विग्रहादिषु सर्वासु भूमिकासु-मन्त्र्यमात्यादिस्थानरूपासु लब्धः-उपलब्धः प्रत्ययः-प्रतीतिः अविसंवादवचनता यस्य स तथा, '**विइण्णविचारे**' इति वितीर्णो-राज्ञाऽनुज्ञातो विचारः अवकाशो यस्य विश्वसनीयत्वात् स वितीर्णविचारः, सर्वकार्यादिष्विति प्रकृतं, किं बहुना ? - **राज्यधुराचिन्तक**श्चापि-राज्यनिर्वाहकश्चाप्यभूद् ॥ ६७५ ॥

सूत्र-६७९ : तत्थ णं सावत्थीए नयरीए पएसिस्स रण्णो अंतेवासी जियसत्तू नामं राया होत्था-महयाहिमवंत जाव[2] विहरइ ॥ ६७९ ॥

सूत्र-६८० : तए णं से पएसी राया अण्णया कयाइ महत्थं महग्घं महरिहं विउलं रायारिहं पाहुडं सज्जावेइ, सज्जावेत्ता चित्तं सारहिं सद्दावेइ, सद्दावेत्ता एवं वयासी-गच्छ णं चित्ता ! तुमं सावत्थिं नगरिं जियसत्तुस्स रण्णो इमं महत्थं महग्धं जाव पाहुडं उवणेहि, जाइं तत्थ रायकज्जाणि य रायकिच्चाणि य रायणीतीओ य राययवहारा य ताइं जियसत्तुणा सद्धिं सयमेव पच्चुवेक्खमाणे विहराहि त्ति कट्टु विसज्जिए ॥ ६८० ॥

सूत्र-६८१ : तए णं से चित्ते सारही पएसिणा रण्णा एवं वुत्ते समाणे हट्ठ[3] तुट्ठ० पडिसुणेत्ता तं महत्थं जाव पाहुडं गेण्हइ, गेण्हित्ता पएसिस्स रण्णो अंतियाओ पडिणिक्खमइ, पडिणिक्खमित्ता सेयवियं नगरिं मज्झं[4]मज्झेणं जेणेव सए गिहे तेणेव उवागच्छति, उवागच्छित्ता तं महत्थं जाव पाहुडं ठवेइ, ठवेत्ता कोडुंबियपुरिसे सद्दावेइ, सद्दावेत्ता एवं वयासी-खिप्पामेव भो ! देवाणुप्पिया ! सच्छत्तं[5] जाव चाउग्घंटं आसरहं जुत्तामेव उवट्ठवेह जाव पच्चप्पिणह ॥ ६८१ ॥

---

१. अत्र शब्दभूत औपम्यार्थः सव्व० JK ॥ २. द्र. सू. ६७१ । ३. द्र. सू० ८ ॥ ४. मज्झं- JKE नास्ति ॥ ५. द्र. सू० १३३ ॥

सूत्र-६८२ : तए णं ते कोडुंबियपुरिसा तहेव पडिसुणित्ता खिप्पामेव सच्छत्तं जाव जुद्धसज्जं चाउग्घंटं आसरहं जुत्तामेव उवट्ठवेंति, उवट्ठवेत्ता तमाणत्तियं पच्चप्पिणंति ॥ ६८२ ॥

[६७९-६८२] '**पएसिस्स रण्णो अंतेवासी**'ति अन्ते-समीपे वसतीत्येवंशीलोऽन्तेवासी-शिष्यः, अंतेवासीव सम्यगाज्ञाविधायी इति भावः ॥ ६८२ ॥ 5

सूत्र-६८३ : तए णं से चित्ते सारही कोडुंबियपुरिसाणं अंतिए एयमट्ठं जाव हियए ण्हाए कयबलिकम्मे कयकोउय-मंगलपायच्छित्ते सण्णद्ध-बद्ध-वम्मियकवए उप्पीलिय-सरासण-पट्टिए पिणद्धगेविज्जविमल-वरचिंधपट्टे[1] गहियाउहपहरणे तं महत्थं जाव पाहुडं गेण्हइ, गेण्हित्ता जेणेव चाउग्घंटे आसरहे तेणेव उवागच्छइ, उवागच्छित्ता चाउग्घंटं आसरहं दुरुहेति, दुरुहेत्ता 10 **बहुहिं पुरिसेहिं सण्णद्ध- जाव गहियाउहपहरणेहिं सद्धिं संपरिवुडे सकोरेंटमल्लदामेणं छत्तेणं धरेज्जमाणेणं-धरेज्जमाणेणं महया भड-चडगर-रहपहकर-विंदपरिक्खित्ते साओ गिहाओ णिग्गच्छइ, सेयवियं नगरिं मज्झंमज्झेणं णिग्गच्छइ, सुहेहिं वासेहिं पायरासेहिं नाइविकिट्ठेहिं अंतरा वासेहिं वसमाणे-वसमाणे केयइ-अद्धस्स जणवयस्स मज्झंमज्झेणं** 15 **जेणेव कुणालाजणवए जेणेव सावत्थी नयरी तेणेव उवागच्छइ, सावत्थीए नयरीए मज्झंमज्झेणं अणुपविसइ, जेणेव जियसत्तुस्स रण्णो गिहे जेणेव बाहिरिया उवट्ठाणसाला तेणेव उवागच्छइ, तुरए निगिण्हइ, रहं ठवेति, रहाओ पच्चोरुहइ, तं महत्थं जाव पाहुडं गिण्हइ, जेणेव अब्भिंतरिया उवट्ठाणसाला जेणेव जियसत्तू राया तेणेव उवागच्छइ, जियसत्तुं रायं** 20 **करयलपरिग्गहियं जाव कट्टु जएणं विजएणं वद्धावेइ, तं महत्थं जाव पाहुडं उवणेइ ॥ ६८३ ॥**

---

१. सनद्धगेविज्जबद्धआबद्धविमल (क, ख, ग, घ, च, छ) ।

सूत्र-६८४ : तए णं से जियसत्तू राया चित्तस्स सारहिस्स तं महत्थं जाव पाहुडं पडिच्छइ, चित्तं सारहिं सक्कारेइ, [सम्माणेइ] पडिविसज्जेइ, रायमग्गमोगाढं च से आवासं दलयइ ॥ ६८४ ॥

सूत्र-६८५ : तए णं से चित्ते सारही विसज्जिते समाणे जियसत्तुस्स रण्णो अंतियाओ पडिणिक्खमइ २, जेणेव बाहिरिया उवट्ठाणसाला जेणेव चाउग्घंटे आसरहे तेणेव उवागच्छइ, चाउग्घंटं आसरहं दुरुहइ, सावत्थिं नगरिं मज्झंमज्झेणं जेणेव रायमग्गमोगाढे आवासे तेणेव उवागच्छइ, तुरए निगिण्हइ, रहं ठवेइ, रहाओ पच्चोरुहइ, ण्हाए कयबलिकम्मे कयकोउय-मंगल-पायच्छित्ते सुद्धप्पावेसाइं मंगल्लाइं वत्थाइं पवरपरिहिते अप्पमहग्घा-भरणालंकिए[1] जिमियभुत्तुत्तरागए वि य णं समाणे पुव्वावरण्हकाल-समयंसि गंधव्वेहि य णाडगेहि य उवनच्चिज्जमाणे उवगाइज्जमाणे उवलालिज्जमाणे इट्ठे सद्द-फरिस-रस-रूव-गंधे पंचविहे माणुस्सए कामभोए पच्चणुभवमाणे विहरइ ॥ ६८५ ॥

[६८३-६८५] **'सन्नद्धबद्धवम्मियकवए'** इति कवचं-तनुत्राणं, वर्म्म-लोहमयंक[2]-सूलकादिरूपं संजातमस्येति वर्मितं, सन्नद्धं शरीरारोपणात् बद्धं गाढतरबन्धनेन बन्धनात् वर्म्मितं कवचं येन स सन्नद्धबद्धवर्म्मितकवचः, **'उप्पीलियसरासणपट्टिए'** इति उत्पीडिता-गाढीकृता शरा अस्यन्ते-क्षिप्यन्ते अस्मिन्निति शरासनम्[3], उत्पीडिता शरासनपट्टिका येन स उत्पीडितशरासनपट्टिकः, **'पिणद्धगेवेज्जविमलवरचिंधपट्टे'** इति पिनद्धं ग्रैवैयं[4]-ग्रीवा-ऽऽभरणं विमलवरचिह्नपट्टश्च येन स पिनद्धग्रैवेयकविमलवरचिह्नपट्टः, **'गहियाउहपहरणे'** इति आयुध्यतेऽनेनेत्यायुधं-खेटकादि, प्रहरणम्-असि-कुन्तादि, गृहीतान्यायुधानि प्रहरणानि च येन स गृहीतायुधप्रहरणः ॥ ६८५ ॥

सूत्र-६८६ : तेणं कालेणं तेणं समएणं पासावच्चिज्जे केसी नाम कुमार-समणे जातिसंपण्णे कुलसंपण्णे बलसंपण्णे रूवसंपण्णे विणयसंपण्णे

---

१. °किय-सरीरे-जि° GB ॥ २. G । °कत्तलका° मु. K । °कत्तलियादि - भा. १ । °कीलिका° J ॥ ३. JK। °सनं इषुधिस्तस्य पट्टिका पिणद्धा येन - मु. । 'पिणद्धा' G नास्ति । सरासणवट्टिया = धनुर्दण्ड इति पाइअसद्द म. ॥ ४. JK। °यकं - मु. G ॥

नाणसंपण्णे दंसणसंपण्णे चरित्तसंपण्णे लज्जासंपण्णे लाघवसंपण्णे[1] ओयंसी तेयंसी वच्चंसी जसंसी जियकोहे जियमाणे जियमाए जियलोहे जियणिद्दे जितिंदिए जियपरीसहे जीवियासमरणभयविप्पमुक्के तवप्पहाणे गुणप्पहाणे करणप्पहाणे चरणप्पहाणे निग्गहप्पहाणे [निच्छयप्पहाणे] अज्जवप्पहाणे मद्दवप्पहाणे लाघवप्पहाणे खंतिप्पहाणे गुत्तिप्पहाणे मुत्तिप्पहाणे विज्जप्पहाणे मंतप्पहाणे बंभप्पहाणे वेयप्पहाणे [नयप्पहाणे] नियमप्पहाणे सच्चप्पहाणे सोयप्पहाणे नाणप्पहाणे दंसणप्पहाणे चरित्तप्पहाणे ओराले [घोरे घोरगुणे घोरतवस्सी घोरबंभचेरवासी उच्छूढसरीरे संखित्तविपुलतेयलेस्से] चउदसपुव्वी चउणाणोवगए पंचहिं अणगारसएहिं सद्धिं संपरिवुडे पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे सुहंसुहेणं विहरमाणे जेणेव सावत्थी नयरी जेणेव कोट्ठए चेइए तेणेव उवागच्छइ, सावत्थीनयरीए बहिया कोट्ठए चेइए अहापडिरूवं ओग्गहं ओगिण्हइ, ओगिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरइ ॥ ६८६ ॥

[६८६] '**केसी नाम कुमारसमणे जाइसंपन्ने**' इत्यादि, जातिसंपन्न-उत्तममातृपक्षयुक्त इति प्रतिपत्तव्यम्, अन्यथा मातृ-पितृपक्षसंपन्नत्वं पुरुषमात्रस्यापीति नास्योत्कर्षः कश्चिदुक्तो भवति, उत्कर्षाभिधानार्थं चास्य विशेषणकलापोपादानं चिकीर्षितमिति, एवं **कुलसंपन्नो**ऽपि नवरं कुलं-पितृपक्षः[2] **बलं**-संहननविशेषसमुत्थः प्राणः, **रूपम्**-अनुपमं शरीरसौन्दर्यं, **विनया**दीनि प्रतीतानि, नवरं **लाघवं**-द्रव्यतोऽल्पोपधित्वं भावतो गौरवत्रयत्यागः, '**लज्जा**' मनोवाक्कायसंयमः, '**ओयंसी**'ति ओजो-मानसोऽवष्टम्भस्तद्वान् ओजस्वी, तेजः-शरीरप्रभा तद्वान् **तेजस्वी**, वचो वचनं सौभाग्याद्युपेतं यस्यास्ति स **वचस्वी**, अथवा वर्चः-तेजः प्रभाव इत्यर्थस्तद्वान् वर्चस्वी, **यशस्वी**-ख्यातिमान्, इह च विशेषणचतुष्टयेऽप्यनुस्वारः प्राकृतत्वात्, **जितक्रोध** इत्यादि तु विशेषणसप्तकं प्रतीतं, नवरं क्रोधादिजय उदयप्राप्तक्रोधादिविफलीकरणतोऽवसेयः, तथा जीवितस्य-प्राणधारणस्य आशा-वाञ्छा, मरणाद्भयं, ताभ्यां विप्रमुक्तो **जीविताशा-मरणभयविप्रमुक्तः**, तदुभयोपेक्षक इत्यर्थः, तथा तपसा प्रधानः-उत्तमः शेषमुनिजनापेक्षया तपो वा प्रधानं यस्य स **तपःप्रधानः**, एवं **गुणप्रधानः** नवरं गुणाः-

१. ०णे लज्जालाघवसंपन्ने ओ० G ॥ २. पैतृकः प० J ॥

संयमगुणाः, एतेन च विशेषणद्वयेन तपः-संयमौ पूर्वबद्धा-ऽभिनवयोः कर्मणोर्निर्जराऽनुपादानहेतू मोक्षसाधने मुमुक्षुणामुपादेयौ प्रदर्शितौ, गुणप्राधान्यप्रपञ्चनार्थमेवाह-'**करणप्पहाणे**' इति यावत् '**चरित्तप्पहाणे**' इति, करणं-पिण्डविशुद्ध्यादि, उक्तञ्च-

"पिंडविसोही समिई भावण पडिमा य इंदियनिरोहो । पडिलेहण गुत्तीओ अभिग्गहा चेव करणं तु ॥ १ ॥"

चरणं-महाव्रतादि, उक्तञ्च-

'वय समणधम्म संजम वेयावच्चं च बंभगुत्तीओ । णाणाइतियं तव कोहनिग्गहाई चरणमेयं' ॥ १ ॥

निग्रहः-अनाचारप्रवृत्तेर्निषेधनं, **निश्चयः**-तत्त्वानां निर्णयः, विहितानुष्ठानेष्ववश्यमभ्युपगमो वा, **आर्जवं**-मायानिग्रहः, **लाघवं**-क्रियासु दक्षत्वं, **क्षान्तिः**-क्रोधनिग्रहः, **गुप्तिः**-मनोगुप्त्यादिका, **मुक्तिः**-निर्लोभता, **विद्या**-प्रज्ञप्त्यादिदेवताऽधिष्ठिता वर्णानुपूर्व्यः, **मन्त्राः**-हरिणेगमेष्यादिदेवताधिष्ठिताः, अथवा ससाधना विद्या साधनरहिता मन्त्राः, **ब्रह्म**[१]-ब्रह्मचर्यं सर्वमेव वा कुशलानुष्ठानं, **वेदः**-आगमो लौकिक-लोकोत्तरिक-कुप्रावचनिकभेदभिन्नः, **नयाः**-नैगमादयः सप्त, प्रत्येकं शतविधाः, **नियमाः**-विचित्रा अभिग्रहविशेषाः, **सत्यं**-भूतहितं वचः, **शौचं**-द्रव्यतो निर्लेपता भावतोऽनवद्यसमाचारता, **ज्ञानं**-मत्यादि, **दर्शनं**-सम्यक्त्वं, **चारित्रं**-बाह्यं सदनुष्ठानं, यच्चेह चरण-करणग्रहणेऽपि आर्जवादिग्रहणं तत् आर्जवादीनां प्राधान्य-ख्यापनार्थं, ननु जितक्रोधत्वादीनामार्जवादीनां च कः प्रतिविशेषः ?, उच्यते, जितक्रोधादि-विशेषणेषु तदुदयविफलीकरणं मार्दवप्रधानादिषु उदयनिरोधः, अथवा यत एव जितक्रोधादिः अत एव क्षमादिप्रधान इत्येवं हेतु-हेतुमद्भावाद् विशेषः, तथा ज्ञानसम्पन्न इत्यादौ ज्ञानादिमत्त्वमात्रमुक्तं ज्ञानप्रधान इत्यादौ तद्वतां मध्ये तस्य प्राधान्यमित्येवमन्यत्राप्यपौनरुक्त्यं भावनीयं, तथा '**ओराले**' इति उदारः-स्फाराकारः, '**घोरे घोरगुणे घोरतवस्सी घोरबंभचेरवासी उच्छूढसरीरे संखित्तविउलतेउलेसे चउद्दसपुव्वी चउनाणोवगए**' इति पूर्ववत् '**पंचहिं अणगारसएहिं**' इत्यादिकं वाच्यम् ॥ ६८६ ॥

सूत्र-६८७ : तए णं सावत्थीए नयरीए सिंघाडग-तिय-चउक्क-चच्चर-चउम्मुह-महापहपहेसु महया जणसद्दे इ वा[२] जणवूहे इ वा जणबोले इ वा जणकलकले इ वा जणउम्मी इ वा जण उक्कलिया इ वा जणसण्णिवाए इ वा जाव परिसा पज्जुवासइ ॥ ६८७ ॥

---

१. पा.४-५ भा.१ J । ब्रह्मचर्यं - बस्तिनिरोधः सर्वं मु. G ॥ २. वा जणउक्कलिया इ वा जण० G ।

[६८७] '**महया जणसद्दे इ वा**' इति महान् जनशब्दः परस्परालापादिरूपः, इकारो वाक्यालङ्कारार्थः, वाशब्दः पदान्तरापेक्षया समुच्चयार्थः, **जनव्यूहो**-जनसमुदायः, '**जनबोले इ वा**' इति बोलः-अव्यक्तवर्णो ध्वनिः, '**जनकलकले इ वा**' कलकलः स एवोपलभ्यमानवचनविभागः, '**जणउम्मी इ वा**' ऊर्म्मिः-सम्बाधः, '**जणउक्कलिया इ वा**' लघुतरसमुदायः, '**जणसन्निवाए इ वा**' सन्निपातः-अपराऽपरस्थानेभ्यो जनानामेकत्र मीलनं, '**जाव परिसा पज्जुवासइ**' इति, यावत्करणात् 'बहुजणो अन्नमन्नस्स एवमाइक्खइ, एवं भासइ, एवं पन्नवेइ, एवं खलु देवाणुप्पिया ! पासावच्चिज्जे केसीनामं कुमारसमणे जाइसंपण्णे जाव गामाणुगामं दूइज्जमाणे इहमागए इह संपत्ते इह समोसढे इहेव सावत्थीए नयरीए बहिया कोट्ठए चेइए अहापडिरूवं ओग्गहं ओग्गिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरइ, तं महप्फलं खलु देवा० तहारूवाणं समणाणं नामगोयस्सवि सवणयाए' इत्यादि प्रागुक्तसमस्तपरिग्रहः ॥ ६८७ ॥

सूत्र-६८८ : तए णं तस्स सारहिस्स तं महाजणसद्दं च जणकलकलं च सुणेत्ता य पासेत्ता य इमेयारूवे अज्झत्थिए जाव समुप्पज्जित्था-किं णं अज्ज सावत्थीए णयरीए इंदमहे इ वा खंदमहे इ वा रुद्दमहे इ वा मउंदमहे इ वा सिवमहे इ वा वेसमणमहे इ वा नागमहे इ वा जक्खमहे इ वा भूयमहे इ वा थूभमहे इ वा चेइयमहे इ वा रुक्खमहे इ वा गिरिमहे इ वा दरिमहे इ वा अगडमहे इ वा नईमहे इ वा सरमहे इ वा सागरमहे इ वा ?, जं णं इमे बहवे उग्गा [उग्गपुत्ता] भोगा राइण्णा इक्खागा णाया कोरव्वा जाव इब्भा इब्भपुत्ता, अण्णे य बहवे राईसर-तलवर-माडंबिय-कोडुंबिय-इब्भ-सेट्ठि-सेणावइ-सत्थवाहप्पभितयो ण्हाया कयबलिकम्मा कयकोउय-मंगल-पायच्छित्ता सिरसाकंठेमालकडा आविद्धमणिसुवण्णा कप्पियहार-अद्धहार-तिसर-पालंब-पलंबमाण-कडिसुत्तय-कयसोहाहरणा चंदणोलित्तगाय-सरीरा पुरिसवग्गुरापरिखित्ता महया उक्किट्ठ-सीहणाय-बोल-कलकलरवेणं[1]

१. "सं० पा०-कलकलरवेणं... एगदिसाए जहा उववाइए जाव अप्पेगतिया । रायपसेणइयवृत्तौ समग्रः पाठो व्याख्यातोऽस्ति । तत्र औपपातिकस्य समर्पणसूचना नास्ति । आदर्शेषु सा किमर्थं कृतेति न ज्ञायते । औपपातिकस्य वृत्त्यनुसारिपाठे 'अंबरतलंपिव' इत्यादि नास्ति, वाचनान्तरे तत् समुपलभ्यते । द्रष्टव्यं-औपपातिकस्य ५२ सूत्रस्य वाचनान्तरम् ।" इति V पृ. १६८ टि. ९ ।

[समुद्दरवभूयं पिव करेमाणा अंबरतलं पिव फोडेमाणा] एगदिसाए एगाभिमुहा अप्पेगतिया हयगया अप्पेगतिया गयगया[1] जाव पायविहारचारेणं महया-महया वंदावंदएहिं निग्गच्छंति । एवं संपेहेइ, संपेहेत्ता कंचुइ-पुरिसं सद्दावेइ, सद्दावेत्ता एवं वयासी–किं णं देवाणुप्पिया ! अज्ज सावत्थीए नगरीए इंदमहे इ वा जाव सागरमहे इ वा ? [जे[2] णं] इमे बहवे उग्गा उग्गपुत्ता भोगा [जाव] णिग्गच्छंति ॥ ६८८ ॥

[६८८] '**इंदमहेइ वा**' इत्यादि, इन्द्रमह[3]:-इन्द्रोत्सवः, इन्द्रः-शक्रः, **स्कन्दः** कार्त्तिकेयः, **रुद्रः** प्रतीतः, **मुकुन्दो**-बलदेवः, **शिवो**-देवताविशेषः, **वैश्रमणो**-यक्षराड्, **नागो**-भवनपतिविशेषः, **यक्षो भूतश्च** व्यन्तरविशेषौ, **स्तूपः**-चैत्यस्तूपः, **चैत्यं**-प्रतिमा, **वृक्ष-दरि-गिरी-अवट-नदी-सरः-सागराः** प्रतीताः, '**बहवे उग्गा उग्गपुत्ता भोगा जाव लेच्छइपुत्ता**' इति, उग्राः आदिदेवाऽवस्थापिता इक्ष्वंशजाताः, उग्रपुत्राः त एव कुमाराद्यवस्थाः, एवं भोगाः-आदिदेवेनैवाऽवस्थापितगुरुवंशजाताः, राजन्याः-भगवद्वयस्यवंशजाः यावत्करणात् 'खत्तिया माहणा भडा जोहा मल्लई मल्लइपुत्ता लेच्छई लेच्छइपुत्ता' इति परिग्रहः, तत्र क्षत्रियाः-सामान्यराजकुलीनाः, भटाः-शौर्यवन्तः, योधाः-तेभ्यो विशिष्टतराः, मल्लकिनो लेच्छकिनश्च राजविशेषाः, यथा *चेटकराजस्य* श्रूयन्ते अष्टादश गणराजा नव मल्लकिनो नव लेच्छकिनः, '**अन्ने य बहवे राईसरे**'त्यादि, राजानो-माण्डलिकाः, ईश्वरा-युवराजानः, **तलवराः**-परितुष्ट-नरपतिप्रदत्तपट्टबन्धविभूषिता राजस्थानीयाः, **माडम्बिकाः**-चित्रमण्डपाधिपाः, **कुटुम्बिकाः**-कतिपयकुटुम्बस्वामिनोऽवलगकाः, **इभ्या**-महाधनिनः, **श्रेष्ठिनः**-श्रीदेवताध्यासितसौवर्णपट्ट-विभूषितोत्तमाङ्गाः, **सेनापतयो**-नृपतिनिरूपिताश्चतुरङ्गसैन्यनायकाः, **सार्थवाहाः**-सार्थनायकाः, **प्रभृति**ग्रहणात् मन्त्रि-महामन्त्रि-गणक-दौवारिक-पीठमर्दादिपरिग्रहः, तत्र मन्त्रिणः प्रतीताः, महामन्त्रिणो-मन्त्रिमण्डलप्रधानाः "हस्तिसाधनोपरिका" इतिवृद्धाः गणका-गणितज्ञा "भाण्डागारिका" इति वृद्धाः, "ज्योतिषिका" इत्यपरे, दौवारिकाः-प्रतीहारा राजद्वारिका वा, पीठमर्दाः[4]-आस्थाने आसन्नप्रत्यासन्नसेवका वयस्या इति भावः '**जाव अंबरतलमिव फोडेमाणा**' इति यावत्करणात् ॥

---

१. द्र. औप. सूत्रे, ५२ ॥ २. जाव (क, ख, ग, घ, च, छ); अत्र भोगा इत्यस्यानन्तरं जाव शब्दो युज्यते, किन्तु लिपिदोषात् जं णं इत्यस्य स्थाने लिखितः प्रतीयते । द्र. सू. ८ ३. इन्द्रमहोत्सवः - JE ॥ ४. ०र्दाः पीठं मर्दयति इति पीठमर्दाः- आस्थाने - JE ॥

